(महाभारते)

भगवद्गीता~~टीका~~

अष्टादशटीकासहिता

चतुर्थाध्यायः

२७१४



श्रीभगवानुवाच इमंविवस्वतेयोगंप्रोक्तवानहमव्य
यं विवस्वान्मनवेप्राहमनुरिक्ष्वाकवेब्रवीत् १ ॥

शांकरभाष्यं

श्रीभगवानुवाच योऽयंयोगोऽध्यायद्वयेनोक्तोज्ञाननिष्ठालक्षणः स
संन्यासः सकर्मयोगोपायः यस्मिन्वेदार्थः परिसमाप्तः प्रवृत्तिलक्षणो
निवृत्तिलक्षणश्च गीतासुचसर्वास्वयमेव योगोविवक्षितोभगवता अतः
परिसमाप्तं वेदार्थंमन्वानस्तंवंशकथनेनस्तौति भगवान् इममध्यायद्व-
येनोक्तं योगंविवस्वते आदित्यायसर्गादौप्रोक्तवानहं जगत्परिपालयितृ-
णां क्षत्रियाणां बलाधानायतेनयोगबलेन युक्ताःसमर्थाभवंति ब्रह्म-
परिरक्षितुं ब्रह्मक्षत्रेपरिपालिते जगत्परिपालयितुमलं अव्ययमव्ययफ-
लत्वान्नह्यस्यसम्यक् दर्शननिष्ठालक्षणस्य मोक्षाख्यंफलंव्येतिसच विव
स्वान्मनवेप्राहमनुरिक्ष्वाकवे स्वपुत्रायादिराजायाब्रवीत् १ ॥

आनंदगिरिकृतटीका

पूर्वाभ्यामध्यायाभ्यां निष्ठाद्वयात्मनोयोगस्य गीतत्वात् वेदार्थस्य चस-
माप्तत्वात् वक्तव्याशेषाभावात् उक्तयोगस्यकृतिमत्त्वशंकानिवृत्तये
वंशकथनपूर्विकांस्तुतिं भगवानुक्तवानित्याह श्रीभगवानिति तदे
तद्भगवद्वचनं वृत्तानुवादद्वारेण प्रस्तौति योयमिति उक्तमेवयोगं वि-
भज्यानुवदति ज्ञानेति संन्यासेनेतिकर्तव्यतया सहितस्यज्ञानात्मनोयो
गस्य कर्माख्योयोगोहेतुरतश्चोपायोपेयभूतं निष्ठाद्वयं प्रतिष्ठापितमि-
त्यर्थः उक्तेयोगद्वये प्रमाणमुपन्यस्यति यस्मिन्निति अथवा ज्ञानयोग
स्य कर्मयोगोपायत्वमेव स्फुटयति यस्मिन्निति प्रवृत्त्यालक्ष्यते ज्ञाय
ते कर्मयोगोनिवृत्त्या चलक्ष्यते ज्ञानयोगइति विभागः यद्यपि पू-
र्वस्मिन्नध्यायद्वये यथोक्तंनिष्ठाद्वयं व्याख्यातंतथापि वक्ष्यमाणाध्या
येषु वक्तव्यांतरमस्तीत्याशंक्याह गीतासुचेति कथंतर्हिसमनंतराध्या
यस्य प्रवृत्तिरतआह अतइति वंशकथनं संप्रदायोपन्यासः संप्रदा

श्री॰
टी॰
४

योपदेशस्य अकृत्रिमत्वशंकानिवृत्त्या योगस्तुतौ पर्यवस्यति गुरुशि
ष्यपरम्परोपन्यासमेवानुक्रामति इममिति इममित्यस्य सन्निहितं विष
यं दर्शयति अध्यायेनेति योगं ज्ञाननिष्ठालक्षणं कर्मयोगोपायलभ्यमि
त्यर्थः स्वयमकृतार्थानां प्रयोजनव्यग्राणां परार्थप्रवृत्त्यसंभवाद्भगवत
स्तथाविधप्रवृत्तिदर्शनात् कृतार्थताकल्पनीयेत्याह विवस्वतइति अ
व्ययवेदमूलत्वादव्ययत्वं योगस्यगमयितव्यं किमिति भगवता कृता
र्थेनापि योगप्रवचनंकृतमितितदाह जगदिति कथं यथोक्तेनयोगे
न क्षत्रियाणांबलाधाने तदाह तेनेति युक्ताःक्षत्रियाइतिशेषः ब्रह्मश
ब्देन ब्राह्मणत्वजातिरुच्यते यद्यपियोगप्रवचनेन क्षत्रंरक्षितं तेनच
ब्राह्मणत्वं तथापिकथं रक्षणीयंजगदशेषं रक्षितमित्याशंक्याह ब्रा
ह्मेति ताभ्यांहिकर्मफलभूतं जगद्रक्षणंतद्वारारक्षितंशक्यमित्यर्थः यो
गस्याव्ययत्वेहेत्वन्तरमाह अव्ययफलत्वादिति ननुकर्मफलवदक्षयो
गफलस्यापिसाध्यत्वेन क्षयिष्णुत्व मनुमीयतेनेत्याह नहीति स्वपुन
राहतिश्रुतिप्रतिहतमनुमानं नप्रमाणीभवतीतिभावः भगवता वि
वस्वतेप्रोक्तोयोगस्तत्रैव पर्यवसन्नोनेत्याशंक्याह सचेति स्वपुत्रायेत्युभ
यत्र सम्बध्यते आदिराजायेतीक्ष्वाकोःसूर्यवंशप्रवर्त्तकत्वेन वैशिष्ट्यमु
च्यते १

स्वामिकृतटीका

ॐस्वधर्मेणयमाराध्यभक्तामुक्तिमितोबुधाः तंकृष्णंपरमानंदंतोष
येत्सर्वकर्मभिः १ एवंतावदध्यायद्वयेनकर्मयोगोपायोज्ञानयोगोमो
क्षसाधनत्वेनोक्तः तमेवब्रह्मार्पणादिगुणविधानेनत्वंपदार्थविवे
कादिनाप्रपंचयिष्यन् प्रथमंतावत्परंपराप्राप्तत्वेनस्तुवन् भगवानु
वाच इममितित्रिभिः अव्ययफलत्वादव्ययमिमंयोगंपुराहंविवस्वते
सूर्यायकथितवान् सचस्वपुत्रायमनवेप्राहदेवायप्राहसचमनुःस्व
पुत्रायेक्ष्वाकवेब्रवीत् [illegible]
[illegible] राजर्षयोविदुः [illegible]
[illegible]
दितलोकेनष्टोविच्छिन्नः १ ॥ [illegible] कालवशा
॥

पिशाचभाष्यं

पूर्वोक्तं योगमनेकशिष्टपरिग्रहणं च स्तौति प्ररोचनार्थं श्री॰ इममि
ति इमं पूर्वोक्तं विवस्वते प्रोक्तवानहमव्ययं अविनाशं न स च विव॰
स्वान्मनवे स्वपुत्राय प्राह स च मनुरिक्ष्वाकवेऽब्रवीत् १ ॥

रामानुजभाष्यं

तृतीयेऽध्याये प्रकृतिसंसृष्टस्य मुमुक्षोः सहसा ज्ञानयोगानधिकारात्क
र्मयोग एव कार्यः ज्ञानयोगाधिकारिणोप्यकर्तृत्वानुसंधानपूर्वकं
कर्मयोग एव श्रेयानिति सहेतुकमुक्तं शिष्टतया व्यपदेश्यस्य तु॰
विशेषतः कर्मयोग एव कार्य इति चोक्तं चतुर्थे त्विदानीमस्यैव कर्मयो
गस्य निखिलजगदुद्धरणाय मन्वन्तरादावेवोपदिष्टतया कर्तव्यतां द्र
ढयितुं संगतयास्यैव ज्ञानयोगाकारतां प्रदर्श्य कर्मयोगस्वरूपं तद्भे॰
दाः कर्मयोगे ज्ञानांशस्यैव प्राधान्यं चोच्यते प्रसंगाच्च भगवदवतारया॰
थात्म्यमुच्यते योयं तवोदितो योगः स केवलयुद्धप्रोत्साहनायेदानीमु॰
दित इति न मंतव्यः मन्वंतरादावेव निखिलजगदुद्धरणाय परमपुरुषार्थ
लक्षणमोक्षसाधनतयेमं योगमहमेव विवस्वते प्रोक्तवान् विवस्वां॰
श्च मनवे मनुरिक्ष्वाकवे इति एवं संप्रदायपरंपरया प्राप्तमिमं योगं पूर्वे रा
जर्षयो विदुः स महता कालेन प्राप्तवृद्धिमांद्याद्विनष्टप्रायोऽभूत् १

अभिनवगुप्तकृतटीकाश्लोकमेव

एवं गुरुपरम्परायाम्नमपि आदित्येवेंत्रिष्टमित्य
नेन भगवानस्य तानस्य कुलभक्ता
गौरवं च प्रदर्शयति इममिति १

परमार्थप्रपा टीका

एवं द्वितीयतृतीयाध्यायाभ्यां ज्ञानकर्मयोगौ निरूप्येदानीं तत्साधि॰
तैनैव तत्कृतकर्म मोक्षसाधकं भवतीति निरूपणार्थं चतुर्थाध्यायस्य
प्रवृत्तिस्तत्र वक्ष्यमाणप्रमेयं मदुपदेशात्परंपरया बहुभिरनुष्ठितमि
त्याह इममिति त्रिभिः इदमेव वक्ष्यमाणं योगं अव्ययमनुपक्षीणं पूर्वं

दौ॰

गी॰ टी॰ ४

विवस्वते प्रोक्तवान् ततस्तमेव योगं विवस्वान्सर्गादौ मनवे प्राह मनु-
रिक्ष्वाकवे ऽब्रवीत् ॥ एवमिक्ष्वाकोः सूर्यवंशप्रथमभूताद्राज्ञः सका-
शात्तस्य परंपराप्राप्तं राजर्षयो राजानो ऋषयश्च विदुर्ज्ञातवन्तः स्मृतिर-
पि नैवैतन्मत्स्यपन्नादिर्वामदेवः प्रतिपेदे ऽहं मनुरभवं सूर्यश्चेति ॥ १

2

यो॰

वनमालीटीका

इममिति त्रिभिः ममाध्यायद्वयेनोक्तं योगं निष्ठाज्ञानलक्षणं तदु-
पायभूतं कर्मयोगमेव सर्गादिकाले ऽहं वासुदेवः सर्वप्रापको विवस्व-
ते सूर्याय प्रोक्तवान् विवस्वान्पुत्राय मनवे प्राह देवाय स च मनुः स्व-
पुत्रायेक्ष्वाकवे ऽब्रवीत् ज्ञानरूपेण योगफलस्य मोक्षस्याव्ययत्वात्त-
स्याव्ययत्वं यद्यपि प्रतिमन्वन्तरस्थायं भुवमन्वादिसाधारणोयं भग-
वदुपदेशस्तथापि सांप्रतिकवैवस्वतमन्वन्तराभिप्रायेणादिममारा-
भ्य संप्रदायो गणितः १

वै॰

याथात्म्यं स्वावताराणां संप्रदायं च कर्मणाम् कर्मभेदाद्विधः श्रेष्ठं तुर्येऽध्यायेऽब्रवीत्प्रभुः कर्मतत्त्वादावपि सर्वाणीत्यत्रोक्तः कर्मयोगविद्यासाधरूपेच पूर्वे इति शिष्टैरनुष्ठितोयं धर्म इत्याह ॥

अथ वैजयंतीटीका

र्थस्वस्यावतारं वै सहेतुकमवर्णयत् भगवान्कर्मयोगं च ज्ञानग-
र्भं यदद्भुतम् १ एवं तावद्द्वितीयेऽध्याये विनाशि तु तद्विद्धीत्यारभ्यैषा
तेऽभिहिता सांख्ये बुद्धिरित्यन्तेनोक्तात् ज्ञानयोगात् कर्मण्येवाधिकारस्ते
मा फलेषु कदाचनेत्यादिनोक्तस्य कर्मयोगस्य श्रेष्ठत्वमुक्तं तृतीये च
शिष्टाचारसंमतत्वेन ज्ञानयोगात्कर्मयोगप्रवृत्त्यर्थं ततः कर्मयोगं-
ऊर्विस्तमिदानीं चतुर्थेऽध्यायेपि तस्यैव कर्मयोगस्य ज्ञानगर्भत-
या ज्ञानरूपता ज्ञानांशस्य च प्राप्तता प्रदर्शयन् निखिलजीवोद्धरणाय
मन्वन्तरस्यादावेवोपदिष्टत्वेन कर्मयोगस्य कर्तव्यत्वं दृढीकृत्य प्रस-
गात्स्वाभि सप्रयोजनं स्वावतारं वदन् पार्थसारथिराह इममिति प्र
व्ययं स्वफलान्न व्येतीत्यव्ययं परमपुरुषार्थलक्षणमोक्षफलमिम-
मध्यायद्वयेनोक्तं योगं कर्मयोगं ज्ञानगर्भकं विवस्वते सर्वशास्त्रप्र-
वर्तनकर्त्रे सूर्याय निखिलजीवनिकायोद्धरणायाहमहमर्थरूपः

सर्वेश्वरोजगदभिन्ननिमित्तोपादानकारणंपुरुषोत्तमोवसुदेवनं
दनःप्रोक्तवान्प्रकर्षेणकर्मज्ञानस्वरूपामिश्रितत्वेनोक्तवान्क· ने
थितवान्समच्छिष्योमदुपदिष्टोविवस्वान्सूर्योमनवेस्वपुत्रायप्रा
द्धदेवायप्राहप्रकर्षेणोक्तवान्सचमनुःसूर्यपुत्रःस्वपुत्रायादिराजा
येक्ष्वाकवेइममेवयोगमब्रवीदकथयत् १

यद्यपिपूर्वमुपेयत्वेनज्ञानयोगस्तदुपायत्वेनकर्मयोगइतिद्वौयोगौकथि
तौतथाप्येकंतंत्वंचयोगंवयः
पप्रपतिस्तपप्यतीत्यनयादिशा
साध्यसाधनयोःफलैक्यादैक्यमु
पचर्य्यसाधनभूतंकर्मयोगंसाध्य
भूतंचज्ञानयोगमनेकविधगुण
विधानायस्तौतिवंशकथनेनभ
गवान् ५+१

मधुसूदनीटीका

५+८ इममध्यायद्वयेनोक्तंयोगंज्ञाननिष्ठालक्षणंकर्मनिष्ठोपायलभ्यं
विवस्वतेसर्वक्षत्रियवंशवीजभूतायादित्यायप्रोक्तवान् प्रकर्षेण
सर्वसंदेहोच्छेदादिरूपेणोक्तवान् अहंभगवान्वासुदेवःसर्वजग·
का५ त्परिपालकःसर्गादौराज्ञांवलादानेनतदधीनंसर्वंजगत्पाल
यितुंकथमनेनवलाधानमितिविशेषणेनदर्शयति अव्ययम·
व्ययवेदमूलत्वात्दव्ययंमोक्षफलत्वाच्च नव्येतिस्वफलादित्यव्य
यंअव्यभिचारिफलं तथाचैतादृशेनवलाधानेशक्ताइतिभावः य५
न५ सचममशिष्योविवस्वान्मनवेवैवस्वतायस्वपुत्रायप्राह सचमनुरि·
क्ष्वाकवेस्वपुत्रायादिराजायाब्रवीत् यद्यपिप्रतिमन्वंतरंस्वायंभुव
मन्वादिसाधारणोयंभगवदुपदेशः तथापिसांप्रतिकवैवस्वतम
न्वंतराभिप्रायेणादित्यमारभ्यसंप्रदायोगणितः १

सदानंदीटीका

समाराध्यानंतरविमतमस्वाब्रह्मपदवीविदित्वात्रैलोक्यसज्जनम·
णानामासुरमितं श्रुतीनांसिद्धांतंप्रथितमहिमादेशिकवपुः·
स्वभक्तायाहेशस्तमहममलंनौमिशतशः १ साध्यसाधनरूपौद्वौ
योगौपूर्वमुदाहृतौ साध्यसाधनयोरैक्यंफलैक्यादौपचारिकं २
साधनंकर्मयोगाख्यंसाध्यंज्ञानमनेकधा गुणैःस्तौतिहरिर्वंश·
कीर्तनेनाप्यनास्फुटं ३ एतावान्सर्ववेदार्थोगीतार्थश्चविवक्षितः
श्रीहरेरित्यतश्चाहंवेदार्थंसकलंहृदिः ४ समाप्तंकिलमन्वानःस्तोत्रे
वेत्यवतारिका इममध्यायद्वयेनप्रोक्तंयोगंविवस्वते ५ सर्वक्ष
त्रियवंशवीजभूतायभास्वते सर्गादौप्रोक्तवान्सर्वजगतांपाल

कोऽहं ६ जगत्पालयितुं राज्ञां बलाधानाय तेन ते युक्तो योगबा
लेन स्फुटः समर्थो विश्वपालने ७ अत्यय स्फूर्तिमूलत्वादविनाशिफ
लत्वतः अव्ययस्व फलान्नैव व्येतिराज्ञां बलेश्वतः ८ आधाने राज
योगोयं समर्थो विश्वपालने ममाशिष्यः सवैसूर्यः श्रादिदेवाय स्व
नवे ९ मनवे प्राहं तं योगं ब्रह्मा मोक्षकारणं परं मनुर्वैवस्वतः प्राह स्व
पुत्रायेक्ष्वाकवे नृपः १० इक्ष्वाकवे स्वसंस्थ्यहि योगः सं स्तूयतेऽधुना प्रतिमन्व
न्तरं योगोपदेशाय यशीशितः ११ साधारणस्तथाप्येक मारभ्याहरि
णाधुना वैवस्वतमनौ वर्तमाने वंशपरंपरा १२ संप्रदायविशुद्ध्यर्थं
श्रोक्तो लोकहिताय च पत्तात्पुण्याय शिष्याय पुत्रायानुगताय च १३
देयायं राजयोगश्चेन्यांशाय श्रीरमापतेः १४ १

नीलकंठीटीका

इममित्यादिना इमं सांख्ययोगं कर्मयोगरूपोपायसहितं संन्यास
मितिभाष्यं इमं संन्यासनादिनिर्विकल्पकसमाध्यन्तं ज्ञानं तं तक
र्मयोगं ज्ञाननिष्ठोपसर्जनं पारिव्रज्यानधिकारिणां राज्ञामेव योगं
विवस्वते सूर्याय मंडलाभिमानिने सर्वेषां क्षत्रियाणामादिभूताय
हं आदित्यान्तर्यामी य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्य
श्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पु
ण्डरीकमेवमक्षिणी तस्योदिति नामेत्यादिश्रुतिप्रसिद्धः प्रोक्तवान् पु
रा अव्ययं अविच्छिन्नसंप्रदायं तेनानादित्वमपि मनवे स्वपुत्राय वि
वस्वानाह इक्ष्वाकवे मनुः स्वपुत्रायाब्रवीत् १

आनंदी टीका

अनंतदेवं पूर्वस्मिन्नध्याये ह्ययेकालपुरुषप्रकृतीनां प्रकृतिविकृतीनाम
हंकारादीनां च सामान्यतः स्वरूपोद्देशपूर्वं ज्ञानकर्मसमुच्चयेनैव श्रेयः
शान्तिर्नतु विहितकर्मत्यागेन ज्ञानमात्रादिति प्रतिपादितं अथ चात्र
चतुर्थेऽध्याये परमेश्वरस्वरूपोद्देशपूर्वं ज्ञानकर्मसमुच्चयमेव प्रतिपा

दर्शयितुं श्रीभगवानुवाच इमं प्रोक्तपूर्वं योगं ज्ञानकर्मसमुच्चयात्मिकां
युक्तिं अव्ययमव्ययस्य मोक्षस्य कारणत्वेनाक्षयं अहं परमात्मस्वरूप
प्रोक्तवान् १

रामकंठीटीका

एवमस्य समस्ताध्यात्मशास्त्रसर्वस्वभूतार्थगर्भस्य प्रकरणस्य ज्ञान
कर्मसमुच्चयलक्षणमभिधेयं परमात्मसमापत्तिलक्षणं च प्रयोजनं
प्रतिपाद्येदानीं संबंधविषययोः प्रतिपादनद्वारेणार्जुनस्यात्मनिरू
षत्वमात्रप्रतिपत्तिव्यामोहनिवृत्तये परमकारणतामाविष्कुर्वन्भगवानु
वाच एवमनेन प्रकारेण यथात्वभ्यं प्रोक्तो यं योगस्तथैव विवस्वते म
हायोगीश्वराय सवित्रे योगमेनमहं परमेश्वर एव कस्मिंश्चित्काले नि
जयोगैश्वर्यपरिकल्पितनिरतिशयप्रभावमयविग्रहः प्रोक्तवान् उप
दिष्टवान् कीदृशं योगमव्ययं परमकारणवन्न कदाचिद्व्युति हीयते य
स्मिन्हि जगत्सर्गादिलक्षणं कर्मानुतिष्ठन्नपि परमेश्वरः प्राक्प्रतिपादि
ताद्वयचिन्मात्रैकलक्षणस्वभावविमर्शैकनिष्ठतया ज्ञानकर्मसमु
च्चयानुष्ठानात्मकस्यास्य योगस्य प्रथमोनुष्ठातेति तद्योगस्यास्या
व्ययत्वमुक्तं अनेन परमकारणादेव प्रवृत्तेरस्य योगस्य प्राधान्येन सं
वेधमुक्त्वा क्रमेणानुष्ठानप्रवृत्तसंप्रदायतया तमेव संबंधं विवृणोति ५१
विवस्वान्मनवे प्राहेति स विवस्वान्स्वजाय मनुसंज्ञायादिराजाय प्राहद्वा
वावप्राहेति लिटश्छांदस आहादेशः सोपि मनुरिक्ष्वाकुसंज्ञाय पुत्राये
वाब्रवीत् १

लासिकी टीका

ज्ञानार्थकर्मन्यासाख्यो योगस्य तारतम्यतः फलानुद्देशतः कर्मकरणं व
लवान्मते एवमस्य ग्रंथस्य कर्मयोगलक्षणमभिधेयं परमात्मसमाप
त्तिलक्षणं प्रयोजनं च प्रतिपाद्य परिसमाप्तमिव विवक्षितमर्थमन्वान
संबंधविषययोर्विवक्षयार्जुनस्यात्मनिरूषत्वमात्रप्रतिपत्तिव्या
मोहच्छेदाय परमकारणतामाविष्कुर्वन्निममिति त्रिभिः श्रीभगवा
नुवाच इममध्यायद्वयेनोक्तं योगं विवस्वते सवित्रे परमेश्वर एवका

कीदृशमव्ययं

स्मिंश्चित्कालेलीलागृहीततनुः प्रोक्तवानुपदिष्टवान् परमकारणवदन्तये
सनातनेऽव्ययफलत्वाद्वाऽव्ययं विवस्वान्मनवेस्वपुत्रायसइक्ष्वाकवेस्वपुत्रा
याब्रवीत् १

पैठोलीटीका

योयंयोगःकर्मयोगोपायःसंन्यासःज्ञाननिष्ठालक्षणःअध्यायद्वयोक्त
स्तस्यैवउत्तरोत्तरसकलगीतासुप्रपंचनीतंसकलगीतार्थपरिसमाप्तेमन्वा
नोभगवान्वंशकथनेनस्तौति इममितित्रिभिःअहमिमंअध्यायद्वये
नोक्तंयोगंज्ञाननिष्ठालक्षणमव्ययंयोगफलस्यमोक्षस्यविनाशाभावा
त् अव्ययस्त्वंविवस्वतेप्रोक्तवान् विवस्वान्मनवेप्राह मनुरिक्ष्वाकवेब्र
वीत् १

श्रीधरीसुबोधिनी॥

श्रीकार्तवीर्यार्जुनायनमः ॐ अथमस्यसमस्तशास्त्रसर्वस्वभूतार्थ
गर्भस्यप्रकरणस्यस्वधर्मानुष्ठानरूपकर्मकौशललक्षणमभिधे
यमैहिकंकीर्तिराज्यभोगादिलक्षणंपारत्रिकस्वर्गादिभोगापवर्ग
लक्षणंचप्रयोजनंप्रतिपाद्येदानींसंबंधविषययोः प्रतिपादनद्वा
रेणार्जुनस्यात्मनिपुरुषत्वमात्रप्रतिपत्तिव्यामोहापवृत्तये परम
कारणताभाविष्कुर्वन्त्वंशपरंपरागतत्वेनसमूलत्वमिदानीमद्यत्वेन
दुर्लभतांगौरवंवास्यप्रतिपादयितुंभगवानुवाच इममित्यादित्रिभिः
इममध्यायद्वयेनभवंतंप्रतिकथितोयोयोगस्तमेवयोगंकर्मकौशल
लक्षणंकर्मयोगंविवस्वतेसर्वक्षत्रियवंशबीजभूतायसवितेपुरादमे
व परमेश्वरः प्रोक्तवान् प्रकर्षेणसर्वसंदेहोच्छेदादिरूपेणोपदिष्टवा
न् सर्गादिकालेनतंबलाधानेन तदधीनंसर्वंजगत्पालयितुमितिभा
वः कीदृशंयोगमव्ययं नकदाचिद्व्येतिक्षीयते यःसोव्ययोजगत्सर्गादि
लक्षणंकर्मप्रवर्तयन्तस्ययोगस्यप्रथमोनुष्ठातापरमेश्वरस्तदनुष्ठीयमा
नत्वादयमप्यव्ययइत्यनेनपरमकारणादस्यप्रवृत्तेः प्राधान्येनसंबंधउक्तः
वाफलत्वाद्वाव्ययोयं यतेनचबलाधाननिमित्तत्वमस्यदर्शितं सचविवस्वा
न्मनवेस्वपुत्रायवैवस्वतायाधिकाराय प्राह प्रोवाच लिडन्त सचमनुरिक्ष्वा
कवेस्वपुत्रायाब्रवीत् १॥

मध्वभाष्य॥

ॐ नमो भगवते वासुदेवाय बुद्धेः परस्य माहात्म्यं कर्म
भेदो ज्ञानमाहात्म्यं चोच्यतेऽस्मिन् ध्याये सर्वोऽवस्थितश्चा
यं धर्मस्त्याद् क्रममिति मध्यमसर्वाणीत्युक्तम् तन्माहा
त्म्यमादितो ज्ञातुं इच्छति १॥

5

रामचंद्रसरस्वतीकृतटीका
एवंद्वितीयाध्यायेज्ञानंमुमुक्षोःप्रधानंकर्मतत्सहकारीतिनिरूप्याभि
संधित्वेनोक्तेतदनभिज्ञार्जुनप्रश्नापाकरणेनकर्मशुद्धिद्वाराज्ञा॰
नोपकारकत्वमितितृतीयेप्रतिपादितंतदेतदव्युत्पादिनाभिज्ञाशि॰
ष्यांतरस्यकेवलंयुद्धाभिनिवेशमात्रायमाभूत्सन्निहितपंडितंव्युत्
पादयतस्तवकथंयुद्धेयमित्यर्जुनशंकांपरिहरन् शुद्धिकृत्कर्म॰
विशेषात्तदितिकर्तव्यताविशेषं विज्ञानस्वरूपनिरूपणेनतस्याभि
प्रकारंतस्यविवक्षितफलसंबंधंचवक्तुमुपक्रमतेभगवान् इमं
विवस्वतेति इमंप्रदर्शितंकर्मणैवहिसंसिद्धिमित्यादौयोगंकर्म
मोचकज्ञानयोःसाधनसाध्यभावलक्षणंसंबंधंअव्ययंविपरीतोः
यःज्ञानंअव्ययःकर्ममोक्षेप्रधानंज्ञानंत्वव्यापारीतरव्यापारःयद्वा
ज्ञानंअंगंकर्माणि यद्वाज्ञानकर्मणीदर्शपूर्णमासवत्समुच्चितेइ॰
त्यंवरूपोनविद्यतेव्ययोयस्मिन्नित्यव्ययःविपरीतसंभावनारहित
लं अथवानास्तिकुतर्कैर्व्ययोबाधोयस्येत्यव्ययःफलमिति अव्यय
मोक्षफलकत्वाद्वाव्ययं विवस्वतेसूर्यायाहप्रोक्तवानुपदिष्टवा
देवत्रयात्मकः॰ न् अनेनवेदत्रयात्मकःसवितृस्वरूपस्यशिष्यकथनेनाव्युत्पादि
नाभिज्ञशिष्यांतरतानिरस्तता प्रागेवयुद्धाभिनिवेशमात्रफल
कत्वाशेषःस्पष्टः इदानींसन्निहितेष्वेवपंडितेषु अयंप्रचारइत्या
ह १

भाषा अनुवाद

श्रीकृष्ण भगवान आप ही अपना आविर्भाव कहे प्रगट होना और तिरोभाव कहे परमधाम का जाना तिस के प्रकाश करने के निमित्त साम वेद के अंतर्गत जीव ब्रह्म प्रतिपादक तत्वमसि महा वाक्य है तिसके तत्पद औ त्वम्पद के विचार के अर्थ कर्म योग की प्रसंसा करते गीता शास्त्र की अभिप्राय जो प्रवृति निवृति लक्षण ज्ञानयोग औ कर्मयोग सो दो अध्या से कहि चुके यह मानते हुये ग्रव वंश कथन से उस कर्मयोग की स्तुति करते है कि यही कर्म योग मैने पूर्व काल मे सूर्य्य से कहा था औ सूर्य्यने अपने पुत्र श्राद्ध देव मनु से कहा औ मनुने फेरि अपने पुत्र इक्ष्वाकु राजा से कहा था ऐसे परंपरा वहकर्मयोग चला आताथा १ ॥

श्रीभगवानकावाक्य दोहा ॥

यों यहलवय परंपरा राजऋषीहुंजान सो अर्जुनवहुकाल
सें योगनाशयहमान १ ॥

एवंपरम्पराप्राप्तमिमंराजर्षयोविदुः सकालेनेह
महतायोगोनष्टःपरंतप २ ॥

शांकरभाष्यं

एवमिति एवंक्षत्रियपरम्पराप्राप्तमिमं राजर्षयोराजानश्च
तेऋषयश्च राजर्षयोविदुरिमं योगंसयोगःकालेनेहमहता॰
दीर्घेणनष्टोविच्छिन्नसंप्रदायः संवृत्तोहे परंतपआत्मनोवि॰
पक्षभूताःपरेउच्यन्ते तान्शौर्यतेजोगभस्तिभिर्भानुरिव तापय
तीति परंतपःशत्रुतापनइत्यर्थः २

आनंदगिरिकृतटीका

यथोक्तेयोगेपरम्परागते विशिष्टजनसंमतिमुदाहरति एवमि॰
ति तस्यकथंसंप्रति वक्तव्यत्वं तदाह सकालेनेति पूर्वार्द्धंव्या
करोति एवमित्यादिना ऐश्वर्यसम्पत्तिमत्त्वं राजत्वंतेषामेव सू
क्ष्मार्थनिरीक्षणक्षमत्वमृषित्वमिहेति भगवतोर्जुनेनसह संव्य
वहारकालोदृश्यते परंतपेतिसंबोधनं विभजतेआत्मनइति २

स्वामिकृतटीका

एवमिति राजानश्चतेऋषयश्चराजर्षयोनिमिप्रमुखाःस्वपित्रादि
भिरिक्ष्वाकुप्रमुखैःप्रोक्तमिमंयोगंविदुर्जानन्ति अद्यतनानामज्ञाने स्म॰
कारणमाह हेपरंतपशत्रुतापनसयोगःकालवशादिहलोकेन॰
ष्टोविच्छिन्नः २

पिशाचभाष्यं

एवंक्षत्रियपरंपराप्राप्तंप्रोक्तमिमंराजर्षयोमनुप्रभृतयोविदुःवि॰
जानंतिसयोगोमहताकालेननष्टःविच्छिन्नसंप्रदायःसंवृत्तःपरं
तप परांस्तापयतीतिपरंतपशत्रुंतप २

रामानुजभाष्यं एवंसंप्रदायपरम्परयाप्राप्तमिमंयोगंपूर्वेराजर्षयोविदुःसमहताकालेनश्रोतृ
बुद्धिमांद्याद्विनष्टप्रायोभूत् २

सएवायमस्खलितस्वरूपःपुरातनोयोगःसखित्वेनातिमात्रभक्त्याचमा
मेवप्रपन्नायतेप्रोक्तःसपरिकरःसविस्तरउक्तइत्यर्थः मदेकक

गीं
टीं
वं

नामिनात्वे वकं वा न वा कं यन इ देव दानो दिन मुनमं हं स्पंज्ञानं २

अभिनवगुप्तकृतटीका नास्ति

एतच्च गुरुपरम्पराप्राप्तमपि आदित्वेनत्रिष्ठमित्यनेनभगवानस्मा
नस्पडर्जमनंतामौवन्वच्च दर्शयति २

परमार्थप्रपाटीका

स एव पुरातनो योगो महता कालेन नष्टः यो वाद्वितीयभूतः सोऽयं योग इति
कारणात्मयातेयप्रोक्तः वक्ष्यपक्कातः इतीतिकिं २

एवमिक्ष्वाकोः सूर्यवंशप्रधानभूतात्ततः सकाशात्प्र याप्राप्तं राजर्षयो राजान ऋषयश्च विदुर्ज्ञातवन्तः अतिशयि हैतत्परंपरया मदेवः प्रतिपेदे गुरभवंस्तद्येषु

वनमालीटीका

एवमादित्यमारभ्य परंपराप्राप्तमिमं योगं राजानश्च ते ऋषयश्च प्रभु
त्वसति सूक्ष्मार्थयोनिमिप्रभृतयः स्वपित्रादिप्रोक्तं विदुः स महतादी
र्घेण धर्महासकरेण कालेन नष्टो विच्छिन्नसंप्रदायो जातः २

परंपराप्राप्तं तत्संप्रदाय

कुसुमवैजयंतीटीका

अतएवातिलत्तः पूर्वैर्य

स्वपित्र

एवं पुत्रादिक्रमेण परंपरया प्राप्तमिमं कर्मयोगं राजर्षयो राजानोपिल
शुचकुंदगाधिनिमिनहुषाम्बरीषादय इक्ष्वाकुप्रमुखैः स्वस्वपितृभि
रुपदिष्टं विदुर्जानंति नन्विदानीं स योगः कुतो न ज्ञायत इति चेदत आ
ह हे परंतप शत्रुतापन इहास्मिन्लोके महता कालेन स योगो नष्टः इ
ह इति पदेन भूलोके तत्रापि भरतखंड एव नष्टः अन्यत्रास्ति स्वस्त्यवति
ष्ठते महतेत्यनेन जनानां कालपरिणामित्वेन मंदबुद्धित्वात्पापा
चरणेनात्मस्वप्रमाददमोहादिदोषयुक्तत्वाच्च नष्ट इति योतितं शत्रुता
पनेति संबोधनेन यथा न वकाले वैपरीत्यात्स्वधर्मरूपे युद्धादौ कर्मणि त
निष्ठा नास्ति परधर्मभूते भिक्षाटनादावाशिचत्वेष्वेतेषां लोकानां सर्वे
षामपि स्वधर्मे निष्ठाभावाद्योगो नष्टस्तस्मादयं मम वचनात्त्वं शत्रुता
पनो भवेति सूचितं २

मधुसूदनीटीका

एवमादित्यमारभ्य गुरुशिष्यपरंपरया प्राप्तमिमं योगं राजानश्च ते
ऋषयश्चेति राजर्षयः प्रभुत्वे सति सूक्ष्मार्थनिरीक्षणक्षमा निमिप्र

मुर्वे: स्वपुत्रादिप्रोक्तं विदुः तस्मादनादिवेदमूलत्वेनानंतफलत्वेनाना
दिगुरुशिष्यपरंपराप्राप्तत्वेन चक्रवर्तिमत्वर्शकानास्यदत्वान्महाप्रभा
वोयंयोगइतिश्रद्धातिशयायस्तूयते सएवंमहाप्रयोजनोपियोगः
कालेनमहतादीर्घेणधर्मह्रासकरेणेहेदानीमावयोर्व्यवहारकाले
द्वापरांतेदुर्बलानजितेंद्रियानधिकारिणःप्राप्यकामक्रोधादिभिरभि
भूयमानोनष्टःविच्छिन्नसंप्रदायोजातः तंविनापुरुषार्थाऽप्राप्तेः अहो
दौर्भाग्यंलोकस्येतिशोचतिभगवान्हेपरंतपकामक्रोधादिरूपशत्रु परं
गणंशौर्येणबलवताविवेकेनतपसावभानुरिवतापयतीतिपरंतपः
शत्रुतापनोजितेंद्रियइत्यर्थः दुर्बलपेक्षणायद्भुतकर्मदर्शनात् ना
स्मात्वंजितेंद्रियत्वादत्राधिकारीतिसूचयति २

सदानंदीटीका

एवमादित्यमारभ्यगुरुशिष्यपरंपरा तयाप्राप्तमिमंयोगंराजानऋष
यस्तते १ प्रभुत्वेसतिसूक्ष्मार्थनिरीक्षणक्षमान्तपाः विदुर्निम्यादयः
पूर्वैस्वपित्राद्यक्रमादरान् २ अनादिवेदमूलत्वादनंतफलभावनः
अनादिसंप्रदायत्वाद्योगोयंस्तूयतेमहान् ३ एवंमहाफलोयोगोध॰
र्मह्रासकरेणसः नष्टोदीर्घेणकालेनद्वापरांतेधुनादितो ४ दुर्बला
न्प्राप्यभोगादौतत्परानजितेंद्रियान् कामाद्यैरभिभूतःसन्विच्छिन्नःसंप्र
दायतः ५ क्रोधादिशत्रुसंचयःशौर्येणस्वविवेकतः तापयत्यर्कवत्
सत्वमधिकारीजितेंद्रियः ६ स्वलोकेपूर्वप्रीत्यागितयासम्यक्परी॰
क्षितः परैविपन्नभूतात्मा शौर्यतेजोगमस्तिभिः तापयत्यर्कवद्धार्य
श्लोकस्त्वंहिपरंतपः ८ २ नीलकंठीटीका

एवमिति एवंपरंपराप्राप्तमिक्ष्वाकोर्निमिभागादिक्रमेण राजर्षयः :
जनकाजातशत्रुकैकयप्रभृतयोराजानः ऋषयश्चसनकवसिष्ठाद्या
सूक्ष्मार्थदर्शिनस्ते राजानएवऋषयइतिवा अविदुर्ज्ञातवंतःसिजा॰
भ्यस्तविदिभ्यश्चेतिलङोर्जुस् नष्टःअदर्शनंगतः २

आनंदीटीका

राजर्षयःस्वयमनुष्ठायपरैरप्यनुष्ठापयितारःसत्त्वेकनिष्ठपुरुषाञ

गीं
टीं
व

ष्टेयोयोगइहास्मिंलोकेमहताकालेनत्रेतादौसत्वादीनांगुणानामेवेया·
न्याभिभवजननमिथुनवृत्तिक्रमेणप्रकृष्टबुद्ध्यपचयान्नष्टोन्तर्भूतः तथा
चोदयनः जन्मसंस्कारविद्यादेःशक्तिस्वाध्यायजन्मनां ह्रासदर्शनतो
ह्रासःसंप्रदायस्यमीयतइति २

9

रामकंठीटीका

एवंपरमेश्वरात्देवप्रभृतिपरम्परयायोगपुत्रादिशिष्यनूएवप्रवन्य
प्रवृत्त्याख्यातेलोकेप्रथितंसंतमन्येजनकप्रभृतयोराजर्षयोराज्य
लक्षणंकर्मकुर्वाणाअपियथोक्तज्ञाननिष्ठत्वादृषयोमनयइमंयथो
क्तंविदुःविदांचक्रुरित्यस्मिन्नर्थेछांदसःप्रयोगःमहताकालेनयुग
सहस्रादिसंख्येनलोकस्यक्रमापचीयमानप्रज्ञादिसर्वगुणत्वाद्यो
गप्रतिपत्त्यभावान्नष्टोंतर्धानमागतःपरमकारणएवव्यवस्थितः
इत्यर्थः २

~~[illegible]~~
लासिकीटीका

एवंपरमकारणादेवप्रवृत्तिर्योगस्येतिसंबंधमर्थः एवंपरमेश्वरात्
प्रवृत्तिपुत्रस्वशिष्यादिपरम्परयाप्राप्तमिमंयोगंराजर्षयोराजानश्च
तेराज्यलक्षणंकर्मकुर्वाणाअपियथोक्तज्ञाननिष्ठत्वादृषयश्चनि
मिजनकप्रमुखाविदुर्विदांचक्रुः अयतनानामज्ञानेकारणमाह हेपरंतप
शत्रुतापनसयोगोमहताकालेनयुगसहस्रादिसंख्येनेहलोकेलोकस्यक्रमा
पचीयमानप्रज्ञादित्वान्नष्टोन्तर्धानमागतःपरमकारणएवव्यव
स्थितः एतेनास्ययोगस्यदुर्लभतागौरवंचप्रदर्शितं २

पंचोलीटीका

एवंइतिराजर्षयः एवंपरंपराप्राप्तंक्षत्रियस्यपरंपराप्राप्तमिमंयो·
गंविदुःहेपरंतपसयोगःइहमहतादीर्घेनकालेननष्टः विच्छिन्न·
संप्रदायः २

रणाबीरससिद्धोयिनी॥

एवमिति यथाहं सवित्रे स च मनवे मनुश्चेक्ष्वाकवे स च स्वपुत्रे-
भ्यः कथितवान् एवं परंपरया परमेश्वरान्मत्त एव प्रभृति योऽय
पुत्रादिशिष्यरूपप्रबंधप्रवृत्त्या प्राप्तं लोके प्रथितं संतमिमं योगं
कर्मकौशललक्षणं कर्मयोगमन्येपि जनकादयो राजर्षयः प्रभु-
त्वेन सति सूक्ष्मार्थदर्शिनो विदुर्विदांचक्रुः लिडर्थे लट् स एवं महा-
प्रयोजनोपि योगो महता युगमहत्त्वादि संख्येन धर्मह्रासकरेण
कालेन इह कलिद्वापरसंधौ प्रोक्तलक्षणकामाभिभूतांतःकरण-
स्याजितेंद्रियस्य दुर्बलस्य क्रमापचीयमानसर्वगुणत्वात्प्रतिपन्न-
भावान्नष्टो नर्थानेन गतो विच्छिन्नसंप्रदायत्वात्परमकारणे मय्येवव्य-
वस्थित इत्यर्थः एतेन वा एतन्नानांतरज्ञाने कारणमुक्तं २॥

मधुभाष्य॥

२॥

भाषा अनुवाद

इसी प्रकार इस कर्म योग को परंपरा प्राप्त कहे एक से दूसरा दू सरेसे तीसरे ऐसे राज ऋषि लोग जानते चले आते थे पर अब हे परंतप शत्रुतापन अर्जुन वह कर्म योग बहुतकाल पायकर नष्ट होगया है २ ॥

दोहा ॥

ऐसें परंपरा प्रापत यह राजऋषिहुंजान सो हे अर्जुन बहु
कालसें योगनाश भयो मान २ ॥

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः भक्तोसि मे
सखा चेति रहस्यं ह्येतदुत्तमं ३

शांकरभाष्यं

दुर्बलान् अजितेंद्रियान् प्राप्य नष्टं योगमिममुपलभ्य लोकं चापु
रुषसंबंधिनं स एवायमिति स एवायं मया ते तुभ्यमद्येदानीं योगः
प्रोक्तः पुरातनः भक्तोसि मे सखा चेसीति रहस्यं हि यस्मादेतदुत्तमं
योगं ज्ञानमित्यर्थः ३

आनंदगिरिकृतटीका

किमिति वर्तमाने काले प्रकृतो योगः संप्रदायरहितोभूदित्याशंक्या
धिकार्यभावादित्याह दुर्बलानिति तदेव दौर्बल्यं प्रकृतोपयोगित्वे
न व्याकरोति अजितेंद्रियानिति यद्यपि कामक्रोधादिप्रधानान्
पुरुषान्प्रतिलभ्य कामक्रोधादिभिरभिभूयमानो योगो नष्टो वि
च्छिन्नसंप्रदायः संजातस्तथापि योगादृते पुरुषार्थो लोकस्य लभ्य
ते चेत् किमनेन योगोपदेशेनेत्याशंक्य यथोक्तयोगाभावे परम
पुरुषार्थाप्राप्तेर्मैवमित्याह लोकंचेति पूर्वीयो योगो विच्छिन्नसंप्र
दायोऽधुना त्वय्ययोगो मदर्थमुच्यते भगवतेत्याशंक्याह स एवे
ति कस्मादन्यस्मै कस्मैचित् पुरातनो योगो नोक्तो भगवतेत्याशंक्याह
भक्तोसीति उक्तमधिकारिणं प्रति योगस्य वक्तव्यत्वे हेतुमाह रहस्यं
हीति अनादिवेदमूलत्वात् योगस्य पुरातनत्वं भक्तिः शरणत्वाश्री
तिस्तया युक्तो निजरूपमवेदन्भक्तो विवादितः समानवयाः स्निग्धः स
हायः सखेत्युच्यते एतदिति कथं योगो विशेष्यते तेनमाह ज्ञानमिति २

स्वामिकृतटीका

स एवायमिति स एवायं योगोऽद्य विच्छिन्ने संप्रदाये सति पुनस्तं मया ते
तुभ्यमुक्तः यतस्त्वं मम भक्तोसि सखा चेति अन्यस्मै मया नोच्यते
हि यस्मादिदमुत्तमं रहस्यम् ३ ॥

पैशाचभाष्यं

स एव विच्छिन्नसंप्रदायो योगः प्रोक्तः पुरातनः तेनैव रहस्यमप्रका
श्यमुत्तमं निरुपमं ३ ॥

स एवायं त्वलित स्वरूपः पुरातनो योगः सख्येनातिमात्रभक्त्या च मामेव प्रपन्नाय ते प्रोक्तः सपरिकरः सविस्तर उक्त इत्यर्थः मदन्येन केनापि ज्ञातुं वक्तुं वा न शक्यं यत इदमेव वेदान्तोदितं उत्तमं रहस्यं ज्ञानम् ३ ५

गी॰ टी॰ २

रामानुजभाष्ये

असिन्नर्थसंगे भगवदवतारयाथात्म्ययथात्म्यवेदानमर्जुन उवाच ५ २

अभिनवगुप्तकृतटीका

भक्तोसि तं भक्तो मत्परमः सखा च चशब्दा

एतत्त्वगुरुतपरम्परागतमपि आदित्येन निषेधितमिति येनेन भगवान् अत्यन्तं स्यडेलं भक्तो गौरवं च प्रदर्शयति भक्तोसि मे सखा चेति त्वं भक्तो मत्परमः सखा च चशब्देनान्वाचय उच्यते तेन यथाभिलाटने भिक्षाणां प्राधान्यं गवानयनं प्राधान्यं एवं भक्तिरत्र गुरुं प्रति प्रधानेन सखित्वमपीति तात्पर्यार्थः २

परमार्थप्रपाटीका

सोयं योग इतिकारणान्मया ते प्रोक्तः वक्तुं प्रपक्कोन ५

५ इतीति किं यतस्त्वं मद्भक्तः सन् सखा भवसि सखित्वलक्षणा भक्तिस्त्वयि वर्तत इत्यर्थः अथान्यत्रास्य निर्वाच्यत्वमाह किंभूतो योगः उत्तमं रहस्यं एकान्तवेद्यमित्यर्थः अयमसंदिग्धार्थोर्जुनः शृणोति २

वनमालीटीका

यः पूर्वं मयोपदिष्टो नं नरविच्छिन्नसंप्रदायोभूत्स एवायं पुरातनो योगो यातित्तेहेन तुभ्यं प्रोक्तः न त्वन्यस्मै चिन इति हेतो यतस्त्वं मे भक्तः श-
५ कस्मै ५ रणागतत्वं सखा त्यन्तविच्छिन्नस्तेह थारावान् सखा त्वं पेत्त्सखा प्रियस्थानीयोसि अतस्तुभ्यमुक्तः अन्यस्मै कुतो नोच्यते तत्राह हि यत एतत् ज्ञानमुत्तमं रहस्यमतिगोप्यं २

कृष्णमैवेजयंतीटीका

स एवेति यः पूर्वं सूर्यायोपदिष्ट इदानीमपि कालगत्या परम्परया मलिनकर्माचरणेन नष्टत्वाद्यन्नष्टः स एव पुरातनः प्राचीनः यो योगः येन सूर्याय प्रोक्तस्तेन सूर्यं गुरुणैवमयाद्येदानीं तेतुभ्यमेव प्रोक्तो नान्यस्मै चेत्तन्न्यस्मै कुतो नोक्त इति चेत्तत्राह मे मम त्वं भक्तोसि नन्वन्येपि तु बहवो भक्ताः सन्ति तेभ्यः कस्मान्नोक्त इति चेत्तत्राह त्वं सखा चासि हि शब्दो हेत्वर्थे इति शब्दो हेतौ एतद्रहस्यमपि तत्रापुत्तमममास्ति इति हेतोस्तुभ्यमेव मयोक्तो नान्येभ्यः यद्वा हि युक्तोय

तान्निवर्तकेनेतरव्यवच्छेदकाभिस्लाते
सिद्धिरिति प्रयत्नतं गता वचनोक्त प्रायेण
मेवं भक्तिरेव सर्वप्रपत्तेस्तान्निवर्त्त सरल वी
कि तात्पर्य

मर्थः यः केवलं भक्तोस्तिसखाचि त्वमस्यनास्तितस्मै रहस्यमेववक्त
व्यंननूतमं रहस्यंयस्यकेवलंसखापवास्तिनतुभक्तस्तस्यापिरहस्या॰
मेवनत्तूत्तम त्वंतुभक्तत्वमित्रत्वाभयधर्मविशिष्टोस्यतस्तुभ्यमेवो
त्तमरहस्यमेतन्मयाप्रोक्तमन्येचकेचिद्भक्ताः केचित्सखायः सन्त्य
तस्तेभ्योनोपदिष्टमिति रहस्यंगोप्यंअभक्तादिभ्योनदेयंअन्यथा
निर्वीर्याविद्याभवेदित्यर्थः तथाचमंत्रवर्णः विद्याहवैब्राह्मणमा॰
जगामगोपायमाशेवधिष्टेहमस्मि असूयकायानृजवे ऽयतायनमां
ब्रूयावीर्यवतीचतथास्यामिति ३

मधुसूदनीटीका

यएवंपूर्वमुपदिष्टोप्यधिकार्यभावाद्धिच्छिन्नसंप्रदायोभूत् यंविना
चपुरुषार्थोनलभ्यतेसएवपुरातनोऽनादिगुरुपरंपरागतोयोगोऽद्य
संप्रदायविच्छेदकालेमयातेतुभ्यंप्रकर्षेणोक्तः नत्वन्य
कस्मै: स्मैं वितकस्मात् यद्भक्तोसिमेसखाचेति इतिशब्दोहेतौ यस्मात्त्व
ममभक्तः शरणागतत्वेसत्यत्यंतप्रीतिमान् सखाचसमानवयाः
स्निग्धः सहायोसिसर्वदाभवसि अतस्तुभ्यमुक्तइत्यर्थः अन्यस्मैकु॰ सि॰
तोनोच्यतेतत्राह हियस्मादेतज्ज्ञानमुत्तमंरहस्यमतिगोप्यं ३

सदानंदीटीका

सएवायंपराचीनस्तुभ्यंस्नेहवशान्मया प्रोक्तोयतस्त्वमद्भक्तो
मामेवशरणागतः १ सखास्निग्धः सहायोसिनतस्तुभ्यमतउत्तमं
गोपनीयमिदंज्ञानंप्रोक्तमत्यद्भुतोपमं २ ३

नीलकंठीटीका

सखाप्रीति
सइतिअयंसंप्रदायविच्छेदेसति भक्तः शरणागतः सखाप्रीति
विषयः रहस्यंगोप्यंअभक्तादिभ्योनदेयं अन्यथानिर्वीर्याविद्या
भवेदित्यर्थः तथाचमंत्रवर्णः विद्याहवैब्राह्मणमाजगामगो
पायमाशेवधिष्टेहमस्मि असूयकायानृजवेऽयतायनमाब्रू॰
यावीर्यवतीतथास्यामिति ३ श्रीधरानंदीटीका

गी॰ टी॰ व॰

17

सएवायंविवस्वतेप्रोक्तोमध्येलीनोपिमयादिविदुषापरमेश्वरेणपुरा॰
तनःप्रोक्तात्स्वरूपादभ्रष्टःनत्वयत्वत्संभावनामात्रार्थमेवोक्तःयोगस्ते
प्रोक्तःअत्रहेतुमाह भक्तोसिमेसखाचेतितवोपदिष्टःहियस्मान्मदु॰
क्तमुत्तमंरहस्यंयस्यकस्यचिद्देयंनास्तिस्वधर्मत्यागोन्मुखस्यतवा
धर्मनिवारणार्थंप्रेमातिशयादुक्तमित्यर्थः ३

रामकंठीटीका

सएवंभ्रष्टस्वरूपोयास्मिन्कालेमयापरमेश्वरेणेवजगदुपकाराययया
दवकुलावतीर्णेनतेतुभ्यंपुरातनोनित्ययोगःप्रोक्तःयतोममभक्तोसि
षुड्गुणैः तथामसखासुहृत् अतोभक्तिसौहार्दलक्षणगुणविशिष्ट
गुणसंपन्नायमयातुभ्यमुपदिष्टं यतएतदुत्तमंसर्वरहस्यानांप्रकृष्टंरहस्य
प्रवमनेनास्यशास्त्रस्यसंबंधविषयावपिप्रतिपादितौ निरुत्तरविज्ञान
मयदिव्यचक्षुर्दानेनपुरस्तात्स्वप्रत्यक्षीकरिष्यमाणपारमार्थिकस्वरूप
स्यार्जुनस्यस्वात्मनियदुकुलोद्भूतमनुष्यमात्रप्रतिपत्तिनिवारणद्वारे॰
णभगवतापारमेश्वर्यमात्मनःकथयितुंचप्रस्तुतं ३

[illegible] लासिकीटीका

सइति अयविच्छिन्नेसंप्रदायेसतिसएवाभ्रष्टस्वरूपोयंयोगःपुरातनो
नित्योमयापरमेश्वरेणातिस्निग्धेनतेतुभ्यंप्रोक्तःनत्वन्यस्मैकस्मैचित्
यतोममभक्तोसिसखाचासि चेतित्वाचयेनभक्तेःप्राधान्यद्योतकः
इतिशब्दोहेतौकुतोन्यस्मैनोच्यतेतत्राह हियस्मादेतत्रहस्यानामु
त्तमं प्रकृष्टरहस्यमतिगोप्यं ३

पंचोलीटीका

सएवेति मयाअद्यहेअर्जुनतेतुभ्यंसएवायंपुरातनोयोगःप्रोक्तः॰
मेममभक्तोसिचपुनःसखाहियस्मादेतत्योगंज्ञानंउत्तमरहस्य॰
मितिकारणादुपदिष्टं ३

भगवीरसमिद्धोधिनी॥

सएवेति यएव त्वम्मुदिष्टः प्रतिपञ्चभावाच्छिन्नसंप्रदायत्वेन
मध्येवलीनोभूत्. सएवसर्वपुरुषार्थसाधनभूतोयंपुरातनोना
दिपुरुषपरंपरागतत्वेननित्योयोगः कर्मस्तुप्रहातिनत्वरणोद्या
स्मिन्नुद्दोयोगसमर्येमयापरेष्वदेतीवजगदुपकाराययादवकृता
वतीर्णेननतेनभ्यंप्रोक्तउपदिष्टोनत्वन्यस्मैकस्मैचित्. यतस्त्वंममभ
क्तःप्रारणागवेसत्युत्यंतप्रीतिमान्सुहृत्सूः सखासमानवयाश्चा
सि एतेनचार्जुनविषयाभक्तिसौहार्दलक्षणमुख्यशिष्यगुणासंप
त्तिरुपदेशनिमित्तीभूताप्रतिपादिता अतिप्राह्वोपदेतौ कृतोनान्यस्मै
कथ्यतइत्यतआह ह्रियस्मादेतउत्तमंरहस्यं सर्वरहस्यानांमध्ये।
प्रकृष्टंरहस्यमतिगोप्यमित्यर्थः ३॥

मधुभाष्य॥

३॥

भाषा अनुवाद

सोई कर्म योग जो परंपरा संप्रदाय से संसार मे न रहा अब फेरि हम ने तुम से कहा क्यों कि तुम मेरे भक्त हो और मित्र भीहो नंही तो मैने फेर और किसी से इसको नंही कहा और न कोई मेरा भक्त छोड इस के कहने योग्य हैं ३

दोहा

सो यह मैने तोहि अब कह्यो पुरातन योग मेरा सेवक मि
त्र तुं श्रेष्ठ रहस्य यह लोग ३॥

15

अर्जुनउवाच अपरंभवतोजन्मपरंजन्मविवस्वतः
कथमेतद्विजानीयांत्वमादौप्रोक्तवानिति ४

शांकरभाष्यं

भगवताविप्रतिषिद्धमुक्तमितिमाभूत्कस्यचित् बुद्धिरितिप-
रिहारार्थंचोद्यमिव कुर्वन् अर्जुनउवाच् अपरमिति अपरमर्वा-
क् वसुदेवगृहेभवतोजन्मपरंपूर्वं सर्गादौ जन्मोत्पत्तिर्विवस्वत
आदित्यस्य तत्कथमेतद्विजानीयामविरुद्धार्थतयायस्त्वमेवा-
दौ प्रोक्तवानिमंयोगंसएव त्वमिदानीं मह्यंप्रोक्तवानसीति ४

आनंदगिरिकृतटीका

भगवति लोकस्यानीश्वरत्वशंकांनिवर्तयितुं चोद्यमुत्थापय-
ति भगवतेति परिहारार्थंभगवतोमनुष्यवदवस्थितस्यानीश्वर-
त्वमपेक्ष्य तद्वचनेशंकितविप्रतिषेधस्येतिशेषः भगवतोनिज-
रूपमपेक्ष्य वेदनेदंचोद्यंकिंतु लीलाविग्रहंगृहीत्वेतिवक्तुं चोद्य-
मिवेत्युक्तंएतच्छ्लोकार्थमेव स्फुटयति यस्त्वमिति ४

स्वामिकृतटीका

भगवतोविवस्वंतंप्रतियोगोपदेशासंभवंपश्यन्नर्जुनउवाच अप-
रमिति अपरमर्वाचीनंतवजन्मपरंप्राक्कालीनंविवस्वतोजन्मतस्मा-
त्त्वमाधुनिकत्वाच्चिरंतनायविवस्वते त्वमादौयोगंप्रोक्तवानित्येतत्
कथमहंविजानीयांज्ञातुंशक्नुयामिति ४

पिशाचभाष्यं

एवंश्रुत्वार्जुनउवाच अपरमिति अपरंअर्वाचीनंवसुदेवगृहेभव-
तोजन्मपरंपूर्वंविवस्वतःआदित्यस्यजन्मसर्गादौअतःकथमेतद्वि-
जानीयांत्वमादौविवस्वतेप्रोक्तवानिति ४

अस्मिन्प्रसंगेभगवदवतारयाथात्म्यंयथात्मभावंज्ञातुमर्जुनउवाच ४

रामानुजभाष्यं

कालसंख्ययापरमस्मज्जन्मसमकालंहिभवतोजन्मविवस्वतश्च

गी॰ टी॰ व 16

कालसंख्यया परमष्टाविंशतिचतुर्युगसंख्याने त्वमादौ प्रोक्त
व॰ वानिति कथमेतदसंभावनीयं विशेषेण यथार्थं जानीयामनुजः
न्मांतरेणापि वक्तुं शक्यं जन्मांतरकृतस्य महतां स्मृतिश्च युज्यत इ
ति नात्र कश्चिद्विरोधः न चासौ वक्तारमेनं वसुदेवतनयं जानाति सर्वे
श्वरं न जानाति स एव त्वाति परंब्रह्म परंधाम पवित्रं परमं भवान् पु यं॰
रुषं शाश्वतं दिव्यमित्यादिना युधिष्ठिरराजसूयादिषु भीष्मोप्यस्य स
कथ्यते कृष्ण एव हि लोकानामुत्पत्तिप्रभवाव्ययः कृष्णस्य हि कृ दि॰
वरा॰ ते भूतमिदं विश्वं चरमित्येवमादि कृष्णस्य कृते कृष्णस्य शेषभूतं कृत्स्नं
जगदित्यर्थः अत्रोच्यते जानात्येवायं भवंतं वसुदेवतनयं पार्थः जान
तोप्यजानत इव पृच्छतोयमाशयः निरस्तसमस्तहेयप्रत्यनीककल्याणैकता
नस्य सर्वज्ञस्य सत्यसंकल्पस्यावाप्तकामस्य कर्मपरवशदेवमनुष्यादिस
जातीयं जन्म किमिंद्रजालमिव मिथ्या किं सत्यं सत्यत्वे च कथं जन्मप्रकारं
किमात्मकोयं देहः कश्च जन्महेतुः कदा च जन्म किमर्थं वा जन्मेति परिहा
रप्रकारेण प्रश्नार्थो ज्ञायते ॥

अभिनवगुप्तकृतटीका उपक्रमे ॥ अर्जुनो भगवत्स्वरूपं जानन्नपि लोके स्फुटीकर्तुं पृच्छति ॥

परमार्थप्रपाटीका अयं संदिहानोर्जुनः पृच्छति

अपरमिति भवतस्तव जन्म अपरमाधुनिकं तथा विवस्वतः सूर्यस्य ज
न्म परं प्राचीनं एवं सति आदौ त्वं प्रोक्तवानिति कथं विजानीयां तत्र भग
वानाह ॥

वनमालीटीका

परंब्रह्म परंधामेति वक्ष्यमाणत्वेन श्रीकृष्णस्य स्वरूपं जानन्नप्यर्जुनो
ज्ञाननिवृत्तिकामस्य सत्यसंकल्पस्य निखिलदेहभृतस्य जगदुद
यस्थितिसंहृतिलीलस्य मुमुक्षुभिक्षुकैरास्वादितपदारविंदमकरंदा
स्य परमकारुणिकस्य सदैकाकारज्ञानबलैश्वर्याद्यनंतविभूतिसंप क॰
न्नस्य सर्वेश्वरस्य कर्मवशाद्देवजन्मा किमिंद्रजालमिव मृषा किं वा स
त्यं सत्यत्वे च कथं जन्मप्रकारः किमात्मकोयं देहः कश्च जन्महेतुः क
दा च जन्म किमर्थं वा जन्मेति शंकां तत्स्वरूपमजानतो हृदिगतां निरा
कर्तुकामः पृच्छति अपरमिति अ कालिक इदानीमेव वसुदेवगेहे

भवतोजन्मपरंबहुकालिकंसृष्ट्यादौविवस्वतोजन्म अतःकथमेत
द्विजानीयामविरुद्धार्थकतया एतच्छुद्धार्थमाहत्वमिति इदानीतनः
त्वंसृष्ट्यादौकथंप्रोक्तवानविरुद्धमेतज्ज्ञातीतिभावः ४

ॐस्त्रमेवैजयंतीटीका

एवंकृष्णस्यैवत्रिलोकानामुत्पत्तिप्रभवाप्ययःकृष्णस्यहिकृतेभूतमिदं
विश्वंचराचरंपरंब्रह्मपरंधामपवित्रंपरमंभवान् पुरुषंशाश्वतंदिव्य-
मित्यादिनायुधिष्ठिरराजसूयादिषुव्यासभीष्मादिभ्यःकृष्णस्यसर्वोत्कृ
ष्टंमाहात्म्यमर्जुनेनाश्रुतमपितन्वत्वेनतज्जन्मश्रोतृकामोभुवो
भारजिहीर्षयावसुदेवगृहेजातइतिजानन्नप्यजानन्निवात्तजनतानां
तत्त्वरूपविज्ञापनायाहविवस्वतेयोगंप्रोक्तवानित्येवंभगवदुक्तिनि
शम्यपामिवमन्वार्जुनोभगवंतंपृच्छतिस्मअपरमिति भवतस्तवापरं
मिदानीमस्मामानकालीनंवसुदेवगृहेजन्मप्रादुर्भावोविवस्वतःसू-
र्यस्यतुजन्मपरंसृष्टेःप्रथमंसूर्याचंद्रमसौधातायथापूर्वमकल्पय
दितिश्रुतेः नवचसूर्यस्यजन्मनोरांतरालिकोऽष्टाविंशचतुर्युगस-
स्यापरिमितोमहान्कालोगतआदौप्राक्कालेविवस्वतेत्वमोतिशयप्राक्का
गतोयत्नायत्वंविवस्वतोऽर्वाचीनोत्यमोयोगंप्रोक्तवानित्येवंप्रकारे
णैतत्तववचनंसत्यंवामिथ्यावाहंकथंकेनप्रकारेणविजानीयामतो
ऽयं तवकतिविधानिजन्मानीतितानित्वं जानासिनवेति अतोऽव्यया
त्मासर्वेषांभूतानामीश्वरस्त्वंकेनप्रकारेणसंभवसीतिकदाकदाकाले
आत्मानंसृजसीतिकस्मैकस्मैप्रयोजनायकस्मिन्युगेसंभवसीत्येवंव
दमाणोवासनानुसारेणार्जुनेनप्रश्नःकृतइतिभावः ४

याभगवतिवासुदेवेमनुष्यत्वेना **मधुसूदनीटीका** सर्वज्ञत्वानित्यत्वाशंकामुत्सर्वाणि नामपनेतुमनुवदन्नर्जुन
शंकते अपरमल्पकालीनमिदानींतनंवसुदेवगृहेभवतोजन्मशरीरग्रहणमतिदेवः
हीनंचमनुष्यत्वात् परंबहुकालीनंसर्गादिभवमुत्कृष्टंचदेवत्वाद्वि
वस्वतोजन्म अत्रात्मनोजन्माभावस्यप्राकृतस्यादितत्वाद्देहाभिप्राये
णैवार्जुनस्यप्रश्नःअतःकथमेतद्विजानीयां विरुद्धार्थतयाएतच्छुद्धा
र्थमेवविवृणोतित्वमादौप्रोक्तवानिति त्वमिदानींतनोमनुष्यःसर्वज्ञः
सर्गादौपूर्वतनायसर्वज्ञायादित्यायप्रोक्तवानिति विरुद्धार्थमेतदिति

गी॰
टी॰
च॰

भिप्रायः अत्रायं निर्गलितोऽर्थः एतद्देहानवच्छिन्नस्य तव देहान्तरावच्छि
न्नेन वा आदित्यप्रत्युपदेष्टृत्वं एतद्देहेन वा नाद्यः जन्मान्तरानुभूतस्यासर्वज्ञे
न स्मर्तुमशक्यत्वात् अन्यथा ममापि जन्मान्तरानुभूतस्मरणप्रसंगः तव
च मम च मनुष्यत्वेनाऽसर्वज्ञत्वाविशेषात् तदुक्तमभियुक्तैः जन्मान्तरानु
भूतञ्च न स्मर्यत इति नापि द्वितीयः सर्गादाविदानीन्तनस्य देहस्यासद्भावात्
तदेव देहान्तरेण सर्गादौ सद्भावसंभवेपीदानीन्तनस्मरणानुपपत्तिः अनेन
देहेन स्मरणोपपत्तावपि सर्गादौ सद्भावानुपपत्तिरित्यसर्वज्ञत्वानित्यत्वा
भ्याह्यावर्जुनस्य पूर्वपक्षो ४

सदानंदीटीका

मायातीतोप्यसंगो विमलमतिमतां भावगम्योप्यगम्योयः संकल्पेन लो
कान्विरचयति विभुर्ब्रह्मरुद्रादिनेतुः यस्तिष्ठत्येव महिम्नि स्वपदरतधि
यो भक्तिविद्यादिसिद्ध्यै स्वात्मानं निष्प्रपञ्चं वपुरिव सृजति श्रीपतिं तं प्र
येहं १ वासुदेवे भगवति मूढानामविचारिणां मनुष्यत्वेन जन्मादिशं
कायां तामवार्जुनः २ अपनेतुमनूद्यैवमवाच श्रीपतिं प्रति वसुदेवगृ
हे जन्म भवतस्त्वाधुनातनं ३ सर्गादौ बहुकालीनं जन्मादित्यस्य चक्ष
तं कथमेतद्विजानीयामविरुद्धार्थभावतः ४ त्वमिदानीन्तनस्त्वस्मै स
दौः र्गे प्रोक्तवानिति ४

नीलकंठीटीका

भगवद्देहस्य वसुदेवादुत्पत्तिं मत्वा नोऽर्जुन उवाच अपरमिति अपरं अ
र्वाक्कालिकं परं बहुकालिकं विजानीयां यद्यपि शब्दाद्ययमर्थो ज्ञातस्त
थापि विरुद्धस्य वाक्यस्याबोधकत्वात् कथमेतद्विजानीयामित्युक्तं
पदयोजना स्पष्टा ४

आनंदी टीका

अत्र परमेश्वरस्य भगवतः स्वरूपानभिज्ञ इदं जन्मापेक्षया पूर्वापरविरो
धं पश्यन्नर्जुन उवाच अपरमर्वाचीनमिदानीन्तनं भवतो जन्म विवस्वतः
परं सर्गादिकालीनं ४

रामकंठीटीका

अत एव संजातसंशयोऽर्जुन उवाच अभवस्त्वास्मिन्कलिद्वापरसंधौ
संभूतत्वात् परमपकृष्टं जन्मोत्पत्तिः विवस्वतश्चादिसर्गाद्यावस्थितस्यप
रं प्रकृष्टमिति कथमेतद्बुध्येय त्वमेवं द्युगीनजन्मा सुचिरातीतकाल

जन्मनेप्यस्मैसूर्यायैनंयोगंप्रोक्तवानि[illegible] ४

लासिकी [illegible]टीका

एवंविषयोप्युक्तः भगवत्स्वरूपंजानन्नपिलोकेस्फुटीकर्त्तुमर्जु
नउवाच अपरमिति भवतोजन्मवसुदेवगृहेशरीरग्रहणमपर॰
ानी मिदंनतनमपकृष्टंचमनुष्टत्वात् विवस्वतोजन्मपरंप्राक्कालीनं
सर्गादिभवत्वात् उत्कृष्टंचदेवत्वात् आत्मनोजन्माभावस्यप्राक्
प्रतिपादितत्वाद्देहाभिप्रायेणैवप्रश्नः अतःकथमेतद्विरुद्धार्थंजा
नीयां किमिति त्वमिदानींतनोमनुष्यःसर्गादावादित्याय प्रोक्त
वानिति रूपांतरेणोपदिष्टवानित्यभिप्रायेणोत्तरंश्रीभगवानुवाच ४

पैचोलीटीका

कालादौवर्तमानंविवस्वंतंप्रतीदानींवसुदेवगृहेत्पन्नस्यभग
वतः योगोपदेशोऽनुपपन्नइत्यभिप्रायेणादिपन्नर्जुनउवाच अ
परमिति हेकृष्णत्वमादौप्रोक्तवानितिएतदहंकथंविजानीयां
भगवतोजन्मअपरंअर्वाक्वसुदेवगृहेविवस्वतः जन्मपरंस॰
र्गादौएतत्संगतेनयुक्तार्थंकथंज्ञास्यामि ४

रणवीरसमिद्धोधिनी ॥

अथकालिकविप्रकर्षवशात्सर्गादौविवस्वंतंप्रति कर्मकोपा
ल लक्षणयोगोपदेशमसंभावयन्संजातसंशयोर्जुनउवाच
अपरमिति हेभगवन् भवतोजन्मअपरमस्मिन्कालिद्वापरसं
धौसंभूतत्वात्कालकृतविप्रकर्षविहीनमल्पकालीनमित्यर्थः
विवस्वतश्चजन्मपरंसर्गादौसंभूतत्वात्कालकृतविप्रकर्षविशि
ष्टं अतएवयथाक्रममपकृष्टमुत्कृष्टंचेत्यर्थः एवंचसतित्वमै
दंयुगीनजन्माचिरातीतकालीनजन्मानंविवस्वंतंप्रति आदौस॰
र्गादौइमंयोगंप्रोक्तलक्षणंप्रोक्तवानुपदिष्टवानितिकथमहं
विजानीयांबुद्ध्येयेति संघायानस्यमेप्रत्यायकंप्रमाणंब्रूहीतिभावः ६ ॥

मधुभाष्य
अपरमिति ननर्स्वनादिर्भवानित्यनआह ४॥

भाषा अनुवाद

जव भगवानने ऐसे कहा कि प्रथम हमने सूर्यसे यही कर्मयोग
कहा था तबतो अर्जुन संदेह युक्त होय पूछा किहे महाराज अ
पर कहे इस समय मे तो आपका जन्म भया है और पर कहे पू
र्व काल मे विवस्वान जो सूर्य तिन का जन्म भया था इस से नवी
न जो आप सो प्राचीन सूर्य के प्रति कर्म योग जो कहा यह हम
किस तरह जानैं कि तुमने सूर्य से प्रथम कहा था यह हमे अ
सम्भवासा जानि पडैहै दूसरा अर्थया अपर कहे और भी पूर्व का
ल मे आपका जन्म भयाथा कि सूर्य हो का पर कहे इस समय
मे कोई जन्म भया है नही तो यह आप का कहना असंभव हम
कैसे जानै कितुमने सूर्य से योग कहा है ४

दोहा

तेरो जन्म सो अब भयो पूर्वरविकोज्ञान कैसेंजानो मेयदु
जो पूर्व कह्यो तुम ज्ञान ४॥

19

श्रीभगवानुवाच बहूनि मे व्यतीतानि जन्मानि तव
चार्जुन तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ५

शांकरभाष्यं

यावासुदेवेऽनीश्वरासर्वज्ञाशंका मूर्खाणां तां परिहरन् श्रीभगवा
नुवाच यदर्थो ह्यर्जुनस्य प्रश्नः बहूनीति बहूनि मे मम व्यतीतानि
अतिक्रांतानि जन्मानि तव च हे अर्जुन तान्यहं वेद जाने सर्वाणि न
त्वं वेत्थ न जानीषे परंतप धर्माधर्मादिप्रतिबद्धज्ञानशक्तित्वात् अहं पु
नर्नित्यशुद्धबुद्धमुक्तस्वभावत्वादनावरणज्ञानशक्तिरिति वे
दाहं हे परंतप ५

आनंदगिरिकृतटीका

भगवत्यज्ञानां मनुष्यत्वशंकां वारयितुं प्रतिवचनमवतारयति या
वासुदेव इति अन्यथा प्रश्ने कथमाशंकांतरं परिहर्तुं भगवद्वचनमि
त्याशंक्य प्रतिवचनयोरेकार्थत्वमाह यदर्थो हीति यस्याशंकितस्य
विरोधस्य परिहारार्थः तस्य प्रश्नस्तमेव परिहारं वक्तुं भगवद्वचनमि
त्यर्थः अतीतानेकजन्मवत्त्वं ममैव नासाधारणं किंतु सर्वप्राणिसा
धारणमित्याह तव चेति तानि प्रमाणाभावान्न प्रतिभांतीत्याशंक्याह
तानीति ईश्वरस्यानावृतज्ञानत्वादित्यर्थः किमिति तर्हि तानि मम
न प्रतीयंते तवावृतज्ञानत्वादित्याह न त्वमिति परान्परिकल्प्य
तत्त्वाभिभवार्थप्रवृत्तत्वात्तव ज्ञानावरणं विज्ञेयमित्याह परंतपेति अर्जु
नस्य भगवता सहातीतानेकजन्मवत्त्वेन तुल्यत्वेऽपि ज्ञानवैषम्ये हेतुमाह
धर्मेति आदिशब्देन रागलोभादयो गृह्यंते ईश्वरस्यातीतानागतवर्त
मानसर्वार्थविषयज्ञानत्वे हेतुमाह अहमिति ५

स्वामिकृतटीका

इति पृष्टवंतमर्जुनं रूपांतरेणोपदिष्टवानित्यभिप्रायेणोत्तरं श्रीभग
वानुवाच बहूनीति मम बहूनि जन्मानि तव च व्यतीतानि तानि स
र्वाण्यहं वेद जानामि अलुप्तविद्याशक्तित्वात् त्वं तु न जानासि अवि
द्यावृतत्वात् ५

पैशाचभाष्यं

आत्मनो निरीश्वरतां मूर्खबुद्धिपरिकल्पितां परिहरन्भगवानुवाच ब

गीं टीं वं

ना

हनीति नान्यहं वेद विजानामि अनावरणत्वात् त्वं तु न वेत्थ न जानी
षे अविद्याकामकर्माहतत्वात् ५

रामानुजभाष्यं

परिहरति बहूनीति अनेन जन्मनः सत्यत्वमुक्तं बहूनि मे व्यतीतानि ज
न्मानीति वचनात् तव चेति दृष्टांतोपादानाच्च ५

अभिनवगुप्तकृतटीका ५ नास्ति

परमार्थप्रपाटीका

बहूनि व्यतीतानि व्यतिक्रांतानि तर्हि को विशेष इत्याह तानीति तानि स
र्वाणि जन्मानि अहं वेद त्वं न वेत्थ ज्ञानवान् अयमर्थः मम ईश्वरस्य ज
न्म स्वेच्छाविर्भावमात्रं अत एवालुप्तज्ञानशक्तित्वात् सर्वाणि वेद्मि त्वं जीव
सत्कर्मवशाद्देहधारिणो लुप्तज्ञानशक्तित्वं ज्ञानं प्राक्तनजन्मज्ञानं ५ नभवति

वनमालीटीका

स्वस्य सर्वज्ञत्वं सर्वज्ञप्रमाविषयत्वेन जन्मनां सत्यत्वं प्राच्यामिंदोरिवावि
र्भावमात्रत्वं चाह बहूनीति मम जन्मानि प्राच्यामिंदोरिवाविर्भावलक्ष
णानि बहूनि लोकदृष्ट्या व्यतीतानि न तु वस्तुतः नूतनदेहलाभरूपाणि तानि
सर्वाणि च मदीयानि च वेद जानामि नित्यसर्वज्ञत्वात् त्वं न वेत्थ न जानासि
नित्यसर्वज्ञत्वाभावात् अजो नित्यसच्चिदानंदविग्रहस्यापि जन्म मथ्येक
रसस्य सूर्यादावुपदेशो न विरुद्ध इति भावः ५

कृस्तमवैजयंतीटीका

एवमर्जुनाभिप्रायमाकलय्य सर्वज्ञः सर्वेश्वरो भगवांस्तदुत्तरमाह ब
हूनीति मे मम बहून्यनेकानि जन्मान्यवताराः व्यतीतानि गतानि भवं
ति हेऽर्जुन तव च व्यतीतानि मम च तव च तानि जन्मान्यहं सर्वज्ञो वेद
जानामि यतो मम विद्याशक्तिमत्त्वेन निरावरणज्ञानवत्त्वं हे परंतप शत्रु
तापन तानि जन्मानि त्वं न वेत्थ न जानासि यतस्त्वमविद्याशक्तिमना
यावरणज्ञानवत्त्वं यद्वा तवेत्युपलक्षणं सर्वेषां जीवानां जातित्वेनैकत्वे
नत्वविद्यावच्छिन्नत्वेन एकस्य मोक्षे सर्वमोक्षप्रसंगादेकस्मिन्मुक्ते स
र्वमुक्तत्वप्रसंगाद्धेत्याद्यनेकदोषदूषितत्वात्सर्वैर्निरस्तत्वाच्च जीवस्यैक
त्वं सर्वथानुपपन्नमेवेत्यलं कृतकैः यद्वा एवकारादपि सर्वेषां जीवानां प

ग्रहणं यथातवोपलक्षणाच्चशब्दाहा सर्वेषांजीवानामकर्मपारव
श्येन वहूनिजन्मानिव्यतीतानितथेश्वरस्यममापिभक्तपारवश्यत्व
नस्वेच्छयावावहूनिव्यतीतानि नन्वेवंचेत्तर्ह्यस्माकंजीवानामीश्वरः
स्यनवचकोविशेषइतिचेत्तत्राह सर्वाणीति अहंसर्वेश्वरस्तानिस
र्वाणिवेदत्वंनवेत्थयतीयान्विशेषः सर्ववेत्तृत्वंममैवास्ति ममापेक्षु
याग्रुक्तानामपिजातिस्मरणमपिसिद्धानामपिजीवानामस्पशक्ति
त्वेनाल्पवेत्तृत्वमस्त्येवेत्यर्थः संबोधनाभ्यांयतस्त्वमवदातान्वयःकुरु
णामत्सखोसि यतश्चकामादिशत्रुगणपरंतापनोनिष्कामभक्तो
स्यतपवकंस्त्वयहमजन्मरूपंरहस्यंब्रवीमीतिसूचितं वहूनीत्यनेन
तवचेतिदृष्टांतेनभगवतिजन्मनः सत्यत्वमुक्तं ५

मधुसूदनीटीका

तत्रसर्वज्ञत्वेनप्रथमस्यपरिहारं जन्मानिलीलादेहग्रहणानिलो
कदृष्ट्यभिप्रायेणादित्यस्योदयवन्ममवहूनिव्यतितानितवचाज्ञा
निनः कर्मार्जितानिदेहग्रहणानितवंचत्युपलक्षणमितरेषामपि
जीवानांजीवैक्याभिप्रायेणवा हेअर्जुनेतिश्लेषेणार्जुनहृक्षनाम्ना
संबोधयन्नाहतज्ञानत्वंसूचयति तानिजन्मान्यहंसर्वज्ञःसर्वशक्ति
रीश्वरोवेदजानामिसर्वाणिमदीयानित्वदीयान्यन्यदीयानिच नतु
त्वमज्ञोजीवस्तिरोभूतज्ञानशक्तिर्वेत्थनजानासिस्वीयान्यपिकिं
उतःपरकीयाणि हेपरंतपपरंशत्रुंभेददृष्ट्यापरिकल्प्यहंतुंप्रवृ
त्तोसीतिविपरीतदर्शित्वाद्भ्रांतोसीतिसूचयतितदनेनसंबोधन
द्वयेनावरणविक्षेपौद्वावप्यज्ञानधर्मौदर्शितौ ५

सदानंदीटीका

शंकांपरिहरन्नाहसर्वज्ञःसर्वशक्तिमान् अतिक्रांतानिजन्मानि
स्वेच्छोपात्तवपूंषिमे १ वहूनिपरमेशस्यवासुदेवस्यमहिभोः त
वचाज्ञानिनःकर्मनिर्मितानितथार्जुन २ अर्जुनेतितरोर्नाम्नासूच
यत्याहृतांमतिं तानिजन्मानिसर्वाणिसर्वज्ञोहंमहेश्वरः ३ विजा
नामित्वदीयानिमदीयानीत्यलमहंकः नत्वंवेत्थतिरोभूतज्ञानशा

क्तिनयाज्ञकः ध भेददृष्ट्यापरंशत्रुंपरिकल्प्यत्वमयतः हेतंवि
पर्ययज्ञानवत्वंदित्याशयोहरेः ५ ५

नीलकंठीटीका

स्वदेहस्याजत्वंमायथितंस्वस्यसर्वज्ञत्वंतावदाह वहूनीति स्पष्टो
र्थः श्लोकः ५

आनंदीटीका

आत्मनोनादित्वंसर्वज्ञत्वंसर्वकर्तृत्वंसर्वशक्तिमत्वमीश्वरस्वरू
पमर्जुनंप्रतिप्रकाशयन्भगवानुवाच तानितवचात्मनश्चभूतानि
जन्मानिअहमनादिस्सर्वज्ञोजानामित्वंतुनवेत्सि यद्यज्ञाशिष्योनै
तदवश्योभविष्यइत्यर्थः अतएवपरंतपेतिसंबोधनं ५

रामकंठीटीका

अत्रभगवानुत्तरमुवाच ॥

सत्येममतवचाऽपरिसंख्येयानिजन्मानितत्तच्छरीरपरिग्रहरूपाणिव्यतीता
न्यतिक्रांतानितानिपुनस्तवचात्मनश्चसमस्तान्यवाहंवेदजानामित्वं
तममात्मनश्चन तान्येवजानासि ५

लासिकीटीका

वहूनीति ममवहूनिजन्मानिव्यतीतानि तवचतानिसमस्तानि त
वचात्मनश्चाहं जानाम्यलुप्तविद्याशक्तित्वात् त्वंतुनजानीषेतिरो
भूतज्ञानशक्तित्वात् स्वीयान्यपिनकिंपुनःपरकीयाणि ५ ॥

पंचोलीटीका

स्वात्मन्यजत्वंसर्वज्ञत्वमीश्वरत्वंचआविष्कुर्वन्परिहरतिभगवान्
वहूनीति हेअर्जुनममतवचवहूनिजन्मानिव्यतीतानिअहमना
हृतज्ञानशक्तिः अतस्तानिजानामित्वंधर्माधर्मादिप्रतिवद्धज्ञानश
क्तिः अतस्तानिनजानासि ५

रसावीरसमिद्धोधिनी॥

अथोत्तरंभगवानुवाच बहूनीति ममतव चकारादन्येषामपि
बहून्यपरिसंख्येयानिजन्मानिव्यतीतान्यतिक्रांतानितानिचस
र्वाणिमदीयानित्वदीयान्यन्यदीयानिच अहंसर्वज्ञईश्वरो वेद हे
परंतप पेदंकालीनजन्ममात्रविषयज्ञानवांस्तुत्वंस्वकीयान्यपि
नवेत्थजानासि किंपुनर्मदीयान्यन्यदीयानिवेति विवस्वंतंप्रति
मत्कर्तृक उपदेशोऽयुक्तएवेतिभावः ५॥

मधुभाष्य

५॥

22

भाषा अनुवाद

तबतो श्रीभगवान बोले कि हे अर्जुन हां मैने और जन्म मे उपदेश किया था संदेह न करो हमारे और तुमारे भी बहुत जन्म होय बी ते हे पर उन सब को हम जान तेहैं और तुम नहीं जानते हो क्यो कि हमारी ज्ञानशक्ति जाती नहीं बनी रहती है और तुम अविद्या कहे अज्ञान से आवृत कहे घेरेहो ५

दोहा

भये व्यतीत बहु जन्म हे अर्जुन तोरहुं मोर में जानों तिह सर्व
को पार्थ न जानेको तोहि जोर ५॥

अजोपिसन्नव्ययात्मा भूतानामीश्वरोपिसन् प्रकृ
तिंस्वामधिष्ठायसंभवाम्यात्ममायया ६

शांकरभाष्यं

कथंतर्हितवनित्येश्वरस्य धर्माधर्माभावेपि जन्मेत्युच्यतेअजोपी
ति अजोपिजन्मरहितोऽपि संस्तथाव्ययात्माऽक्षीणज्ञानशक्तिस्व
भावोऽपिसन् तथाभूतानांब्रह्मादिस्तंबपर्यंतानां ईश्वरईशनशीलो
पिसन्प्रकृतिंमायांममवैष्णवीं त्रिगुणात्मिकांयस्यावशेसर्वंजगत्
वर्ततेयया मोहितःसन्स्वमात्मानंवासुदेवंनजानाति तांप्रकृतिंस्वा
मधिष्ठायवशीकृत्यसंभवामिदेहवानिव भवामिजातइवात्ममायया
नपरमार्थतोलोकवत् ६ आनंदगिरिटीका

ईश्वरस्यकारणाभावात् जन्मैवायुक्तमतीतानेकजन्मवत्त्वन्तु दूरोत्
सारितमितिशंकते कथमिति वस्तुतोजन्माभावेपिमायावशाज्जन्म
संभवतीत्युत्तरमाह उच्यतइति परमार्थिकजन्मायोगेकारणंपूर्वार्द्धे
नास्य प्रतिभासिकजन्मसंभवेकारणमाह प्रकृतिमिति प्रकृतिश
ब्दस्य स्वरूपविषयत्वमस्यादेहमात्ममाययेत्युक्तंवस्तुतोजन्माभावे
कारणानुवादभागंविवृणोति अजोपीत्यादिना प्रातिभासिकजन्म
संभवे कारणकथनपरमुत्तरार्द्धं विभजतेप्रकृतिमित्यादिना प्रकृति
शब्दस्यस्वरूपशब्दपर्यायत्वंवारयति मायामितितस्याःस्वातन्त्र्यंनि
राकृत्य भगवदधीनत्वमाह ममेतितस्याश्च अधिकरणद्वारेणवाच्छि
न्नत्व सूचयतिवैष्णवीमिति मायाशब्दस्यापिप्रज्ञानामसुपाठाज्ज्ञा
नशक्तिविषयत्वमाशंक्याह त्रिगुणात्मिकामिति तस्याःकार्यलिंग
कमनुमानं सूचयतियस्याइति जगतोमायावशवर्तित्वमेव स्फुटय
तिययेति यथालोकेकश्चिज्जातोदेहवानालक्ष्यते एवमहमपिमाया
माश्रित्यतया स्ववशयासंभवामितनमायामयमीश्वरस्यजन्मेत्याह
तांप्रकृतिमित्यादिना संभवामीत्युक्तमेव विभजतेदेहवानिवेति अ
स्मदादेरिवतवापिपरमार्थिकत्वाभिमानोजन्मादिविषयेस्यादित्या
शंक्याप्रागुक्तस्वरूपपरिज्ञानवत्वादीश्वरस्यमैवमित्याह नपरमार्थ

गीं
टीं
वं

तइति आवृतज्ञानवतोलोकस्यजन्मादिविषये परमार्थत्वाभिमा
नःसंभवतीत्याह लोकवदिति ॥

स्वामिकृतटीका

नन्वनादेस्तवकुतोजन्मअविनाशिनश्चकथंपुनःपुनर्जन्मयेनबहू
निव्यतीतानिइत्युच्यते ईश्वरस्यचतवपुण्यपापविहीनस्यकथंजीव
वज्जन्मेत्यतआह अजोपीति सत्यमेवंतथापिअजोपिसन्नहं तथाव्य जन्मशून्योपि
यात्मापिअनश्वरस्वभावोपिसन्तथाईश्वरोपिकर्मपारतंत्र्यरहितो
पिसन्स्वमाययासंभवामि सम्यगप्रच्युतज्ञानबलवीर्यादिशक्त्यैवा
भवामि ननु तथापिषोडशकलात्मकलिंगशून्यस्यतवकुतोजन्मे देह
त्यतःउक्तं स्वांशुद्धसत्वात्मिकांप्रकृतिमधिष्ठायस्वीकृत्यविशुद्धोर्जि
तसत्वमूर्त्यास्वेच्छयाअवतरामीत्यर्थः ॥

पिशाचभाष्यं

कथंतर्हितवनित्येश्वरस्यधर्माधर्माभावेजन्मेत्यर्जुनस्यप्रश्नेसतिभग
वान् अजोपिजन्मरहितोपिसन्अव्ययात्माअनुपक्षीणज्ञानशक्तिस्व
भावः भूतानामाब्रह्मस्तंभपर्यंतानामीश्वरः ईशनशीलोपिप्रकृ
तिंममवैष्णवींमायांत्रिगुणात्मिकांयस्यावशेसर्वंजगद्वर्ततेययामो
हितंस्वमात्मानंवासुदेवंमानजानाति तांप्रकृतिंस्वामधिष्ठायस्वीकृ
त्यसंभवामिदेहवानिवजातइवचभवामिआत्ममाययाआत्मनोमा
ययानपरमार्थतोलोकवत् ॥

रामानुजभाष्यं

आत्मनोवतारप्रकारंदेहयाथात्म्यंजन्महेतुंचाह अजोपीति अ
जत्वाव्ययत्वसर्वेश्वरत्वप्रकारमजहदेवस्वांप्रकृतिमधिष्ठायात्ममा
ययासंभवामि प्रकृतिःस्वभावःस्वमेवस्वभावमधिष्ठायस्वेनैवरू
पेणस्वेच्छयासंभवामीत्यर्थः स्वरूपंतुआदित्यवर्णंतमसःपर
स्तात् भूयतमसस्यरजसःपराकेमएषोंतरादित्येहिरण्मयःस्तस्मि
न्नयंपुरुषोमयामृतोहिरण्मयः सर्वेनिमेषाजज्ञिरेविद्युतःपुरुषा
दधिभारूपसत्यसंकल्पआकाशात्मासर्वकामसर्वगंधसर्वरस
महारजतंवासइत्यादिश्रुतिसिद्धआत्ममायया आत्मज्ञानेनमा

यावयुनं ज्ञानमिति ज्ञानपर्यायोऽत्र मायाशब्दः तथा चाभियुक्तप्रयो
गः मायया सततं वेत्ति प्राचीनानां शुभाशुभमिति आत्मीयेन ज्ञाना
त्मा संकल्पेनेत्यर्थः अतोऽपहतपाप्मादिसमस्तकल्याणगुणात्म
कत्वं सर्वमैश्वरस्वभावमजहदेव स्वमेव रूपं देवमनुष्यादिसजाती
यसंस्थानं कुर्वन्नात्मसंकल्पेन देवादिरूपं संभवामीति तदिदमाह
अजायमानो बहुधा विजायत इति श्रुतिः इतरपुरुषसाधारणज
न्माकुर्वन्देवादिरूपेण स्वसंकल्पेनोक्तप्रकारेण जायत इत्यर्थः बहूनि
मे तान्यहं वेद तदात्मानं सृजाम्यहं जन्म कर्म च मे दिव्यमेवं यो वेत्ति
तत्त्वत इति पूर्वापराविरोधाच्च ६

अभिनवगुप्तकृतटीका ६ नास्ति

परमार्थप्रपाटीका

अथ स्वेश्वरत्वं प्रकटयन्नाह अजोऽपीति अजो उत्पत्तिधर्मा अव्य
योऽविनाशधर्मा भूतानामीश्वरः कर्मपारतन्त्र्यरहितः सन्नपि संभवामि
सम्यक्प्रकारेणालेपसर्वज्ञत्वादिगुणः सन्भवामि ननु ईश्वरत्वे
लिंगदेहादिशून्यस्य कथं जन्मेत्याह प्रकृतिमिति स्वां स्वस्मिन्नध्य
स्तां शुद्धसत्त्वात्मिकां प्रकृतिमवष्टभ्याधिष्ठाय स्वेच्छाविर्भूतशुद्धस
त्त्वात्मकमूर्त्या आविर्भवामि तदुक्तं सतो हि मायया जन्म जायते तेन त
त्त्वतः असतो मायया जन्म तत्त्वतो न हि युज्यते वन्ध्यापुत्रो न तत्त्वेन
मायया वापि जायत इति ६

वनमालीटीका

स्वावतारप्रकारं विग्रहयाथात्म्यमवतारहेतुं चाह अजोऽपीति अ
जोऽपि सन्नुत्पत्तिरहित एव सन्नव्ययः आत्मा देहो यस्य सः भूतानां प्रा
णिनां च ब्रह्मादिस्तंबपर्यंतानामीश्वरोऽपि स्वां प्रकृतिं सर्वनियंतृ
त्वादिस्वभावमधिष्ठाय अजहदेवात्ममायया स्वीयसर्वविषयकज्ञा
नेन सह संभवाम्याविर्भवामि मायावयुनं ज्ञानमिति वचनात् मा
यया कृपया वा माया कृपायां दंभे चेति कोषात् सदेकरससच्चिदा
नंदघनविग्रहाभिन्नोऽहं स्वस्वरूपे स्थित एव प्राच्यामिंदुरिवाविर्भवा
मीत्यर्थः न च न विग्रहस्य नित्यत्वे मानाभावः आदित्यवर्णं तमसः प

गी॰ रस्तात् यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं तदा विद्वान्पुण्यपापे विधू
टी॰ य निरंजनः परमं साम्यमुपैति प्रकृष्टं कृत्स्नपिंगले विश्वतश्चक्षुः सहस्र॰
च॰ शीर्षा पुरुषः सहस्राक्षः सहस्रपादित्यादीनामुक्तश्रुतित्वात् तमसः पदवाच्य
प्रकृति परत्वबोधकश्रुतीनां मानत्वात् पश्य मे पार्थ रूपाणि शतशो
ऽथ सहस्रशः सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखमिति वक्ष्यमाण
त्वाच्च न चादित्यवर्णमित्यस्य स्वप्रकाशं विद्याविलक्षणस्वरूपतया पा॰
स्यपरतया चोपपत्तिः त्वदभिमतनिराकारस्वरूपं वर्णयदाद्यसंगतेः
तमसः परस्तादित्याद्युक्तस्य तमसः प्रकृतेः परत्वस्योपास्यसंभवात्
य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते इत्यत्र वर्तमानत्वेनाप …
विषयत्वोक्तेः न हि योषित्यायित्वं दृश्यत इत्युक्त्या … ज्ञाजि
पादिना सर्वात्मकतया सर्वनियामकतया च ब्रह्म …
त्वाद्युक्तिः नियम्यदुःखित्वशोकित्वादिना दुःखितादि …
च सर्वतः पाणिपादत्वाद्यसंभवः एकैकावयवे सर्वावयवकार्ये …
णसामर्थ्यपरत्वात् न च पादाद्यभिन्नविग्रहस्य व्यापकत्वे देशविशेषा
वच्छेदेन परमपुरुषकैर्गम्यत्वप्रवेष्टृत्वादेश्चोक्तिः संगतेति वाच्यं निःशेषा॰
विद्यानिहत्यर्थं हि प्रकृतेः परस्य देशस्य प्राप्तिरुच्यते न चैवात्रापि तस्य स॰
विग्रहवत्त्वस्य सामर्थ्यं तत्राणुत्वादनेन शक्तिस्वीकारेण प्रवेष्टृत्वोपप
त्तेः अन्यत्र सर्वगते प्रतिव्यक्तिसमाप्त्यभावेपि गोत्वादिजातावेकारणादि
रूपव्यक्तिरिति मते रूपादिरूपे च प्रतिव्यक्तिसमाप्तिवदन्यत्र सर्वगतेऽणु
त्वक्रिययोरभावेपि प्रमाणबलाद्ब्रह्मण्युभयमस्ति अतोंतर्यामितया नि
यम्यप्रवेशः सूपपन्नः न चाणुत्वमहत्त्वयोरेकत्र विरोधः अचिंत्यशक्त्या
विरोधपरिहारात् न चैवमज्ञत्वदुःखित्वादिकमपि तत्र स्यात् ऐश्वर्यावि
रोधिनां अणोरणीयान्महतो महीयानित्यादिश्रुत्युक्तानां तत्र समावेशो
ऽपि न हि विरोधिनां दुःखित्वादीनां समावेशासंभवात् अनंतब्रह्मांडानि स॰
त्वातिमलोकपालानि स्वाकरथ्यादौ स्थितस्य मुखे पश्यतोर्यशोदार्जु
नादीनां प्रत्यक्षस्यापि तत्र मानत्वात् न हि दिव्यं ददामि ते चक्षुरिति वद
ता परमात्मनैन्द्रजालिकवन्मायां प्रदर्श्य स्वैकशरणाः प्रतारणीयाः षो॰
डशसहस्रादिसंख्याकानां विवाहः प्रतिगृहमेकस्मिन्नेव मुहूर्ते वसुदे॰
वादीनां स्वस्य वानेकत्ववदेकस्याचिंत्यमहिम्नोऽनेकरूपत्वोपपत्तेः न च प

शपन्यवद्वंशूराणात्मकगण इति विरोधः चक्षुरादिभिन्नावयवस्यापि चक्षु
रादिकार्यकरत्वोक्तेः एतत्मयोक्तं नरदेवतत्त्वं नारायणो विश्वमिदं पु
राणः स सर्गकाले च करोति सर्गं संहारकाले च संहरति भूयः संहृत्य सर्वं
निजदेहसंस्थं कृत्वाप्सु शेते जगदंतरात्मेति प्रलयेपि विग्रहवत्त्वसत्त्वो
क्तेश्च वेदेषु विप्रयोन्वयणायोगाद्वशार्ङ्गिणा तस्मिन्नेव ब्रह्मशब्दो मुख्य
तो महात्मनेयास्मिन् प्रयुज्यमाने त्वगुणयोगः स पुष्कलः तत्रैव मुख्यवृत्
तोयमन्यत्रोप चारत इति गारुडे विग्रहस्यैव मुख्यब्रह्मशब्दार्थत्वमुक्तं वे
दाहमेतं पुरुषं महांतमादित्यवर्णं तमसस्तु पारे तमेव विद्वानमृत इह भ
ती[illegible]ः पंथा विद्यते अयनायेत्यादिना विग्रहस्य महत्त्वमुक्तं तेय
[illegible]कमयः प्राकृतः सहस्रशीर्षेत्यादिना विग्रह
[illegible]स्य विश्वाभूतानि त्रिपादस्यामृतं दिवीति सर्वभू
[illegible]देशाश्रयत्वं तस्य नित्यत्वादिकं चोपदिष्टमनंतरं तस्माद्वि
राडजायतेति त्रैलोक्यशरीरस्य विराजस्तत उत्पत्तिरुक्ता न चापाणिपाद
इत्यादिश्रुतिविरोधः प्राकृतपाणिपादादेरेव निषेधात् अन्यथा सर्वमित्या
दिना सर्वत्वरूपत्वस्यापि निषेधापत्तेः नाभ्या आसीदंतरीक्षमित्यादिना
विग्रहस्य भूतकारणत्वोक्तेः न च नाभित्वादिकल्पनया विराड्रूपमेवोक्तं
तमसः परस्तादिति प्रकृतेः परत्वोक्तेः विराजः प्रकृतिकार्यत्वात् एको
नारायण आसीन्न ब्रह्मा न च शंकर इति प्रलयेपि विग्रहसत्त्वोक्तेः न च ना
रायणपदं मायोपहितपरं न ब्रह्मेत्यादिनिषेधासंगतेः मायोपहितत्वस्य
शंकरादिसाधारणत्वात् नारायणपदस्य विग्रहविशेषविशिष्टे योगरू
ढत्वाच्च पुराकल्पापाये स्वकृतमुदरीकृत्य शेते इति श्रुतौ प्रलयेपि वि
ग्रहसत्त्वोक्तेः सर्वे नित्याः शाश्वताश्च देहास्तस्य महात्मनः परमानंदसंदो
हाज्ञानमात्राश्च सर्वशः इति श्रुत्या नित्यत्वाद्युक्तेश्च आनंदरूप[illegible]मम
नेत्याद्विभा[illegible]श्राप्रणावात्मसर्वपवानंद इत्यादिश्रुतेश्च स्वरूपविग्रहयोर्भे
दाभावेप्यहिकुंडलन्यायेन भेदप्रतिनिधिना विशेषशक्तिविशेषेण भे
दव्यवहारोपपत्तेः विचित्रशक्तिः पुरुषः पुराण इति श्रुतेः आत्मनि चैवं वि
चित्राश्च हीति सूत्राच्च न च श्रुतशक्तिमात्रेण विग्रहसिद्धौ ब्रह्मैवेदं सर्वमि
त्यादिना प्रपंचस्य ब्रह्मरूपतापि स्यादिति वाच्यं प्रपंचस्य ब्रह्मरूपत्वे प्रत्य

गी॰
टी॰
च॰

त्वादिविरोधःस्वकृतेविरोधाभावात् नचपशुपत्यवद्वैरीत्याद्युक्तदा
षंनप्रतिकर्तृत्वानुपपत्तिरीशस्यजन्यज्ञानानंगीकारादितिवाच्यंनि
त्यप्रत्यपितेनसाधारणकर्तृतायाःसंभवात् पुत्रभगवद्विग्रहोन
नित्योमहत्वेसतिरूपवत्वाद्विग्रहत्वात्सावयवत्वादस्मद्विग्रहवदिति
25 गौडाधमप्रलपितंतत्र प्राकृतत्वस्योपाधित्वात् नचोपाधिःसाधन
व्यापकःभगवद्विग्रहेप्रकृतिकार्यत्वरूपसाधनत्वस्याप्रकृतत्वादिबा
धितत्वात् ईश्वरस्यादृष्टभोगाद्यभावेनजन्यविग्रहवत्वेमानाभावात्
अप्रामाणिकध्वंसप्रागभावकल्पनागौरवाच्चयदयोब्रह्मपरंविश्वधि प्र॰
ष्ठपयमनन्ताजलफणासहस्रमालासंवलभंददर्शसः तस्योत्संगे
घनश्यामभातात्मायतलोचनं चतुर्भुजंउदारांगचक्राद्यायुधभू
षितंइतिपरब्रह्मणःसमाधिविषयेरूपमुक्तावलिहोलीनथाक्रूरःप्र
त्यभिज्ञायविस्मितइतिमूलविग्रहावतारविग्रहयोरभेदमुक्तोवै
श्चवे भारतेच हरिंसहस्रशीर्षंसहस्रवदनेक्षणं प्राङ्नारायणं
देवंयंविश्वस्यपरायणं यवाक्येचवाक्येषूपनिषत्स्वपनिषत्स्वच गृ
णांतिविश्वकर्माणंसत्यंसत्येषुकर्मसु यंदेवंदेवकीदेवीवसुदेवाद
जीजनत् भौमस्यब्रह्मणोगुप्त्यैदीप्तमग्निमिवारणिः महतस्तमसः
पारेपुरुषंशाश्वतंहरिं यंज्ञात्वामृत्युमत्येतितस्मैज्ञानात्मनेनमः इ
तिविग्रहविशिष्टज्ञानात्मोक्तः यस्याग्निरास्यंद्यौर्मूर्धाखंनाभिश्चरणौ
क्षितिः सूर्यश्चक्षुर्दिशःश्रोत्रंतस्मैलोकात्मनेनमः इतिलोकमयंप्रा
कृतविग्रहमुक्त्वानच्चपश्यामितत्त्वेनयज्ञरूपसनातनं योस्त्वया
क्षीरसाब्धिमापन्नोदेवीवसंश्रया विक्रमेणत्रयोलोकाःपुरुषोसिस
नातन अतसीपुष्पसंकाशंपीतवाससमच्युतं येनमस्यंतिगोवि
दंनतेषांविद्यतेभयमितिवैप्राकृतोविग्रहउक्तः यतेनत्वयानवित्तेयं
रूपवानितिदृश्यतेमायाह्येषामयासृष्टायन्मांपश्यसिनारदेतिना
रायणीयंवाक्यं तस्मायंरूपवानितिहेतोर्मयावक्तुमाहृश्यतइतित्व
यानवित्तेयंनहीन्द्रियप्रकाशकस्तज्ज्ञोवशोभवति किंतमयैषामाया
कृपासृष्टाप्रकटीकृतायद्यथामांपश्यसीत्यर्थः मायाकृपायांदंभे
चेतिकोषात् यमेवैषवृणुतेतेनैवलभ्यइतिश्रुतेः यन्मामन्त्ररही

नोस्मियन्नेदृष्टः स्वयंप्रभुः नहितंदृष्टवान्कश्चित्पद्मयोनिरपिस्वयं
मायैतद्धिनामरूपंवचनंसमुदाहृतं नास्यभक्तोस्तितत्परोलोकेक
श्चनविद्यतेइतितत्रैवश्रीविग्रहदर्शनस्यदुर्लभत्वोक्तेः यत्तुभगव
द्विग्रहेत्तनरुधिरादिकंविग्रहत्यागादिकंकविस्मरणादौप्रतीय॰
तेतत्त्वसुराणांव्यामोहायभगवतामायाप्रदर्श्यते किंचशरीरे॰
स्त्वगात्यज्यनेव यत्रबालकौमाराद्यवस्था प्रदर्शनेमात्रसीयानां
स्वास्मिन्ननुरागोत्पादनायकृपाख्यामाया नहिलोकेयादृशोनुरा
गः पुत्रादौस्वाभाविकोभवतितादृशः स्वनियामकेराज्ञिभवति
निखिलनिगमगीतेश्रीहरेर्विग्रहयोनौ सदसितगुणसिंधौहेयवृ
न्येसदेह प्रलपतियदकांडेदूषणाभासवृंदैः सुगतपशुरूपे॰
स्पादेस्त्यप्रायः सविशेषः १ प्रथममवदद्भेर्दूषणाभाससंघात
पुषिमुररिपोः पश्चात्तूजानानिकस्मात् परमितिमुरलीफकाय
त्यीनवस्त्रात्सहरविग्रहरूपेद्यावचकः सर्वविशेषः २

ऊस्तुभवेजयंतीटीका

ननुजीवानामिवममापिबहूनिजन्मानिव्यतीतानीतितवोक्तिस्त
ममाः यच्चितेवाभातियतोजस्यतवैकमपिजन्मनसंभवतिबहू॰
नीतितुकथमुपपद्यतेऽजत्वहानेः यथाकथंचिद्वेतत्संभवेपिपूर्व
देहत्यागादेवापरस्यदेहस्यप्राप्तिर्जन्मशब्देनोच्यतेननुजीवस्यवा॰
संभवतिनत्वव्ययात्माऽव्ययदेहस्तस्यासकृद्देहत्यागग्रहणासं॰
भवात्कथंचशुभाशुभकर्मभिरेवदेहोत्पत्तिर्देहप्राप्तिश्चापिस्यात्त
न्नत्वय्यनुपपन्नं यतस्त्वंभूतानामीश्वरोसि यत्रसर्वजीवतियत्रस्त
वपुण्यापुण्यादिकर्मजन्यदेहप्राप्तेरसंभवस्तस्मात्तवकिंप्रकार॰
कोवतारः किमाकारोवादेहः कोवाजन्महेतुरितित्वंवदेत्यपेक्षा
यामवतारप्रकारादिकंप्रश्नत्रयमाह अजोपीति अजोपिसञ्जन्म
रहितोपिसन्नव्ययात्मापिसन् व्ययोविनाशोनव्ययोयस्यत्यव्ययोऽ
वायोः विनाशआत्मादेहोयस्यसतथाऽविनाशदेहोपिसन्भूतानां
ब्रह्मादिस्तंबपर्यंतानामीश्वरोपिसन्नियंतापिसन् शुभाशुभकर्म
रहितोपिसन् नतदजत्वाव्ययत्वेश्वरत्वादिसकलहेयप्रतिभटका॰

गी॰
टी॰
व॰

26

त्वानाद्यनंतगुणाश्रयत्वसर्वज्ञत्वानंतशक्तित्वाः अपहतपाप्मत्वनिर्दो-
षत्वसर्वशरण्यत्वसर्वनियन्तृत्वतेजस्त्वबलत्वादिपारमैश्वर्यरूपप्र-
कारमत्यजन्नेवाहं य एषोंतरादित्ये हिरण्मयः सर्वे निमिषाजज्ञिरे विद्यु-
तः पुरुषादधि भारूपः सत्यकामः सत्यसंकल्पः आकाशात्मा सर्वकामः
सर्वगंधः सर्वरसो हिरण्यकेशो हिरण्यश्मश्रुः आप्रणखात्सुवर्णः म-
हारजतं वासः आदित्यवर्णं तमसः परस्तात् क्षयं तमसा रजसः पराके
इत्यादिश्रुतिनिरूपितां स्वां स्वकीयां प्रकृतिं स्वभावं स्वरूपमित्यर्थः सं-
सिद्धिप्रकृतीत्विमे स्वरूपं च स्वभावश्च निसर्गश्चेत्यमरकोशात् अधिष्ठा-
यावलंब्य स्वस्वरूपेणेत्यर्थः आत्ममायया आत्मज्ञानेन स्वसंकल्पेनैव मा-
यावयुनं ज्ञानमिति यैडुककोशात् मायया सततं वेत्ति प्राचीनं च शुभाशु-
भमिति स्मृतेश्च मायाशब्दोऽत्र ज्ञानपरः संभवामि स्वेच्छया विर्भवामि
अजोपि सन्नित्यनेनापूर्वप्राकृतदेहप्राप्तिर्निराकृता अव्ययात्मेत्यने-
न विद्यमाननित्यदिव्यदेहत्यागोपि निराकृतः भूतानामीश्वरोपीत्यने-
न च पुण्यापुण्यकर्मसंबंधोपि हरीकृतः अजोपि सन्नित्यादि समस्त-
पदत्रयेणावतारस्य प्रकारो दर्शितः प्रकृतिं स्वामधिष्ठायेत्यनेन स्व-
स्याप्राकृतविग्रहत्वं सूचितं आत्ममाययेत्यनेन च स्वस्य जन्महेतुर्गु-
नितः एवमपि सकलशङ्कणशक्तिमतो भगवतो ममान्यानपि गुण-
पुरुषलीलावेशकलांशपूर्णादीनवतारानपि त्वं जानीहीत्याशयः ६

मधुसूदनीटीका

नन्वतीतानेकजन्मवत्त्वमात्मनः स्मरसि चेन्नहि जातिस्मरो जीवस्त्वं पर-
जन्मज्ञानमपि योगिनः सर्वात्माभिमानेन शास्त्रदृष्ट्यातूपदेशो वामदेव-
वदिति न्यायेन संभवति तथा चाह वामदेवो जीवोप्यहं मनुरभवं सू-
अनेकजन्मस्मरणं ५ र्यश्चाहं कक्षीवानृषिरस्मि विप्र इत्यादि दाशतय्यां अतएव न मुख्यः स-
र्वज्ञस्त्वं तथा च कथं मामादित्यं सर्वज्ञमुपदिष्टवान् त्वं अनीश्वरः सन् न-
हि जीवस्य मुख्यं सार्वज्ञ्यं संभवति व्यष्ट्युपाधेः परिच्छिन्नत्वेन सर्वसंबंधि-
त्वाभावात् समष्ट्युपाधेरपि विराजः स्थूलभूतोपाधित्वेन सूक्ष्मभूतपरि-
णामविषयं मायापरिणामविषयं च ज्ञानं न संभवति एवं सूक्ष्मभूतो-
पाधेरपि हिरण्यगर्भस्य तत्कारणमायापरिणामाकाशादिसर्गक्रमा

दिविषयज्ञानाभावः सिद्ध एव तस्मादीश्वर एव कारणोपाधित्वाद-
तीतानागतवर्त्तमानसर्वार्थविषयज्ञानवान् अयम् सर्वज्ञः अतीता-
नागतवर्त्तमानविषयं मायावृत्तित्रयमेकैव वा सर्वविषया मायावृत्ति-
रित्यन्यत् तस्य चानित्येश्वरस्य सर्वज्ञस्य धर्माधर्माद्यभावेन जन्मैवानु-
पपन्नमतीतानेकजन्मवत्त्वं तु दूरोत्सारितमेव तथा च जीवत्वे सर्व-
ज्ञत्वानुपपत्तिरीश्वरत्वे च देहग्रहणानुपपत्तिरिति शंकाद्वयं परिहरन् नि- ५
त्यत्वपक्षस्यापि परिहारमाह ॥ अपूर्वदेहेंद्रियादिग्रहणं जन्म पूर्व-
गृहीतदेहेंद्रियादिवियोगो व्ययः तदुभयं तार्किकैः प्रेत्यभाव इत्युच्यते
तदुक्तं ज्ञानस्याहिफवो मृत्वार्भवे जन्ममृतस्येति तदुभयं धर्माधर्म-
वशाद्भवति धर्माधर्मवश्यत्वं चास्य जीवस्य देहाभिमानिनः क-
र्माधिकारित्वाद्भवति तत्र यदुच्यते सर्वज्ञेश्वरस्य सर्वकारणस्य सूक्ष्म-
हः देहग्रहणं नोपपद्यत इति तन्नैव कथं यदि तस्य शरीरं स्थूलभूतकार्यं
स्यात्तदा व्यष्टिरूपत्वे न जाग्रदवस्थास्मदादिवत्त्वे स्वप्नावस्थासंपन्ने
तुल्यत्वात् रस्मदादिभिर्जीवैः समष्टिरूपत्वे च हिरण्यगर्भजीवत्वं तस्य तदुपाधि-
त्वात् तथा च भौतिकशरीरं जीवानाविष्टं परमेश्वरस्य न संभवत्येवेति
सिद्धं न च जीवाविष्टतादृशशरीरे तस्य भूतावेशवदावेश इति वाच्यं
तच्छरीरावच्छेदेन तज्जीवस्य भोगाभ्युपगमे तर्यामिरूपेण सर्वशरीर
प्रवेशस्य विद्यमानत्वेन शरीरविशेषाभ्युपगमवैयर्थ्यात् भोगाभा-
वे च जीवशरीरत्वानुपपत्तेः अतो न भौतिकं शरीरमीश्वरस्येति पूर्वार्धे-
नांगीकरोति अजोपि सन्नव्ययात्मा भूतानामीश्वरोपि सन्निति अजो-
पि सन्निति अपूर्वदेहग्रहणं अव्ययात्मापि सन्निति पूर्वदेहविच्छेद
भूतानां भवनधर्माणां सर्वेषां ब्रह्मादिस्तंबपर्यंतानामीश्वरोपि सन्नि-
ति धर्माधर्मवशत्वं निवारयति कथं तर्हि देहग्रहणमित्युत्तरार्धेना-
ह प्रकृतिं स्वामधिष्ठाय संभवामि प्रकृतिं मायाख्यां विचित्रानेकश-
क्तिमघटमानघटनापटीयसीं स्वां स्वोपाधिभूतामधिष्ठाय चिदाभा-
सेन वशीकृत्य संभवामि तत्परिणामविशेषैरेव देहवानिव जात इ-
व भवामि अनादिमायैव मदुपाधिभूता यावत्कालस्थायित्वेन च नि-
त्या जगत्कारणत्वसंपादिका मदिच्छयैव प्रवर्त्तमाना विशुद्धसत्त्वमयत्वे

समष्टित्वेन विराड्जीवत्वं तस्य तदुपाधित्वात् पृथक्स्थूलभूतकार्यम् तदा व्यष्टिरूपत्वे च

गीं॰ टीं॰ चं॰

नममर्त्तिमत्वहिशिष्टस्यवाजत्वमव्ययत्वमीश्वरत्वंचोपपन्नं अतोने
नतित्यनैवदेहेनविवस्वंतेचत्वांचप्रतीमंयोगमुपदिष्टवानहमित्युप॰
पन्नं तथाचश्रुतिः आकाशशरीरंब्रह्मेति आकाशोत्राव्याकृतंआ॰
काशएववत्दीप्तंचप्रोक्तंचेत्यादौतथादर्शनात् आकाशस्तल्लिंगादिति
न्यायाच्च नहिभौतिकविग्रहाभावात्तद्धर्ममनुष्यत्वादिप्रतीतिःकथमि
तिचेत्तत्राह आत्ममाययेति मन्माययैवमयिमनुष्यत्वादिप्रतीतिर्लो
कानुग्रहायनतुवस्तुवृत्त्येतिभावः तथाचोक्तंमोक्षधर्मे मायाह्येषा
मयासृष्टायन्मांपश्यसिनारद सर्वभूतगुणैर्युक्तंनतुमांद्रष्टुमर्हसी
ति सर्वभूतगुणैर्युक्तंकारणोपाधिमाचर्मचक्षुषाद्रष्टुंनार्हसीत्यर्थः
उक्तंभगवताभाष्यकारेण सचभगवान्ज्ञानैश्वर्यशक्तिबलवीर्यते
जोभिः सदासम्पन्नस्त्रिगुणात्मिकांवैष्णवींस्वांमायांप्रकृतिंवशीकृ॰
त्य अजोऽव्ययोभूतानामीश्वरोनित्यशुद्धमुक्तस्वभावोपिसन्स्वमायया
देहवानिवजातइवलोकानुग्रहंकुर्वन्नलक्ष्यते स्वप्रयोजनाभावेपि॰
लोकाननुजिघृक्षयेति व्याख्यातृभिश्चोक्तं स्वेच्छाविनिर्मितेनमाया॰
मयेनदिव्येनरूपेणसंबभूवेति नित्योयःकारणोपाधिर्मायाख्योने॰
कशक्तिमान् सएवभगवद्देहइतिभाष्यकृतांमतं अन्येतुपरमेश्व
रेदेहदेहिभावनमन्यंतेकिंतुयश्चनित्योविभुः सच्चिदानंदघनोभग
वान्वासुदेवःपरिपूर्णोनिर्गुणःपरमात्मासएवतद्विग्रहोनान्यःक
श्चिद्भूतभौतिकोमायिकोवेति अस्मिन्पक्षेयोजना आकाशवत्सर्व
गतश्चनित्यअविनाशीवा अरेयमात्मानुच्छित्तिधर्मेत्यादिश्रुतेः
असंभवस्तुसतोनुपपत्तेः नात्मश्रुतेर्नित्यत्वाच्चताभ्यइत्यादिन्यायाच्च णा॰
वस्तुगत्याजन्मविनाशरहितःसर्वभासकःसर्वकारणमायाधिष्ठा
नत्वेनसर्वभूतेश्वरोपिसन्नहं प्रकृतिंस्वभावंसच्चिदानंदघनैकरसंमा
यांव्यावर्तयतिस्वामितिनिजस्वरूपमित्यर्थःसभगवान्कस्मिन्प्रति
ष्ठितःस्वेमहिम्निइतिश्रुतेः स्वस्वरूपमधिष्ठायस्वरूपावस्थितएवस
न्संभवामि देहदेहिभावमंतरेणैवदेहिवद्व्यवहरामि कथंतर्हिदेह
सच्चिदानंदघनेदेहित्वप्रतीतिरतआह आत्ममाययेतिनिर्गुणेशुद्धे
सच्चिदानंदैकरसघनेमयिभगवतिवासुदेवेदेहदेहिभावस्त्वप्रत॰

रूपेणाभीतीतिर्मायामात्रमित्यर्थः तदुक्तं कस्मेनमेवेहित्वमा
त्मानमखिलात्मनांजगद्धितायसोप्यत्रदेहीवाभातिमाययेति अहो
भाग्यमहोभाग्यंनंदगोपव्रजौकसां यन्मित्रंपरमानंदंपूर्णंब्रह्मसना
तनमिति केचित्तुनित्यस्यनिरवयवस्यनिर्विकारस्यापिपरमानंदस्या
२४ वयवावयविभावंवास्तवमेवेच्छंतितेनिर्युक्तिकंत्ववार्णस्तुनास्माभिर्वि
निवार्यतइतिन्यायेननापवाद्याःयदिसंभवेत्तथैवास्तुकिमतिपल्लवि
तेनेत्युपरम्यते [illegible]
[illegible] १

सदानंदीटीका

सर्वज्ञस्यतवेशस्यधर्माधर्माद्यभावतः जन्मैवासंभविस्वामिन्कुत
स्तेवंध्याजनिः १ इत्यत्राहचिदानंदकंदलःश्रीरमापतिः अपूर्वदेह
संबंधोजन्मतद्वर्जितोप्यहं २ पूर्वदेहस्यविच्छेदोव्ययस्तद्रहितोपि
सन् ब्रह्मादीनांचभूतानांसर्वेषामीश्वरोपिसन् ३ विचित्रानेकश
क्त्याख्यामायाख्याप्रकृतिस्त्विका स्वापाधिभूतामत्यंतसंभावितप्र
दर्शिनी ४ चिच्छाययावशीकृत्यस्यामहंदेहवानिव अजातोजा
तइवचस्वेच्छयास्वात्ममायया ५ वेत्सवीममायेयंमत्रघात्वादि
नाटने लोकस्यानुग्रहायैववस्तुवृत्त्याननन्मयि ६ मायाह्येषा
मयासृष्टायन्मापश्यसिनारद सर्वभूतगुणैर्युक्तंनतुमांद्रष्टुमर्ह
सि ७ मोक्षधर्मोक्तरीत्यापिवस्तुतोहंनिराकृतिः यस्याविद्याद्य
संबंधोजन्मनस्यैवसुज्यते ८ निरवियस्यशुद्धस्यकथंभूतमयंवपु
ः नचैवोक्तंपुराणेपिब्रह्मांडाख्यमहर्षिणा ९ स्त्रीपुंसोस्तुप्रयो
गात्मादेहोनास्यविजायते किंतुनिर्दोषचेतन्यस्तुबनिर्माणस्त्विकात
ं ३ १० प्रकाशयतिसैवेयंजनिर्विष्णोनचापरा निमित्तायःकारणोपा
धिर्मायाख्यानेकशक्तिमान् ११ सएवभगवद्देहइतिभाष्यकृता
मतं अन्यत्वाकृतिर्नैवास्तिदेहदेहिभिदाहरेः १२ किंतुसंडचिदानंद
घनोयोविभुरव्ययः निर्गुणोनित्यपूर्णात्माविग्रहोस्यसएवहि १३
भौतिकोमायिकोवास्यनास्तिदेहोहरेर्विभोः अतएवाहसर्वविस्तर
जइत्यादिकागिरः १४ आकाशवत्सर्वगतोनित्यइत्यादिवेदतः प्र

श्रितं स्वस्वरूपमधिष्ठाय स्वस्वरूपे ह्यवस्थितः १६ देहेष्वहं विहरामीशो देहदेहिभिदोज्झितः १७ स्वतः स्वच्छे बोधे
विगलितमहामोहतिमिरे मयीशे जन्मादेर्न भवति कदाचापि कलना स भक्तोद्धारार्थं स्वयमहमजोप्यात्मकलया
चिदानन्दाकारं वपुरिव सृजामीत्यममलम् १८ ॥ ६

कृतिं स्वां चिदानंदस्वभावं प्रकृतेः परं १५ ६ [illegible] संनित्यं स्वे महिम्नि प्रति

गी॰ टी॰ ३

26

नीलकंठीटीका

किंतर्हि योगिनां सर्वज्ञत्वप्रसिद्धेस्त्वं जातिस्मरो जीवोसीत्याशंक्याह अजइ
ति देहानिष्कृष्टस्याजत्वाव्ययत्वेन त्वेवाहं जातु नासमित्यत्र साधिते
इहतु देहविशिष्टस्यैव ते उच्येते ईश्वरोपीत्यनेन देहानिष्कृष्टस्य सदा
देरणीश्वरत्वं तत्त्वमस्यहं ब्रह्मास्मीत्यादिश्रुतिप्रसिद्धमेतादेहविशि
ष्टस्यैवाजत्वनित्यत्वे दृढीक्रियेते अन्यथानीश्वरत्वप्रसंगात् न ह्यादित्यां
तर्यामिणः परमेश्वरस्य हिरण्यश्मश्रुत्वादिविशिष्टो देहो जन्मव्ययवा
निति वक्तुं शक्यं अकर्मजत्वात् कर्मफलस्य हि परा काष्ठा हैरण्यगर्भ
शरीरप्राप्तिः न च पुरुषो ह वै नारायणोकामयत अत्यतिष्ठेयं सर्वाणि
भूतान्यहमेवेदं सर्वं स्यामिति स एतं पुरुषमेधं पंचरात्रं यज्ञक्रतुम
पश्यदित्यादिना शतपथे नारायणाख्यस्य परमात्मनः सहस्रशीर्षा
पुरुषः सहस्राक्षः सहस्रपात् स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं
इति पादोस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति च पुरुषसूक्तप्रति
पाद्यस्य सर्वाणि भूतान्यतिक्रम्य स्थितस्येश्वरस्यापि शरीरं पंचरात्रा
ख्यकर्मविशेषफलमिति श्रूयते इति वाच्यं तत्र नारायणशब्देन हि
रण्यगर्भस्यैव विवक्षितत्वात् न हि परमेश्वरस्य पूर्णकामस्य सर्वा
न तिक्रम्य स्थितस्य पुनरत्यतिष्ठेयं सर्वाणि भूतानीति कामना सं भ
ति न च परमेश्वरेपि कामना दृष्टा सोकामयत बहु स्यां प्रजायेयेती
ति चेत् श्लाघनीयप्रज्ञो देवानां प्रियो यतः आप्तकामस्य का स्पृहेति
श्रुतेर्लोकवत्तु लीलाकैवल्यमिति न्यायाच्च निस्पृहस्य लीलयैव ब्र
ह्माण्डकोटीः सृजतो भगवतो राजगोपालस्य वा किं करेण कर्म
णा सार्वात्म्यं प्रार्थयतः साम्यमापादयति तस्मान्न कर्मफलं भगवत
शरीरं अत एव न भौतिकं विराट्सूत्रात्मातिरिक्तस्य भौतिकस्याभा
वात् तस्मात्कृतकमजोपि सन्निति न च तर्हि भगवच्छरीरस्य किमुपा
दानं अविद्येति चेन्न परमेश्वरे तदभावात् जीवाविद्या चेन्न शुक्तिरज
तादेरिव तत्कल्पत्वापत्तेः चिन्मात्रं चेन्न चितः साकारत्वायोगात् तथा

त्वेवातस्यांतीद्रियत्वापत्तिः तस्मात्किमालंबो भगवद्देहो देवकीगर्भप्रवे-
शजननबाल्यकौमारपौगंडयौवनादिप्रतीतिविषय इति चेत् शृणु प्रकृ-
तिं स्वामधिष्ठाय संभवाम्यात्ममाययेति अयमर्थः जीवात्मानो हि अनात्म-
भूतां प्रकृतिं तेजोबन्नात्मिकां पंचभूतात्मिकां वा अधिष्ठाय संभवंति जन्मा-
दीन् लभंते अहं तु स्वां प्रत्यगनन्यां प्रकृतिं प्रत्यक्चैतन्यमेवेत्यर्थः तदेवाधि-
ष्ठाय न तूपादानांतरं आत्ममायया स्वीयमायया संभवामि यथा कश्चि-
न्मायावी स्वयं स्वस्थानादप्रच्युतस्वभावोपि अदृश्यो भूत्वा स्थूलसूक्ष्मभू-
तान्यनुपादायैव केवलया मायया द्वितीयं मायाविनं स्वसदृशमेव सूत्रमा-
र्गेण गगनमारोहंतं सृजति एवमहं कूटस्थचिन्मात्रोप्यहं स्वमायया वि-
न्मयमात्मनः शरीरं सृजामि तस्य बाल्याद्यवस्थाश्च सूत्रारोहणवद्दर्शया-
मि एतावांस्तु विशेषः लौकिकमायावी मायामुपसंहरन् द्वितीयं माया-
विनमप्युपसंहरति अहं तु तामनुपसंहरन् स्वविग्रहमपि नोपसंहरामीति हं
एवं हि सति हिरण्यश्मश्रुत्वादिलक्षणविग्रहयोगित्वं चैतन्यस्य अंतस्तद्धर्मो-
पदेशादित्यादिन्यायसिद्धं वियदाद्युपादानत्वलक्षणं सर्वेश्वरत्वं युज्यते ना-
न्यथेति तस्मात्सिद्धं परमेश्वरस्य मायामयं शरीरं नित्यमिति एकेनैव देहेन
विवस्वंतमुपदिश्य त्वामप्युपदिशामीति अन्यत्रापि नित्यैव सा जगन्मूर्तिरि-
ति सावधारणं प्रतिज्ञायते देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा उ-
त्पन्नेति तदा लोके सा नित्याप्यभिधीयत इति नित्याया अप्याविर्भावापे-
क्षया सर्वस्यैव बाल्यादिकं उत्पत्त्याद्युपगमते भाष्ये तु स्वां प्रकृतिं वैष्णवीं
त्रिगुणात्मिकां मायां अधिष्ठाय वशीकृत्य आत्ममायया संभवामि देहवा-
न्जात इवात्मनो मायया न परमार्थतो लोकवदिति व्याख्यातं ६

आनंदीटीका

कथं पुनरीदृशः सन् पुनः पुनर्जायस इत्याशंकामपाकुर्वन्नाह अजोपी-
ति जन्मशून्योपि सन् अव्ययात्मा नाशहीन आत्मा स्वरूपं यस्य तादृशोपि सन्
भूतानां सर्वेषामुत्पत्तिमतामीश्वरो निग्रहानुग्रहशक्तोपि सन् धर्माधर्मा-
नुपभोगतया यद्यपीदं शरीरत्यागः परशरीरग्रहणं च नास्ति तथापि स्वा-
त्मनो मायया अतिदुर्घटकारिण्या मदभिन्नया परमैश्वर्यशक्त्या पराजिह-
नानुपया स्वां स्वोपभोगस्थानं प्रकृतिं विस्तरेणाग्रे लक्ष्यमाणाम् अपरा

गी॰ टी॰ व॰ त्मिकामधिष्ठायाप्रित्यसंभवामिप्राडर्भवामि ६

रामकृष्णटीका

अतोहं — अजोव्ययात्मानित्यत्वंजन्मविनाशरहितोपितथासर्वभूतानांस्थाव
रजंगमानांस्थितिविनाशादिषुयथेष्टकर्तृत्वादीश्वरःप्रभुरपिसन् स्वा
प्रकृतिंआत्मीयंपरंस्वभावमधिष्ठायाहृयचिन्मात्रलक्षणं तेत्रैवस्थि॰
त्वात्तस्मात्स्वभावादप्रच्युतःस्वमाययास्वयास्वात्माधीनयामायया
हेतावभासनमात्रप्राणेनशक्तिविशेषेणहेतुभूतेनसंभवामिजन्मा॰
दिसत्तांपरिगृह्णामि अतोनित्यत्वादीश्वरत्वाच्चस्वेच्छापरिगृहीतत्वाच्च
स्वप्राडर्भावोस्वाहृशोचसर्वदेहिनोभूताभविविनमानांस्वजन्मादिवि जो॰
कारान्सतततमविस्मृतसर्वज्ञत्वशक्तिरहमेवजानामि [illegible]
[illegible]

लासिकी [illegible]टीका

ननुतवेश्वरस्यजन्मकारणपुण्यपापविहीनत्वात्कथंजीववज्जन्मप॰
रिग्रहइत्यतआह अजइति नित्यत्वाज्जन्मविनाशरहितोपि तथाभू॰
तानां स्थावरजंगमात्मकानांईश्वरोपिसर्गादिषुयथेष्टकर्तृत्वात्प्रभु
रपिसन् एतेनकर्मादिपारतंत्र्यंनिवारितं मामैश्वरीं ननुभूतसेवयिनी
प्रकृतिस्वरूपगोपनरूपां त्रिगुणसाम्यात्मिकामधिष्ठायालंबीकृत्य
संभवामि सम्यगप्रच्युतज्ञानबलवीर्यादिरेवदेहवानिवजातइव
भवामि ननुतथापि षोडशकालात्मकलिंगशून्यस्यतवकुतोजन्म
इत्यतउक्तं स्वमाययेति स्वयास्वाधीनयामाययाहेतावभासनमात्र॰
प्राणेनशक्तिविशेषेण ६

पंचोलीटीका

कथंतर्हितवनित्येश्वरस्यसर्वज्ञस्यधर्माधर्माभावेजन्मेत्यत्राह अ
जोपीति अजःजन्मरहितःअव्ययात्माअक्षीणःज्ञानशक्तिस्वभा॰
वःसर्वभूतानांब्रह्मादिस्थावरांतानामीश्वरोपिसन् अहंस्वावैलक्षीमा
यांप्रकृतिंत्रिगुणात्मिकामधिष्ठायवशीकृत्यआत्ममाययासंभवामि
नपरमार्थतः ६

रसवीरसमिद्धोधिनी॥

नन्वनादेः सर्वज्ञस्येश्वरस्य तव कुतो जन्मेत्यत आह अजोपीति यो हि प्रागभावप्रतियोगी स जायते अहं सदा विद्यमानत्वादजो जन्मरहितोपि सन् अत एवाव्ययात्मा विनाशरहितोपि सन् यो हि जायते स ध्वंसप्रतियोगी भवति यश्च विनश्यति स पुनः प्रागभावप्रतियोगित्वाज्जायते अहं तु नित्यत्वाद्विनाशरहितः अत एव सर्वविलक्षणत्वाद्भूतानां सर्वेषां प्राणिनामीश्वरो नियामितया स्थितोपि सन् स्वां प्रकृतिं स्वकीयां स्वेनैव व्यवस्थापितां स्ववर्णोचितां वा स्वदेहयोग्यनुरूपां वा प्रकृतिं प्रकृष्टां कृतिं कर्म तु प्रवृत्तिरूपामधिष्ठाय स्वीकृत्य स्वमायया निजमायाशक्त्या संभवामि देहं स्वीकरोमीति लोके धर्मव्यवस्थापनार्थं तादृशदेहानुरूपवर्णाश्रमोचिताचारप्रवर्तनार्थं देहमिवांगीकरोमीति न मम तत्संबंधेन काचिदनित्यताप्रसक्तिरिति स्वमाययेत्यनेन द्योत्यते मायाव्यपि लोकः प्रतीत्यर्थं तादृशं विडंबनं कुर्वन्नपि पर्यंते स्वकीयेनैव रूपेण सर्वेषां प्रतिभाति एवं जन्मादिरहितोपीश्वरो देहं लोकधर्मव्यवस्थापनार्थं तादृशानि बहूनि शरीराणि धारयामीति तात्पर्यार्थः॥ ६॥

मधुभाष्य

अजोपीति अव्ययः आत्मा देहोपीत्यव्ययात्मा अनंतं विश्वतोमुखमिति रूपविशेषणमजरञ्च एतज्ज्ञानावतारेणानिधानं बीजमव्ययमिति च जगद्गुरुरिति तदुक्तिः श्रुतयस्तूक्ताः आत्मानादिस्तत्सर्वसमं कथमनादिनित्यस्य जनिः प्रकृतिं स्वामधिष्ठाय प्रकृत्या जातेष्वात्मदेवादिषु तथैव तेषां जातत्वप्रतीयत इत्यर्थः न तु स्वतंत्रा मधिष्ठायेत्याह स्वामिति इत्यक

मेवेतिप्युक्तम् साहित्तगोक्ता ततः सर्वस्यैवः आत्ममाययात्र्या
त्मज्ञानेन प्रकृतेः पृथगभिधानात् केचः केवुस्थितिस्थितम्
कत्वमेतिमनीषा मायेतिह्यभिधाने सृष्टिकारणयातेषामा
गेरादिस्तु विमोहिकयाज्ञानात् इवाज्ञानतएव प्रतीयते वाउक्त
मदृष्टादेस्तु मातायाश्रोभूमिरिति कल्पिता विमोहिकाव उ
गीव्याताभिविस्तरेणोपिटि जानवन्नघते आत्माविहलान्नू
पवेतसामिति ईश्वरः ईशोम्मोपिवरः ईशोम्मोब्रह्मरुद्रश्रीपा
दादिभ्योयतो भवान् वदन्ते ईश्वराख्यात मुख्यानान्यस्यकस्य
चिदिति ब्रह्मवैवर्ते समर्थः ईशाइत्युक्तस्तद्गुणात्मीश्वरइति च
नजन्मनैवपरित्राणादिककार्यमितिनियमः तथापि लील
यास्वभावेनयदृच्छचारी तथाप्युक्तं देवस्यैषस्वाभावोयम्
लोकवत्तुलीलाकैवल्यं क्रीडतोबालकस्येवचेष्टा तस्य निष्का
मय श्रीभयादिवस्तुयंनद्यवात्तीयदनंतवीर्यः एकर्मो
यमस्यात्र नकिंचिदप्यन्यथापिसर्वाः कुरुते प्रवृत्तीः अतो वि
रुद्धेष्वपि मवदंतिपरापश्चात्तानयः प्रमाणताइत्यार्थ वेदावि
लेष एषअनुगुक्तिः सर्वज्ञाननियमदर्शनार्थं नवता वस्मा
वेणयुक्तिरित्युक्तं वेदाप्युक्तं तत्संवयोज्ञातोपालेसदा हि मां
तस्यैवदर्शनपथ्यामिनान्यस्यकस्यचिदित्युक्तेश्च महाकौ
र्मप्रयोक्तस्यैतद्भावैवजन्मनैतीतिगतिः इतरथाकान्तानां
न्यायगतिः नान्यस्यकस्यचिदितिविशेषणात् तन्वइति
विशेषणाच्च सर्वज्ञानमायतति यद्वैवंभवतितत्र नन्वत
इति विशेषणेनविरोधः उक्तं च एकंचतत्त्वतोज्ञात्वा विनास
वंतर्ज्ञानरः नसमर्थोमहेशोपि तस्मात्सर्वज्ञजिनसेदिविस्त्वं
देमतिवतथाप्युक्ता इत्यादि ८॥

भाषा अनुवाद

जो कहो कि अनादि जो तुम तुमारा जन्म कैसे और अविनाशी हो तुमतुमारा पुनर्जन्म ही वा कैसे सम्भव होय जो कहते हो कि बहुत जन्म हमारे व्यतीत भये हैं और भी तुम ईश्वर तुमारे पुन्य औ पाप दोनो भी नहीं तो फेरि जीव की नाई तुमारा जन्म कैसे संभव होय सकै तिसपर कहते हे किहां यह बात तो ठीक है पर हम जन्म रहित और अविनाशी स्वभाव होके भी तथा ईश्वर अर्थात् कर्मके वश नहीं भीहै पर तो भी अपनी मायाके द्वाराख इच्छा से प्रगट होते हैं और जो कहो कि तोभी पंच ज्ञानइंद्री औ पंच कर्मइंद्री पंच प्राण और एक अंतःकरण ये सोरह कलारूप लिंग शरीर के विना किसतरह जन्म होना सम्भवै इस पर कहतेहैं कि हम अपनी शुद्ध सत्वात्मक प्रकृतिको स्वीकार करि अति जाज्वल्यमान सत्वमूर्ति से स्वेच्छाधीन अवतार लेतेहैं ६

दोहा

अज हौं अव्यय आत्मा ईश्वरहौंसमभूत निज प्रकृति को धार
के हौं निजमायाके संभूत ६॥

31

यदायदाहिधर्मस्यग्लानिर्भवतिभारत अभ्युत्था॰
नमधर्मस्यतदात्मानंसृजाम्यहं १

शांकरभाष्यं

तच्चजन्मकदाकिमर्थंवेत्युच्यते यदेति यदायदाहिधर्मस्य ग्लानि
र्हानिर्वर्णाश्रमादिलक्षणस्य प्राणिनामभ्युदयनिःश्रेयससाधनस्य
भवतिभारत अभ्युत्थानंसमुद्भवोऽधर्मस्य तदा तदात्मानंसृ
जाम्यहं मायया १ आनंदगिरिकृतटीका

यदीश्वरस्यमायानिबंधनेजन्मोक्तंतस्यप्रश्नपूर्वकं कालंकथयति
तच्चेत्यादिना चातुर्वर्ण्यंचतुराश्रम्यंचयथावदनुष्ठीयमानेनास्तिध॰
र्महानिरिति मत्वानोविशिनष्टिवर्णेति वर्णाश्रमैस्तदाचारैश्चल॰
क्ष्यते ज्ञायतेधर्मःतस्येतियावत्‌धर्महानौ समस्तपुरुषार्थभंगोभ
वतीत्यभिप्रेत्याह प्राणिनामिति नचयथोक्तसर्वधर्मस्यहानिः सो॰
ढुंशक्तोभवानित्याह भारतेतिनकेवलंप्राणिनांधर्महानिरेव भग
वतोमायाविग्रहस्यपरिग्रहे हेतुरपितुतेषामधर्मप्रवृत्तिरपीत्याह
अभ्युत्थानमिति यदायदेति पूर्वेणसंबंधः २

स्वामिकृतटीका

कदासंभवसीत्यपेक्षायामाह यदायदेति ग्लानिर्हानिःअभ्युत्थान॰
माधिक्यं १ पिशाचभाष्यं

तच्चजन्मकदाकिमर्थंचेत्यत्रोच्यते यदायदायस्मिन्कालेधर्मस्यप्रा
णिनामभ्युदयस्यनिःश्रेयसःसाधनस्यग्लानिर्भवति अधर्मस्ययदा॰
भ्युत्थानमुद्भवोभवतितदाहमात्मानंसृजामिउत्पादयामीति १

रामानुजभाष्यं

जन्मकालमाह यदायदाहीति नकालनियमोमत्संभवस्य यदायदा
यदाहिधर्मस्यवेदोदितस्यचातुर्वर्ण्यचातुराश्रम्यव्यवस्थयावस्थितस्य य५
धर्मस्यग्लानिर्भवति यदाच तद्विपर्ययस्याधर्मस्याभ्युत्थानंतदाहमे

व स्वसंकल्पेनोक्तप्रकारेणात्मानं सृजामि १

अभिनवगुप्तकृतटीका

[illegible] श्रीभगवान्किल पूर्णषाड्गुण्यत्वाच्छरीरसम्पर्कमात्ररहितोपि स्थितिकारित्वात्कारुणिकतयात्मांशं सृजति आत्मा पूर्णषाड्गुण्यः अंशउपकारकत्वेनाप्रधानभूतो यत्र तदात्मांशशरीरं गृह्णातीत्यर्थः १

परमार्थप्रपाटीका

अथाविर्भावावसरमाह यदेति यदा धर्मस्य ग्लानिर्ह्रासः तथा अधर्मस्य अभ्युत्थानं अभ्युदयस्तदात्मानं सृजामि स्वयं स्वेच्छयाविर्भवामि १

वनमालीटीका

अवतारकालमाह यदेति यदा यदा धर्मस्य भवारायनरूपस्य वर्णादिप्रकारेण वेदविहितस्य ग्लानिर्हानिरधर्मस्य वेदनिषिद्धस्याभ्युत्थानमुद्भवस्तदात्मानं स्वस्वरूपाभिन्नं देहं सृजाम्याविर्भावयामि यद्यपि वेदविहितधर्मस्य तिरोधानमीश्वरेच्छामात्रेणैव स्यान्नावतारप्रयोजनमस्ति तथापि तत्र भगवद्रूपगुणकर्मलीलादिचिंतनेकनरानां धर्मस्य भगवदाविर्भावं विना रक्षणं न भवतीति भावः १

ऊरुमवैजयंतीटीका

एवं स्वावतारप्रकारादिकमुक्त्वेदानीं कस्मिन्काले तव जन्मेत्याशंक्य मम जन्मनः कालनियमो नास्तीत्याह यदा यदेति हे भारत यदा यदा यस्मिन्यस्मिन्काले धर्मस्य वेदोक्तवर्णाश्रमादिलक्षणस्य मद्उपासनरूपस्य वा ग्लानिर्हानिर्भवति हि शब्द उक्तसमुच्चयार्थश्चार्थकः यदा यदाधर्मस्य वेदोक्तविपरीतस्याभ्युत्थानमभ्युदयो भवति तदा तदा तस्मिंस्तस्मिन्नेवावसरेऽहं सर्वेश्वरः पुरुषोत्तमः पूर्वोक्तप्रकारेण स्वरूपेण स्वसंकल्पेनैवात्मानं देहं सृजामि प्रकटयामि न तु निर्माणं करोमि इह भारते नेति संबोधनेन स्वधर्मपालकस्य भरतस्य राजर्षेः कुले जातोसि यद्वा भा ज्ञाने तस्मिन्नतः प्रीतियुक्तो यस्तः परधर्मरूपमधर्मं त्यक्त्वा मोक्षादिलक्षणे

स्वधर्मसमाचरणधर्माचरणंनवातीवायोग्यमितिस्त्रवितं १

मधुसूदनीटीका

एवंसच्चिदानंदघनस्यतव कदाकिंप्रर्थंवादेहिवद्व्यवहारइतितत्रोच्यते ॥
धर्मस्यवेदविहितस्यप्राणिनामभ्युदयनिःश्रेयससाधनस्यप्रवृत्तिनिवृ-
त्तिलक्षणस्यवर्णाश्रमतदाचारव्यंजकस्ययदायदाग्लानिर्हानिर्भवति
हेभारतभरतवंशोद्भवत्वेनभारतानंतच्चरतत्वेनवात्वंनधर्महानिंसोढुं
शक्नोषीतिसंबोधनार्थः एवंयदायदाभ्युत्थानमुद्भवोऽधर्मस्यवेदनि-
षिद्धनानाविधदुःखसाधनस्यधर्मविरोधिनः तदातदात्मानंदेहंसृजा-
मिनित्यसिद्धमेवसृष्टमिवदर्शयामिमायया [illegible]
[illegible] ...विविनित्यादि १

सदानंदीटीका

सर्वदैव[illegible]स्वरूप[illegible]
रूपावस्थितः १ देहिवद्विहरामीत्यादेहदेहिभेदोऽज्ञितः [illegible]
धैर्यविगलितमहामोहतिमिरमयी [illegible]भवतीकदाकाचिकव-
ना [illegible]चिदानंदाकारंवक्ष्य-
[illegible]मीत्यमलं चिदानंदघनस्यैवंकिमर्थंतववाकदा देहिवद्व्य-
वहारोऽस्तीत्यतआहजगद्गुरुः १ द्विविधस्यास्यधर्मस्यवेदप्रामाणिक-
स्यच स्वर्गमोक्षनिमित्तस्यप्राणिनांहियदायदा २ क्षतिर्भवत्यधर्मोऽशेषः
स्वर्गमोक्षविरोधिभिः श्रुतिस्मृतिनिषिद्धस्याधर्मस्यानर्थकारिणः ३
उद्भवोऽधर्मपात्रोऽस्यभवतीहयदायदा तदातदाहमात्मानंदर्शयामिस्व
मायया ४ नित्यसिद्धंसृष्टमिवाविद्धंनपरमार्थतः ७

नीलकंठीटीका

कदासंभवसीत्यपेक्षायामाह यदेति ग्लानिर्ह्रासः अभ्युत्थानंवृद्धिः १

आनंदीटीका

प्रयोजनमनुद्दिश्यनमंदोऽपिप्रवर्तते इतिसंप्रदायप्रद्योतनार्थमात्मनः
शरीरग्रहणमुपपादयति आत्मानंशरीरंसृजामिगृह्णामि उक्तंपुरा-
णेऽपुनाकारणात्कारणाद्वाकारणात्कारणान्नच शरीरग्रहणंव्यापिन्

धर्मत्राणायकेवलमिति ७

रामकेशीटीका इदानींस्वजन्मपरिग्रहस्यप्रयोजनमाह॥

यदायदायत्रयत्रकालेधर्मस्यवर्णाश्रमनियमविभक्तस्यसदाचा
रस्यग्लानिरूपक्षयोभवति ततश्चतद्विपरीतस्याधर्मस्यवर्णादिव्यव
स्थाव्युत्थानहेतोर्दुराचारस्याभ्युत्थानमुद्भवोभवति तदातत्रकाले
हंपरमकारणभूतस्यात्मनःकेचिदंशेशक्तिलेशंस्वेच्छापरिकल्पि
तजगत्क्रीडापरिरक्षणायसृजाम्युत्पादयामि ७

लासिकी[illegible]टीका

कदासंभवमीत्यपेक्षायामाह यदेति यदायदायस्मिन्यस्मिन्कालेव
र्णाश्रमविभागेनवेदोक्तस्यनिःश्रेयसाभ्युदयकारणस्यसदाचारस्य
हानिर्भवति तथाधर्मस्यतद्विपरीतस्योद्भवोभवति तदातदात्मानं
स्वमेश्वरंरूपंसृजामि स्थूलदेहेनसंयोजयामि ७

पंचोलीटीका

तच्चजन्मकदेत्याह यदायदेति हेभारतहियस्माद्यदायदाधर्मस्य
वर्णाश्रमप्रयुक्तस्यग्लानिर्भवतिअधर्मस्यधर्मविपरीताचरणस्यअ
भ्युत्थानंउत्पत्तिर्भवतितदाहंआत्मानंसृजामिदेहवान्भवामि ७

रणवीरसमिद्धोधिनी॥

एतदेवविवृणोति यदायदेति यस्मिन्यस्मिन्कालेधर्मस्यप्रवृत्ति
रूपस्यस्वस्ववर्णाश्रमविभागेनमयैवव्यवस्थापितस्यग्लानिः प्र
तिपक्षभावेनसंप्रदायविच्छेदाद्धानिर्भवति अधर्मस्यचाभ्युत्थानं
वृद्धिर्भवति तदाहमात्मानंसृजामि ७॥

मधुभाष्य

७॥

भाषा अनुवाद

तोअपनी इच्छासे कब आप जन्म ग्रहण करते हो इस अपेक्षा पर कहते है कि हे भारत भरतवंशी अर्जुन जब जब धर्मकी ग्लानि अर्थात् हानि होतीहै और अधर्म का अभ्युत्थान कहे वृद्धि होती तब तब हम शरीर धारणकरतेहै ७

दोहा

जबजब होत हैं धर्मकी हेभारत अतिहान अधर्महोत है प्र
गट तबकरौं रूपसंधान ७॥

34

परित्राणायसाधूनांविनाशायचदुष्कृतां धर्मसं॰
स्थापनार्थायसंभवामियुगेयुगे ८

शांकरभाष्यं

किमर्थं परित्राणायेति परित्राणायपरिरक्षणाय साधूनांसन्मा॰
र्गस्थानां विनाशायचदुष्कृतां पापकारिणां किंचधर्मस्य संस्थाप
नार्थाय सम्यक्स्थापनंतदर्थं संभवामियुगेयुगेप्रतियुगं ८

आनंदगिरिकृतटीका

यथोक्तेकाले कृतकृत्यस्य भगवतोमायाकृते जन्मनि प्रश्नपूर्वकं
प्रयोजनमाह किमर्थमित्यादिना यथासाधूनांरक्षणमसाधूनां
व५ निग्रहश्च भगवदवतारफलंतथाफलांतरमपि तस्यास्तीत्याह किंचे
ति धर्मोहिस्थापितेजगदेवस्थापितंभगवत्यन्यथाभिन्नमर्यादं जग
दसंगतमापद्येतेत्यर्थः ८ स्वामिकृतटीका

किमर्थमपेक्षायामाह परित्राणायेति साधूनांस्वधर्मनिरतानांरक्ष॰
णाय दुष्टकर्मकुर्वंतीति दुष्कृतस्तेषांवधायच एवंधर्मस्यसंस्थापना
र्थायसाधुरक्षणेनदुष्टवधेनचधर्मस्थिरीकर्तुंयुगेयुगेतत्तदवसरेसं एवं५
भवामीत्यर्थः नचैवंदुष्टनिग्रहंकुर्वतोपिनैर्घृण्यंशंकनीयं यथाहुः॰
लालनेताडनेमातुर्नाकारुण्यंयथार्भके तद्वदेवमहेशस्यनियं॰
तुर्गुणदोषयोरिति ८ पिशाचभाष्यं

किमर्थमित्यत्राह परित्राणायेतियुगेयुगेप्रतियुगे ८

रामानुजभाष्यं

जन्मनःप्रयोजनमाह सधर्मवदुक्तलक्षणधर्मशीलावैष्णवाग्रेसराम
माश्रयणेप्रवृत्तामन्नामकर्मस्वरूपाणामवाङ्मनसगोचरतयामद्द
र्शनादृतेस्वात्मधारणपोषणादिकमलभमानाअणुमात्रकालमपियु
गसहस्रंमन्वानाःप्रशिथिलाभवेयुरितिजानन्स्वस्वरूपवेदनाउष्टानां
यलोकनांपालादिदानेनतेषांपरित्राणायतद्विपरीतानांविनाशाय
ना

गी॰ ज्ञीणस्य वैदिकस्य धर्मस्य मर्यादारक्षणरूपस्याराध्य स्वरूपप्रदर्शनेन स्था
टी॰ पनाय च देवमनुष्यादिरूपेण युगे युगे संभवामि कृतत्रेतादियुगे विशे
४॰ षनियमोपि नास्तीत्यर्थः ॥

अभिनवगुप्तकृतटीका ॥ नास्ति

परमार्थप्रपाटीका

किमर्थमित्याह परित्राणायेति साधूनां स्वमार्गवर्तिनां परित्राणाय विघ्नेभ्यो रक्षणाय तथा दुष्कृतकर्मकर्तृत्वं ये ते दुष्कृतस्तेषां विनाशाय एतदपि किमर्थं धर्मसंस्थापनार्थाय धर्मसंस्थापनमेवार्थः प्रयोजनं तस्मै युगे युगे तत्तदवसरे अन्यथा जातिसंकरः स्यात् स्मृतिरपि मयैतद्विधरणमेषां लोकानामसंभेदायेति अत्र तुल्यदृष्टेः परमेश्वरस्य साधुसंरक्षणं खलनिर्बर्हणमयुक्तमिति नाशंकनीयं तथाहुः लालने ताडने मातुर्नैवैषम्य यथार्भके तद्वदेव महेशस्य नियन्तुर्गुणदोषयोरिति ॥

वनमालीटीका

साधूनां वेदोक्तस्वधर्मानुष्ठातॄणामनुक्तनिषिद्धाननुष्ठातॄणां परित्राणाय दुःकृतां तद्विपरीतानां विनाशाय युगे युगे संभवामि मुख्यप्रयोजनं तु साधूनां तद्रूपादिचिंतकानां परित्राणं दुःकृतां दैत्यानां स्वमूर्तेर्ज्ञतादिप्रदर्शनेनावज्ञादिकमुत्पादयन्नरकपातादिरूपं नाशनं न च सर्वसमः भगवान् कथं नाशयतीति वाच्यं वैषम्यनैर्घृण्ये न सापेक्षत्वादिति सूत्रानुसारात् तेषां तादृशादृष्टानुसारेण भगवतः फलादिदातृत्वेन च वैषम्याद्यभावात् ॥

कुसुमवैजयंतीटीका

ननु यदि धर्महानिरधर्मवृद्धिश्च तवावतारस्य कारणं भवति तर्हि धर्मं परित्यज्याधर्ममेव करिष्यामि यस्माद्धर्मान्मंगलमूर्तेर्मन्मित्रस्य तवाविर्भावः साक्षाद्दर्शनादिकं च न स्यात्तस्य हेतुः किं भवतीत्येवमर्जुनस्याधर्मवृद्धिनिश्चयमेव यथार्थमाहात्म्यमदुक्तत्वेन विचार्यैवं त्वं वदसि न केवलं ममायने धर्महान्यधर्मवृद्धिश्च कारणमिति मदुक्तस्य तात्पर्यमस्ति किंतु धर्मवृद्धावधर्महानावेव तदेव दर्शयन्स्वजन्मनः प्रयोजनमाह परित्राणायेति साधूनां मत्साक्षात्कारसाधनशीलानां मत्स्वरूपगुणकर्मणामहरहर्धि

तनकीर्तनस्मरणश्रवणमननध्यानाद्यनलभर्जितप्राकृतविषयवा
स[illegible]नाशयकोशानां मत्स्मरणानंदपुलकितांगानां मदितरदेवभाव
साधनफलरहितानां यद्दर्शनानिरतानां मदर्थत्यक्तसकलकुलकुटुं
बधनधामदारसुतैहिकामुष्मिकभोगसाधनानां मत्कामानां मदीय
नेमदर्शनेविनाक्षणमपिप्राणधारणासमर्थानां मदर्पणकृतनिखि
लात्मात्मीयसम्पत्तीनां वैष्णवाग्रेसराणां परित्राणाय संसारादुद्धार
णाय दुष्कृतां पापात्मनां मद्विमुखानां मद्भक्तविरोधिनां महंममाभि
मानेनत्यक्तशास्त्राचार्यमर्यादानां गृहपुत्रदारधनकामोपहतचि
त्तानां मदितरदेवनिष्ठानां मदभक्तानामवैष्णवानां विनाशाय संसार
प्राप्तये धर्मसंस्थापनार्थाय धर्मस्य वेदविहितस्य मदाराधनरूपस्य
संस्थापनार्थाय वर्णाश्रमादिषु तत्तदधिकारिषु प्रवर्तनेन कर्त्तुं युगेयुगे
तत्तदवसरेनन्तकृतादिष्वेवेति नियमः संभवामि आविर्भवामीत्यन
न्वयं मत्संभवस्य प्रयोजनं साधुभ्यः पुण्यकर्मकारयित्वा तत्र सनातने
मदाराधनरूपधर्ममाचारयित्वा तान् स्वर्गगतिं मां प्रापयामि दुष्कृतस्त्व
पापकर्मकारयित्वाऽधर्मंस्थापयित्वाऽधोगतिं निरयतुल्यसंसारंप्रा
पयामि एषएव साधुकर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष
एवासाधुकर्मकारयति तं यमेभ्यो लोकेभ्योऽधोनिनीषत इत्यादिश्रु
तेः ननु एवं चेत्तर्हि तव वैषम्यनैर्घृण्यादिदोषः स्यादितिचेन्न तेषामना
दितत्तत्पुण्यपुण्यादिकर्मसापेक्षत्वेन तत्तत्कर्मकारयितृत्वेमम निर्दोष
त्वात् यद्वा यथा माता स्वपुत्रान्शिक्षार्थमेव दंडयति न तन्नाशाय
तथाहमपि दुष्कृतो जीवान् संसारे पातयित्वा तत्र दुःखरूपं दंडं दत्वा
पुनः संसारादुद्धरामि लालने पालने मातृणां कारुण्यं यथा अर्भके
तद्वदेव महेशस्य नियंतृगुणदोषयोरिति स्मृतेः अतो मम न दोषवत्त्व
मितिभावः ८   मधुसूदनीटीका तत्किं धर्मस्य हानिरधर्मस्य वृद्धिस्तव परितोषकारणं
येन तस्मिन्नेव काले आविर्भवसीति न तथा चानर्थावहं एव त
+ धर्महान्याक्षीयमानानां साधूनां पुण्यकारिणां वेदमार्गस्थानां परि- वावतारः स्यादिति नेत्याह +
त्राणाय परितः सर्वतो रक्षणाय तथा धर्मवृद्ध्या वर्धमानानां दुष्कृतां पा
पकारिणां वेदमार्गविरोधिनां विनाशाय च तदुभयं कथं स्यादिति तदा
ह धर्मसंस्थापनार्थाय धर्मस्य सम्यगधर्मनिवारणेन स्थापनेन वेदमार्गपरिरक्षणं धर्म

गी॰ टी॰ व॰ संस्थापनेनतदर्थंसंभवामिप्रत्येकयुगेप्रतियुगं ॥

सदानंदीटीका

धर्माधर्मविपर्यासःकितवाभिमतोयतः तदेवाविर्भवेस्यैवमपेक्षा
यामितीर्यते १ साधूनांहीयमानानांधर्महान्यामहात्मनां वेदमा
र्गस्थितानांचरक्षणायसमंततः २ पापिनांवर्द्धमानानामधर्मस्याङ्ग मि॰
वेनच विध्वंसनायदुष्टानांवेदमार्गविरोधिनां ३ वेदमार्गपरित्रा
णधर्मसंस्थापनायच नित्यसिद्धःप्रतियुगंस्वयंप्रादुर्भवाम्यहं ४ ॥

३६

नीलकंठीटीका

किमर्थमात्मानंमाययासृजसीत्यतआह परित्राणायेति दुष्कृतांदु
नाशायच ष्टकर्मकुर्वतांपापिनां संभवामिआविर्भवामि ॥

आनंदी टीका

अत्रपरानुग्रहार्थंचेत्पारमेश्वरीप्रवृत्तिस्तत्कोनामायमसतांविना
शेनुग्रहइतिविचारोलिखितएवोपोद्घाते ॥

रामकंठीटीका

अतोदेवासुरसर्गविभेदेनस्वयमवभासितेजगतिदैवसर्गभाजो
शास्त्रोपदेशविषयभूतानांसाधूनांसत्त्वगुणोत्कर्षनिर्मलप्रज्ञानां
परित्राणायसत्क्रियाविघातहेतुभ्योविघ्नेभ्योरक्षणाय तथादुष्कृ
तांशास्त्रीयनियमातिक्रमात् जगत्स्थितिविप्लवकदुष्टकर्मका
रिणामसतांविनाशायप्रध्वंसायतएवधर्मस्यजातिदेशकालादिप्रवि
भक्तविशेषस्यसदाचारस्यसंस्थापनायसम्यक्प्रवर्तनायप्रतियुगं
तेनकारेणसमुद्भवाम्युत्पत्तिमत्तांदर्शयामि नतुवस्तुतोहंजन्मवि
नाशादिभावविकारकलंकस्पर्शमनुभवामि

लासिकी [illegible]टीका

किमर्थमित्यपेक्षायामाह परीति साधूनां स्वधर्मवर्तिनां तत्कि-
याविघ्नातहेतुभ्यो रक्षणाय दुष्कृतां शास्त्रीयनियमातिक्रमाज्ज
गत्स्थितिविघ्नायैवदुष्टकर्मकारिणां विनाशाय च प्रनष्टधर्मस
स्थापनार्थाय धर्मस्थिरीकर्तुं युगेयुगे तत्तदवसरे संभवामि उत्प
त्तिमत्तां दर्शयामि न तु वस्तुतोहं जन्मादिविकारकलंकास्पर्शीम
न्नभवामि नचैवं दुष्टनिग्रहं कुर्वतोपि नैर्घृण्यं शंकनीयं यदाहुः ला
लनेताडने मातुर्नैकारुण्यं यथार्भके तद्वदेव महेशस्य नियंतुर्गु
णदोषयोरिति ८

पैचोलीटीका

तच्च जन्म किमर्थमित्यत्राह परित्राणायेति हे अर्जुन अहं साधूनां
परित्राणाय सन्मार्गगामिनां रक्षणाय च अपरं दुःकृतां पापकारिणां
विनाशाय धर्मसंस्थापनार्थाय युगेयुगे संभवामि उत्पत्तिं करोमि ८

रणवीरसमिद्धायिनी ॥

ननु तर्हि भवतोपि धर्मग्लानितद्वृद्धी एव परितोषनिमित्तं येन
तदैव प्रादुर्भवसीति भवदवतारादनर्थ एव स्यादित्याशंक्याह
परित्राणायेति परप्रयोजनार्थैव मम प्रवृत्तिरितिभावः लाल
नेताडने मातुर्नैकारुण्यं यथार्भके तद्वदेव महेशस्य नियंतुर्गु
णदोषयोरिति स्मृतेर्नैश्वरस्य साधुरक्षणेतरनिग्रहाभ्यां वैष
म्यनैर्घृण्ये आशंकनीये इति तात्पर्यं ८॥

मधुभाष्य

८॥

37

भाषा अनुवाद

जो कहो कि ऐसे समय मे आप क्यों शरीर धारणकर अवतरते
हौ तो कहते है कि साधु कहे स्वधर्म के करने वाले लोग उन
की रक्षा और दुष्कृत कहे अधर्मी पापी जनोंके नाशके हेतमे
जन्म लेता हूं इस से यह आया कि धर्म का स्थापन औ साधु का
रक्षण दुष्टों का वध करि के धर्मकीवृद्धि करनी को सोइ सोई
समय मे शरीरग्रहणकरताहूं नही कहा कि संभवामि युगेयु
गे जोकोई शंका करै कि दुष्ट नाश करने से भगवान को किर्द
यता आवती तो ऐसा कभी कहना नंही देखो माता पिता गुरू
ये जो पुत्र शिष्य को शिक्षाके ताडन करते हैं तो क्या निर्दई हैं
ऐसे ही ईश्वर गुण दोष नियम के अर्थ दंड देतेहें पर शत्रुता से
नंही ८ ॥

दोहा ॥

धर्मस्थितिके कारणों
साधनकीरक्षाकरण दुष्टनाशके हेत
युग युग जन्म हीं लेत ८ ॥

38

जन्मकर्मचमेदिव्यमेवंयोवेत्तितत्वतः त्यक्त्वादेहंपु
नर्जन्मनैतिमामेतिसोर्जुन ९

शांकरभाष्यं

जन्मेति तज्जन्ममायारूपंकर्मचसाधूनां परित्राणादिमेमम दिव्य
मप्राकृतमैश्वरमेवं यथोक्तंयो वेत्तितत्वतः तत्वेनयथावत्त्यक्त्वा दे
हमिमं पुनर्जन्मपुनरुत्पत्तिं नैतिनप्राप्नोति मामेत्यागच्छतिसमुच्य
ते अर्जुन ९

आनंदगिरिकृतटीका

मायामयमीश्वरस्य जन्मनवास्तवं तस्यैवचजगत्परिपालनं कर्म
नान्यस्येति जानतःश्रेयोवाप्तिंदर्शयन्विपक्षे प्रत्यवायंसूचयति
तज्जन्मेत्यादिना यथोक्तंमायामयंकल्पितमिति यावन्नवेदनस्य
यथावत्त्वंवेदयस्य जन्मादेरुक्तरूपान्ननिवर्तिते यदिपुनर्भगवतोवा
स्तवं जन्मसाधुजनपरिपालनादि चान्यस्यैवकर्मतत्क्रियस्येति विवक्ष
ष्यतेतदा तत्वापरिज्ञानप्रयुक्तोजन्मादिः संसारोदुर्वारःस्यादितिभा
वः ९

स्वामिकृतटीका

एवंविधानामीश्वरजन्मकर्मणांज्ञानेफलमाह जन्मकर्मेति मेजन्म
स्वेच्छया कृतंकर्मचधर्मपालनरूपंदिव्यमलौकिकं तत्वतःपरानुग्रहा
र्थमेवेतियोवेत्तिसदेहाभिमानंत्यक्त्वा पुनर्जन्म^संसारं नैतिनप्राप्नोतिकिंतु
मामेवप्राप्नोति ९

पिशाचभाष्यं

जन्मकर्मचेति जन्ममायारूपंकर्मचधर्मसंस्थापनार्थीयकंसर्वदादि
रूपंदिव्यंअप्राकृतमैश्वर्यंयोवेत्ति तत्वतःयथावद्देहंत्यक्त्वापुनर्जन्म
नगच्छतिकिंतुमामेवैतिप्राप्नोतिमुच्यतइत्यर्थः ९

रामानुजभाष्यं

एवंकर्ममूलहेयत्रिगुणप्रकृतिसंसर्गजन्मरहितस्यसर्वेश्वरत्वस
र्वज्ञत्वसत्यसंकल्पत्वादिसमस्तकल्याणगुणस्य साधुपरित्राणायमत्समा
श्रयणीकप्रयोजनंदिव्यमप्राकृतंमदसाधारणंमज्जन्मचेष्टितंचतत्वतो

योवेत्तिसवर्त्तमानेदेहंपरित्यज्यपुनर्जन्मनेतिमदीयदिव्यजन्मचेष्टित
र्यथात्म्यज्ञानेनविध्वस्तसमस्तमत्समाश्रयणविरोधिपाप्मास्मिन्ने
वजन्मनिमयोदितप्रकारेणमामाश्रित्यमदेकप्रियोमदेकचित्तोमा
मेवप्राप्नोति ९

अभिनवगुप्तकृतटीका

अतएवास्यजन्मदिव्यंयतआत्ममाययायोगप्रज्ञयास्वसातंत्र्यशक्त्या
रब्धंनकर्मभिःकर्माण्यपिदिव्यफलदानासमर्थत्वात् यश्चैवमेनत्तत्त्वेवे
त्तिआत्मन्यप्येवमेवमन्यतेसोवश्यंभगवद्भावस्सदेवतत्त्वंजानाति ९

परमार्थप्रपाटीका

एवंविधानामीश्वरजन्मकर्मणांज्ञानेफलमाह जन्मस्वेच्छाकृतंकर्म
पालनरूपंतत्त्वतःअनुग्रहार्थमेवेतियोवेत्ति यथावत्परमेश्वरस्वरूपं
वेत्तिसवर्तमानेदेहंत्यक्त्वापुनर्जन्मनेतिकिंतुमामेतिमामेवप्राप्नोति ९

वनमालीटीका

स्वावतारज्ञानफलमाह जन्मेति ममजन्मश्रीरामकृष्णादिरूपेणप्रा
४॰ च्यामिंदोरिवाविर्भावरूपंमेतत्त्वंयगोर्द्धनोधरणादिरूपंजगड्द्यादि ल॰
रूपंचकर्मदिव्यंमदेकसाधारणंलोकविलक्षणंतत्त्वतोनिःसंदिग्धंयोवे
त्ति देहंलिंगदेहंत्यक्त्वापरमानंदस्वरूपमाप्नोतिनपुनर्जन्मेतिकिंतु
स्वस्वरूपाविर्भावरूपंमोक्षंप्राप्नोतीत्यर्थः ९

ऊस्तमवैजयंतीटीका

एवमात्मनोजन्मनःकारणंप्रयोजनंचोक्तमिदानींजन्मकर्मज्ञानेफ
लमाह जन्मकर्मचेति मेजस्याव्ययात्मनःसर्वभूतेश्वरस्यममेवमुक्त
प्रकारेणप्रकृतिमंडलस्यामपिदिव्यमप्राकृतमीश्वरत्वाद्यनन्तानिज
धर्मयुक्तंस्वेच्छाकृतंतत्संकल्पविहितंजन्माविर्भावरूपंनरहरिरघुय
दुवरादिरूपंकनसर्वजनप्रत्यक्षविषयीभूतमित्यर्थः कर्मचासुरवध
स्वजनपालनादिरूपंकतत्त्वतोयाथात्म्यतोयोऽनंतजन्मार्जितानेकपु
ण्यपुञ्जवान्वेत्तिजानाति हेर्जुन सस्वेच्छात्तशरीरमचरमजन्मापु
रुषोदेहंप्रकृतिकार्यंरूपंलिंगदेहंत्यक्त्वापरित्यज्यपुनर्देहत्यागानंत
रजन्मप्रकृतिमंडलेप्राकृतेनदेहेनाविर्भावंनेतिनैतिभावनेतिनमा

मोतिपुनःसंसारजन्ममृत्युलक्षणंकदाचिदपिनप्राप्नोतीत्यर्थः नतु
तर्हिक्वगच्छतीत्यपेक्षायामाह मामेतीति अयंभावःअप्राकृतमज्ञ
नमयथात्यक्तानदावानलभस्मसात्कृतनिःशेषानादिकर्मात्मिका
विद्याजनितानादिप्रकृतिसंसर्गतत्कार्यरूपषोडशकलात्मकलिं
गदेहोमच्छरणोमदाश्रयणोमदात्मकोमज्जनसंसर्गिकनिर्वासिता
त्मलक्ष्करणोभूत्वाकेशपोषाधमरनिकराननतचरणकमलमनपा
यिश्रीभूलीलालोललोचनराजीवराजिपूजितंजगदभिन्ननिमित्तो
पादानकारणंमहाविभूतिपतिंसच्चिदानंदविग्रहंचेतनात्मानमनं
तगुणशक्तिकंसविशेषनारायणंकृष्णंमामर्चिरादिमार्गेणोतिम
ह्राववेप्राप्नोतीति ९ मधुसूदनीटीका
जन्मनित्यसिद्धस्यैवममसच्चिदानंदघनस्यलीलयातथानुकरणंक
र्मचधर्मसंस्थापनेनजगत्परिपालनेममनित्यसिद्धेश्वरस्यदिव्यमप्रा
कृतमन्यैःकर्तुमशक्यमीश्वरस्यैवासाधारणं एवमजोपिसन्नित्यादि
नाप्रतिपादितंयोवेत्तितत्त्वतोभ्रमनिवर्तनेनमूढैर्हिमनुष्यत्वभ्रांत्या
भगवतोपिगर्भवासादिरूपमेवजन्मस्वभोगार्थमेवकर्मेत्यारोपितं
परमार्थितःशुद्धसच्चिदानंदरूपत्वज्ञानेनतदपनुद्याजस्यापिमायया
याजन्मानुकरणमकर्तुरपिपरानुग्रहायकर्मानुकरणमित्येवंयोवे
त्तिसआत्मनोपितत्त्वस्फुरणात्यक्त्वादेहमिमंपुनर्जन्मनैतिकिंतुमां
भगवंतंवासुदेवमेवसच्चिदानंदघनमेतिसंसारात्मुच्यतइत्यर्थः
हेअर्जुन [illegible] ९
सदानंदीटीका
जन्मैवनित्यसिद्धस्यचिदानंदघनस्यमे लीलयामोचयाशक्त्यात
थानुकरणंदिती १ धर्मसंस्थापनेनैवजगतःपरिपालने कर्ममे
वासुदेवस्यनित्यसिद्धेश्वरस्यच २ अक्रियस्यातिशुद्धस्यदिव्यमप्रा
कृतंपरं अन्यैःकर्तुमशक्यंयदसाधारणमेश्वरं ३ योवेत्तितत्त्वतोभ्रा

गी॰ तिंम्यक्तैवंमनुप्रथीगतो सच्चिदानंदरूपस्याजस्यापिस्वात्ममायया
टी॰ जन्मानुकरणंचैवमकर्त्तरपिसर्वथा कर्मानुकरणंलोकानुग्रहा॰
च॰ येतिवेत्तियः ५ सआत्मतत्वविज्ञानात्त्यक्त्वादेहमिमंवुधः प्राप्नोति
नपुनर्जन्ममामेवैतिविदद्वयं ६ जीवन्मुक्तोमुनिर्भूत्वासंसारान्मु
40 च्यतेर्जुन १ ९

नीलकंठीटीका

जन्ममायामयं कर्मसाधुत्राणादिदिव्यंअप्राकृतंयोवेत्ति सत्यक्त्वादेहं पुनःजन्मनप्राप्नोतिकिंतुमामेतिमामेवप्राप्नोति एतेनभगवतोजन्मानिकर्माणिचभगवत्प्राप्तिकामेनगेयानीतिदर्शितं ९

आनंदी टीका

एवंपरानुग्रहादेवदिव्यमद्भुतंमंदबुद्धिभिरसंभाव्यंनतुसामान्यजा॰ नवद्धर्मायमेपारतंत्र्येणोर्ध्वारागवद्भूलमितितत्त्वतःपरमार्थतोयोवेत्तिसइदंशरीरपातादनंतरंमत्सायुज्यंप्राप्नोतीत्यर्थः ९

रामकंठीटीका

अतएव – एवमुक्तेनप्रकारेणजन्मकर्मचयःप्रबुद्धोतत्त्वतःपरमार्थतोजा॰ नाति यत्रशरीरत्वेसतियथोक्तात्परतःस्वभावादप्रच्युतिःयत्रतत्तत्क्रियाफलासंस्पर्शस्यातएवदिव्यमलोकसामान्यमतादृशोयथोक्तविज्ञाननिष्णातमतिर्देहंत्यक्त्वादेहप्रतिपत्तिपुनरूपजन्मनेतितिमत्तत्वभावमापद्यते [illegible] अतोमामे

लासिकी [illegible] टीका

यतएवंततःजन्मपरानुग्रहार्थंदिव्यमलौकिकंपरतःस्वभावादप्रच्युतत्वात्त्वात्तत्रअशक्यारब्धत्वाच्चनतत्कर्मभिः तथाकर्मचधर्मपालनादिरूपंदिव्यंफलदानासमर्थत्वात् एवंतत्त्वतःपरमार्थतोयोवेत्तिआत्मन्यपिएवमेवमन्यते सतत्त्वतस्तत्त्वज्ञानादेहंदेहाहंभावंत्यक्त्वापुन

र्जन्मनैति किंतुमामेवमत्स्वभावमेवैति प्राप्नोतिमुच्यतइत्यर्थः
तत्वतइत्याहृत्याख्येयं ९

पंचोलीटीका

एवंविधानामीश्वरजन्मकर्मणांतत्वज्ञानफलमाह जन्मकर्मेति
हेअर्जुनयःमेजन्ममायारूपंकर्मसाधुपरित्राणादिदिव्यमलौकि
कमीश्वरएवंअमुनाप्रकारेणतत्वतःयाथार्थ्येनवेत्तिजानातिसदेहं
त्यक्त्वापुनर्जन्मनैतिकिंतुमामेतिमोहंनप्राप्नोति ९

रणवीरसमिद्धोधिनी॥

फलितमाह जन्मेति मेममजन्म अजस्यापि जन्मानुकरणंक
मेचकृतकृत्यत्वादविद्यमानकर्तव्यस्यापि स्वधर्माचरणरूप
कर्मानुकरणंदिव्यमलोकसामान्यमेवं परानुग्रहप्रयोजनंयो
वेत्तिनिश्चिनोति अजेनापि परमेश्वरेणजगतांश्रेयोविधानार्थं
जन्मधृतंकृतकृत्येनापिलोकशिक्षार्थंकर्मानुष्ठितंकाकथान्ये
षामिति निश्चित्ययःस्वधर्ममनुतिष्ठति सयुद्धेसंमुखमरणादि
नारेदेहंत्यक्त्वा यद्वास्वधर्मभूतंयुद्धंविधायशत्रूंश्चविजित्यराज्यंल
ब्ध्वाश्वमेधादिभिर्देवानिष्ट्वातिथींश्चसंतर्प्यप्रजाश्चधर्मतःपाल
यित्वांतकालेच देहंत्यक्त्वापुनर्जन्मनैति किंतुमांमत्सायुज्यमा
प्नोति एतेनचकर्मणैवमोक्षइतिप्रतिपादितं ९॥

मधुभाष्य

९॥

भाषा अनुवाद

अब अपने जन्म कर्म जानने का फल कहते है कि हमारे स्वे
च्छासे दिव्य कहे अलौकिक आश्चर्य रूप जो जो जन्म औ कर्म
केवल लोक के अनुग्रहार्थ है तिनके तत्व पूर्वक जानने से लो
ग देह अभिमान छाडि फेरि संसार मे जन्म ग्रहण नही करते ९
वल हमारे ही को प्राप्त होते अर्थात् आवागम से रहित होते है

दोहा

जन्म कर्म मम दिव्य है यह तत्त जानत जोय
जन्म न लेवें देह तज मोहि पावें अर्जुन सोय ९॥

42

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः बह
वो ज्ञानतपसा पूता मद्भावमागताः १०

शांकरभाष्यं

नैष मोक्षमार्ग इदानीं प्रवृत्तः किं तर्हि पूर्वमपि वीतरागेति वीतरागभय
क्रोधा रागश्च भयं च क्रोधश्च रागभयक्रोधाः वीता विगता येभ्यस्ते वीत
रागभयक्रोधा मन्मया ब्रह्मविद ईश्वराभेददर्शिनो मामेव च परमेश्वरमु
पाश्रिताः केवलज्ञाननिष्ठा इत्यर्थः बहवोऽनेके ज्ञानतपसा ज्ञानमेव च
परमात्मविषयं तपस्तेन ज्ञानतपसा पूताः परां शुद्धिं गताः संतो मद्भावमी
श्वरभावं मोक्षमागताः समनुप्राप्ताः इतरतपोनिरपेक्षा ज्ञाननिष्ठा इ
त्यस्य लिंगं ज्ञानतपसेति विशेषणं १०

आनंदगिरिकृतटीका

संप्रति प्रस्तुतमोक्षमार्गस्य नूतनत्वेनाव्यवस्थितत्वमाशंक्य परिहरति
नैष इति मन्मयत्वस्य मद्भावगमनेनापौनरुक्त्यं दर्शयति ब्रह्मविद इति
आत्मनो भिन्नत्वेन वा ब्रह्मणो वेदनं व्यावर्तयति ईश्वरेति अभेददर्शनेन स
मुच्चित्य कर्मानुष्ठानं प्रत्याचष्टे मामेवेति तदुपाश्रयत्वमेव विघटयति
केवलेति मामुपाश्रिता इति केवलज्ञाननिष्ठत्वमुक्त्वा ज्ञानतपसा पूता
इति किमर्थं पुनरुच्यते तत्राह इतरेति १०

स्वामिकृतटीका

कथं जन्मकर्मज्ञानेन त्वत्प्राप्तिः स्यादित्यत आह वीतरागेति अहं शुद्धसत्त्वा
वतारैर्धर्मपालनं करोमीति मदीयं परमकारुणिकत्वं ज्ञात्वा वीता विगता
चिनः रागभयक्रोधा येभ्यस्ते विक्षेपाभावान्मन्मया मदेकचित्ता भूत्वा मामेवोपाश्रि
ताः संतो मत्प्रसादलब्धं यदात्मज्ञानं तपश्च तत्परिपाकहेतुः स्वधर्मस्तयोर्द्वं
द्वैकवद्भावः तेन ज्ञानतपसा पूताः शुद्धा निरस्ताज्ञानतत्कार्यमला मद्भावं म
त्सायुज्यं प्राप्ता बहवः न त्वधुनैव प्रवृत्तोऽयं मद्भक्तिमार्ग इत्यर्थः तदेवं तान्यहं वे
द सर्वाणीत्यादिना विद्याविद्योपादिभ्यां तत्त्वंपदार्थावीश्वरजीवौ प्रदर्श्येश्वरस्य
वाविद्याभावेन नित्यशुद्धत्वात् जीवस्य चेश्वरप्रसादलब्धज्ञानेनाज्ञाननिवृत्तेः

शुद्धस्सन्तश्चिदंशेनतदैक्यमितिद्रष्टव्यं १०

पिशाचभाष्यं

नैषमोक्षमार्गइदानींप्रवृत्तः किंतर्हिपूर्वमपि वीतरागेति मन्मयाब्रह्म
विदः मामुपाश्रिताः मामेवपरमेश्वरमाश्रिताः ज्ञानमेवतपः तेनज्ञा-
नतपसापूताः शुद्धाः मद्भावमीश्वरभावमागताउक्ताइत्यर्थः १०

रामानुजभाष्यं

तदाह मदीयजन्मकर्मतत्वज्ञानाख्येनतपसापूताबहवएवंसंवृत्ता :
तथाचश्रुतिः तस्यधीरापरिजानंतियोनिमितिधीराधीमतामग्रेसरा
एवतस्यजन्मप्रकारंजानंतीत्यर्थः १०

अभिनवगुप्तकृतटीका

तथाचैवंविदंतःमन्मयत्वात्परिपूर्णेच्छत्वात्क्रोधादिरहितानिष्फलं
कर्मकरणीयंकुर्वाणाबहवोमत्स्वरूपमवाप्ताः १०

परमार्थप्रपाटीका

अथकथमेतावतैवत्वत्प्राप्तिःस्यादतआह वीतरागेतिवीताअतिक्रां
तारागभयक्रोधायेभ्यस्तेअतएवमतमन्मयाःमदेकचित्ताःअतएवमामे
वोपाश्रिताःसंतोमत्प्रसादाल्लब्धेनज्ञानतपसाज्ञानमात्मानात्मविवेक
रूपंतपइवतन्निमित्तभूतंकर्मतेनबहवोयोगिनःपूताःशुद्धाःसमितभूते
केसंतोमद्भावंमत्सायुज्यमागताः १०

वनमालीटीका

ममजन्मादिज्ञानेनबहवोमुक्ताजाताइत्याह वीतेतिरागोविषयभो
गतृष्णासर्वविषयान्विहायमोक्षमार्गेकथंप्रवर्तितव्यमितित्रासोभयं
सर्वविषयोच्छेदकोयंमोक्षमार्गःकथंहितःस्यादितिद्वेषःक्रोधःएतेवी
ताभगवज्जन्मादिचिंतनहेतुकप्रसादेनविगतायेभ्यस्तेमन्मयामदेकवि
तामामुपाश्रिताएकांतप्रेमभक्त्यामामीश्वरंशरणंगताःबहवोज्ञानरू-
पेणतपसातेनपूतानिरस्ताविद्याःसंतोमद्भावंशुद्धबुद्धसदानंदघनाः-

नित्यमुक्तस्य मम भावं सामान्यापरपर्यायं सायुज्यरूपं मुक्तिमागताः नि
रंजनः परमं साम्यमुपैतीति श्रुतेः १

ऊसमवैजयंतीटीका

ननु नैतज्ज्ञानेन कश्चिदपि जनस्त्वां प्राप्तो न वेत्यपेक्षायां बहवो मद्भावं गता
इत्याह वीतरागभयक्रोधा इति रागः प्रियविषयेषु धनपुत्रदारादिषु
प्राकृतेषु प्रीतिः भयं मोक्षमार्गे अनेकविघ्नरूपे देवेभ्यो व्यालव्याघ्रा
दिभ्यो वा काममोहादिभ्यो वा त्रासः क्रोधः स्वकर्मप्रेरके पुरुषे द्वेषरू
पः वीता विशेषेण दूरीकृता रागभयक्रोधा यैस्ते अतएव मन्मयाः
मां व्यापकरूपं तत्पदार्थमीश्वरं त्वंपदार्थादंतर्यामिनो भेदाभेदेन
साक्षात्कृतवंतो मदेकमनसो वा मामुपाश्रिताः अनपायिन्या भक्त्या
श्वरमात्मानं मां शरणं प्राप्ताः बहवो कामाजाताः ज्ञानतपसा ज्ञानेन म
ज्जन्मकर्मयाथात्म्यरूपं तपो मन्त्राद्यखिलसाधनेन ज्ञानमेव तपस्तेन
यद्वा ज्ञाने चेतनाचेतनयोर्ब्रह्मतादात्म्यरूपं तपः प्राकृतविषयकाम
सन्तापनं तच्च तज्ज्ञानयोस्तमाहरस्तेन पूताः पवित्रीकृता यो त संसार
सन्तापास्ते मद्भावं मम समानरूपं निरावरणज्ञानत्वान्मत्समान
विग्रहे वा आगताः प्राप्ताः मज्जन्मकर्मज्ञानेनैव बहवो धीरा मोक्षं प्रा
प्ता इत्यर्थः तस्य धीराः परिजानन्ति योनिमित्यादिश्रुतेः धीराः धीमन्ता
मग्रे मराः सूरयो यतेष्वेव तस्य भगवतो मम योनिं जन्म जानन्ति नान्य
इति श्रुत्यर्थः १

मधुसूदनीटीका

सर्वेषु नसप्राप्यतया पुरुषार्थत्व
सा मे ति सोऽर्जुने स्तु तं तत्र स्वस्था
रागस्तत्फलतृष्णा सर्वान् विषयान् परित्यज्य ज्ञानमार्गे कथं जीवि
तव्यमिति त्रासो भयं सर्वविषयसर्वोच्छेदकोऽयं ज्ञानमार्गः कथं हि
तः स्यादिति द्वेषः क्रोधः एते रागभयक्रोधा वीता विवेकेन विगता
येभ्यस्ते वीतरागभयक्रोधाः शुद्धसत्त्वाः मन्मयाः मां परमात्मानं तत्प
दार्थं त्वंपदार्थाभेदेन साक्षात्कृतवंतः मदेकचित्ता वा मामुपाश्रिता
एकान्तप्रेमभक्त्या मामीश्वरं शरणं गताः बहवोऽनेके ज्ञानतपसा ज्ञा
नमेव तपः सर्वकर्मक्षयहेतुत्वात् नहि ज्ञानेन सदृशं पवित्रमिह वि

मार्गस्थानादिपदे
परागतत्वे वद
र्शयति ०

यतेंतितिहिवदयति तेनहृताःक्षीणसर्वपापाःसंतोनिरस्ताज्ञानतत्कार्यमलाःमद्भावंमद्रूपत्वंविशुद्धसच्चिदानंदघनंमोक्षमागताःअज्ञानमात्रापनयेनमोक्षंप्राप्ताःज्ञानतपसापूताःजीवन्मुक्ताःसंतोमद्भावंमद्विषयंभावंरत्याख्यंप्रेमाणमागताइतिवा तेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यतेइतिहिवदयति [illegible] १०

सदानंदीटीका

सर्वमुक्तजनैःप्राप्यंस्वात्मानंसंप्रदर्श्यच मोक्षाध्वनोप्यनादित्वंदर्शयत्यधुनाहरिः १ तत्रत्कलैषणारागोभयंभोगेषुदीनता विषयोच्छेदकत्वेनज्ञानमार्गःकथ्यहितः २ इतिद्वेषात्रक्रोधोस्तितेत्रयोत्यंतदुःसहाः विवेकाद्विगतायेभ्यःशुद्धसत्वाविरागिणः ३ तत्वंपदार्थाभेदेनमामेवाद्वयमांतरं साक्षात्कृत्यैवमद्रूपामामेवशरणंगताः ४ ज्ञानमेवतपःसर्वकर्मविध्वंसकारणं तेनपूताःपरिक्षीणज्ञानतत्कार्यकल्मषाः ५ बहवःसच्चिदानंदघनेमद्भावमागताः ६ १०

नीलकंठीटीका

एतस्यापिभगवत्प्राप्तेर्द्वारमाह वीतेति रागोविषयेषुप्रीतिःभयंस्वोच्छेदाशंका क्रोधःस्वपरपीडाहेतुरभिज्वलनंतेत्रयोवीताःयेभ्यस्तेवीतरागभयक्रोधाःअतएवमन्मयाःमदेकप्रधानाःकिंजारिणीयथाजारमपिभर्तारंवाश्रितायोगक्षेमार्थंतद्वदेत्याह मामुपाश्रिताअंतरंचिंतनंयस्यज्ञानमयंतपइतिश्रुतिप्रसिद्धंज्ञानंतपःतेनपूताःसंतोमद्भावंमनादात्म्यंप्राप्ताइत्यर्थः १०

आनंदीटीका

एवमीश्वरस्वरूपमुद्दिश्यप्रकृतंज्ञानकर्मसमुच्चयमेवलक्षयति

वीताविगता रागो विषयाभिलाषो रजोगुणकार्यं भयं तद्विघात
केभ्यस्त्रासो रजस्तमसोः कार्यं क्रोधो विघातकप्रतीकाराय चित्त
ज्वलनं येभ्यस्ते अतएव मन्मया मदेकस्वभावाः शुद्धसत्त्वाः तथाहमे
वव्यपाश्रयो विशिष्टोपाश्रयः स्थितिहेतुर्येषां ते बहवो ज्ञानतपसा
ज्ञानसमुच्चितेन तपसा कर्मणा पूताः क्षीणकल्मषा मद्भावं मत्सायु
ज्यमागताः तपःशब्दो ब्रह्मकर्मार्थवाचकः ज्ञानसमुच्चितं च तत्तपो ज्ञा
नतप इति मध्यपदलोपी समासः १०

रामकंठीटीका

यतएतेन — यथोक्तज्ञानलक्षणेन निरतिशयशुद्धिहेतुना व्रतविशेषेण पूताः प
वित्राः सन्तो बहवो योगिनो मद्भावं मामिकां सत्तामागताः मदभेदं शमा
इत्यर्थः यतोधिज्ञानपरिशीलनाद्वीतरागभयक्रोधाः रागो विषये
ष्वभिलाषस्तथा तद्विघातहेतुभ्योऽशक्यप्रतिकारेभ्यो भयं त्रासस्तथा
शक्यप्रतिकारेषु क्रोधः इत्येते संसारदृढगडरूच्छेद निगडभूता दोषा वी
ता विगताः स्फुटिता येषां ते अतएव मन्मया मदेकस्वभावा मद्व्यपाश्र
या अहमेव व्यपाश्रयो निरपायत्वाद्विशिष्टोपाश्रयः स्थितिहेतुर्येषां ते
ध॰ तथाविधाः नन्वेवं तो भगवतैकमेव तत्त्वं यथोक्तविशेषणविशिष्टं
परमार्थसत्त्वेन [illegible] प्रतिपादितं तदेव चेदानीमहन्तया व्यपदिश्यते
तत्कथं केचिदेव मद्भावमागता इत्युच्यते [illegible] १०
[illegible]

लासिकी[illegible]टीका

किंतु पूर्वेपिमु
नकेवलमिदानीमेव तत्त्वतो जन्म कर्म ज्ञानेन मुच्यते
क्ताएवेत्याह वीतरागेति रागो विषयेष्वभिलाषः भयं तद्विघात
हेतुभ्योऽशक्यप्रतीकारेभ्यस्त्रासः तथा शक्यप्रतीकारेषु क्रोधः इत्ये
ते विगता येषां ते तथा मन्मया मदेकस्वभावा मामेव परमात्मानमा
भेदेन साक्षात्कृतवन्तः तथा मां परमेश्वरं भक्त्योपाश्रिताः शरणमा
गताः अतएव मन्मया मांदलभ्यो नाहेतलक्षणज्ञानरूपेण तपसा पूताः

दा

क्षीणविकल्पकलंकाः क्षीणकल्मषा वा निरस्ताज्ञानं तत्कार्यम-
लावा बहवो मद्भावं मत्सायुज्यमागताः ननु अधुनैव प्रवृत्तोयं मद्भक्ति
मार्ग इत्यर्थः तदेवं तान्यहं वेद सर्वाणीत्यादिना विद्याविद्योपाधि
भ्यां तत्त्वंपदार्थावीश्वरजीवौ प्रदर्श्येश्वरस्य विद्यैकभावेन नित्यशुद्ध
त्वात् जीवस्य चेश्वरप्रसादलब्धज्ञानेनाज्ञाननिवृत्तेः शुद्धस्य सतः वि
देशेन तदैक्यमुक्तमिति द्रष्टव्यं ९

पैचोलीटीका

नैष मोक्षमार्गः इदानींप्रवृत्तः किंतर्हि पूर्वमप्यस्तीत्याह वीतरागेति हे
अर्जुन बहवः वीतरागभयक्रोधाः मन्मया मत्स्वरूपाः मामुपाश्रिताः
मन्निष्ठा ज्ञानतपसा ज्ञानरूपेण तपसा पूताः मद्भावमागताः परां सिद्धि
मागताः मोक्षप्राप्ताः ९

मनावीरसमसिद्धोधिनी॥

उक्तमेवार्थं विवृणोति वीतेति रागः पुत्रमित्रादि विषयः स्नेहः प्र
वृत्तिनिरोधकः भयं मत्तो बलवद्भ्यः परेभ्यः सकाशाज्जातं यद्वा कथ
महं शुद्धे स्वबंधून्हत्वा तथैवाजीवामीत्येवंरूपस्त्रासः क्रोधः सर्वेषां
बंधादीनां विच्छेदकोयं शुद्धमार्गः कथं हितः स्यादिति द्वेषः तद्रहि
ताः मन्मया मामेव कर्मसु प्रवृत्तं प्राप्तुर्येषां प्रमाणीकृतवंतः अत
एव मामेव सिद्ध्यसिद्धिविषये उपाश्रिताः प्रमाणीकृतवंतः बहवोऽ
परिसंख्येयाः पूर्वे राजर्षयो मद्भावं मत्सायुज्यमापन्नाः प्राप्तवंतः
यतो ज्ञानतपसा पूताः ज्ञानं शुद्धमिदं स्वधर्मं युद्धमेव यथा यमनुष्ठा
स्यामि तेन च मम सर्वं पुरुषार्थावाप्तिर्भवेदित्येवंरूपनिश्चयात्मकं
तत्र तपो नियमधारणारूपं तेन पूताः अनुष्ठितस्वधर्माण इत्यर्थः ते
न त्वमपि मां प्रमाणीकृत्य स्वधर्मं युद्धमनुतिष्ठ ततश्च मत्सायुज्यं
प्राप्स्यसीति भावः १०॥

मधुभाष्य

वीतरागेति मन्मयाः मत्प्रभुताः सर्वत्रमां विना न किंचित्
प्रयीत्यर्थः नच मद्भजनमात्रेण मुक्तिर्भवत्यन्यदेवतादिरू
पेण तथापि सर्वेषामात्मरूपेण फलं ददामीत्याह ९

46

भाषा अनुवाद

जो कहोकि ईश्वरके जन्म कर्म जानने हीसे कैसे ईश्वर प्राप्त होयहै इस पर कहतेहै कि शुद्ध सतोगुण से अवतार लेय हमारे जोपरम दयालुता के कर्म तिनके जानने से सतोगुण के द्वारा सत्व वृद्धि होती फेरि वे लोग संसार से विगत स्नेह श्रो गत क्रोध निर्भय होय मेरे आश्रित मद्रूप अर्थात् मत्स्वभाव बहुतेरे ज्ञान संपन्न परम पवित्र होय मद्भाव को प्राप्त भये हैं अर्थात् मेरे स्वरूप मेलीन होगयेहैं १० ॥

दोहा

रहित राग भय क्रोध जो मो मय मो शरणाय बहुतप ज्ञान प
वित्रहोय मोरे भाव समाय १० ॥

येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहं मम वर्त्मा
नुवर्तंतेमनुष्याःपार्थसर्वशः ॥

शांकरभाष्य

तवतर्हिरागद्वेषौस्तःयेनकेभ्यश्चिदेवात्मभावं प्रयच्छसिनसर्वेभ्यइत्युच्य
तेये यथेति येयथायेनप्रकारेणयेनप्रयोजनेन यत्फलार्थितयामांप्रप
द्यंतेतांस्तथैव तत्फलदानेन भजाम्यहमनुगृह्णाम्यहं इत्यर्थः तेषांमोक्षं
प्रत्यर्थित्वं प्रत्यनर्थित्वान्नह्येकस्यमुमुक्षुत्वंफलार्थित्वंच युगपत्संभवति
अतोयेयत्फलार्थिनःतान्तत्फलप्रदानेनयेयथोक्तकारिणस्त्वफ
लार्थिनोमुमुक्षवश्चतान् ज्ञानप्रदानेनयेज्ञानिनः संन्यासिनोमुमुक्षव
श्चतान्मोक्षप्रदानेन तथाआर्तानार्तिहरणेनेत्येवं यथायेनप्रकारेणमां
प्रपद्यंतेयेतांस्तथैवभजामीत्यर्थः नपुनःरागद्वेषनिमित्तं मोहनिमित्तं
वा किंचिद्भजामि सर्वथापिसर्वावस्थस्यममेश्वरस्यवर्त्ममार्गमनुवर्तंते
येमनुष्याःयत्फलार्थितया यस्मिन्कर्मण्यधिकृताःयेप्रयतंतेतेमनु
ष्याअत्रउच्यंते हेपार्थसर्वशःसर्वप्रकारैः ॥

आनंदगिरिकृतटीका

ईश्वरःसर्वेभ्योभूतेभ्योमोक्षंप्रयच्छतिचेत् प्रागुक्तविशेषणवैयर्थ्यं यदि
तुकेभ्यश्चिदेव मोक्षंप्रयच्छेत्तर्हि तस्यरागादिमत्त्वादनीश्वरत्वापत्तिरिति
शंकतेतवतर्हीति येमुमुक्षवस्तेभ्योमोक्षमीश्वरोज्ञानसम्पादनद्वारा प्र
यच्छति फलांतरार्थिभ्यस्तु तत्तदुपायानुष्ठापनेन तत्तदेवददातीति
नास्यरागद्वेषावितिपरिहरति उच्यतइति मुमुक्षूणामीश्वरानुसारित्वे
पि फलांतरार्थिनांकुतस्तदनुसारित्वमित्याशंक्यफलमत उपपत्तेरिति
न्यायेनतत्फलस्येश्वरायत्तत्वात्तदनुवर्तित्वमावश्यकमित्याह ममेतिभगव
द्वचनभागिनां सर्वेषामेवकैवल्यमेकरूपं किमितिनानुगृह्यतेतत्राह ते
षामिति अभ्युदयनिःश्रेयसार्थित्व प्रार्थनावैचित्र्यादेकस्यैव किंन
स्यादित्याशंक्यपर्यायेण तदनुपपत्तिंसाधयतिनहीति मुमुक्षूणांफला
र्थिनांचविभागेस्थितेसत्यनुग्रहविभागंफलितमाह अतइति फलप्रदा
नेनानुगृह्णामीति संबंधः नित्यनैमित्तिककर्मानुष्ठायिनामेव फलार्थि

त्वाभावेसतिमुमुक्षुत्वे कथंतेष्वनुग्रहः स्यादितितत्राह येयथेति
ज्ञानप्रदानेनभजामीत्युत्तरत्र संबंधः संतिकेचित्त्यक्तसर्वकर्म्माणोज्ञा
निनोमोक्षमेवापेक्षमाणास्तेष्वनुग्रहप्रकारं प्रकटयति येज्ञानिन इति
केचिदार्त्ताः संतोज्ञानादिसाधनांतररहिता भगवंतमेवार्तिमत्वहर्तृत्वमनु
वर्त्तंते तेषुभगवतोऽनुग्रहविशेषं दर्शयतितथेति पूर्वार्द्धव्याख्यानमुप
संहरति इत्येवमिति भगवतोऽनुग्रहे निमित्तान्तरंनिवारयति नत्वनरि
ति फलार्थित्वेमुमुक्षुत्वेच जन्तुना भगवदनुसरणमावश्यकमित्यन्त
राई विभजते सर्वथापीति सर्वावस्थत्वेनेनतेनात्मना परमेश्वरस्या
वस्थानं मार्गोज्ञानकर्म्मलक्षणः मनुष्यग्रहणादितरेषामीश्वरमार्गानु
वर्त्तित्वमप्युदासः स्यादित्याशंक्याह यत्फलेति सर्वप्रकारैर्ममम्मार्गम
नुवर्त्तन्ते इतिपूर्वेणसंबंधः ॥

स्वामिकृतटीका

ननु तर्हिकिंत्वय्यपिवैषम्यमस्ति यस्मादेवंत्वदेकशरणानामेवात्मभावं
ददासिनान्येषांसकामानामित्यतआह येयथेति यथायेनप्रकारेण
सकामतयानिष्कामतयावायेमांभजंति तानहंतथैवतदपेक्षितफ
लदानेनभजाम्यनुगृह्णामिनतुयेसकामामांविहायेंद्रादीनेवभजंती
तितानहमुपेक्ष इतिमंतव्यं यतःसर्वशःसर्वप्रकारैरिंद्रादिसेवकाअपिम
मेववर्त्मभजनमार्गमनुवर्त्तंते इंद्रादिरूपेणापिममैवसेव्यत्वात् ॥

पिशाचभाष्यं

मद्भावमागताइत्युपक्रांतंमैत्रमेवप्रयच्छतिभगवान्भक्तानांनज्ञानैश्व
र्यादिफलमित्यज्ञेनस्यवचनमाशंक्याह येयथेति येयत्फलप्रार्थिनः
पुरुषायथायेनप्रकारेणसात्विकराजसतामसभावेनमांप्रपद्यंतेतान
हंतथैवतत्फलदानेनैवपैश्वर्यादिफलार्थिनः तद्दानेनैवेत्यभिप्रायः
ममेश्वरस्यमन्मार्गंयथाभिलषितफलप्रदत्वमनुवर्त्तंतेअनुसरंति य
यत्फलमभिलषितंतदेवमांप्रार्थयंतइत्यभिप्रायः ॥

रामानुजभाष्यं

येयथामामितिनकेवलंदेवमनुष्यादिरूपेणावतीर्यमत्समाश्रय-
णापेक्षपरित्राणंकरोमि अपितुमत्समाश्रयणापेक्षंयथायेनप्रका
रेणापेक्षात्तदनुरूपंमासंकल्प्यप्रपद्यते ममाश्रयंतेतान्प्रतितथैव-
तन्मनीषितप्रकारेणभजाम्यहंमादर्शयामिकिमत्रबहुनासर्वेमनु भक्ति ५
ष्यामदनुवर्तनैकमनोरथाममवर्त्ममत्स्वभावंसर्वयोगिनामवाङ्
मनसगोचरमपिस्वकार्यैश्चक्षुरादिकरणैः सर्वशःसर्वप्रकारैरनुभू
यानुवर्तते ११

अभिनवगुप्तकृतटीका ११ ५

येयथैवबुद्ध्यामामाश्रयंतेतान्प्रतितदेवस्वरूपंगृहीत्वा
स्ताननुगृह्णामि एवमेवमदीयंमार्गंमन्मयाअम
न्मयाश्चसर्वएवानुवर्तंते नहिज्योतिष्टोमादिरन्यो
मार्गोमदीयएवसातथोक्तावदंतेहि
चातुर्वर्ण्यंमयासृष्टमिति अन्यत्स्वाह
लिङ्थेलट् यथाविरात्रेषोडशिनं
गृह्णातिनगृह्णातीयुरित्यर्थः एवमिहा
प्यनुवर्तेरन्निति ११

परमार्थप्रपाटीका

ननुयेत्वय्यपिवैषम्यमस्ति यतस्त्वदेकशरणानामेवात्मभावंददासि
मा ५ नकामिनामित्यतआह येयथेतियेउपासकाःमुमुक्षवःयथायदुद्दि-
श्यमांप्रपद्यंतेयशरणंव्रजंतिअहमपितांस्तथैवभजामि तदुद्देश्य
पूर्णीकरोमि तदुक्तंसप्तदशायदुपास्तिनार्थदइति अथतदुद्देश-
प्रवर्तकोप्यहमेवेत्याह ममेतिसर्वशःसर्वेमनुष्याःममवर्त्ममार्गमनु
लक्षीकृत्यवर्ततेसर्वांतर्यामित्वेनतत्तद्गुणविशिष्टबुद्धेःप्रेरकोप्य
हमेवास्मि ११

वनमालीटीका

ननुत्वज्जन्मादिचिंतनलब्धत्वत्परोक्षेणयेप्रताःस्तान्मोक्षंयेत्वविद्या
स्तान्स्वर्गादिकंयेत्वामवजानंतितान्नरकमितरानासुरांस्तुनीचयोनि
ष्पांसंतनिं प्रापयसीतिविषमोसीतिकथंत्वंभजनीयस्तादृशस्यज्ञा
नामोक्षश्चकथंस्यादतआहयइतियेयथासकामतयानिःकामतया
द्वेषावज्ञादिनामांभजंतितांस्तथैवस्वर्गमोक्षनरकसंसारादिदानेन
भजामि यथाकल्पतरुर्यायथाश्रयतिसतथैवततःफलंप्राप्नोति
तद्वदितिभावः नन्वेवविद्यानामिंद्रादियाजित्वात्कथंतेमुच्यंतेकथं
वात्वांप्रपद्यंतेतत्राह ममेति ममसर्वांतर्यामिणोवर्त्मभजनमार्गं-
सर्वेदेवांतर्याजकाअप्यनुवर्ततेशास्त्रस्यमनुष्याधिकारिकत्वान्म
नुष्याइत्युक्तं इंद्रादौस्थितस्तुमज्जाग्राहकःफलदाताचाहमेवतथा
चवक्ष्यतियेप्यन्यदेवताभक्तायजंतेश्रद्धयान्वितास्तेपिमामेवकौंते-
ययजंत्यविधिपूर्वकमिति ११ ॥

उत्कर्षवैजयंतीटीका

ननु येन त्वामुपाश्रितास्तेन तव जन्म कर्म च ज्ञात्वैव मोक्षं प्राप्नुवंतीति
चेन्नहि ये केवलं त्वां समाश्रिता एवं त्वज्जन्मादिकं न जानंति तेषां का ग
तिरित्याशंक्य मत्प्राप्तौ ज्ञानादिसाधनापेक्षैव नास्ति तस्याश्रयस्य साध
नानपेक्षत्वेन स्वतंत्रत्वादित्याह येयथेति हे पार्थ यथापुन्नर्थ्ययापि सर्व
शः सर्वे मनुष्यास्तदपि ममेश्वरस्य वर्त्मा विरादिमार्गं विधिशिवादीनां
योगेश्वराणामपि कथं विज्ञानरूपं विषयं स्वरूपं वर्त्म शब्दो ऽत्र गा
तिपर्य्यायः स्वरूपवाचकः गतिर्भर्ता प्रभुः साक्षीति वचनात् शास्त्राचा
र्य्योपदेशेनानुभूय वर्तंते प्रपद्यंते नात्र संदेहः परं तु ये केचिन्नराकार
माचाः शास्त्राचार्योपदेशादिरहिताः सदाचारविहीनाः सर्वज्ञानादिसा
धनशून्या जातिकुलधर्मकर्मादिवर्जिताः शबरहूणादयः पापजीवाय
थायेन केनापि प्रकारेण मां सर्वेश्वरं विश्वासं कृत्वा प्रपद्यंते समाश्रयंते ता
न् जनांस्तथैव तेन तेनैव तत्तन्मनीषितप्रकारेणेश्वरोऽहं भजामि तत्तन्मयतः
विषयीभूतत्वादनुगृह्णामि एवं कारेणान्यूनाधिकफलं न ददामीति हृचित
पार्थेति संबोधयन्नेनत्वं मनुष्याग्रेसरो मत्प्रपन्नो मदनन्यभक्तोसि यथाय
था मां माज्ञापयसि तथा तथैवाहं सर्वेश्वरोपि करोमि त्वत्प्रपन्नाधीनो मा
मीश्वरं सात्त्वतात्स्ववदनुषेवपश्येति सूचितं ११

+ ननु ये ज्ञाननपसाहृता निष्कामास्ते त्वद्भावं गच्छन्ति ये त्वपूर्ताः सकामंस्ते न गच्छंतीति फ
लदोत्तु त्वं वैषम्यनैर्घृण्यपस्याताममितिनेत्याह +

मधुसूदनीटीका

+ ये आर्ता अर्थार्थिनो जिज्ञासवो ज्ञानिनश्च यथा येन प्रकारेण सकामतः
या निष्कामतया च मामीश्वरं सर्वफलदातारं प्रपद्यंते भजंति तांस्तथैव
तदपेक्षितफलदानेनैव भजाम्यनुग्रहणाम्यहं न विपर्ययेण तत्राः मु
मुक्षूनार्तानर्थार्थिनश्चार्तिहरणेनार्थदानेन चानुगृह्णामि जिज्ञासू
न्विविदिषंति यज्ञेनेत्यादि श्रुतिविहितनिष्कामकर्मानुष्ठानानुत्ताननेन नदान्
ज्ञानिनश्च मुमुक्षून्मोक्षदानेन न त्वन्यस्मै कामायान्यद्ददामीत्यर्थः ननु
तथापि स्वभक्तानामेव फलं ददासि न त्वन्यदेवभक्तानामिति वैषम्यं स्थि
तमेवेति नेत्याह मम वर्त्मानुवर्तंते इति मम सर्वात्मनो वासुदेवस्यैव
त्मि भजनमार्गं कर्मज्ञानलक्षणं मनुवर्तंते हे पार्थ सर्वशः सर्वप्रकारै
रिंद्रादीनप्यनुवर्तमाना मनुष्या इतिकर्मादिकारिणः इंद्रं मित्रं वरुण

मन्निमाङ्करित्यादिमंत्रवर्णात् फलमत उपपत्तेरितिन्यायाच्च सर्वरूपे
णापिफलदाताभगवानेकएवेत्यर्थः तथाचवक्ष्यतियेप्यन्यदेवताभ
क्ताइत्यादि [illegible]
[illegible] ॥

सदानंदीटीका

येज्ञानतपसाशक्तास्त्वज्ञावंयांतितेजनाः नेतरेवेतिवैषम्यंफलदा॰
तस्त्ववेतिचेत् १ शृणुवार्तावित्तकामाश्चज्ञानिनश्चमुमुक्षवः सका॰
मत्वेननिष्कामतयायेमांयथेश्वरे २ समस्तफलदातारंभजंतेतांस्त
थैवच तदभीष्टप्रदानेनत्वनुगृह्णाम्यहंहरिः आर्त्तानार्त्तिविनाशेन
वित्तदानेनचार्थिनः जिज्ञासून्ज्ञानदानेनज्ञानिनोमोक्षदानतः ४
अनुगृह्णाम्यहंस्वामीनान्यकामायचान्यथा फलार्थित्वेमुमुक्षुत्वे
हरिरेवनृणांगतिः ५ इत्याहाखिलभूतानामात्मास्वामीगुरुःसखा
सर्वात्मनःपरेशस्यममवार्गेहितेथेरिते ६ ज्ञानकर्मात्मकेसर्वेजीवाः॰
कर्माधिकारिणः अनुवर्त्ततएवास्मिन्यार्थसर्वप्रकारतः ७ अन्यदेवा
न्भजंतोपिभजंतेमाखिलात्मकं ८ ॥

नीलकंठीटीका

ननुसाधुसाधोस्त्राणविनाशौकुर्वतस्तववैषम्यनैर्घृण्येस्तांःतःकिंत
वास्मदादितुल्यस्यजन्मकर्मस्वरूपाणांचिंतनेनेत्याशंक्याह येयथेति
येमनुष्याःमांसर्वशरीरस्थंयथायेनप्रकारेणशत्रुत्वेनमित्रत्वेनवाप्रप
द्यंतेप्राप्नुवंतितांस्तेनैवप्रकारेणाहमपिभजाम्यनुसरामि येतुमम
वर्त्मभक्तिध्यानप्रणिधानात्मकमनुवर्त्ततेतान्नममात्मभूतांस्तथैव
सर्वशःसर्वैःप्रकारैरनुवर्त्तेहमितियोजना ततश्चमह्यंविभूतेप्राणिजा
तेयथायःप्रीतिद्वेषंवाकरोतितस्मिन्मत्प्रतिबिंबभूतेहमपितथैवप्री
तिद्वेषंचकरोमि बिंबपूजापरिभवौप्रतिबिंबेपर्यवसन्नौमतोनानमम
वैषम्यनैर्घृण्येस्तः तस्मात्श्रेयोर्थिनासर्वस्यकल्याणायैवयतितव्य
मितिभावः भाष्येतुयेयथायेनप्रकारेणयेनप्रयोजनेन आर्त्ताजि
ज्ञासवोर्थार्थिनोज्ञानिनोवाप्रतिपद्यंतेतांस्तथैवपीडापरिहारेणज्ञा

नदानेनअर्थदानेनमोक्षदानेनवाऽनुगृह्णामि सर्वथातेममैववर
र्त्मानुवर्तंतइतिअन्यदेवताभक्ताइतिचेतत्राचक्ष्यते ॥

आनंदी टीका

वीतरागेष्वेवयदित्वंसायुज्यप्रदोनेतरेष्विति वैषम्यप्रवृत्तिशंकांप्र
कारांतरेणापनयति येस्वर्गादिकामफलार्थंमांप्रपद्यंतेतांस्तथै
वभजामिस्वीकरोमिस्वर्गादिफलभागिनएवकरोमियेतुमोक्षा
र्थिनस्तान्मोक्षभागिनएवकरोमि हेपार्थसर्वशःसर्वएवलोका
भोगार्थिनोमोक्षार्थिनोवाममैववर्त्मानुवर्ततेमत्कृतमेवमार्ग
मनुगच्छंतिप्रवृत्तिमार्गोनिवृत्तिमार्गश्चमयैवदर्शितः ॥

रामकंठीटीका

इत्यर्जुनस्यसम्यग्गृहीतपारमेश्वरक्रीडाविधेविकल्पमाशंक्याह ॥
सत्यमेवाहंसमस्तानामन्योन्यभिन्ननानाविधस्वरूपाणांफेनबुद्बु
दकल्लोल कलापानामुदधिरिवोदयास्तमयनिलयएकएवतादृ
शेनमयानिजमायाशक्त्यातत्तन्नियतसामर्थ्यावच्छिन्नदेहादिप्रति
ष्ठिताःहंकारेतेन येहेत्वज्ञानानानारूपानुभवभूमितामु यथायेनप्रका स्तिषुम
रेणयादृशेनसंकल्पेनयेकेचनमांप्रपद्यंतेमांप्रार्थयंते तत्कालेमत्स
मापन्नाभवंति तानहंतथैवतत्संकल्पोचितफलदानरूपेणप्रकारे
णभजामि सेवयामि नाचेत् सर्वएवमत्प्राप्तस्तत्तदर्थक्रियासम्पादना ५
र्थिनावसरेममसर्वेभ्यःसर्वमनोरथफलसाधनैकचिंतामणेर्वर्त्मश्रा
मिहेतेनिर्विकल्पोत्साहलक्षणंपंथानमनुवर्तंते नुकुर्वंतियथाहेप
रेणोत्साहेनैकएवसर्वंकरोमिजानामिच तथातेप्रतिनियतंकार्यंज्ञे
यंचकुर्वंतोजानंतश्चमत्समापत्तिवेदनशक्तिशून्यत्वादहंकरोम्यहं
जानामीतिकिंचित्कर्तारःकिंचिज्ज्ञाएतादृशेस्वात्मनिकर्तृत्वादिकंम
न्यंते किमनेनोक्तंभवति यथाक्रीडाकेनानुग्रहीतहृदयास्तिर्यंचो
बालादयश्च तत्तदर्थक्रियानिष्ठाःतेतेस्वंस्वंविषयंप्रपद्यंति नचतेन
मन्यन्तेमत्कृतत्वात् यतस्तादृशेनव्यवहारेणव्यक्तत्वात्तस्तथैवसर्वेते
अज्ञास्तत्तदर्थक्रियार्थिनोमयैवतत्तत्क्षणप्रार्थितेनस्वप्रकाशानु

गृहीतमसंविदोदृष्टप्रयोजनमदृष्टप्रयोजनंवासर्वंकुर्वंतिजानंतिच
दी॰ मायामोहितत्वात्मानंनतुकारणत्वेनमन्यंते नचमांतत्रकारणत्वे
नमन्यंते [illegible]

लासिकी[illegible]टीका

ननुकिंतर्हित्वय्यपिवैषम्यमस्ति यत्एवंत्वदेकशरणानामेवात्मभा
वंददासिनान्येषांकामाकुलचित्तानांइत्यतआह येयथेति यथाये
नप्रकारेणशक्तीच्छयाकामाभिलाषेणवा येजिज्ञासवोज्ञानिनः आ
र्ताअर्थार्थिनोवामांभजंति तानहंतथैवतदपेक्षितफलदानेनभ
जाम्यनुगृह्णामि ननुतथापिस्वभक्तानामेवफलंददासि नत्वन्यदे
वभक्तानामितिवैषम्यंस्थितमेवेतिनेत्याह ममसर्वात्मनोवर्त्मभ
जनमार्गं सर्वशः सर्वैःप्रकारैरिंद्रादिसेवकाअपिअनुवर्तंते इंद्रा
दिरूपेणापिममैवसेव्यत्वात् नहिज्योतिष्टोमादिरन्योमार्गोमदीये
वसातथेस्त्वा ॥

पंचोलीटीका

तर्हितवरागद्वेषौस्तःयेनकस्मैचित्तवभक्तायआत्मभावंप्रयच्छ
सिनसर्वेभ्यइत्यत्राह येयथेति हेअर्जुनयेअधिकारिणःयथाये
नप्रयोजनेनमांप्रपद्यंतेतानहंतत्फलदानेनतथैवभजामिअनुगृ
ह्णामिमनुष्याःसर्वशःसर्वप्रकारैःममवर्त्ममार्गमनुवर्ततेअनुस
रंति ॥

रणवीरसमिद्धोधिनी॥

ईश्वरस्यचमत्प्रीणनार्थंस्वोचितकर्मरताः सर्वकामनानांसा
धनभावंप्रतिपादयंस्तत्रैवप्रहृतिमनुशास्ति येयथेति शुभे
नयेशुभांसः यथायेनाभिलाषेणमांशरणंप्रपद्यंतेपरमेश्व
रेणचोदितंस्वधर्मभूतंयुद्धंप्रारभमाणानामस्माकंसएवाभि
लषितांसिद्धिंदास्यतीतिनिश्चयेनतत्रप्रवर्तते अहंचतांस्तथैव
तदभिलाषानुसारेणैवभजामिअनुगृह्णामि तंतंस्वर्गभोगा

घभिलाषं पूरयामीत्यर्थः अतो मनुष्याः कर्माधिकारिणः सर्व
शः सर्वैर्वैदिकैः पारत्रिकैरापवर्गिकैश्चाभिलाषैर्मम वर्त्मम
यासर्वेश्वरेण प्रवर्तितं वर्त्मानुवर्ततेनुवर्तेरन्निति लिङर्थे
प्रेरणायां लट् तदनुष्ठानाच्च ते सर्वकामनाभाजो भवन्तीति ता
त्पर्यं ॥११॥

मध्वभाष्य

ये यथेति सेवयामि फलदानेन नवैषम्याभावेन कथमेवं
विशेषमित्यत आह मम वर्त्मेति अन्यदेवतायजनोपि
मम वर्त्मैवानुवर्तन्ते सर्वकर्मकर्तृत्वात् भोक्तृत्वाच्च मम येः
प्यन्यदेवताभक्ता इति वक्ष्यति यो देवानां नामधा एक एवेति
श्रुतिः भगवानेव चैतन्नामभिधीयते अजस्य नाभावध्येकमर्पि
तमिति लिङ्गात् अतो मम वर्त्मानुवर्तन्त विशेषः अत एव
द्धिफलप्राप्तिः तस्मात्तेषां न तत्प्रियं यदेतन्मनुष्या विदुरिति श्रुतिः अहमेवाह
कर्तेत्याह ॥११॥

भाषा अनुवाद

तो तुमारे भी क्या विपरीत भाव कहे स्वपर बुद्धिहै जिस हेतु शरणागत को कृपाकरि आत्मस्वभाव देते और दूसरे को नहीं देते हो इस का सिद्धांत कहते हैं कि हेपार्थ अर्जुन जो मनुष्य जब जिस प्रकार अर्थात् सकाम या निष्काम रूप हमको भजते सेवते हैं उनको वैसे ही फलप्रदान करि मैभी अनुग्रह करताहूं और काम ना करकेजो लोग इंद्र आदि देवतों का भजन पूजन करते हैं उनका अनादर या त्याग हम नहीं करते कारण यह कि जिस किसी की पूजा भजन करे वह मेरी ही पूजा होतीहै क्यों कि सर्व रूपमय मैंहीं हूं सोहे पार्थ मेरी ही राह मे सब मनुष्य वर्तमान हैं पर जेसी जिसकी भावना तैसा तिस को फल मिलना है इस से सकाम लोगोंको कर्मानुसार फल लाभ देवाया औ निष्काम तो मेरा रूप हीहैं ११

दोहा

जो जेसें मोहि भजतहैं तिह तेसें भजों मेंह मो मार्गमें चलतहै नरसम नरन संदेह ११

52

कांक्षंतः कर्मणां सिद्धिं यजंत इह देवताः क्षिप्रं
हि मानुषे लोके सिद्धिर्भवति कर्मजा १२

शांकरभाष्यं

यदि तवेश्वरस्य रागादिदोषाभावः तदा सर्वप्राणिषु अनुजिघृक्षायां
तुल्यायां सर्वफलप्रदानसमर्थे च त्वयि सति वासुदेवः सर्वमिति ज्ञाने-
नैव मुमुक्षवः संतः कस्मात्त्वामेव सर्वे न प्रतिपद्यंते इति शृणु तत्र कार-
णं कांक्षंत इति अभिलषंतः कर्मणां सिद्धिं फलनिष्पत्तिं प्रार्थयंतो
यजंते इहास्मिन् लोके देवता इंद्राग्न्याद्याः अथ योन्यां देवतामुपास्तेन्यो
सावन्योहमस्मीति न स वेद यथा पशुरेवं स देवानामिति श्रुतेः तेषां
हि भिन्नदेवतायाजिनां फलाकांक्षिणां क्षिप्रं शीघ्रं हि यस्मान्मानुषे
लोके मनुष्यलोके हि शास्त्राधिकारः क्षिप्रं हि मानुषे लोके इति वि-
शेषणादन्येष्वपि कर्मफलसिद्धिं दर्शयति भगवान् मानुषे लोके वर्णाश्र-
मादिकर्माणीति विशेषः तेषां च वर्णाश्रमाद्यधिकारिणां कर्मणां फ-
लसिद्धिः क्षिप्रं भवति कर्मजा कर्मणो जाता १२

आनंदगिरिकृतटीका

अनुवर्तमानाणां ज्ञानकर्मानुरोधेन भगवता तेषामनुग्रहविधानात्तस्य रा-
गद्वेषौ यदि न भवतस्तर्हि तस्य रागाद्यभावादेव सर्वेषु प्राणिष्वनुग्रहे-
च्छा तुल्या प्राप्ता न च तस्यां सत्यामेव फलस्याल्पीयसः सम्पादने साम-
र्थ्यं न तु भगवतो महतो मोक्षाख्यस्य फलस्य प्रदाने शक्तिरिति युक्त-
मप्रतिहतज्ञानेच्छाक्रियाशक्तिमतस्तव सर्वफलप्रदानसामर्थ्यान्न-
था च यथोक्तानुजिघृक्षायां सत्यां त्वयि च यथोक्तसामर्थ्यवति सति
सर्वफलस्य फलादभ्युदयात् विमुखा मोक्षमेवापेक्षमाणा ज्ञानेन त्वामे-
व किमिति न प्रतिपद्येरन्निति चोदयति यदीति मोक्षापेक्षाभावात्तदु-
पायभूतज्ञानादपि वैमुख्याद्भगवत्प्राप्त्यभावे हेतुमभिदधानः समा-
धत्ते शृण्विति कर्मफलसिद्धिमिच्छन्तः किमिति मानुषे लोके देवतापू-
जनमिच्छन्ति तत्राह क्षिप्रं हीति कर्मफलसम्पत्प्रार्थिनां यष्टृयष्टव्यवि-
भागदर्शिनां तद्दर्शने कारणमात्माज्ञानमित्यत्र बृहदारण्यकश्रुतिम्

गीं टीं व

दाहरति अथेति अविद्याप्रकरणोपक्रमार्थमथेत्युक्तं उपायनं भेद
दर्शनमित्यनूद्य कारणमात्मज्ञाने नतत्रेति दर्शयति नेति यथास्म
दादीनां हलवहनादिना पशुरुपकरोत्येवमज्ञो देवादीनां यागादिभि
रुपकरोतीत्याह यथेति किमिति ते फलाकांक्षिणोभिन्नदेवतायाः
जिनो ज्ञानमार्गेनापेक्षंते तत्रोत्तरार्द्धमुत्तरत्वेन योजयति तेषामित्या
53 दिना यस्माद्यथोक्तानामधिकारिणां कर्मप्रयुक्तं फलं लोकवि
फे१ शेषे [illegible]टिति सिध्यति तस्मात्तेषां मोक्षमार्गादृत्तिवैमुख्यमित्यर्थः मा
नुषलोकविशेषणं किमर्थमित्याशंक्याह मनुष्यलोकेहीति लो
कांतरेषु नहि कर्मफलसिद्धिर्नास्तीत्याशंक्य क्षिप्रविशेषणस्य ता
त्पर्यमाह क्षिप्रमिति क्वचित् कर्मफलसिद्धिरविलंबेन भवत्यन्य
त्र तु विलंबेनेति विभागे को हेतुरित्याशंक्य सामग्रीभावाभावा
भ्यामित्याह मनुष्य इति मनुष्यलोके कर्मफलसिद्धेः शैघ्र्यात्तदभि
मुखानां ज्ञानमार्गवैमुख्यं प्रायिकमित्युपसंहरति तेषामिति १२

स्वामिकृतटीका

तर्हि मोक्षार्थमेव किमिति सर्वे न भजंतीत्यत आह कांक्षंत इति कर्मणां
सिद्धिं फलं कांक्षंतः प्रायशः इह मनुष्यलोके इंद्रादिदेवता एव यजंते न
तु मां त्वामेव हि यस्मात्कर्मजा सिद्धिः कर्मफलं शीघ्रं भवतीति न तु
ज्ञानफलं कैवल्यं दुष्प्रापत्वात् ज्ञानस्य नन्वेवं केचित्सकामतया भजं
ते केचिन्निष्कामतया इति कर्मवैचित्र्यं तत्कर्तॄणां ब्राह्मणादीनामुत्तमम
ध्यमादिवैचित्र्यं १२

पिशाचभाष्यं

किंच कांक्षंत इति कामयमानाः कर्मणां यज्ञादीनां सिद्धिं स्वर्गादि
फलं यजंते पूजयंति इह लोके देवता इंद्राद्याः यत्र क्षिप्रं शीघ्रं मानुषे
लोके कर्मजा सिद्धिः कर्मफलं भवति जायते न लोकांतरे वर्णाश्रमा
दिविशेषालाभात् १२

रामानुजभाष्यं

इदानीं प्रासंगिकं परिसमाप्य प्रकृतस्य कर्मयोगस्य ज्ञानाकारताप्र
फे२ कारं वक्तुं तथाविधकर्मयोगाधिकारिणो दुर्लभत्वमाह कांक्षंत इति

सर्वएवपुरुषाकर्मणांफलंकांक्षमाणाइंद्रादिदेवतायथाशास्त्रंय
जंतेआराधयंति नहिकेचिदनभिसंहितफलमिंद्रादिदेवतात्मभू
भ५ तंसर्वयज्ञानांभोक्तारंमांजानंत एतत एतद्धिक्षिप्रमस्मिन्नेव
प५ मानुषेलोकेकर्मजापुत्रपश्वन्नाद्यासिद्धिर्भवति मनुष लोकशब्दः
स्वर्गादिलोकप्रदर्शनार्थः सर्वएवहिलौकिकापुरुषा अक्षीणाना
दिकालप्रवृत्तानेकपापसंचयतयाविवेकिनःक्षिप्रफलाभिकांक्षि
णःपुत्रपश्वन्नाद्यस्वर्गाद्यर्थितयासर्वाणिकर्माणींद्रादिदेवताराधनमा
त्राणिकुर्वतेनतुकश्चित्संसारोद्विग्नहृदयोमदुक्तलक्षणकर्म
योगंमदाराधनभूतमारभतइत्यर्थः १२

अभिनवगुप्तकृतटीका

येयथैवद्धरामाम्नाथ्यपेतेतान्प्रतितेनदेवस्वरूपेणहंतानतथैवरूपत्वानि
एवमेवमदीयंमार्गमनुवर्तन्ते सर्वएवानुवर्तन्ते नहिकोपि
मत्तोव्यतिरिक्तमार्गोमदीयेवस्तुन्यन्यथा चानुवर्तिमर्यादा
इतिभिन्न्यमुत्वादितत्वैर्थैलिख यथामितरवेमीडसिद्धिस्वेहोतिदृष्टी
अंशमर्थः एवमित्याद्युत्तरेणेति मानुषएवलोकेभोगापवर्गल
क्षणासिद्धिर्नान्यत्रेति १२

परमार्थप्रपाटीका

अथतदेवप्रकटयन्नाहद्वाभ्यां कांक्षंतइति केपिकर्मणांसिद्धिंकांक्ष
तःसंतोदेवताइंद्रादीन्यजंतेतेषांहीतिनिश्चयेनकर्मजासिद्धिः इहैव
मानुषेलोकेक्षिप्रंशीघ्रंभवतिनतुजन्मांतरविलंबेन यतोयदेवता
येणकुर्वंतितेनतद्देवतांतर्याम्यहमेवसंतर्पितोभूत्वातत्तद्देवतारूपे
णकामान्पूरयामीत्यर्थः ॥ अथवैतस्यपरीहारार्थमाहचातुर्वर्ण्यमिति १२

वनमालीटीका

नन्वेवंत्वामेवसर्वेश्वरमनंतसद्गुणालयंपरकारुणिकंशरणागतव
त्सलंसर्वेकुतोनभजंतेतत्राह कांक्षंतइतिसर्वएवपुरुषाःकर्मणांसि
द्धिंफलमिहास्मिन्नेवजन्मनि कांक्षंतःइंद्राद्यादेवतायजंते नतुफ

लाभिसंधिराहित्येन सर्वयज्ञानां भोक्तारमीश्वरं यतः स्वयं सर्वफलदा॰
तारं मां भजंते तेन मोहरजोभ्यामाविष्टचित्तत्वेन तेषां पापाविष्टविचित्तत्वे
न च कामान्विहाय निःकामतया मदाराधने प्रवृत्तिर्न भवति विषया
विष्टचित्तानां कुत्सावेशसमुद्भूता नराणां क्षीणपापानां कृष्णे भ॰
क्तिः प्रजायते इत्यादिस्मृतेरित्याशयेनाह क्षिप्रमिति क्षिप्रमस्मिन्नेव
जन्मनि मानुषे लोके ज्योतिष्टोमादिकर्मजा स्वर्गपुत्राद्यासिद्धिर्भव
ति अक्षीणानादिकालसंचितसदसत्कर्मवासनाप्रवाहेन लग्नविवे
काभ्यंत्यक्तविषयभोगत्वरितः क्षिप्रफलाभिकांक्षिणः पुत्राद्यर्थ
तया सर्वाणि कर्माणीश्वराराधनमात्राणि कुर्वंति न तु संसारदुः
खेनोद्विग्नचित्ता निःकामं मदाराधनरूपं कर्म कुर्वंतीति भावः १२

कृस्नमैवेजयंतीटीका

ननु नैव प्रकृते भक्तेश्चैवं माहात्म्यं चेत्तर्हि सर्वे एव जनास्त्वामेव कथं न॰
सेवंत इत्याशंक्य प्रासंगिकं परिसमाप्य प्रकरणप्राप्तस्य कर्मयोगस्य॰
ज्ञानरूपतां वदिष्यन् तथाविधकर्मयोगाचरणकर्तारोधिकारिणो॰
विरलाः संतीत्याह कांक्षंत इति सर्वे एव सकामाः पुरुषा अनादिकाल
प्रवृत्तपुण्यादिकर्मफलभोगवासनया कर्मणां यज्ञादिरूपाणां सिद्धिं
फलं धनपुत्रपश्वादिरूपं कांक्षंत इच्छंतः संत इह भरतखंडे देवता इंद्रं इं॰
सूर्यविनायकादीन् मत्तः सर्वेश्वरात् पृथक्रूपत्वेन यजंते सेवंते न हि॰
केचिदपि सर्वकर्मफलदातारं सर्वकर्मभोक्तारं सर्वेश्वरेश्वरं तमहं देवतान्
तर्यामिनं सर्वदेवस्वामिनं सर्वपितरं सर्वयज्ञसमं तद्देवाः पृथक्केन वर्तमानं भ
गवंतं मां यजंते कस्मादेतत् हि यस्मान्मानुषे तयानामरोगनाविहाय॰
दिरूपा भवति अतः शीघ्रफलप्राप्तिकामनया॰ विवेकिनो मद्भक्तेष्वर्थी
मद्भक्त्यान्मदधीनानेवाराधयंति न तु कश्चिदपि विवेककुशलो मुमुक्षुः
सांसारिकाध्यात्मादितापत्रयजनितदुःखनिहतये मदाराधनलक्षणेन
निष्कामकर्मयोगेन मामाराध्य मत्पदप्राप्तिमिच्छंतीत्यभिप्रायः १२

+ कर्मणां सिद्धिं फलनिष्पत्तिं कांक्षंत इहलो के

मधुसूदनीटीका ॥ + ननु त्वामेव भगवंतं वासुदेवं किमिति सर्वे न प्रपद्यंते इति तत्राह ॥
देवानिंद्राग्न्यादीन्यजंते पूजयंति अज्ञानप्रतिहतत्वान्न तु निष्कामाः सं॰

तोमांभगवंतंवासुदेवमितिशेषः कस्मात्‌ हियस्मात्‌ इंद्रादिदेवतायाजिनांतत्‌फलकांक्षिणांकर्मजासिद्धिः कर्मजन्यफलंक्षिप्रंशीघ्रमेव॰भवतिमानुषेलोकेज्ञानफलंत्वतःकरणशुद्धिसापेक्षत्वान्नशीघ्रंभवतिमानुषेलोकेकर्मफलंशीघ्रंविशेषणादन्यलोकेपिवर्णाश्रमधर्मव्यतिरिक्तकर्मफलसिद्धिर्भगवतासूचिता यतस्तत्तत्‌क्षुद्रफलसिद्ध्यर्थंसकामामोक्षविमुखाअन्यादेवतायजंतेः तोनमुमुक्षवइवमांवासुदेवमात्मत्वेनप्रपद्यंतइत्यर्थः

॥ १२ ॥

सदानंदीटीका

ननुत्वामेवसर्वेशंनभजंतेकुतोखिलाः सर्वाभीष्टप्रदातारमित्यत्राह रमापतिः १ कर्मणांफलनिष्पत्तिंप्रार्थयंतोजनाइह पूजयंतींद्रवरुणादीनज्ञानहतबुद्धयः २ कर्मजन्यफलंयस्मादिंद्रवरुणादियाजिनांतत्फलकांक्षिणांपुंसांशीघ्रंभवतिभारते ३ तत्वज्ञानफलंबुद्धिशुद्धिसापेक्षभावतः नशीघ्रंभवतीत्यस्मादन्यान्देवान्भजंतिते ४ क्षिप्रंहिमानुषेलोकइत्यस्मात्तुविशेषणात्‌ अन्यलोकेप्युपासादिकर्मजासिद्धिरूहिता ५ सकामामोक्षविमुखास्ततत्क्षुद्रफलाप्तये अन्यदेवान्यजंतेतोमांभजंतिमुमुक्षवः ६ १२

नीलकंठीटीका

कांक्षंतइति हियस्मात्मानुषेलोकेकर्मजासिद्धिःकाम्यकर्मफलंपुत्रपश्वादिकंक्षिप्रंभवतिनतुनिष्कामकर्मजाचित्तशुद्धिः अतोयेकर्मणांसिद्धिंफलंइहैवक्षिप्रंकांक्षंतःकांक्षमाणाःदेवताःइंद्रादीन्यजंतेतेपिममैववर्त्मानुवर्तंतइतिपूर्वेणान्वयः वक्ष्यतिचयेप्यन्यदेवताभक्ताइत्यादि १२

आनंदीटीका

तत्रप्रवृत्तिमार्गमेवतावत्प्रपंचयति इहभोगभूमौभारतेवर्षेकर्मणांसिद्धिंभोगापवर्गरूपांकांक्षंतःभोगार्थिनोमोक्षार्थिनोवादेवतापूकृतिमनुष्योपदिष्टान्मदंशानिंद्रादीन्मामेवपरमेश्वरंवायजंतेहिय

स्मान्मानुषेलोकेकर्मणः सकामान्निष्कामाद्वाजातासिद्धिः क्षिप्रंभ
वति १२

रामकंठीटीका

अतएवकिंवांछन्तस्तेममवर्त्मानुवर्तंतइत्याह ॥

दृष्टप्रयोजनेनकर्मणातत्तदभिमतप्राप्तिलक्षणांसिद्धिंकर्मफलंप्रा
र्थयमानाः तथाअदृष्टप्रयोजनेनयज्ञादिनातत्तल्लोकांतरभोग्यसु
खप्राप्तिलक्षणफलाभिलाषिणः संतोदेवताइंद्रादिरूपायजंतोहं
विर्दानादिनापूजयंतः त्रिमत्रतात्पर्यं आब्रह्मणःकीटपर्यंतेयोयः
कश्चिद्येनयेनाभिसंधिनाययत्किंचनचिकीर्षतिजिज्ञासतेवा तत्तत्फ
लंसंपतेस्तत्कालमवश्यभाविन्यपि अमंचेत्यमानामत्सप्राप्तिरेवकं
कारणंयस्मात् अस्मिन्मानुषेलोकेसर्वस्यप्रत्यक्षभूते कर्मणस्तत्तत्सं
कल्पमूलव्यापारसमुत्थासिद्धिः फलप्राप्तिः क्षिप्रंतत्कालमेवमत्सप्रा
प्तिवलादेवसमुद्यते परमार्थतः कर्तृजीवत्वोस्यसंभवात्
[illegible] १२

लासिकी [illegible]टीका

नत्वामेव [illegible] भगवंतंकिमिति नसर्वेप्रपद्यंतेइतितत्राह कांक्षंतइति प्रा
यशःकर्मणांदृष्टादृष्टरूपांफलसिद्धिं कांक्षंतइहमनुष्यलोकेइंद्रादि
देवता एवभजंतेनतुसाक्षान्मामेवकुतःहियस्मादिंद्रादिदेवयाजिनां
कर्मजाफलसिद्धिःशीघ्रमेवभवति नतुज्ञानफलंकैवल्यंदुष्प्रापत्वाज्ज्ञा
जीवस्य नस्य १२

पंचोलीटीका

तर्हिमोक्षार्थमेवसर्वेत्वयासमेनप्रेरिताःत्वामेवकिमितिनभजन्तेइत्य
त्राह कांक्षंतइति इहअस्मिन्लोकेकर्मणांसिद्धिंफलनिष्पत्तिंकांक्षंत
तःप्रार्थयंतःदेवताःइंद्रादयःयजंतेहियस्मात्मानुषेलोकेकर्मजा
कर्मणोजातांफलरूपासिद्धिःक्षिप्रंशीघ्रंभवति १२

ब्रणावीरसमिद्धोधिनी॥

स्वमार्गानुवर्तनप्रकारमेवाह काङ्क्षंतइति येकर्मणांस्ववर्णा
श्रमोचितानां युद्धादीनांव्यापाराणांसिद्धिंनिष्पत्तिंभोगापवर्ग॰
लक्षणफलसंपत्तिंवा काङ्क्षंतस्तेइहआरभ्यमाणेयुद्धलक्षणे
व्यापारेकर्मणामनेकविधानांमध्येदेवता अस्त्रदेवताजंयते अ
जेरन् अस्त्रैःसंयुंजीरन् अस्त्रदेवतामंत्रानुद्दिश्यप्रपाणादीन्स्तद्धीम
न्नितियावत् यजदेवतापूजासंगतिकरणदानेष्वित्यस्यसंगति
करणार्थस्यधीरणायोलिङःधेलट् एषएवचममममार्गः यदस्त्र
देवतामंत्रानुद्दिश्यप्रपाणादीन्यत्त्वभिसंधायमहाबलाअपितु
युयुत्सवोयुद्ध्यंतेइति ततश्चभवताप्यस्त्रदेवताः संस्मृत्यप्राणादि
संधानेसमाहितेनभूत्वायोद्धुकामाभीष्मादयोमहावीरायोद्ध
व्यास्ततश्चतेभोगापवर्गोभयलक्षणापिसिद्धिर्भविष्यतीतिता
त्पर्यं यद्वापूजार्थस्यैवयजेरूपं तथाचायमर्थः देवताप्रक्रांत
युद्धौचित्येनास्त्रदेवता इहयुद्धयज्ञे यजेरन् पूजयेरन् युद्धेते॰
षांप्रयोगएवपूजेति पूर्वेणासमाने हियस्मात्कर्मभ्यः क्षत्रादि
योग्यरणादिलक्षणेभ्योजातासिद्धिर्मानुषेलोके क्षिप्रंशीघ्रमे
वभवति जयेपराजयेवासति राज्यस्वर्गादिप्राप्तेस्तत्कालेभावि
त्वादितितात्पर्यं १२॥

मधुभाष्य

भाषा अनुवाद

जो ऐसा कहो कि तो फेरि मोक्ष ही के वास्ते सब लोग भगवा-
न का आराधन क्यों नहीं करतेहैं इसपर कहते हैं कि मनुष्य
लोकमे बहुतेरे लोग कर्मफल की अभि लाषा करि इंद्र आदि
देवतों की सेवा करते और साक्षात् हमारी सेवा नही करते हैं क्यों
कि कर्मसे फल शीघ्र प्राप्त होता और मेरी साक्षात् सेवासे ज्ञान
का फलरूप जो मुक्ति सो दुष्प्राप्य है बडे कठिन से चिरकाल मे मि
लतीहै १२

दोहा

कर्मसिधिकों कां— के पूजत देव दिंजोय सिघ्रहि मानुष
लोकमें कर्मसिधि होय सोय १२॥

चातुर्वर्ण्यंमयासृष्टंगुणकर्मविभागशः तस्य
कर्तारमपिमांविद्ध्यकर्त्तारमव्ययं १३

शांकरभाष्यं

मानुषएवलोकेवर्णाश्रमादिकर्म्माधिकारो नान्येषुलोकेष्विति
नियमः किंनिमित्तइति अथवावर्णाश्रमादिप्रविभागोपेताःमनुष्या
ममवर्त्मानुवर्त्तंते सर्वशइत्युक्तं कस्मात्पुनःकारणात्नियमेन त
वैववर्त्मानुवर्त्तंते नान्यस्येत्युच्यते चातुर्वर्ण्यमिति चातुर्वर्ण्यंचत्वार
एववर्णाश्चातुर्वर्ण्यंमयेश्वरेण सृष्टमुत्पादितंब्राह्मणोस्यमुखमासी
दित्यादिश्रुतेः गुणकर्म्मविभागशः गुणविभागशः कर्मविभागशश्च
गुणाः सत्वरजस्तमांसि तत्रसात्विकस्यसत्वप्रधानस्य ब्राह्मणस्यश
मोदमस्तपइत्यादीनिकर्म्माणि सत्वोपसर्जनरजः प्रधानस्यक्षत्रि
यस्य शौर्यतेजःप्रभृतीनि कर्म्माणि तमउपसर्जनरजःप्रधानस्य
वैश्यस्यकृष्यादीनिकर्म्माणि रजउपसर्जनतमःप्रधानस्यशूद्रस्य
शुश्रूषैवकर्म्मेत्येवं गुणकर्म्मविभागशः चातुर्वर्ण्यंमयासृष्टमित्य
र्थः तच्चेदंचातुर्वर्ण्यंनान्येषुलोकेषुअतोमानुषेलोकेइतिविशेषणं ह
न्ततर्हि चातुर्वर्ण्यस्यसर्गादेःकर्म्मणः कर्त्तृत्वात्तत्फलेनयुज्यसे अ
तोनत्वंनित्यमुक्तोनित्येश्वरइत्युच्यते यद्यपिमायासंव्यवहारेण तस्य
कर्म्मणःकर्तारमपिसंतंतथापिमांपरमार्थतो विद्ध्यकर्त्तारमतएवा
व्ययमसंसारिणंचमांविद्धि १३

आनंदगिरिकृतटीका

मनुष्यलोकेचातुर्वर्ण्यंचातुराश्रम्यमित्यनेन द्वारेणकर्म्माधिकारनि
यमेकारणंपृच्छति मनुष्यएवेति आदिशब्देनावस्थाविशेषाविवक्ष्यं
ते प्रकारांतरेणवृत्तानुवादपूर्वकं चोद्यमुत्थापयति अथवेत्यादिना
प्रश्नद्वयंपरिहरति उच्यतइति तर्हितवकर्तृत्वभोक्तृत्वसंभवादस्मदा
दितुल्यत्वेनानीश्वरत्वमित्याह तस्येति ईश्वरस्यविषमसृष्टिंविदधान

स्यसृष्टिवैषम्यनिर्वाहकं कर्मेति गुणेति गुणविभागेन कर्मवि-
भागस्तेन चातुर्वर्ण्यस्य सृष्टिमेवोपदिष्टा स्पष्टयति तत्रेत्यादिना प्र
श्नद्वयप्रतिविधानं प्रकृतमुपसंहरति तत्त्वेदमिति मनुष्यलोके परं
वर्णाश्रमादिपूर्वके कर्मण्यधिकारः तत्रैव वर्णादेरीश्वरेण सृष्टत्वात्
लोकांतरेषु न तत्र वर्णाद्यभावादीश्वरमेव चातुर्वर्ण्याश्रमादिविभाग-
भागिनोऽधिकारिणोनुवर्त्तन्ते तेनैव वर्णादेस्तद्व्यापारस्य च सृष्टत्वा
नेदत्रवर्त्तनस्य प्रकृतत्वादित्यर्थः तस्येत्यादिद्वितीयभागायोग्यचोद्यम
नुद्रवति हेतेति यदि चातुर्वर्ण्यादिकर्तृत्वादीश्वरस्य प्राकृतोनिय
मोऽभिमतस्तर्हि तद्विषयसृष्ट्यादेस्तन्निष्ठव्यापारस्य च धर्मादेर्निवर्त
कत्वात्तत्फलस्य कर्तृगामित्वात् कर्तृत्वभोक्तृत्वयोरत्वयिप्रसंगात्
नित्यमुक्तत्वादिनेनस्यादित्यर्थः माययाकर्तृत्वं परमार्थतस्त्वकर्तृ
त्वमित्यभ्युपगमान्नित्यमुक्तत्वादि सिध्यतीत्युत्तरमाह उच्यतइति मा
यावृत्तेन संव्यवहारेण चातुर्वर्ण्यादेस्तत्कर्मणश्च यद्यपि कर्ताहं
तथापि तथाविधं मां परमार्थतोऽकर्तारं विद्धीति योजना अकर्तृत्वा
देवाभोक्तृत्वसिद्धिरित्याह अतएवेति १३

ननु च केचिन्निष्कामतया प्रवर्तन्ते केचि स्वामिकृतटीका न्निष्कामतयेति कर्मवैचित्र्यं तत्कर्तॄणां ब्राह्म
णादीनां मनुष्याणामुत्तममध्यमादिवैचित्र्यं कुर्वतस्तव कथं वैषम्यं नास्तीत्याशंक्याह चातुर्वर्ण्यमिति चत्वारो व
र्णा एव चातुर्वर्ण्यं स्वार्थे ष्यञ् प्रत्ययः अयमर्थः सत्त्वप्रधाना ब्राह्मणाः
तेषां च शमदमादीनि कर्माणि सत्त्वरजःप्रधानाः क्षत्रियास्तेषां च शौ
र्ययुद्धादीनि कर्माणि रजस्तमःप्रधाना वैश्यास्तेषां च कृषिवाणिज्या-
दीनि कर्माणि तमःप्रधानाः शूद्रास्तेषां त्रैवर्णिकशुश्रूषादीनि कर्माणि
इत्येवं गुणानां कर्मणां च विभागशः विभागैश्चातुर्वर्ण्यं मयैव सृष्टमि-
ति सत्यं तथाप्येवं तस्य कर्तारमपि फलतः अकर्तारमेवं विद्धि तत्र हेतुः
अव्ययमासक्तिराहित्येन श्रमरहितमित्यर्थः १३ मा

पिशाचभाष्यं

अतएव यतो वर्णाश्चातुर्वर्ण्यं मयेश्वरेण सृष्टं गुणाः सत्त्वादयस्तद्विभा

गेनच तत्रसात्विकस्यब्राह्मणस्यशमोदमस्तपइत्यादीनिकर्माणि
सत्वोपसर्जनस्यरजःप्रधानस्यक्षत्रियस्यशौर्यतेजःप्रभृतीनिकर्मा॰
णि रजःप्रधानस्यवैश्यस्यकृष्यादीनिकर्माणि तामसस्यशूद्रस्यशु
श्रूषैवकर्मेत्येवंगुणकर्मविभागशःचातुर्वर्ण्यमयासृष्टमित्यर्थः
तस्यचातुर्वर्ण्यस्यकर्मणःशमप्रभृतेःकर्तारंमामीश्वरंविद्धिविजा॰
नीहिवस्तुतोऽकर्तारमव्ययम विकारिणं १३

रामानुजभाष्यं

यथोक्तकर्मारंभविरोधिपापक्षयहेतुमाह चातुर्वर्ण्यमितिचात
वर्ण्यप्रमुखंब्रह्मादिस्तंबपर्यंतंकृत्स्नंजगन्सत्वादिगुणविभागेनत
दनुगुणशमादिभागेनचविभक्तंमयासृष्टं ग्रहणंप्रदर्शनार्थंमये॰
वरक्ष्यतेमयैवोपसंह्रियतेतस्यविचित्रसृष्ट्यादेःकर्तारमपिअकर्तारं
माविद्धि १३ अभिनवगुप्तकृतटीका अप्रकर्म १३ नास्ति

परमार्थप्रपाटीका अथवैषम्यपरीहारार्थमाह चातुर्वर्ण्यमिति

चत्वारोवर्णानांभावश्चातुर्वर्ण्यं ब्रह्मक्षत्रविट्शूद्रस्वरूपंगुणकर्मवि
भागशःमयैवसृष्टंगुणाःसत्वादयःकर्मवर्णाश्रमोचितंतद्विभा
गेनतद्वर्णोचितेननिमित्तंविराड्रूपेणतस्यचातुर्वर्ण्यस्यविराड्रूपेणे
वकर्तारंमांविद्धिजानीहि तथाअव्ययमदारंशुद्धस्वरूपमसंगम॰
कर्तारंविद्धि अत्रशातपथीश्रुतिःतदेतद्ब्रह्मक्षत्रंविट्शूद्रस्तदाग्निनैव
देवेषुब्रह्माभवत् ब्राह्मणोमनुष्येषुक्षत्रियेणक्षत्रियोवैश्येनवैश्यः
शूद्रेणशूद्रइति भाष्यब्रह्मक्षत्रविट्शूद्रइति यच्चातुर्वर्ण्यंतदेतत्
तत्कितएवैतेषुअग्निनावैश्वानरायरायरूपेणविराड्रूपेणसमष्टिना
देवेषुब्रह्माभवत् सएवमनुष्येषुव्यष्टिरूपेणब्रह्मणोभवत् तथादे
वेषुक्षत्रियेनइंद्रवरुणादिनाक्षत्रियेणमनुष्येषुक्षत्रियोभवत् तथा
देवेषुवैश्यविधेनवसुरुद्रादित्यादिनावैश्येनमनुष्येषुवैश्योभवत्
तथादेवेषुएकविधेनपूषसंज्ञकेनशूद्रेणमनुष्येषुशूद्रोभवत् तथा॰
ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतइत्यादयपि अयवियकर्तार

गीं
टीं
चं

59

मखायमित्सेवविद्याह १२

वनमालीटीका कानं४

देहारंभकगुणवैषम्याज्जगतिवैषम्यंममभँजन्नभावस्ततस्तेषांमोक्षेनधि
कारइतिबोधयित्वागुणभेदेनप्रजानामुत्पत्तिंस्वकर्तृकामाहचातुर्वर्ण्य
मितिचत्वारोवर्णाएवचातुर्वर्ण्यंस्वार्थेष्यञ् मयासर्वेश्वरेणगुणविभा
गशःकर्मविभागशश्च तथाहिसत्वप्रधानाब्राह्मणास्तेषांशमदमा
दीनिकर्माणि सत्वोपसर्जनरजःप्रधानाःक्षत्रियास्तेषांशौर्यादीनिकर्मा
णि तमउपसर्जनरजःप्रधानावैश्यास्तेषांकृष्यादीनितादृशान्येवकर्मा
णि तमःप्रधानाःशूद्रास्तेषांतादृशमेवत्रैवर्णिकशुश्रूषादीनिकर्मा
णि ननुविषमसृष्टिकर्तृत्वात्तवापिवैषम्यंतत्राह विद्धीतितस्यचातुर्व
र्ण्यस्यकर्तारमपिक्रियायामभिनिवेशाभावादकर्तारमतएवाव्ययंकर्तृ
त्वप्रयुक्तव्ययेनविकारेणरहितं यद्वाअकर्तारंनास्तिकर्तायस्यतंकर्तृर
हितंविद्धीत्यर्थः १३

अथवैजयंतीटीका

ननुयतोवाइमानिभूतानिजायंतेजन्माद्यस्ययतइतिश्रुतिसूत्रेत्वांस
र्वविचित्रजगत्कर्तारंवदतःसएवसाधुकर्मकारयतितमितिश्रुतिस्त
त्वांकर्मकारयितारमपिवक्तियेसकामतयादेवान्यजंतेयेचनिष्काम
ते तयात्वांयजन्तेषांसर्वेषामपिजन्मकर्ताकर्मकारयिताचत्वमेवास्य
तोजन्मकर्तरिकर्मकारयितरिचत्वयिवैषम्यनैर्घृण्यादिदोषप्राप्तिः
स्यादित्याशंक्यस्वदोषंपरिहरन्कर्मयोगारंभविरोधिनःपापस्यनाश
हेतुमाह चातुर्वर्ण्यमितिचत्वारएवतेवर्णाश्चचतुर्वर्णाश्चतुर्वर्णाएव
चातुर्वर्ण्यंस्वार्थिकःष्यञ्प्रत्ययःचातुर्वर्ण्यमित्युपलक्षणंसर्वजगता
चातुर्वर्ण्यप्रमुखमाब्रह्मस्तंबपर्यंतंसर्वंचेतनात्मकजगन्मयासर्वे
श्वरेणसृष्टंस्थितिसंहारयोरुपलक्षणमेतत्पालितंसंहृतंचकेनेत्यपे
क्षायामाह गुणकर्मविभागशःगुणानांविभागैःकर्मणांविभागैश्चा
यमर्थः सत्वगुणमुख्याःशमदमादिकर्माणश्चविप्राःसत्वरजोगुण
मुख्याःशौर्ययुद्धादिकर्माणश्चक्षत्रियाःरजस्तमोगुणमुख्याःकृषिवा
णिज्यादिगुणकर्माणश्चवैश्याःतमोगुणमुख्यास्त्रैवर्णिकशुश्रूषादि

कर्माणश्च शूद्रा इत्येवं गुणकर्मविभागैर्विभक्तं निखिलं जगन्मया सृष्टा
दिकं कृतमित्यर्थः तस्य विचित्रजगत्सृष्टिस्थितिलयादेः कर्त्तारमपि मां त
त्कर्मशक्तिरहितत्वादकर्त्तारं त्वं विद्धि जानीहि ननु एतत् यतोऽव्ययं जग
त्स्रष्टृत्वेपि कर्मकारयितृत्वेपि च स्वस्वभावसाम्यान्न वैषम्यतो वैषम्यनैर्घृण्या
दिदोषो मयि नास्त्येव तथा सूत्रकारोप्याह वैषम्यनैर्घृण्ये न सापेक्षत्वादिति
परमेश्वरस्य वैषम्यनैर्घृण्यदोषो न भवतः कुतः क्षेत्रज्ञानां कर्मसापेक्षत्वा
त् क्षेत्रज्ञकर्मानुसारेणैव तत्तद्विषमस्वभावस्य सृष्ट्यादेः कर्त्ता त
त्तद्गुणपापादिकर्मकारयिता वाहं भवाम्यतो मम न वैषम्यादिदोषवत्त्व
मिति सूत्रार्थः भगवान्पराशरोप्याह निमित्तमात्रमेवायं सृज्यानां सर्गक
र्मणि प्रधानकारणीभूता यतो वै सृज्यशक्तयः निमित्तमात्रं मुक्त्वैवं ना
न्यत्किंचिदपेक्षते नीयते तपतां श्रेष्ठ स्वशक्त्या वस्तुतामिति सृज्यानां
जीवानां सर्गकर्मणि सृष्टिकर्मणि अयं पुरुषोत्तमो निमित्तमात्रमेवका
रणमात्रमेव वै निश्चयेन यतो हेतोः सृज्यशक्तयः सृज्यानां जीवानां प्राची
नकर्मशक्तय एव प्रधानकारणीभूता मुख्यकारणरूपा भवन्ति अतो नि
मित्तमात्रं मुक्त्वैव स्रष्ट्रादिकर्त्तारं पुरुषोत्तमं मुक्त्वैवान्यत्किंचिन्नापेक्षते
इदं जीववस्तु सुरनरादिभावं यान्तीत्येवं नापेक्षते किं तु हे तपतां श्रेष्ठ हे मै
त्रेय स्वशक्त्या विगतप्राचीनकर्मशक्त्यैव वस्तुतां सुरनरादिवस्तुभावं
नीयते प्राप्यते इति सूत्रार्थः १३

मधुसूदनीटीका

शरीरारंभकगुणवैषम्यादपि न सर्वे समानस्वभावा इत्याह ॥
चत्वारो वर्णा एव चातुर्वर्ण्यं स्वार्थे ष्यञ् मयेश्वरेण सृष्टमुत्पादितं गु
णकर्मविभागशः गुणविभागशः कर्मविभागशश्च तथा हि सत्त्वप्रधा
ना ब्राह्मणास्तेषां सात्त्विकानि शमदमादीनि कर्माणि । सत्त्वोपसर्जनर
जःप्रधानाः क्षत्रियाः तेषां च तादृशानि शौर्यतेजःप्रभृतीनि कर्माणि । त
मउपसर्जनरजःप्रधाना वैश्यास्तेषां च कृष्यादीनि तादृशानि कर्माणि । त
मःप्रधानाः शूद्रास्तेषां च तामसानि त्रैवर्णिकशुश्रूषादीनि कर्माणि मा
नुषे लोके व्यवस्थितानि । एवं तर्हि विषमस्वभावचातुर्वर्ण्यस्रष्टृत्वेन तव
वैषम्यं दुर्वारमित्याशंक्य नेत्याह तस्य विषमस्वभावस्य चातुर्वर्ण्यस्याप्य

व्यवहारदृष्ट्याकर्त्तारमपिमांपरमार्थदृष्ट्याविद्ध्यकर्त्तारमव्ययंनिरहंकार-
त्वेनाक्षीणमहिमानं १३

मदानंदीटीका

गुणानामपिवैषम्याच्छरीरारंभकारिणां नसर्वेतुल्यशीलाःस्युरित्याह प्रकृतेःपतिः चत्वारएववर्णास्तत्कर्मणःस्वार्थविधानतः गुणकर्म-विभागेनवर्णास्तेब्राह्मणादयः १ चत्वारोनिर्मिताःसर्गेमयाभगवता वेयातः सत्वप्रधानायेविप्रास्तेषांकर्मशमादिकं २ सत्वगौणरजोमुख्यान्नृपाःशौर्यादिकर्मिणः तमोगौणरजोमुख्यावैश्याःकृष्यादिकर्मिणः ४ तमःप्रधानाःशूद्रास्तत्कर्मशुश्रूषणादिकं तदिदंमानुषेलोकेचातुर्वर्ण्यंव्यवस्थितं ५ एवंवैषम्यसृष्टेस्तेकर्तृत्वात्तत्फलेन च संबंधोदुर्निवारःस्यादित्यतःप्राहमाधवः ६ व्यवहारदृशातस्य चातुर्वर्ण्यस्यसर्वशः कर्तारंसंतमपिमांपरमार्थदृशाव्ययं ७ विद्ध्यकर्तारमक्षीणस्वभावमनहंकृतिं निर्विकारतयासंतंमांज्ञात्वामुच्यते भयात् ८ १३

नीलकंठीटीका

अन्यदेवताभक्ताअपिकस्मात्पुनःकारणात्त्वैववर्त्मानुवर्तंतेनान्यस्येत्यतआह चातुर्वर्ण्यमिति चतुर्णांवर्णानांहितंचातुर्वर्ण्यं गुणाश्चकर्माणिचेतिगुणकर्म द्वंद्वैकवद्भावःकर्माणिअग्निहोत्रादीनिगुणाश्चद्रव्यदेवतादिरूपाः विभागशःसंधारणासाधारणविभागेन तथाहि दानजपादिकंसर्वसाधारणं अग्निहोत्रादिकंत्रैवर्णिकस्यैवनशूद्रस्य राजसूयादिकंराजन्यस्यैवनेतरेषामिति विभागोदृश्यते यतश्चातुर्वर्ण्यंगुणकर्मभिर्मयासृष्टंततोऽन्यदेवतानामपिमदन्यत्वात्तत्प्रीत्यापितृरिवतत्प्रीत्याममैववर्त्मनिरतीत्यर्थः यद्वागुणविभागशःकर्मविभागशइतियोज्यं तथाहिसत्वप्रधानाब्राह्मणास्तेषांकर्मशमदमादिकं सत्वोपसर्जनरजःप्रधानाःक्षत्रियास्तेषांकर्मशौर्यादि तमउपसर्जनरजःप्रधानावैश्यास्तेषांकर्मकृष्यादि रजउपस-

जेनतमःप्रधानाःशूद्रास्तेषांकर्मशुश्रूषैवेतिगुणकर्मविभागोदृश्यते त
थाचातुर्वर्ण्यमितिस्वार्थेष्यञ् चत्वारोवर्णाःगुणकर्मविभागशोमयासृ
ष्टाइत्यर्थः अन्यदेवताभक्ताअपिमद्भक्तकर्मकारित्वान्मद्भक्ताएवेतिभा
वः ननुयद्येवंत्वंसंततितर्पणेनस्वाज्ञाकरणेनप्रीयसेतदर्थंचत्वयाचातु
र्वर्ण्यंसृष्टंतर्हिमहान्संसारीत्वमसीत्याशंक्याह तस्यापिकर्तारंमायायो
गात् वस्तुतोऽकर्तारं अतएवाव्ययंअविकारिणं १३

आनंदीटीका

सर्वेश्रेयः प्राप्नुयेत्वामेवकथंनयजंतेइत्याह मयेश्वरेणगुणाः सत्वादिभि
न्नतोयःकर्मणांब्राह्मणत्वादिर्नित्याश्रयत्वाद्विभागोविस्तारस्तेनलक्ष्यि
घमाणास्तेगुणकर्मविभागेनचातुर्वर्ण्यंसृष्टमित्यतएवनिजानिजप्र
कृत्यनुरूपंतत्तदर्थंनयादेवतायजंतइत्यर्थः अत्रापित्वत्कृतमेववैषम्य
मित्याह तस्यैवंसर्गस्यकर्तारमपिमांपरमेश्वरमकर्तारंतत्कार्यत्वमेव
ईफलमनाश्रयंतंविद्धि अनयोःकस्वात्मनःक्लेशकर्मविपाकाशयैर
परामर्षीवर्णितः १३

+ ननुत्वमेवचेदेकः कर्ता तत्त्वंचरमभावेनकृते:

रामकंठीटीका

कर्मभित्त्वमेवतत्फलेनसंबध्यसे ततस्तेतत्रस्त्वक ल्यादिसंबंधस्तत्रापि प्रसक्तदुःखजनाशका परिहारंकामश्राह +

+ सत्वगुणविभागेन अयंसात्त्विकोऽयंराजसोऽयंतामसइत्येवंरूपेणसर्ग
भेदमूलेन तथाकर्मविभागेनब्राह्मणोऽध्येतव्यंयष्टव्यंदातव्यमिति
वमादिरूपेणमयायथोक्तस्वरूपेणैकेनकर्त्राचातुर्वर्ण्यंसृष्टंचत्वारो
वर्णाब्राह्मणादयोनिर्मितास्तस्यैवंविधस्यचातुर्वर्ण्यस्यसगुणकर्मवि
भागसमुचितकर्मानुरूपतत्फलभाजः कर्तारंनिर्मातारमपि मामक
र्तारं तद्दत्ताहंककर्मफलसंबंधाभावात्कर्तृत्वधर्मरहितंजानीहि कुत
इतिहेतुगर्भविशेषणमाह कीदृशंसंतमकर्तारंविद्धिअव्ययंनित्यमेक
स्मात्स्वरूपाद्यतोहंनक्षेमिनव्यपगच्छामि अहंयथाचिन्मात्रस्वभावता
मेवनजहाम्येवंचाव्ययंसंतंमामकर्तारं विद्धिहेतुत्वाहिमन्मायोद्भा
विताभिर्देहाद्यहंकारमयास्त्रिगुणाः संकल्पकारिणः सत्वादिभि
फलैर्युज्यते नत्वहंगुणातीतस्वभावस्तेजातुयुज्यते [illegible] १३

लास्तिकी [illegible]टीका

गी॰ शरीरारम्भकगुणवैषम्यादपि न सर्वे समस्वभावा इत्याह चातुर्वर्ण्यमि-
टी॰ ति चत्वारो वर्णाः चातुर्वर्ण्यं मया सृष्टम् सत्वप्रधाना ब्राह्मणास्तेषां च श-
च॰ मदमादीनि कर्माणि सत्वरजःप्रधानाः क्षत्रियास्तेषां च शौर्ययुद्धादी-
नि कर्माणि रजस्तमःप्रधाना वैश्यास्तेषां च कृषिवाणिज्यादीनि कर्मा-
णि तमःप्रधानाः शूद्रास्तेषां च त्रैवर्णिकशुश्रूषादीनि कर्माणीत्येवं
६१ गुणानां कर्मणां च विभागैश्चातुर्वर्ण्यं मयैवेश्वरेण सृष्टमुत्पादितं एवम-
पि तव विषमस्वभावसृष्टत्वेन वैषम्यं दुर्वारमित्याशंक्यनेत्याह तस्य विष-
मस्वभावस्य चातुर्वर्ण्यस्य लोकदृष्ट्या कर्तारमपि वस्तुदृष्ट्याऽकर्तारमेव
४३ मां विद्धि अत्र हेतुगर्भं विशेषणमव्ययमिति स्वस्वभावाज्जीववद्बन्धमि
नचोपगच्छामि १३

पंचोलीटीका

कस्मात्कारणान्नियमेन तवैव वर्णानुवर्तनेनान्यस्यत्र स्वब्राह्मणा-
दिकं सकामनिष्कामतया विचित्रं वर्तमानं अन्मममध्यमादिवैचित्र्यं कुर्व-
तः तद्वैषम्यं प्राप्नोतीत्यत्राह चातुर्वर्ण्यमिति मयाईश्वरेण चातुर्व-
र्ण्यं वर्णचतुष्टयं गुणकर्मविभागशः गुणानां सत्वरजस्तमसां कर्म-
णां शमदमशौर्यकृषिसेवादीनां ब्राह्मणक्षत्रियविट्शूद्रकार्याणां
विभागेन सृष्टमुत्पादितं तस्य चातुर्वर्ण्यस्य कर्तारमपि संतं मां परमा-
र्थतः अकर्तारमसंसारिणं जानीहि १३

भगवीरसमिद्धोयिनी॥

चातुर्वर्ण्यमिति चत्वारो वर्णा एव चातुर्वर्ण्यं विप्रक्षत्रियविट्शूद्र-
लक्षणं मया सृष्टं कथं गुणकर्मविभागशः गुणाः सत्वादयः कर्मा-
णि भिक्षाचर्यादीनि सेवान्तानि तान्विभज्येत्यर्थः तत्र ब्राह्मणाः सत्व-
प्रधानाः शमदमभिक्षाचर्यादिकर्माणश्च क्षत्रियाः सत्वरजःप्रधानाः
शौर्ययुद्धादिकर्माणश्च विशो रजस्तमःप्रधानाः कृषिवाणिज्यादि-
कर्माणश्च शूद्रास्तमःप्रधानास्त्रैवर्णिकशुश्रूषादिकर्माणश्चेति य-
थावर्णं गुणानुरूपेण कर्माणि यथा स्वकर्मव्यतयानिर्दिष्टानि तस्य

चातुर्वर्ण्यस्यकर्तारमपिमामीश्वरमकर्तारंविद्धिजानीहि यो
हिकर्तासकथंकर्तृत्वप्रतियोगिकाभाव विषयोभवतीतिवि
रोधोलंकारः समाधिस्त्वित्थंनविद्यतेऽन्यःकर्तायस्येत्यकर्ता
सर्वकारणस्यमेवनकश्चित्कारणमितितात्पर्यं यतोव्ययंवि
नाशरहितं योहिविनश्यति सजायते यश्चजायते सविनश्य
तीति नकश्चिज्जनकोमेऽस्त्यर्थः समुदायार्थस्तु सर्वजनकेन
मयेश्वरेणयथास्वमनुष्ठितानिकर्माणिप्रजाभिरवश्यंवि
धेयानि ममतुकारणांतराभावान्नकश्चिच्छास्तेत्यतोयद्यपि
ममकर्माणिनावश्यमाचरणीयानितथापितेषुलोकसंग्र
हार्थंप्रवृत्तएवास्मि एवंविचार्यत्वमपिकर्माधिकारीसन्स्व
धर्ममेवाचरेतिभावः १३॥

मधुभाष्य

चातुर्वर्ण्यमिति चतुर्वर्णसमुदायः सात्विकोब्राह्मणः सा
त्विकराजसःक्षत्रियः राजसतामसोवैश्यः तामसः शूद्र इ
तिगुणविभागः कर्मविभागस्तुशमोदमइत्यादिनावक्ष्यते
क्रियायांवैलक्षण्यात्कर्ताकर्ता यथाहिश्रुतिः विश्वकर्म
विमानाइत्यादि तद्वियाक्रियाकृतिरितिच साधितव्येत्
स्वरूपात् अतएवनमांकर्माणिलिंपंति अतएवनलिंपती
त्याह नमेकर्मफलेस्पृहाइति अकामार्थंवास्ति नतत्राभि
निवेशः नचोक्तं प्राकृतवदन्यापिदेवोमेनेच्छसेलोकवत्परः
नह्याप्तकामस्यविमोक्षेतिनकामोहितस्याविति नवकेविन्दुः
क्ताभवंतीतिकर्मणासर्वशक्तिः यथाहिश्रुतिः ज्ञात्वातमेन
मनसाहृदावभूयोनमृत्युमुपयातिविद्वानिति कथंवाऽस्य
नेतास्त्येनंतवदितिहोवाचाति एवंज्ञात्वापिकर्मकरणेप्राचा

62

रोपस्तीत्याद ॥४

और जो कहो कि चारो वर्णके कर्ता भी तुमही हो और अनेक प्रकार कर्म भी वेद के द्वारा तुम्हीने कहा है फेरि उन्ही कर्मो के करने वाले ब्राह्मण आदि वर्णो को उत्तम औ अधम कर्मभी तुमने कहा तोइस सबके करने औ कहने वाले एक तुम ठहरे फेरि किसी की प्रवृत्ति सकाम कर्म मे और किसीकी निष्काममे जोहोतीहै तो कहो वैषम्य दोष कहे विषम स्वभाव तुमारा क्यों नहीहै इन बातों से अलबत्ते तुमकोपक्ष पात दोष हो सकताहै इसके उपर कहते हैं किहो चातुर्वर्ण्य कहे सतोगुण प्रधान जोब्राह्मण उनके कर्म शम दम उपरति तितिक्षा समाधान श्रद्धा है और सत्व रजप्रधान जो क्षत्री उनके कर्म भूमि रक्षा प्रजापालन युद्ध आदिक हैं और रजोगुण तमोगुण प्रधान जो वैश्य तिनके कर्म व्यापार खेती आदि कहे और तमोगुण प्रधान शूद्रका कर्म इन तीनो वर्ण की सेवा है सो यह बात ठीकहै पर जोभी हमइनके कर्ताहैं तोभी अकर्ताही जानो क्योंकि हम अव्यय हमारी आसक्ति इन कर्मोमे नहीहै १३

दोहा

चतुर वर्णजो मे रचे करविभाग गुणकर्म ताकोकर्ताजान मोहि अव्यय अकर्ता परम १३ ॥

63

न मां कर्माणि लिंपंति न मे कर्मफले स्पृहा इ-
ति मां योऽभिजानाति कर्मभिर्न स बध्यते १४

शांकरभाष्यं

येषां तु कर्म्मणां कर्तारं मां मन्यसे परमार्थतस्तेषामकर्तैवाहं यतः
नेति न मां तानि कर्म्माणि लिंपंति देहाद्यारम्भकत्वेनाहंकाराभा-
वान्न च तेषां कर्म्मणां फलेषु मे स्पृहा तृष्णा येषां तु संसारिणां अहं
कर्तेत्यभिमानः कर्म्मसु स्पृहा तत्फलेषु च तान् कर्म्माणि लिम्पं-
तीति युक्तं तदभावान्न मां कर्म्माणि लिम्पन्तीत्येवं योऽन्योपि मा-
मात्मत्वेनाभिजानाति नाहं कर्ता न मे कर्मफले स्पृहेति स कर्मभि-
र्न बध्यते तस्यापि न देहाद्यारंभकाणि कर्माणि भवंतीत्यर्थः १४

आनंदगिरिकृतटीका

ईश्वरस्य कर्तृत्वभोक्तृत्वयोर्वस्तुतोऽभावे कर्म्मतत्फलसंबंधवैधु-
र्यं फलतीत्याह येषां त्विति कर्मतत्फलसंस्पर्शशून्यमीश्वरं मां पश्य-
तो दर्शनानुरूपं फलं दर्शयति न मामिति तानि कर्म्माणीति येषां-
कर्म्मणामहं कर्तेति तवाभिमतस्तानीति यावत् देहेंद्रियाद्यारम्भ-
कत्वेन तेषां कर्म्मणामीश्वरे संस्पर्शाभावे तस्य तत्कारणावस्थाया-
महंकाराभावं हेतुं करोति अहंकाराभावादिति कर्म्मफलतृष्णा-
भावाच्चेश्वरं कर्माणि न लिंपंतीत्याह न चेति उक्तमेव प्रपंचयति
येषां त्विति तदभावात् कर्मस्वहं कर्तेत्यभिमानस्य तत्फलेषु स्पृ-
हायाश्चाभावादित्यर्थः ईश्वरस्य कर्मनिर्लेपेऽपि क्षेत्रज्ञस्य किमा-
यातमित्याशंक्योत्तरार्द्धं व्याचष्टे इत्येवमिति अभिज्ञानप्रकारमा-
भिनयति नाहमिति ज्ञानफलं कथयति स कर्मभिरिति कर्मसंब-
न्धं विदुषि विघटयति तस्यापीति १४

स्वामिकृतटीका

तदेवं दर्शयन्नाह कर्माणि विश्वसृष्ट्यादीन्यपि मां न लिंपंति आसक्त-

गी॰ टी॰ च॰

64

न कुर्वंति निरहंकारत्वात् आप्तकामत्वेन मम कर्मफलेस्पृहा
भावाच्च मां न लिंपंति इति किं वक्तव्यं यतः कर्मफलेस्पृहाराहित्येन
मां यो भिजानाति सोपि कर्मभिर्न बध्यते मम निर्लेपत्वकारणं निरहं
कारत्वनिस्पृहत्वादिकं ज्ञानतस्तस्याप्यहंकारादिशैथिल्यात् १४

पिशाचभाष्यं

कर्तृत्वे कर्मफलसंबंधानवानीश्वरत्वमित्याशंक्याह नमामिति
न मां कर्माणि यज्ञादीनि लिंपंति उपश्लेष्यंति देहादारंभकाले नत्व
हंकाराभावान् मे कर्मफले स्पृहा अतो हेतोरकर्त्रात्माज्ञानादहं
कर्मभिरलिप्त इत्यतो पि मां परमात्मानं योगिनामात्मत्वगच्छति क
र्मभिर्न स बध्यते न लिप्यते १४

रामानुजभाष्यं

कथमित्यत्राह नमामिति यत इमानि विचित्रसृष्ट्यादीनि न मां
कर्माणि लिंपंति न बध्नंति न मत्प्रयुक्तानि देवमनुष्यादिवै
चित्र्याणि सृज्यानां पुण्यपापप्रयुक्तानामर्थं अवाप्तावाप्तविवेकेन विचि
त्रसृष्ट्यादेर्नाहं कर्ता यतः ते क्षेत्रज्ञाः सृष्टिलब्धकरणकलेवराः
सृष्टिलब्धभोग्यजातेफलसंगादिहेतुभिः स्वकर्मानुगुणं भजंते
सृष्ट्यादिकर्मफले च तेषामेव स्यादिति न मे स्पृहा तथाहि सूत्रकारः
वैषम्यनैर्घृण्ये न सापेक्षत्वादिति तथाह भगवान्पराशरः निमित्त
मात्रमेवायं सृज्यानां सर्गकर्मणि प्रधानकारणीभूता यतो वै
विसृज्यशक्तयं निमित्तमात्रं मुक्त्वैवं नान्यत्किंचिदपेक्षते नीयते तप
तां श्रेष्ठ स्वशक्त्या वस्तु वस्तुतामिति सृज्यानां देवक्षेत्रज्ञानां सृष्टेः कारणमा
त्रमेवायं परमपुरुषः देवादिवैचित्र्ये तु प्रधानकारणं सृज्यभूतक्षे
त्रज्ञानां प्राचीनकर्मशक्तय एव अतो निमित्तमात्रं मुक्त्वा सृष्टेः कर्ता
रं परमपुरुषं मुक्त्वा इदं क्षेत्रज्ञवस्तु देवादिविचित्रभावेनान्यदपे
क्षते स्वगतप्राचीनकर्मशक्त्यैव देवादिवस्तुभावमुपनीयत इत्यर्थः
एवमुक्तेन प्रकारेण सृष्ट्यादेः कर्तारमप्यकर्तारं सृष्ट्यादिकर्मफल

संगरहितं च यो मामभिजानाति स कर्मयोगारंभविरोधिभिः फला-
क्लिन्नः संप्राचीनकर्मभिर्न बध्यते मुच्यत इत्यर्थः १४

अभिनवगुप्तकृतटीका १४ ममकिल कथमाकाङ्क्षा

परमार्थप्रपाटीका अथ विषयकतारमव्ययमित्येवं विव

नि
व्याह नमामिति मां कर्माणि सृष्ट्यादीनि कर्तृत्वेन न लिंपंति असंगत्वात्
अत एव न मे कर्मफले स्पृहा वांछापि अवाप्तसकलकामेन मया किमु
द्दिश्य तत्कर्तव्यमित्यर्थः यथा सूर्यो जगद्व्यापारहेतुत्वेपि तत्कर्म
णा न लिप्यते एवमित्युक्तप्रकारेण यो मामभिजानाति सोपि कर्मभि
र्न बध्यते किंपुनरहमित्यर्थः १४

वनमालीटीका

तदेवाह नेति यतो मम कर्मफले स्पृहा नास्त्यतो मां कर्माणि न लिंपं-
पाधिहीनं ति इतीत्थं जीवो मां सर्वेश्वरं कर्मफलाद्यभिनिवेशरहितं यो वदस्यम
त्वसादलब्धनिर्लेपसामर्थ्यात् प्रवाहानादिकर्मरूपया विद्यया न बध्य
ते क्रियमाणादिभिरपि कर्मभिर्न बध्यत इत्यर्थः १४

कुसमवैजयंतीटीका

पुनरपि तदेव विशदं कुर्वन् तत्केन प्रकारेण भवतीत्याह नमामिति
कर्माणि विचित्रविश्वसर्गादीनि मां सर्वेश्वरेश्वरं न लिंपंति न बध्नंति
सृज्यमानजीवानां पुण्यपुण्यप्रयुक्तानीमानि सुरासुरनरादयनेकवि
चित्ररूपाकाराणि भवंति न मत्प्रयुक्तानि यतो मम मेश्वरस्य कर्मफले
विश्वसृष्ट्यादिकर्मफले स्पृहेच्छा नास्त्यतो मां तानि न लिम्पंतीत्यर्थः इ
त्येवंप्रकारेण यो मुमुक्षुर्मा सृष्ट्यादिकर्तारमप्यकर्तारं कर्मफलेच्छा
शून्यमभिजानाति साकल्येन वेत्ति स पुरुषः कर्मभिर्निष्कामकर्मयोगा
रंभविरोधिभिः सकामप्राचीनकर्मभिर्न बध्यते संसारान्मुच्यत इत्यर्थः १४

मधुसूदनीटीका

कर्माणि विश्वसर्गादीनि मानिरहंकारत्वेन कर्तृत्वाभिमानहीनं भगवं नं

कर्तुस्य कर्मभिर्लेपः आकाशप्रति मत्वं काम
भावादित्यनेन तान प्रकारेण यो भगवंतमेवा
त्वे सर्वत्र सर्वदानन्दघनं परमेश्वरमेव नवाह
वात्परमस्ति किं विदितिनीत्या विमृश्यानि तस
किं कर्मभिर्बन्धः

गी॰ टी॰ व॰ नेन लिंपंति देहारंभकत्वेन न बध्नंति एवं कर्तृत्वं निराकृत्य भोक्तृत्वं नि
राकरोति न मे मम आप्तकामस्य कर्मफले स्पृहा तृष्णा आप्तकामस्य स्पृहे सकाः
ति श्रुतेः कर्तृत्वाभिमानफलस्पृहाभ्यां हि कर्माणि लिंपंतीति तदभा
वान्न मां कर्माणि लिंपंतीति किंचवक्तव्यं इत्येवं यो न्योपि मामकर्तारम
भोक्तारं चात्मत्वेनाभिजानाति कर्मभिर्न स बध्यते अकर्तात्मज्ञानेन मुच्य
त इत्यर्थः [illegible] कर्मभिर्न बध्यते
[illegible] १४

65

सदानंदीटीका

कर्तृत्वं स्वे निराकृत्य निराचष्टेऽथ भोक्तृतां कर्माणि विश्वसृष्ट्यादीन्य
नहंकारमीश्वरं १ देहाद्यारंभकत्वेन न मां बध्नंति विद्धि न न वा मम आ
प्तकामस्य तृष्णा कर्मफले यतः २ कर्तृत्वाभिनिवेशेन तथैवाफलतृ
ष्णया लिंपंत्यज्ञास्तु कर्माणि तदभावान्न मां हरिं ३ एवं यो न्योपि मामी
शमात्मत्वेन श्रुतेर्नयात् अकर्तारमभोक्तारं वेति स्वानुभवेन च ४ य
मायमादिरूपाणि कर्माणि बंधकान्यपि तस्यापि नैव देहाद्यारंभका
णि भवंति वै ५ स चाकर्तात्मबोधेन मुच्यते कर्मबंधनैः ६ १४

नीलकंठीटीका

ननु कर्तुरपि कथमकर्तृत्वमत आह न मामिति कर्मलेपोपि कुतो
नास्तीत्यत आह न मे इति यः कर्तृत्वाभिमानी स लिप्यते यस्तु फले
च्छुः स एवात्मनः कर्तृत्वं मम तु इति फलेच्छाभावादकर्ता अकर्तृत्वाच्च
न लिप्यते यं इति मां यो भिजानाति स कर्मफलस्पृहात्यागात् कर्मभि
र्न बध्यते १४

आनंदी टीका

कथमेतदित्याह न मां कर्माणि लिंपंति न मे कामफलेष्वपि यतो
मे कर्मणां फलेषु कामः स्पृहा नास्ति ततो मां कर्माणि न लिंपंति अ
तो हं कृत्वाप्यकर्तैवेत्यर्थः प्रत्युदं सेतयाज्ययज्वनो तदेव सर्वमीश्व
र लक्षणमात्मनि प्रकाश्य प्रकृते कर्मणि पार्थस्य श्रद्धां जनयति इती
त्थं प्रकारेण यो मां सर्वज्ञं सर्वकर्तारं सर्वानुग्राहकं परमेश्वरमभिजा

इति मां यो भिजानाति
कर्मभिर्न बध्यते

नातिज्ञानेन साक्षात्करोति स कर्मभिः क्रियमाणैर्न बध्यते ज्ञानपू
र्वं क्रियमाणं हि कर्म न बंधकमित्यर्थः १४

रामकृतटीका

ततश्च कर्माणि पुण्यपापलक्षणाः क्रिया न मां लिंपंति सुखदुःखादिल
क्षणस्वफलरूपेण कलंकेन न मलिनयंति यतो नित्यनिजानंदतृप्त
स्य मम कर्मणां फलेषु तत्तदुत्तरोत्तरप्रकृष्टस्वरूपेष्वपि न कामो नाऽ
भिलाषः यथा प्रतिपादितस्वरूपैकमयत्वेन सर्वमिदमनुपश्यतः य
श्च यथोक्तेन ज्ञानेन मन्तनिर्झरेण निर्धौतसकलविकल्पकलंकत्वान्नि
र्मलप्रज्ञो योगी त्वेवं यथोक्तस्वरूपं मामभिजानाति प्रतिपद्यते स ज्ञय
त्क्रियमाणैः कर्मभिर्न बध्यते न रागादिक्लेशपाशनियंत्रितः क्रियते
[illegible] १४
[illegible] १४

लासिकी [illegible]टीका

ततश्च न मामिति कर्माणि विश्वसृष्ट्यादीनि मामीश्वरं स्वरूपादप्रच्युत
त्वेन न लिंपंति कर्तृत्वाभिमानरूपेण सुखदुःखादिफलरूपेण च क
लंकेन न मलिनयंति यतो न मे कर्मफले स्पृहा आप्तकामस्य कास्पृहे
ति भ्रुतेः एतेन कर्तृत्वं भोक्तृत्वं च निराकृतं एवमन्योपि यो मामकर्तार
मभोक्तारं चात्मत्वेनाभिजानाति कर्मभिः क्रियमाणैरपि स मद्वन्न ब
ध्यते न क्लेशपाशनियंत्रितः क्रियते १४

पंचोलीटीका

तदेव दर्शयन् तज्ज्ञाने फलमाह नमामिति कर्माणि मां न लिंपंति दे
हारंभकाणि न भवंति मे मम कर्मफले स्पृहा न य इति मामभिजा
नाति स कर्मभिर्न बध्यते तस्य कर्माणि देहारंभकाणि न भवंति १४

रणवीरसमिद्धोधिनी ॥

अतश्च नमामिति कर्माणिसर्वजनकेनेश्वरेण यथावर्णमनु
शिष्टानियुद्धादीनिविगुणान्यपिमांतदधिकादिगणंनलिंपंति
पापफलेननबध्नंति यतोमेममकर्मफलेकर्मणःप्रवृत्तिरू
पस्यस्ववर्णोचितस्ययुद्धादेःफलेराज्यभोगादिलक्षणेनस्पृहा
फलोद्देशेननकर्मसुप्रवृत्तिः किंत्वीश्वराज्ञैषा पालनीयेतिधि
यैवेत्यर्थः इत्यनेनप्रकारेणयोमामभिमांलक्षणीकृत्यमत्प्रवृत्तिं
प्रमाणीकृत्येतियावत् जानातिनिश्चिनोति स्वधर्ममवश्यपाचर
णीयत्वेनेतिशेषः सकर्मभिः हिंसाप्रधानैरपियुद्धादिव्यापारै
र्नबध्यते पापासंगेनेतिशेषः १४॥

मधुभाष्य

१४॥

भाषा अनुवाद

वही कर्म की आसक्ति देखलाति हुये कहते है कि देखो विश्व सर्जन आदिकर्म हमको नंही लगते और न कर्म फल की इच्छा हमेहै क्योंकिहम निरहंकार कर्मकरते है और पूर्ण काम है इससे कोई विषयके दर्शनादि से हमारी भोगमे इच्छा नही होती तोये कर्म हमे कैसे आसक्त करसके और क्या कहे देखो जो मनुष्य हमको कर्ममे निर्लिप्त जानतेहै वेभी कर्म बन्धमे नही पडते कारणयह कि जो हमारे निर्लेपता केहेतु अनहेकार औ निस्पृहत्व है सो उनके जानकार पुरुषके भी शिथिल होते कहे नाम मात्र को रहजाते औरकुछ नाम देखने योग्य नंही रहतेहै १४

दोहा

कर्म न मोकों लिप्त दे न कर्मफल मो अभिलाष ऐसेंजो
मोहिजानदे नहि कर्म बंध तिह भाष १४

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः कुरु का
र्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतं १५

शांकरभाष्यं

नाहं कर्ता न मे कर्मफले स्पृहेति एवमिति एवं ज्ञात्वा कृतं कर्म पूर्वैर
तिक्रांतैर्मुमुक्षुभिः कुरु तेन कर्मैव त्वं न तूष्णीमासनं नापि संन्यासः
कर्तव्यस्तस्मात्त्वं पूर्वैरप्यनुष्ठितत्वाद्यद्यनात्मज्ञस्त्वं तदात्मशुद्ध्यर्थं
तत्त्वविच्चेल्लोकसंग्रहार्थं पूर्वैर्जनकादिभिः पूर्वतरं कृतं नाधुनातनं
कृतं निर्वर्तितं १५ आनंदगिरिकृतटीका

तव कर्मतत्फलसंबंधाभावे तथाज्ञानवतश्च तदसंबंधे ममापि किं
कर्मणेत्याशंक्य कर्मणि कर्तृत्वाभिमानं तत्फलस्पृहां च त्यक्त्वा
मुमुक्षुवत् त्वया कर्म कर्तव्यमेवेत्याह नाहमित्यादिना एवमिति ना
हं कर्तेत्येवमादि परामृश्यते तेन पूर्वैर्मुमुक्षुभिरनुष्ठितत्वेन हेतुनेत्य
र्थः कर्मैवेत्येवकारार्थमाह नेत्यादिना त्वंशब्दस्य क्रियापदेन संबंध
तस्मादित्युक्तमेव स्फुटयति पूर्वैरिति यदुक्तं किं मम कर्मणेति तत्र त्व
मज्ञो वा तत्त्वविद्वा यद्यज्ञस्तदा चित्तशुद्ध्यर्थं कुरु कर्मेत्याह यदीति द्वि
तीयं प्रत्याह तत्त्वविदिति कुरु कर्मेति संबंधः पूर्वैः श्रेष्ठैराचरितमित्ये
तावता किमिति विवेकवता मया तत् कर्तव्यमित्याशंक्याह जनका
दिभिरिति नैतदेवं संपाद्य कर्म कृतवंतो न तदिदानीमप्रामाणिकत्वा
दनुष्ठेयमित्याशंक्याह पूर्वतरमिति १५

स्वामिकृतटीका

ये यथा मां प्रपद्यंत इत्यादिभिश्चतुर्भिः श्लोकैः प्रासंगिकमीश्वरस्य वैष
म्यं परिहृत्य पूर्वोक्तमेव कर्मयोगं प्रपंचयितुमनुस्मारयति एवं ज्ञात्वेति
अहंकारादिराहित्येन कृतं कर्म बंधकं भवतीत्येवं ज्ञात्वा पूर्वैः जनका
दिभिरपि मुमुक्षुभिः सत्वशुद्ध्यर्थं पूर्वतरं युगांतरेष्वपि कृतं तस्मात्त्वम
पि प्रथमं कर्मैव कुरु १५ पैशाचभाष्यं

गीं
टीं पूर्वं
वं

68

एवंज्ञात्वेति अहमेवेश्वरःकर्मणःस्रष्टाअहमेवचकर्तेतिज्ञात्वापूर्वैर्मु
कृतंपूर्वतरमेवकृतंकर्मत्वंतस्मादेवहेतोःकुरु १५

रामानुजभाष्य

एवमितिएवंमांज्ञात्वाविमुक्तपापैःपूर्वैरपिमुमुक्षुभिःफललक्षणंकर्म
कृतंतस्मात्त्वमुक्तप्रकारमद्विषयज्ञानविधूतपापः पूर्वैर्विवस्वन्मन्वादि
भिःकृतंपूर्वतरंपुरातनंतदानीमेवमयोक्तंवक्ष्यमाणाकारंकर्मैवकुरु १ ५

अभिनवगुप्तकृतटीका

ममापिलक्षणमाकाशकल्पस्यकर्मनिर्लेपः आकाशप्रतिमत्वंकाम
नाभावादित्येवंज्ञानप्रकारेणयोभगवन्तमेवाश्रयते सर्वंसमर्पयन्नेवंद
देवंवदनेनपरमेव नवाशदेवान्यस्मात्किंविदितिनीत्याविन्दन्नाशनिरस्य
किंकर्मभिर्बध्यः; तस्मादनयाबुद्ध्यापवित्रीकृतस्त्वमपिकर्माण्यवश्यक
र्तव्यानिकुरु १५

परमार्थप्रपाटीका

अथप्रकृतमनुसरति एवमिति एवममुनाप्रकारेणमदीयंकर्तृत्वा
द्यभिमानशून्यत्वंज्ञात्वामुमुक्षुभिर्मोक्षमिच्छद्भिःपूर्वैःपुरातनैरपिक
र्मकृतंतस्मात्त्वमपिप्रस्तुतंकर्मैवकुरु यतःपूर्वैःपूर्वतरमनादिसिद्धं
कृतं अनेनशिष्टाचारोपिसप्रमाणमितिसूचितं १५

वनमालीटीका

यतोभिमानाभावात्कर्मकर्तारंमांकर्माणिनलिंपन्त्यतोभिमानरा
हित्येनत्वमपिकर्मकुर्वित्याह एवमितियतःपूर्वैर्यदुप्रभृतिभिर्मुमुक्षु
भिरेवंकर्तृत्वाद्यभिमानाभावेकर्माणिनलिंपन्तीत्येवंज्ञात्वाकर्तृत्वाद्य
भिमानशून्यतयाकर्मकृतंतस्मात्त्वमपिमुमुक्षुर्विद्वान्वाज्ञानसंपादना
त्वात्तत्प्रियत्वेनसंन्यासानधिकाराच्च कर्मैवफलाभिसंधिशून्यःसन्
कुरु पूर्वैःजनकादिभिःपूर्वतरमतिपूर्वंयुगान्तरेपिकृतं १५

कुसुमवैजयंतीटीका

इदानींपूर्वैःकृतत्वेनकर्मयोगस्यावश्यककर्तव्यतामाह एवमिति
एवंकर्मफलेच्छादिरहितंमांज्ञात्वामुमुक्षुःपूर्वैर्मदनुवर्तिभिर्जनकादि-

भिर्मुमुक्षुभिर्लोकसंग्रहायथर्थमंतस्करणशुद्धयेचकर्ममदाराधनल
क्षणंफलानुसंधानरहितंकृतंयस्मादेवंतस्मात्त्वमपिपूर्वोक्तलक्षणं
कर्मैवकुरुपूर्वैर्मद्विषयज्ञानविशुक्तपापैःमद्भिष्येर्वैवस्वतमन्वा
दिभिःकृतंपूर्वतरमतिप्राचीनं १५

मधुसूदनीटीका

यतोनाहंकर्तानमेकर्मफलेस्पृहेतिज्ञानात्कर्मभिर्नबध्यतेऽतः॥

एवमात्मनोकर्तृःकर्मालेपंज्ञात्वाकृतंकर्मपूर्वैरपिअस्मिन्युगेअ
न्ययुगेवाययातियदुप्रभृतिभिर्मुमुक्षुभिःतस्मात्त्वमपिकर्मैवकुरु
नतूष्णीमासनंनापिसंन्यासं यद्यतत्त्ववित्तदात्मशुद्ध्यर्थं तत्त्ववित्चे
लोकसंग्रहार्थंपूर्वैर्जनकादिभिः पूर्वतरमतिपूर्वयुगांतरेपिकृतं
पूर्वैः एतेनास्मिन्युगेऽन्ययुगेचपूर्वतरैःकृतत्वादवश्यंत्वयाकर्तव्यंकर्म
तिदर्शयति [illegible]
[illegible] १५

सदानंदीटीका

एवमेवात्मनोकर्तृःकर्मालेपंविचार्यैवै कृतंकर्मयुगेप्यस्मिन्नति
क्रांतैर्मुमुक्षुभिः १ तस्मात्त्वमपिकर्मैवकुरुत्यागस्तुनोचितः धी
शुद्ध्यर्थंममत्वश्चेतज्ज्ञश्चेत्संग्रहायच २ युगांतरेकृतंपूर्वैःकृतंतज
नकादिभिः अवश्यंपकर्मकर्तव्यंकृतत्वात्सार्वकालिकैः ३ १५

नीलकंठीटीका

एतदेवशिष्टाचारप्रदर्शनपूर्वकंग्राहयति एवंज्ञात्वेति पूर्वतरंवेदो
क्तत्वात् नत्वधुनाकेनचित्कल्पितमित्यर्थः पूर्वतरंप्रमेध्यतरंकृतमि
त्यावश्यकत्वादितिवार्थः १५

आनंदी टीका

एवमीश्वरैर्देशमुपसंहृत्यकर्तव्यसिद्धांतमाह एवमिति १५

रामकंठीटीका

किंच यस्मादनयाबुद्ध्यापवित्रीकृतेत्वमपिअवश्यकर्तव्यानिकर्माणि कुरुइत्येवाह॥

एवंयथाप्रतिपादितेकर्तृत्वेण्यकर्तृत्वपर्यवसायित्वात् तत्वंज्ञात्वा

पिगमत्पूर्वैरपिमन्वादिभिर्मुमुक्षुभिःकर्मशास्त्रचोदितं कृतमनुष्ठि
तं तस्मात्त्वमपियथोक्तज्ञाननिष्ठत्वेनकर्मैव स्वजातिविहितयुद्धादि
व्यापारमेवानुतिष्ठ पूर्वैरतीतविप्रकृष्टकालजन्मभिस्तैस्तैः पूर्वतर
म॰ मादितरं नुष्ठितं [illegible] १५

लासिकी[illegible]टीका

अतएव एवमिति एवंस्वस्वभावादप्रच्युततया फलानभिलाषेण वा
कृतं कर्म बंधकं न भवतीत्येवं ज्ञात्वा पूर्वैर्मनुजनकादिभिरपिमुमुक्षु
भिःकर्मकृतमनुष्ठितं अनेनश्लोकार्थेनकर्मसंन्यासस्यलक्षणमुक्त
मितिद्रष्टव्यं तस्मात्त्वमपियथोक्तबोधनिष्ठत्वेनकर्मैवस्वजातिवि
हितयुद्धादिव्यापारमेवानुतिष्ठ पूर्वैरतीतविप्रकृष्टकालजन्मभिस्तै
स्तैः पूर्वतरमादितरंयुगांतेष्वपिवर्तमानंकृतं १५ ॥

पंचोलीटीका

येयथा मांप्रपद्यंते इत्यादिनाचतुर्भिःश्लोकैरीश्वरस्यवैचित्र्यंकुर्वतः
वैषम्यप्रासंगपरिहृत्यपूर्वोक्तमेवकर्मयोगंप्रपंचयितुमनुस्मारयति
एवमिति पूर्वैरपिमुमुक्षुभिः जनकादिभिः एवंज्ञात्वाफलाकां
क्षारहितंकर्मबंधकंनभवति इत्येवंविज्ञायकर्मकृतंतस्मात्त्वंक
र्मैवकुरुपूर्वैः पूर्वतरंकृतं पूर्वैर्जनकादिभिः युगांतरेपिसत्वशुद्ध्य
र्थंकृतं १५

रणवीरसमिद्बोधिनी ॥

अत्र सदाचारंप्रमाणयन्नुक्तमर्थमुपसंहरति एवमिति एवमुक्ते
नप्रकारेणाज्ञात्वानिश्चित्यपूर्वैर्जनकादिभीराजर्षिभिर्मुमुक्षुभिर
पिमोक्षकामैरपिकिमुतभोगेच्छुभिः कर्मस्ववर्णाश्रमोचितंकृतम
नुष्ठितम् तस्मात्त्वंकर्मप्रवृत्तिरूपमेवकुरुनपुनर्निवृत्तिमातिष्ठ यतः
पूर्वतरंमतईश्वरतः सर्गादौप्रवृत्तत्वात्पूर्वैश्चविवस्वदादिभिरनुष्ठि
तम् १५॥

मधुभाष्य

एवमिति पूर्वतरं कर्म पूर्वभावीत्यर्थः कर्मकर्त्तव्यक
म. तस्यकर्मणोऽविज्ञेयत्वमाह सम्यग्वक्ते १५ ॥

70

भाषाअनुवाद

अब ऐसे चारि श्लोक मे प्रसंग प्राप्त ईश्वर के वैषम्य दोषको
दूर करते हुये पूर्व कथित कर्म योग को विस्तार करि कहा
त है कि अहंकार रहित किया हुआ कर्म ज्ञानका बाधक न
ही होता है यह जानि करिके पूर्वकालके मुमुक्षु जनक आ
दिकों ने किया था इस से तुमभी अभी इस प्रथम अवस्थामे क
र्मकरो जब ज्ञान अवस्था प्राप्त होगी आपही छूट जायगे अभी
छोड़ने से सतोगुण की शुद्धि होना दुर्घटहै देखो और और यु
गमेभी लोगोने प्रथम कर्म को किया है यह कर्म युग युगांत
रसे किया चला आताहैं १५

दोहा

यों जाने कर्महि किये पूर्व मोक्ष हित जोय तातें तुमभी क
र्मकर ज्यों पूर्व पुरुष कृतसोय १५॥

71

किंकर्मकिमकर्मेतिकवयोप्यत्रमोहिताः तत्ते
कर्मप्रवक्ष्यामियद्ज्ञात्वामोक्ष्यसेशुभात् १६

शांकरभाष्यं

तत्रकर्मचेत् कर्तव्यंत्वद्वचनादेवकरोम्यहं किंविशेषणेन पूर्वैःपूर्व
तरंकृतमित्युच्यते यस्मान्महद्वैषम्यंकर्माकर्मणिकथंकिंकर्मेति
किंकर्मकिंवाकर्मेति कवयोमेधाविनोऽप्यत्रास्मिन्कर्मादिविष
येमोहिताःमोहंगताः अतस्तेतुभ्यमहंकर्माकर्मचप्रवक्ष्यामि यत्
ज्ञात्वाविदित्वाकर्मादिमोक्ष्यसेशुभात् संसारात् नचैवंत्वयामंतव्यं
कर्मनामदेहादिचेष्टा लोकप्रसिद्धमकर्म नामतदक्रियातूष्णीमास
नंकिंतत्र बोद्धव्यमिति १६

आनंदगिरिकृतटीका

कर्मविशेषणमाक्षिपति तत्रेति मनुष्यलोकःसप्तम्यर्थःकर्मणि म
हत्वैषम्यस्याविद्यमानत्वात्तस्य पूर्वैरनुष्ठितत्वेनपूर्वतरत्वेनचविशेषि
तत्वेतास्मिन्प्रवृत्तिस्तवसकरोति युक्तंविशेषणमितिपरिहरति उच्य
तइति कर्मणिदेहादिचेष्टारूपेलोकप्रसिद्धेनास्तिवैषम्यमिति शं
कते कथमितिविज्ञानवतामपिकर्मादिविषयेव्यामोहोपपत्तेःस्तु
रामेवतवतद्विषये व्यामोहसंभवात्तदपीहार्थमाप्तवाक्यापेक्षणाद
स्तिकर्मणि वैषम्यमित्युत्तरमाह किंकर्मेति तत्तेकर्मेत्यत्राकारानु
बंधेनापिपदंछेत्तव्यंकर्मादिप्रवचनस्यप्रयोजनमाह यज्ज्ञात्वेति तत्
कर्माकर्मचेतिसंबंधःअतोमेधाविनोऽपि यथोक्तेविषयेव्यामोहस्य
सत्त्वादित्यर्थःकर्मणोकर्मणश्चप्रसिद्धत्वात्तद्विषयेनकिंचिद्बोद्धव्य
मिति चोद्यमनूद्यनिरस्यतिनचैवेति १६

स्वामिकृतटीका

तच्चतत्त्वविद्भिःसहविचार्यकर्तव्यं नलोकपरंपरामात्रेणेत्याह किं
कर्मेति किंकर्मकीदृशंकर्मकरणंकिमकर्मकीदृशंकर्माकरणमि
त्यस्मिन्नर्थेविवेकिनोपिमोहिताःअतोयज्ज्ञात्वानुष्ठायाशुभात्संसारा

७२

न्मोक्ष्यसेमुक्तोभविष्यसितत्कर्माकर्मचतुभ्यंप्रवक्ष्यामिशृणु ॥ १६

पिशाचभाष्यं

अथात्मज्ञानेनकर्मफलेशासंमन्यमानः स्वयमेवकर्मणाअध्यात्मिका स्वरूपाविष्करणार्थमाह किंकर्मकिमकर्मेतिकर्माकर्मस्वरूपमजानेन कवयोपिमोहिताःपरमसूक्ष्माःतत्त्वतःतत्तेकर्मप्रवक्ष्यामियत्कर्मस्वरूपं ज्ञात्वाअशुभात्संसारात्विमोक्ष्यसे ॥ १६

रामानुजभाष्यं

वक्ष्यमाणस्यकर्मणोदुर्ज्ञानतामाह किंकर्मेतिमुमुक्षुणामनुष्ठेयंकर्म किंस्वरूपं,कर्मचकिंफलाभिसंधिरहितंभगवदाराधनरूपंकर्मअकर्मे तिकर्तुरात्मनोयाथात्म्यज्ञानमुच्यते अनुष्ठेयंकर्मतदंर्गतंज्ञानंच किंरूपमित्यर्थः अत्रकवयोविद्वांसोपिमोहितायथार्थतयानजानंतिएव मंतर्गतज्ञानंयत्कर्मतद्वक्ष्यामियज्ज्ञात्वानुष्ठायाशुभात्संसारंबंधान्मोक्ष्यसे ॥ १६

अभिनवगुप्तकृतटीकाउपक्रमे ॥ १६

अवोच्यतेकरणादेवसिद्धिरितिनतथैतत् ॥ १६

परमार्थप्रपाटीका

अथकर्मणोदुर्ज्ञेयत्वमाह किंकर्मेतित्रिभिः कर्मवेदबोधितंकीदृशंतथान त्समानिरूपमकर्मैनेष्कर्मकीदृशमित्यत्रकवयःपंडिताअपिमोहिताःकिंपु नर्भवादृशाइत्यर्थः यस्मादेवंतत्रतस्मात्तेमुमुक्षु[illegible]नुष्ठेयंकर्मप्रवक्ष्यामितत् किंयत्ज्ञात्वाअशु[illegible]भात्संसारात्मोक्ष्यसे ॥ १६

वनमालीटीका

कुरुकर्मेत्युक्तस्यकर्मणोजिज्ञासार्थंदुर्ज्ञेयत्वंवदन्विशेषेणवक्तुंप्रतिजा नीतेकिमिति किंकीदृशंकर्मअकर्म कर्माकरणंविरुद्धकर्मचयामंतत्रो भाववविरुद्धकर्मरूपहृयार्थत्वात् काम्यकर्मणोमोक्षविरोधित्वान्निषिद्धता तकर्मतेतन्मप्रकर्षेणवक्ष्यामिअनुष्ठानपर्यंतंयज्ज्ञात्वाशुभात्संसारात्मो क्ष्यसे ॥ १६

ऊरुममेवेजंयंतीटीका

ननुयत्कर्मपूर्वतरंपूर्वैरपिकृतंतत्स्यकिंविषयकंरूपंतत्त्वंवदेत्यपेक्षायांक
र्मयोगस्यउद्बोधत्वमाहकिंकर्मेतिकिंकर्मभगवदाराधनरूपेणमुमुक्षु·
भिरनुष्ठेयंकर्मकिंस्वरूपकंस्यादथचकिमकर्मात्राकर्मशब्देनज्ञानवाच
कः।कर्मणोन्यदकर्मज्ञानंतदन्यत्वेऽत्रनञ्समासः पूर्वेषांमुमुक्षूणामनु
ष्ठानार्हंयत्कर्मतस्मादन्यद्यत्क्रतुरात्मनोयाथात्म्यज्ञानेनतदकर्मेत्यर्थः इ·
त्येवंप्रकारेणात्रकर्माकर्मविभागनिर्णयेकवयोपिकर्तव्याकर्तव्यवि·
चारकुशलाःशास्त्रज्ञाअपिमोहितास्तयोर्याथात्म्यस्वरूपनिर्णयासाम·
र्थ्यात्मोहंप्राप्ताःनजानंतीत्यर्थःतदहंसमाणंज्ञानगर्भकंकर्मयोगंतेमत्
द्विष्यायमञ्जन्यायमन्नित्रायतन्भ्यामहंसर्वज्ञःसर्वेश्वरःपुरुषोत्तमःप्रव
क्ष्यामिवदिष्यामियन्निष्कामलक्षणंश्रेयस्करंज्ञात्वाकर्माकर्मस्वरूपज्ञा
नपूर्वकमनुष्ठायाशुभादमंगलरूपात्संसारान्मोक्ष्यसेमुक्तोभविष्यसी·
त्यर्थः १६

मधुसूदनीटीका

ननुकर्मविषयेकिंकश्चित्संश योप्यास्तियेनपूर्वैःपूर्वतरंकृतमित्यतिनिर्बध्नासि अत्रेप
वेत्याह नौस्थस्यनिष्क्रियेष्वपितटस्थवृक्षेषुगमनभ्रमदर्शनात् तथादूराच्चक्षु :
षः सन्निकृष्टेषुगच्छत्स्वपिपुरुषेष्वगमनभ्रमदर्शनात् परमार्थतः किं·
कर्मकिंवापरमार्थतोऽकर्मेतिकवयोमेधाविनोप्यत्रास्मिन्विषयेमोहि
ताःमोहंनिर्णयासामर्थ्यंप्राप्ताःअत्यंतदुर्निरूपत्वादित्यर्थःततस्मात्तेतु
भ्यमहंकर्मप्रकारसंक्षेपेणत्वेदादकर्मचप्रवक्ष्यामिप्रकर्षेणसंदेहोच्छे·
देनवक्ष्यामि यत्कर्माकर्मस्वरूपंज्ञात्वामोक्ष्यसेमुक्तोभविष्यसिअशुभा
त्संसारात् [illegible] १६

सदानंदीटीका

नन्वत्रकर्मविषयेकिंकाश्चित्संशयोस्तिवा पूर्वैःपूर्वतरंचेत्तियेनोक्तमिति
वेच्छृणु १ निष्क्रियेष्वपितीरस्थवृक्षेषुगमनभ्रमः नौस्थस्यदृश्यतेपुंस
स्तस्मात्किंकर्मवस्तुतः २ वदतुषासन्निकृष्टेषुगच्छत्स्वप्यतिदूरतः नरेष्व
गमनभ्रांतिदर्शनात्किमकर्मतत् ३ अतःकिंवस्तुतःकर्मकिमकर्मेति
वार्थतः मेधाविनोपिकर्मादिविषयेनिर्णयेर्थतः ४ असामर्थ्यंगताश्चा
तिदुर्निरूपतयाखिलाः तस्मात्तुभ्यमहंकर्मवक्ष्यामितदकर्मच ५ क

र्माकर्मस्वरूपंयज्ज्ञात्वामुक्तोभविष्यसि अशुभागारसंसारजन्ममृत्यु-
प्रवाहतः ६ १६

नीलकंठीटीका

आवश्यकत्वेपिनकर्मणोगतानुगतिकतयानुष्ठानंकर्तव्यंकिंतुज्ञात्वा
कर्माणिकुर्वीतेतिवचनात्कर्माश्रितेकिंविद्विशेषंज्ञापयितुंउपोद्घा
तयति किंकर्मेति यतःकर्माकर्मणीकवीनामपिदुर्निरूपेततस्माते-
त्रभ्यकर्मअकर्मचाकारप्रश्लेषेणग्राह्यंतेउभेमवक्ष्यामियत्तद्वयंज्ञात्वा
ऽशुभात्संसारात्मोक्ष्यसे १६

आनंदीटीका

अथभेदेनकर्मलक्षयति अशुभात्कर्मबंधनात् १६

रामकंठीटीका

किंव किंकर्मानुष्ठेयंकिंवाकर्मपरिहार्यमित्यत्रप्रविभागज्ञानेकवयोपिदृष्टा
रोपिमुनयोमोहिताः तेपिसम्यगेतयोर्नविभागेजानते तस्मादकर्मप-
रिहारेणतदनुष्ठेयंकर्मतत्त्वंप्रकर्षेणेदानींवक्ष्यामिकथयिष्यामि यद्वि
दित्वासंसारबंधलक्षणादशुभादकल्याणान्मोक्ष्यसेमुक्तोभविष्यसि
१६

लासिकी [illegible]टीका

ततश्चतत्वविद्भिःसहविचार्यकर्तव्यंनलोकपरम्परामात्रेणेत्याह
किमिति किंकर्मानुष्ठेयंकिंवाकर्मपरिहार्यमित्यत्रप्रविभागज्ञाने
कवयोविवेकिनोपिमोहिताःतस्मादकर्मपरिहारेणतदनुष्ठेयंक-
र्मतत्त्वंप्रकर्षेणवक्ष्यामि यज्ज्ञात्वाशुभात्संसारान्मोक्ष्यसेमुक्तोभवि
ष्यसि १६

पंचोलीटीका

तच्चतत्वविद्भिःतद्विचार्यकर्तव्यंनलोकपरंपरामात्रेणतदर्थंकर्म-
स्वरूपेणदुर्विज्ञेयतांदर्शयति किंकर्मेति किंकर्मकीदृशंकर्माकि-
मकर्मकीदृशाकर्माकरणमिति अत्रैवकर्मविभागेकवयोपिमे-
धाविनोऽपिमोहिताः तत्कर्मतेतत्त्वंवक्ष्यामियज्ज्ञात्वाअशुभात्संसा
रान्मोक्षसे १६

रणवीरसमिद्धोधिनी॥

ननुकालमाहात्म्यवशेनाधिकारिणांश्रोतृणांबुद्ध्याद्यपचयेपि
व्यासादिमहर्षीणांत्रिकालदर्शिनांधर्मनिर्णायकानांतज्ज्ञानम
स्त्येवेतिनसर्वथाकर्मयोगसंप्रदायविच्छेदःसंभाव्यतेइतिकथंत
स्ययोगोनष्टइतीत्याशंक्याह किंकर्मेति कर्मविहितमनुष्ठेयंकिं
कीदृशं अकर्मनिंद्यंयोविपर्ययेचनञ् तथाचनिषिद्धंपरिहार्यं
कर्मकिंकीदृशं तथाकरणाभावश्चकीदृशःअस्मिन्नर्थेकव
यःक्रांतदर्शिनोपिमोहंप्राप्ताः स्वयंसंदिग्धत्वेनपरान्निर्णयि
तुमसमर्थाः अतस्तेतुभ्यंतत्कर्मअकारप्रश्लेषादकर्मच विहि
तनिषिद्धनिवृत्तिलक्षणंत्रिविधमपि प्रकर्षेणसर्वसंदेहोच्छि
त्तिरूपेणवक्ष्यामि अनुष्ठेयत्वेनपरिहार्यत्वेनचकथयामि यत्त्रि
विधमपिज्ञात्वाशुभादमंगलान्मोक्ष्यसेमुक्तोभविष्यसीति १६

मधुभाष्य

किंकर्मकिमकर्मेति नकेवलंतज्ज्ञात्वामोक्ष्यसेज्ञातैवेत्या
शयवानाह १६॥

74

भाषा अनुवाद

और देखो तत्वज्ञानी के साथ विचार करके कर्म करना चाहि
ये केवल भेड़िया धसेन की नाई लोक परं परा प्राप्त देखकर कर
ना अनुचित जानो यह कहते है कि देखो कौन कर्म कर्तव्य औ
र कौन२ कर्तव्य है इस कर्म अकर्म के विचार मे कवि कहे बडे
बडे पंडित भी मोहित हो जाते पता नही लगताहै इससे जिस क
र्म के करने से इस अशुभ संसार से मुक्त होउगे सो और अकर्म जो
अकरणीय कर्म ये दोनो हम तुमसे कहते हैं सो सावधान होस
नो जिसको जानिके अशुभ संसारसे छूट मुक्त हो जावगे १६

दोहा

क्या है कर्म क्या अकर्म है कवि मोहे इह मांहि ताते ताको क
र्म कहूं जानत अशुभ छूट जांहि १८

75

कर्मणोह्यपिबोद्धव्यंबोद्धव्यंचविकर्मणः अक
र्मणश्चबोद्धव्यंगहनाकर्मणोगतिः १७

शांकरभाष्यं

कस्मात्उच्यतेकर्मणइति कर्मणःशास्त्रविहितस्यहियस्मात्अ
प्यस्तिबोद्धव्यंबोद्धव्यंचास्त्येव विकर्मणःप्रतिषिद्धस्य तथाअकर्म
णश्चतूष्णींभावस्यबोद्धव्यमस्तीति त्रिष्वप्यध्याहारःकर्तव्योयस्मात्
गहनाविषमादुर्ज्ञेयाकर्मणइत्युपलक्षणार्थंकर्मादीनांकर्माकर्म
विकर्मणांगतिर्याथात्म्यंतत्वमित्यर्थः १७

आनंदगिरिकृतटीका

तत्रहेत्वाकांक्षापूर्वकमनंतरंश्लोकमवतारयतिकस्मादिति त्रिष्व
पि कर्माकर्मविकर्मसुबोद्धव्यमस्तीति यस्मादध्याहारस्तस्मान्मदीयं
मवचनमर्थवदितियोजना बोद्धव्यसद्भावेहेतुमाह यस्मादितित्रितयं
प्रकृत्यान्यतमस्य गहनत्ववचनमयुक्तमित्याशंक्यान्यतमगहनस्योप
लक्षणार्थत्वमुपेत्य विविक्षितमर्थमाहकर्मादीनामिति १७

स्वामिकृतटीका

ननुलोकप्रसिद्धमेवकर्मदेहादिव्यापारात्मकंअकर्मचतदव्यापारात्म
कं अतःकथमुच्यतेकवयोप्यत्रमोहिताःमोहंप्रापाइतितत्राह कर्मण
इति कर्मणोविहितव्यापारस्यतत्वंबोद्धव्यमस्तिनतुलौकिकप्रसिद्धमा
त्रमेवअकर्मणोव्यापारस्यापितत्वंबोद्धव्यमस्ति विकर्मणोनिषिद्धस्यापि
तत्वंबोद्धव्यमस्तियतःकर्मणोगतिर्गहनाकर्मणइत्युपलक्षणार्थंकर्मा
कर्मविकर्मणांतत्वमतिदुर्विज्ञेयमित्यर्थः १७

पिशाचभाष्यं

कर्मनामशरीरेंद्रियव्यापारः तदभावश्चाकर्मकथमत्रकवयोपिमो
हिताइतिचेदुच्यते कर्मणोह्यपिबोद्धव्यंशरीरेंद्रियव्यापारनिर्वृत्तिरूपंबो
द्धव्यंकिंचिदस्तितथाविकर्मणःप्रतिषिद्धस्यापिबोद्धव्यंप्रतिषेध्यरूपमस्ति
तथाअकर्मणःकर्माभावस्यापिबोद्धव्यंरूपमस्तियतःकर्मणोगतिर्गह
नादुर्बोधा १७

76

रामानुजभाष्यं

कर्तव्यंकर्मज्ञानेस्यअनुष्ठानफलंकुतोस्यइज्ञानेनेत्यत्राह कर्मणइति
यस्मान्मोक्षसाधनभूतेकर्मणःस्वरूपेबोद्धव्यमस्तिविकर्मणिचनित्यनैमि धं॰
त्तिककाम्यरूपेतत्साधनद्रव्यार्जनद्वारेणविविधतामापन्ने विकर्मनकर्मा कर्म
तस्मिन कर्मणिज्ञानेचबोद्धव्यमस्तिगहनादुर्ज्ञानामुमुक्षोःकर्मणो
गतिर्विकर्मणिबोद्धव्यंनित्यनैमित्तिककाम्यद्रव्यार्जनादौकर्मणिफल
भेदकृतंवैविध्यंपरित्यज्यमोक्षैकफलतयैकशास्त्रार्थत्वानुसंधानं त
देतद्व्यवसायात्मिकाबुद्धिरेकेत्यत्रैवोक्तमितिनेहप्रपंच्यते १७

अभिनवगुप्तकृतटीका

कर्माकर्मणोर्विभागोदुःपरिज्ञानः तथाचकर्मण्यपिमध्येदृष्टकर्मापि
अग्निष्टोमस्थपशुवधः विरुद्धेपिचकर्मणिशुभमस्तिकर्म तथाहिस्व
प्राणिवधेप्रजोपतापाभावः अकरणेपिचशुभाशुभकर्मास्तिवाङ्मनस ऊ॰
कृतानांकर्मणामवश्यंभावित्वात् तेषांज्ञानमंतरेणदुःपरिहरत्वात्
अतःकुशलैरपिगहनत्वात्कर्मनज्ञायते अनेनशुभकर्मणाशुभमस्मा
कंभविष्यति अनेनचकर्मणामनारंभेणामोक्षोनभविष्यतीत्य तस्माद्व
क्ष्यमाणोविज्ञानवह्निरेवावश्यंसकलशुभाशुभकर्मेंधनप्लोषसमर्थः
शरणत्वेनान्वेष्यइतिभगवतोभिप्रायः १७

परमार्थप्रपाटीका

अथकर्मगहनत्वमेवाह कर्मणइति मोक्षनिरूपणेतावत्कर्माकरण
विरुद्धकर्मणांस्वरूपंज्ञातत्वात्कर्मणोवेदविहितात्किंभवतीतिबोद्ध
व्यंतत्त्वतोज्ञातव्यं तस्मिन्नवक्ष्यमाणप्रकारेणद्विधाज्ञातेसतिविनश्वरफ
लंकर्मविकर्मस्वर्गप्रापकंतस्मात्किंभविष्यतीतिबोद्धव्यं तथाअकर्मण
नतस्माभिरूपात्नैष्कर्म्यात्किंभविष्यतीतिबोद्धव्यंयतःकर्मणोगतिर्ग :
हनात्तदुक्तंटिप्पणिकायांकर्माकर्मविकर्मणांभिन्नभिन्नधियाबोद्धव्यमेवादितः
कर्मस्माद्विधिपूर्वकंतन्मनसासर्वेंद्रियव्यापृतिः तत्तुद्वेधासफलफलेनरा
हितत्वाच्चविकर्मस्वरूपंतथाद्यदकर्मशुद्धिकरणंनैष्कर्म्यतामागतमि
ति अस्यार्थःसुधियाप्रकृष्टेनआदितःप्रथमतःकर्माकर्मविकर्मणाम
मेरहस्यंबोद्धव्यंज्ञातव्यं तत्रकर्मकिंनामेत्याहविधिपूर्वकंयथाभवति

तथा मनसा सह सर्वेंद्रियव्यापृत्तिः सत्वसंपन्नेन मनसा साकं सर्वेंद्रिया
णां ज्ञानकर्मेंद्रियाणां या व्यापृतिर्व्यापारस्तत्कर्मेत्युक्तं यज्ञोपकरण
दर्शनं तत्प्रतिपादकवेदश्रवणं होमद्रव्यमाघ्राणं यज्ञपात्रस्पर्शनं पुरोडा
शास्वादनं यज्ञसामग्रीसंपादनार्थं हस्तपादक्रियाः ततो भार्याभिगम
नं दक्षिणास्यादिषि मलोत्सर्ग इत्यादि विष्णूक्त इंद्रियव्यापारः कर्मशब्देनो
च्यते अथ तत्कर्मद्विधा सफलं स्वर्गप्रापकं फलेन रहितं मोक्षप्रापकं च
उभयत्र विधित्वस्त्वेकपर्व परंतु संकल्पकृतो भेदस्तत्राद्ये स्वर्गप्रापके विक
र्मविनश्वरफलं ज्ञातव्यं यातव्यं हेतुत्वात् तथान्यन्मोक्षप्रापकं कर्म अक
र्मयतनश्चित्तशुद्धिकरणादनंतरं स्वयमुपरमप्राप्तमतोऽकर्मतामागतं ज्ञा
ज्ञानप्रदत्वप्राप्तमित्यर्थः १७

वनमालीटीका

नन्वहमेतज्जानामि देहेंद्रियव्यापारः कर्म तत्त्यागोऽकर्म किमत्र वक्तव्य
मस्तीति अत आह कर्मण इति हि यतः कर्मणः वेदविहितस्यापि तत्त्वबो
द्धव्यमस्ति विकर्मणश्च प्रतिषिद्धस्य अकर्मणश्च तूष्णींभावस्यापि तत्त्वेऽपि त
त्त्वमस्तीत्यत आह यतः कर्मण इत्युपलक्षणं कर्मविकर्माकर्मणां गतिस्तत्त्वं ग
हनमित्यर्थः १७

ऊस्तमवैजयंतीटीका

ननु शरीरेंद्रियव्यापाररूपं कर्म सर्वैर्ज्ञातं ज्ञाश्चापि जनाश्च कुर्वंत कुर्वंति
करिष्यंति च सर्वेषामस्य कर्मणः प्रत्ययविषयत्वेनानुभवविषयत्वादत्र क
वयोऽपि मोहिता इति यदुक्तं षि तन्मया कथं संभावनीयं स्यादित्याशंक्यास्य
रूपं न हि सर्वैर्ज्ञातुं शक्यते किंत्वेक एव साकल्येन जानामीत्यभिप्रायेणास्य
दुर्ज्ञेयतामाह कर्मण इति अपि निश्चयेऽपि यस्मात्कर्मणः फलानुसंधानर
हितस्येश्वराराधनरूपस्य मोक्षसाधनभूतस्य स्वरूपं बोधव्यं ज्ञातव्यमस्ति
च पुनः विकर्मणः संसारप्रापकस्य मोक्षविरोधिनः काम्यनिषिद्धरूपस्य स्व
रूपं बोधव्यमस्ति अकर्मणश्च कर्मेतरस्यात्मज्ञानस्य स्वरूपं बोद्धव्यमस्ति त
त्स्वरूपज्ञातृभिः सह विचार्यमस्तीत्यर्थः तस्मात्कर्मणः कर्माकर्मविक
र्मरूपस्य गतिः स्वरूपं गहना दुर्गमा मुमुक्षूणां दुर्ज्ञेयमर्थः अतः कवयोऽ
प्यत्र मोहिता इत्युक्तं मया त्वया तु मद्वचनं नासंभावनीयं स्यादिति भावः १७

मधुसूदनीटीका

नन्वसर्वलोकप्रसिद्धत्वादहमेवैतज्जानामि देहेंद्रियादिव्यापारः कर्म तूष्णीमासनमकर्मेति
तत्र किं वक्तव्यमस्तीति तत्राह ॥

हियस्मात्कर्मणः शास्त्रविहितस्यापि तत्त्वं बोद्धव्यमस्ति विकर्मणश्च
प्रतिषिद्धस्य अकर्मणश्च तूष्णींभावस्य अत्र वाक्यत्रयेपि तत्त्वमस्तीत्य-
ध्याहारः यस्मात् गहना दुर्ज्ञाना कर्मण इत्युपलक्षणं कर्माकर्मविकर्म
णां गतिस्तत्त्वमित्यर्थः (…टपंनहिकर्मादीनां तत्त्वमितितदाह) १७

सदानंदीटीका

सर्वलोकप्रसिद्धत्वाज्जानाम्यहमेवतत् देहेंद्रियादिव्यापारः कर्मा
कर्मविपर्ययः १ किंत्वया तत्र वक्तव्यमिति चेच्छृणु तत्त्वतः यस्माच्छा-
स्त्रविधानस्य बोद्धव्यं तत्त्वमस्तिते २ निषिद्धस्यापि बोद्धव्यं तत्त्वमस्ति वि
कर्मणः तूष्णींभावस्य बोद्धव्यमस्ति तत्त्वमकर्मणः ३ यतस्तत्त्वं च दुर्ज्ञे
यं कर्माकर्मविकर्मणां ४ १७

नीलकंठीटीका

एतज्ज्ञानमावश्यकमित्याह कर्मण इति तत्त्वं बोद्धव्यमस्तीति स्थलत्र-
येपि तत्त्वमस्तीति पदद्वयाध्याहारः कर्मणः शास्त्रविहितस्य विकर्मणः
प्रतिषिद्धस्य अकर्मणस्तूष्णींभावस्य गहना कर्मण इत्यत्र कर्मण इति
त्रितयोपलक्षणं कर्मविकर्माकर्मणां गतिर्याथात्म्यं तत्त्वं गहनं १७

आनंदीटीका

कर्माकर्मविकर्मेति त्रिविधं कर्म तत्र कर्मणो वर्णाश्रमधर्मत्वेन श्रुतिः
स्मृतिविहितस्य नित्यस्य कर्मणो बोद्धव्यं स्वरूपं विचार्यं विकर्मणः श्रुति-
स्मृतिनिषिद्धस्य परिहरणीयस्य कर्मणः स्वरूपं बोद्धव्यं अकर्मणो विहित-
निषिद्धाभ्यां कर्मभ्यामितरस्य काम्यस्य च कर्मणः स्वरूपं बोद्धव्यमित्यत्रा-
स्मणामानयेतिवन्नञ्समासार्थः अथ च कर्मणामभावो करणं तस्माद
कर्मणः कर्मसंन्यासस्य स्वरूपं बोद्धव्यं यतः कर्मणो गतिर्गहना दुर्ज्ञेया
स्ति १७

रामकंठीटीका

यतः सामान्येनात्र श्रेयतयोपदिष्टस्य कर्मणो बोद्धव्यं विशेषात्मकं वस्तु वि
द्यते अकर्मणश्च कर्मपरिहारस्यापि बोद्धव्यं विद्यते विकर्मणश्च विरुद्ध
स्यापि कर्मणस्तथैव बोद्धव्यं विद्यते यतोस्य त्रिप्रकारत्वमवस्थितस्य-

कर्मणोगहनाडुरवथारतत्वागतिर्ज्ञाप्तिः आद्दश्याऽवयार्थेते
तत्त्वमनियादयितमाह १

लासिकी वल्लभोक्तिटीका

नतुलोकप्रसिद्धमेवकर्मदेहादिव्यापारात्मकमकर्मचतदव्यापा
रात्मकमतः कथमुच्यतेकवयोप्यत्रमोहिताइति तत्राह कर्मण
इति कर्मणोऽनुष्ठेयतयोपदिष्टस्यकर्मणोबोद्धव्यंविशेषात्मकंत
त्त्वमस्ति यथालोकेविहितेकर्मण्यपिमध्येऽदृष्टकर्मास्ति अग्निष्टो
मइवपशुवधः विकर्मणोविरुद्धस्यापिकर्मणस्तत्त्वंबोद्धव्यमस्ति
यथाविरुद्धेपिलौकिकेकर्मणिशुभमस्तिकर्मेहिंसप्राणिवधइ
वप्रजोपनापभावः अकर्मणः कर्मपरिहारस्यापिबोद्धव्यंतत्त्वमस्ति
यथालौकिकेअकरणेपिशुभाशुभमस्तिवाङ्मनसे कृतानांकर्म
णामवश्यंभावित्वात् यतः कर्मणोगतिर्ज्ञाप्तिर्गहनादुरवथार्यत
त्वा ऊ शौलेरपिगहनत्वात्कर्मनज्ञायते तस्माद्वक्ष्यमाणोविज्ञानवा
न्धिरेवावश्यंसकलशुभाशुभकर्मन्यनलोपसमर्थः शरणत्वेना
न्वेष्यइतिभगवतोभिप्रायः कर्मणइत्युपलक्षणार्थं कर्माकर्मविकर्मणां
तत्त्वंदुर्ज्ञेयम् १७

पंचोलीटीका

ननुकर्मनामदेहादिचेष्टालोकप्रसिद्धंअकर्मचतदकरणंकिमत्र
बोद्धव्यमित्यत्राह कर्मणइति हियस्मात्कर्मणः शास्त्रविहित
स्यतत्कर्मस्वरूपंबोद्धव्यंज्ञातव्यंविकर्मणः प्रतिनिषिद्धस्यकर्म
णः स्वरूपंबोद्धव्यंज्ञानिनोनिषिद्धकर्मस्वभावापन्नंअनहंकारे
णकृतंतस्यदोषायनभवतिविवेकीदेहेंद्रियादिभिरेवकर्मकृत
मन्यते आत्मानमकर्तारंकूटस्थमन्यतेअज्ञस्यतुरागतः अहं
कारेणकृतंनिषिद्धकर्मदोषायभवतियतःअज्ञः देहेंद्रियादि
गतंकर्तृत्वमात्मनिअविद्यमानमपिविद्यमानंमन्यतेएवंवि
कर्मणः स्वरूपंबोद्धव्यंअकर्मणः कर्माऽकरणस्यस्वरूपंबोद्ध
व्यंगहनादुर्विज्ञेयात्रयाणांकर्मादीनांगतिः स्वरूपं १७

रणवीरसमिद्धोधिनी॥

तदेवाह कर्मणइति हि यस्माद्धो निश्चये त्वयाकर्मणोपिसका
शाद्बोद्धव्यं प्रवृद्धेनभाव्यं विकर्मणश्चसकाशाद्बोद्धव्यं अक
र्मणश्चसकाशाद्बोद्धव्यं यत्कर्मविहितंतदनुष्ठेयमेव यच्च
निषिद्धंतत्परिहार्यमेव . यच्चाकर्मस्ववर्णोचितविहितकर्मा
ननुष्ठानंतत्रापिप्रत्यवायंपरिज्ञाय तस्मान्निश्चयः परावर्तनी
यइतिभावः अतश्चकर्मणः अकारप्रश्लेषादकर्मणश्चगति
र्गहनातिरहस्याभवतीतितात्पर्यं ॥ १७॥

मधुभाष्य

कर्मणइति तथोक्तं अस्मात्ताभगवान्कस्यकर्माकर्मवि
कर्मकं दर्शानंयातिहिमुनेऊतोमुक्तिस्तहिनेति अक
र्मकर्माकरणं कर्माकर्मान्यहिकर्मनिषिद्धंकर्मबंधकत्वा
त् ततोविद्यकर्मादिवोद्धव्यमित्यादि नचयापादिनाकव
योप्यत्रमोहिताः अपाकंचैतज्ज्ञात्वमित्याह गहनेति कर्मा
दिस्वरूपमाह १७॥

भाषा अनुवाद

जो कहो कि मन वचन देह के व्यापार ही तो कर्म हैं और देहादि व्यापार का अभाव ही अकर्म है यही तो लोक मे प्रसिद्ध है फेरि जो आप ने कहा कि पंडित लोग भी कर्म अकर्म के विषय मे मोहको प्राप्त होते सो कैसे इस बात पर कहते हैं कि कर्म तो शास्त्रविहित व्यापार का तत्त्व जानि करके कर्त्तव्य है केवल लोक व्यवहार देखि अवश्य कर्त्तव्य कर्म नहीं और अकर्म तो संन्यास आश्रम अंगीकार करि शास्त्रकी रीतसे कर्मका त्याग करना पर तत्त्व ज्ञानवान होकर उचित है और विकर्म जो निषिद्ध कर्म उसका भी तत्त्व जानना आवश्यक है क्यों कि सब कर्मों की गति का ज्ञान होना कठिन है सोई कहा कि कर्म की गति गहन कहे बडी कठिन सहज से जानवे जोग नहीं हैं १७

दोहा

कर्महि जानन योग्य है जानन योग्य विकर्म जानन योग्य
अकर्म त्यों गहन कर्मगतिपर्म १७

79

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः स बु
द्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् १८

शांकरभाष्यं

किंपुनस्तत्कर्मादि यद्बोद्धव्यं वक्ष्यामीति प्रतिज्ञातमुच्यते कर्मणीति
कर्मणि क्रियत इति कर्म व्यापारमात्रं तस्मिन् कर्मण्यकर्म कर्माभा
वं यः पश्येदकर्मणि च कर्माभावे कर्तृतंत्रत्वात् प्रवृत्तिनिवृत्त्योर्वस्तु
प्राप्यैव हि सर्वएव क्रियाकारकादिव्यवहारोऽविद्याभूमावेव कर्म यः
पश्येत् यः पश्यति स बुद्धिमान्मनुष्येषु स युक्तो योगी च कृत्स्नकर्मकृ
त् समस्तकर्मकृच्च सः इति स्तूयते कर्माकर्मणोरितरेतरदर्शी ननु
किमिदं विरुद्धमुच्यते कर्मण्यकर्म यः पश्येदित्यकर्मणि च कर्मेति न
हि कर्माकर्म स्यादकर्म वा कर्म तत्र विरुद्धं कथं पश्येत् द्रष्टा नन्वकर्मै
व परमार्थतः सत्कर्मवदवभासते मूढदृष्टेर्लोकस्य तथा कर्मैवाकर्म
वत् तत्र यथाभूतदर्शनार्थमाह भगवान् कर्मण्यकर्म यः पश्येदित्या
दि अतो न विरुद्धं बुद्धिमत्त्वाद्युपपत्तेश्च बोद्धव्यमिति च यथाभूतं दर्श
नमुच्यते न च विपरीतज्ञानादशुभान्मोक्षणं स्यात् यज्ज्ञात्वा मोक्ष्यसेऽशु
भादिति चोक्तं तस्मात् कर्माकर्मणी विपर्ययेण गृहीते प्राणिभिस्तद्वि
पर्ययग्रहणनिवृत्त्यर्थं भगवतो वचनं कर्मण्यकर्म य इत्यादि न चात्र क
र्माधिकरणमकर्मास्ति कुण्डे बदराणीव नाप्यकर्माधिकरणं कर्मा
स्ति कर्माभावत्वादकर्मणोऽतो विपरीते गृहीते एव कर्माकर्मणी लौ
किकैः यथा मृगतृष्णिकायामुदकं शुक्तिकायां वा रजतं ननु कर्म कर्मै
व सर्वेषां न क्वचित् व्यभिचरति तन्न नौस्थस्य नावि गच्छन्त्यां तटस्थेष्वग
तिकेषु नगेषु प्रतिकूलगतिदर्शनात् दूरेषु चक्षुषाऽसंनिकृष्टेषु गच्छ
त्सु गत्यभावदर्शनादेवमिहाप्यकर्मणि अहं करोमीति कर्मदर्शनं कर्म
णि चाकर्मदर्शनं विपरीतदर्शनं येन तन्निराकरणार्थमुच्यते कर्मण्य
कर्म यः पश्येदित्यादि तदेतदुक्तप्रतिवचनमप्यसकृदत्यन्तविपरीतदर्श
नभाविततया मोमुह्यमानो लोकः श्रुतमप्यसकृत्तत्त्वं विस्मृत्य मिथ्या
प्रसंगमवतार्यावतार्य चोदयतीति पुनः पुनरुत्तरमाह भगवान्

गीं
टीं
चं

दुर्विज्ञेयत्वं चालक्ष्य वस्तुनः अव्यक्तोयमचिंत्योयं न जायते म्रियते इ
त्यादिनात्मनि कर्माभावः श्रुतिस्मृतिन्यायप्रसिद्ध उक्तो वक्ष्यमाणश्च
तस्मिन्नात्मनि कर्माभावेऽकर्मणि कर्मविपरीतदर्शनमत्यंतनिरूढं
यतः किं कर्म किमकर्मेति कवयोप्यत्र मोहिता देहाद्याश्रयं कर्मात्म
न्यध्यारोप्याहं कर्ता ममैतत्कर्म मयास्य कर्मणः फलं भोक्तव्यमिति च
तथाहं तूष्णीं भवामि येनाहं निरायासोऽकर्मा सुखी स्यामिति कार्यकर
णाश्रयं व्यापारोपरमं कर्मैव तत्कृतं च सुखित्वमात्मन्यध्यारोप्य न करो
८५ मि किंचित्तूष्णीं सुखमासमित्यभिमन्यते लोकस्तत्रेदं लोकस्य विरीतदर्श
नापनयनायाह भगवान् कर्मण्यकर्म यः पश्येदित्यादि अत्र च कर्म क
र्मैव सत्कार्यकरणाश्रयं कर्मरहितेऽविक्रिये आत्मनि सर्वैरध्यस्तं यतः पं
डितोप्यहं करोमीति मन्यते अत आत्मसमवेततया सर्वलोकप्रसिद्धे क
र्मणि नदीकूलस्थेष्विव वृक्षेषु गतिः प्रातिलोम्येनातोऽकर्म कर्माभावं
यथाभूतं गत्यभावमिव वृक्षेषु यः पश्येत् अकर्मणि च कार्यकरणव्यापा
रोपरमे कर्मवत् आत्मन्यध्यारोपिते तूष्णीमकुर्वन् सुखमासे इत्यहंका
राभिसन्धिहेतुत्वात्तस्मिन् अकर्मणि च कर्म यः पश्येत् य एवं कर्माकर्म
विभागज्ञः स बुद्धिमान् पंडितो मनुष्येषु स युक्तो योगी कृत्स्नकर्मकृच्च
सोऽशुभान्मोक्षितः कृतकृत्यो भवतीत्यर्थः ॥ अयं श्लोकोन्यथा व्या-
ख्यातः कैश्चित् कथं नित्यानां किल कर्मणामीश्वरार्थेऽनुष्ठीयमानानां त
त्फलाभावादकर्माणि तान्युच्यन्ते गौण्या वृत्त्या तेषां चाकरणमकर्म त
च्च प्रत्यवायफलत्वात् कर्मोच्यते गौण्यैव वृत्त्या तत्र नित्ये कर्मण्यकर्म
यः पश्येत् फलाभावात् यथा धेनुरपि गौरगौरुच्यते क्षीराख्यं फलं न प्र
यच्छतीति तद्वत् तथा नित्याकरणे त्वकर्मण्यपि कर्म यः पश्येत् नरकादि
प्रत्यवायफलं प्रयच्छतीति नैतद्युक्तं व्याख्यानमेवं ज्ञानादशुभान्मो-
क्षानुपपत्तेर्यत् ज्ञात्वा मोक्ष्यसेऽशुभादिति भगवतोक्तं वचनं बाध्येत क-
थं नित्यानामनुष्ठानादशुभात् स्यान्नाम मोक्षणं न तु तेषां फलाभावज्ञा
नात् न हि नित्यानां फलाभावज्ञानमशुभमुक्तिफलत्वेन चोदितं नित्यकर्म
ज्ञानं वा न च भगवतैवेहोक्तं एतेनाकर्मणि कर्मदर्शनं प्रत्युक्तं न ह्यकर्मणि
कर्मेति दर्शनं कर्तव्यतयेह चोद्यते नित्यस्य तु कर्तव्यतामात्रं न चाकरणा
न्नित्यस्य प्रत्यवायो भवतीति विज्ञानात् किंचित्फलं स्यात् नापि नित्याकर

णंज्ञेयत्वेन चोदितं नापि कर्माकर्मेति मिथ्यादर्शनादशुभान्मोक्षणं
न च बुद्धिमत्त्वं युक्तता कृत्स्नकर्मकृदित्यादि च फलमुपपद्यते स्तुतिर्वा
मिथ्याज्ञानमेव हि साक्षादशुभरूपं कुतोऽन्यस्मादशुभान्मोक्षणं न हि त
मस्तमसो निवर्तकं भवति ननु कर्मणि वाकर्मदर्शनं अकर्मणि वा क
र्मदर्शनं न तन्मिथ्याज्ञानं किं तर्हि गौणं फलभावाभावनिमित्तं न क
र्माकर्मविज्ञानादपि गौणात् फलस्याश्रवणात् नापि श्रुतहान्यश्रुतप
रिकल्पनया कश्चिद्विशेषो लभ्यते स्वशब्देनापि शक्यं वक्तुं नित्यकर्म
णां फलं नास्त्यकरणाच्च तेषां नरकपातः स्यादिति तत्र व्याजेन परव्या
मोहरूपेण कर्मण्यकर्म यः पश्येदित्यादिना किं तत्रैवं व्याचक्षाणेन
भगवतोक्तं वाक्यं लोकव्यामोहार्थमिति व्यक्तं कल्पितं स्यात् न चैतच्छद्म
रूपेण वाक्येन रक्षणीयं वस्तु नापि शब्दान्तरेण पुनः पुनरुच्यमानं सु
बोधं स्यादित्येवं वक्तुं युक्तं कर्मण्येवाधिकारस्त इत्यत्र हि स्फुट
तर उक्तोऽर्थो न पुनर्वक्तव्यो भवति सर्वत्र च प्रशस्तं बोद्धव्यं च कर्तव्य
मेव न निष्प्रयोजनं बोद्धव्यमित्युच्यते न च मिथ्याज्ञानं बोद्धव्यं भवति
तत्प्रत्युपस्थापितं वा वस्त्वाभासं नापि नित्यानामकरणादभावात् प्र
त्यवायोत्पत्तिर्नासतो विद्यते भाव इति वचनात् कथमसतः सज्जायेते
ति च दर्शितं असतः सज्जन्मप्रतिषेधात् असतः सदुत्पत्तिं ब्रुवता असदे
व सद्भवेत् सच्चाप्यसद्भवेदित्युक्तं स्यात् तच्चायुक्तं सर्वप्रमाणविरो
धान्न च निष्फलं विदध्यात्कर्म शास्त्रं दुःखरूपत्वात् दुःखस्य च बुद्धिपू
र्वकतया कार्यत्वानुपपत्तेः तदकरणे च नरकपाताभ्युपगमे अनर्थायै
वोभयथापि करणे करणे च शास्त्रं निष्फलं कल्पितं स्यात् स्वाभ्युपग
मविरोधश्च नित्यानां निष्फलं कर्मेत्यभ्युपगम्यते मोक्षफलायेति ब्रुवत
तस्माद्यथाश्रुत एवार्थः कर्मण्यकर्म इत्यादेस्तथा च व्याख्यातोऽस्मा
भिः श्लोकः १८

आनंदगिरिकृतटीका

उत्तरश्लोकमाकांक्षापूर्वकमुपादत्ते किं पुनरिति प्रथमपादस्यान्त
रोत्थमर्थं कथयति कर्मणीत्यादिना द्वितीयपादस्यापि शङ्काप्रकाशि
तमर्थं निर्दिशति कर्मणि चेति कर्माभावः अकर्म प्रतीतीति संबंधः

गी॰
टी॰
च॰

४१

प्रवृत्तेरेवकर्मत्वान्निवृत्तेस्तदभावत्वात्तत्रकथंकर्मदर्शनमित्याशंक्य द्वयोर
पिकारकाधीनत्वेनाविशेषमभिप्रेत्याह कर्तृतंत्रत्वादिति प्रवृत्ताविव निवृ॰
त्तावपिकर्मदर्शनमविरुद्धमितिशेषः ननुनिवृत्तेर्वस्त्वधीनत्वात्कारकनि
बंधनाभावान्न तत्रकर्मदर्शनंयुज्यतेतत्राह वस्त्विति क्रियाकारकफलव्य
वहारस्यसर्वस्याविद्यावस्थायामेवप्रवृत्तत्वाद्वस्तुसंस्पर्शशून्यत्वात् प्रवृत्ति
वन्निवृत्तावपियःकर्मपश्यतिसमनुष्येषुबुद्धिमानितिसंबंधः कर्मण्यकर्म
यःकर्मणिचकर्मपश्यतोबुद्धिमत्त्वयुक्तं समस्तकर्मकृत्तेचकथमित्याशं॰
क्याह इतिस्तूयतइतिश्लोकस्यशांकरोत्थोर्थोदर्शितेतात्पर्यार्थापरिज्ञानान्मि
थ्याविरोधंशंकतेनन्विति कथमिदंविरुद्धमित्याशंक्याह कर्मणीति वि
षयसप्तमीवास्यादधिकरणसप्तमीवेतिविकल्पाद्येऽन्याकारंज्ञानमन्याव
लंबनमितिस्पष्टोविरोधःस्यादित्याह नहीति अन्यस्यान्यात्मतायोगात्क
र्माकर्मणोरभेदासंभवात्कर्माकारंकर्मावलंबनंज्ञानमयुक्तमित्यर्थः द्वि
तीयंदूषयति तत्रेति कर्मण्यधिकरणेततोविरुद्धमकर्मकथमाधेयंद्रष्टा
द्रष्टुमीष्टेनहिकर्माकर्मणोर्मिथोविरुद्धयोराधाराधेयभावःसंभवतीत्यर्थः
विषयसप्तमीमुपेत्यसिद्धांतीपरिहरतिनन्वकर्मैवेति लोकस्यमूढस्यदृष्टेर्वि
वेकवर्जितस्यपरमार्थतोब्रह्माकर्माक्रियमेवसत्संप्रत्याकर्मसहितंक्रिया
वदिवप्रतिभातीत्युत्तरार्थः परस्पराध्यासमुपेत्योक्तंतथेति यथाबल्वा॰
कर्मब्रह्मकर्मवदुपलभ्यतेतथाकर्मसक्रियमेवदेहेतेअक्रियेब्रह्मण्यधिष्ठाने
संसृष्टतद्वज्ञानीत्युत्तरयोजना कर्माकर्मणोरितरेतराध्याससिद्धेसम्यग्दर्शि
नसिद्ध्यर्थंभगवतोवचनमुचितमित्याह तत्रेति यथायदिदंरजतमितिप्रति
पन्नेनदिदानींशुक्तिसकलंपश्येतिभ्रमसिद्धरजतरूपविषयानुवादेनतदधि
ष्ठानं शुक्तिमात्रमुपदिश्यतेतथाभ्रमसिद्धकर्माद्यात्मकविषयानुवादेन
तदधिष्ठानंकर्मादिरहितं कूटस्थंब्रह्मभगवताव्यपदिश्यते तथाचभग॰
वद्वचनमविरुद्धमित्याह अतइति इतरैराध्यारोपितकर्माद्यनुवादपूर्वकं
तदधिष्ठानस्यकर्मादिरहितस्यनिर्विशेषस्यब्रह्मणोभगवताबोध्यमानत्वा
न्नतत्रविरोधाशंकावकाशोभवतीत्याह बुद्धिमत्त्वादीति कूटस्थात्ब्रह्म॰
णोन्यस्यसर्वस्यमायामात्रत्वात् अन्यज्ञानाद्बुद्धिमत्त्वयुक्तत्वसर्वकर्मकृत्त्वा
नामनुपपत्तेरत्रबुद्धिमानि^दिना बुद्धिमत्त्वादिनिर्देशात् तद्ब्रह्मज्ञानादेव

त्या॰

तदुपपत्तेः सर्वविक्रियारहितं ब्रह्मज्ञानमेव विवक्षितमित्यर्थः वोध-
शास्त्रस्य सम्यग्ज्ञाने प्रसिद्धत्वात् कर्माकर्मविकर्मणां स्वरूपं वोद्धव्यम-
स्तीति वदता सम्यग्ज्ञानोपदेशस्य विवक्षितत्वादपि कूटस्थब्रह्मात्मा-
भिप्रेतमित्याह वोद्धव्यमिति फलवचनपर्य्यालोचनायामपि कूटस्थ-
ब्रह्मात्माभिप्रेतं प्रतिभातीत्याह नचेति सम्यग्ज्ञानाधीनफलमत्र न श्रु-
तमित्याशंक्याह यज्ज्ञात्वेति अध्यारोपापवादार्थं भगवद्वचनमविरुद्ध-
मित्युपपादितमुपसंहरति तस्मादिति तद्विपर्य्ययेत्यत्र तच्छब्देन प्राणिनो
गृह्यंते विषयसप्तमीपरिग्रहेण परिहारमभिधायाधिकरणसप्तमीपक्षे
दर्शितं दूषणमंगीकारेण परिहरति नचेति व्यवहारभूमिरेवेत्युच्यते योग्य-
प९ त्वे सत्यनुलब्धेरित्यर्थः अकर्माधिकरणं कर्म न संभवतीत्यत्र हेत्वंतरमाह
कर्माभावत्वादिति नहि तुच्छस्याधिकरणत्वं क्वचिद्दृष्टमिष्टं वेत्यर्थः नि-
रूप्यमाणे कर्माकर्मणोरधिकरणाधिकर्त्तव्यभावासंभवे फलितमाह अ-
तइति शास्त्रपरिचयविरहिणामध्यारोपमुदाहरति यथेति कर्माकर्मणो-
रारोपितत्वमुक्तमनूद्यमानः शंकते नन्विति कर्मकर्मैवेत्यत्राकर्म चाकर्मै-
वेति द्रष्टव्यमिति मतं सत्यमव्यभिचारित्वात् ब्रह्मवदित्यर्थः तत्र कर्म तत्त्वतो ना-
व्यभिचारि कर्मत्वान्नौस्थस्य तटस्थवृक्षगमनवदित्यव्यभिचारित्वं कर्मण-
कर्मणः सिद्धमिति परिहरति नत्रेति अकर्मवत्तत्त्वतो न व्यभिचारि कर्माभा-
वत्वात् दूरप्रदेशे चैत्रमैत्रादिषु गच्छत्स्वेव चक्षुषा सन्निधानविधुरेषु दृश्य-
मानगत्यभावादित्याह दूरइति दूरत्वादेव विशेषतः सन्निकर्षविरहितेषु
तेषु स्वरूपेणाचक्षुःसन्निकृष्टेषु चक्षुषा गत्यभावदर्शनादिति योजना ग-
तिरहितेषु नरेषु गतिदर्शनवत् प्रकृते ब्रह्मण्यविक्रिये कर्मदर्शनं सक्रिये
देहे तत्प्रपंचे च गतिमत्सु चैत्रादिषु गत्यभावदर्शनवत् कर्माभावस्य विपरी-
तदर्शनं येन हेतुना संभवति तेन तस्य विपरीतदर्शनस्य निरसनार्थं भगव-
द्वचनमिति दार्ष्टांतिकं निगमयति एवमित्यादिना ननु कर्म तदभावयोरा-
रोपितत्वादविक्रियस्य ब्रह्मणो ज्ञानमात्राभिप्रेतं चेदव्यक्तोयमचिंत्योयं न
जायते म्रियते वेत्यादिना पौनरुक्त्यं प्राप्तं नैव ब्रह्मात्मनो निर्विकारत्व-
स्योक्तत्वादिति तत्राह तदेतदिति तदेतदात्मनि शंकितं सक्रियत्वमस-
कृदुक्तं प्रतिवचनमपि निर्विकारात्मवस्त्वपेक्षयात्यन्तविपरीतदर्शनं

मिथ्याज्ञानेनेन भावितत्वं तत्संस्कारप्रपंचवत्त्वं ततोतिशयेन मोहमापद्यमा
नो लोकः श्रुतिमपि तत्त्वं विस्मृत्य पुनर्यत्किंचित् प्रसंगमापद्य सक्रियत्व
मेवात्मनश्चोदयतीति पुनःपुनस्तत्त्वभूतमुत्तरं भगवानभिधत्ते वस्तुन
श्च दुर्विज्ञेयत्वात् पुनःपुनः प्रतिपादनेन तत्तद्भ्रमनिराकरणार्थमुपयुज्यते
तथा च नास्ति पुनरुक्तिरित्यर्थः असकृदुक्तप्रतिवचनमेवानुवदति अ
च्छेद्योयमिति कर्माभाव उक्त इति संबंधः उक्तस्य न जायते म्रियते वा विप
श्चिदित्यादिश्रुतौ प्रकृतस्मृतावसंगत्वादिन्यायेन च प्रसिद्धत्वमस्तीत्याह
श्रुतीति न केवलमुक्तः कर्माभावः किंतु सर्वकर्माणि मनसा संन्यस्येत्या
दौ वक्ष्यमाणश्चेत्याह वक्ष्यमाणश्चेति न तु कर्मणां देहादिनिर्वर्तकत्वेन
त्रैविध्यात् कूटस्थस्वभावस्यात्मनोऽसंगत्वात्तद्व्यापाररूपस्य कर्मणोऽ
प्रसिद्धत्वात् न तस्मिन्नकर्मणि विपरीतस्य कर्मणो दर्शनं सिध्यतीत्याशं
क्याह तस्मिन्निति कर्मैव विपरीतं तस्य दर्शनमिति यावत् अहं कर्त्तेत्यात्म
समानाधिकरणस्य व्यापारस्यानुभवात् कर्मभ्रमस्तावदात्मन्यनंतरूढो
स्तीत्यर्थः आत्मनि कर्मविभ्रमोस्तीत्यत्र हेतुमाह यत इति आत्मनो निः
क्रियत्वे कुतस्तस्मिन् यथोक्तो विभ्रमः संभवेदित्याशंक्याह देहेति इदा
नीमात्मन्यकर्मभ्रममुदाहरति नश्येत्यादिना यथा शुक्तेः स्वाभाविकम
रूप्यत्वं रूप्यत्वमारोपितं तदभावोप्यारोप्याभावत्वादारोपपदपाती त
थात्मनोपि स्वाभाविकमविक्रियत्वं पुनरध्यस्ततदभावत्वात् कर्माभावो
प्यध्यस्त एवेति मन्वानः समनुपसंहरति तेनेदमिति आत्मनि कर्मादिविभ्र
मे लौकिके सिद्धे सति एवं कर्मणीत्यादिवचनं तत्परिहारार्थं भगवानुक्त
वानित्यर्थः संप्रयुक्तेर्थे श्लोकान्तरसमन्वयं दर्शयितुं कर्मणीत्यादि व्या
चिख्यासुः भूमिकां करोति अत्र चेति व्यवहारभूमौ कार्यकारणाधिक
रणं कर्मस्वेनैव रूपेण व्यवस्थितं सदात्मन्यविक्रिये कार्यकरणारोपणा
द्वारेण सर्वैरारोपितमित्यत्र हेतुमाह यत इति अविवेकिनो न कर्त्तृत्वाभि
मानः स्वतरामिति वक्तुमपिशब्दः आत्मनि कर्मरहिते कर्मारोपे दृष्टांत
माह नदीति एवमात्मनि कर्मारोपमुपपाद्य प्रथमपादं व्याचष्टे अत इ
ति आरोपवशादात्मनिष्ठत्वेन कर्मणां सर्वलोकप्रसिद्धे कर्माभावं यः
पश्येत्स बुद्धिमानिति संबंधः अकर्मदर्शनस्य यथाभूतत्वसमर्थकत्वं त

अदृष्टांतमाह गत्यभावमिवेति द्वितीयपादं व्याकरोति अकर्मणि चेति
अध्यारोपमभिनयति तूष्णीमिति अकर्मणि कर्मदर्शने युक्तिमाह अहं
कारेति पूर्वार्द्धेनोक्तमनूद्योत्तरार्द्धं विभजते य एवमिति आत्मनिका-
र्यकरणसंघातसमारोपद्वारेण तद्व्यापारमात्रे कर्मणि शुक्तिकायामि
व रजतमारोपिते विषये तदभावमकर्म वस्तुतो यो रजताभाववदनुभ
वति अकर्मणि च संघातव्यापारोपरमे तद्द्वारा स्वात्मन्यहं तूष्णीमासे सुख ६५
मित्यारोपिते गोचरे कर्माहंकारहेतुकं यस्तत्त्वतो मन्यते स दृश्यतदभाव
विभागहीनशुक्तिमात्रवदात्ममात्रं कर्मतदभावविभागशून्यं कूटस्थं
परमार्थतोऽवगच्छन् बुद्धिमानित्यादिस्तुतियोग्यतां गच्छतीत्येवं स्वाभि
प्रायेण श्लोकं व्याख्याय वृत्तिकारव्याख्यानमुत्थापयति अयमिति
अन्यथा व्याख्यानमेव प्रश्नद्वारा प्रकटयति कथमित्यादिना ईश्वरार्थे
नानुष्ठाने फलाभाववचनं व्याहतमिति मत्वाह किलेति नित्यानामक-
र्मत्वमप्रसिद्धमित्याशंक्य फलराहित्यगुणयोगात्तेषु कर्मत्वव्यवहारः सि
ध्यतीत्याह गौणेति नित्यानामकरणमुख्यवृत्त्यैवाशब्दकर्मवाच्यमि-
त्याह तेषां चेति तत्र कर्मशब्दस्य प्रत्यवायाख्यफलहेतुत्वगुणयोगात्
गौणप्रवृत्त्या प्रवृत्तिरित्याह तच्चेति पातनिकामेवं कृत्वा श्लोकाक्ष-
राणि व्याचष्टे तत्रेत्यादिना अकर्मणि चेत्यादि व्याकरोति तथेति स बुद्धि
मानित्यादि पूर्ववत् परकीयव्याख्यानं दूषयति नैतदिति नित्यक-
र्माकर्मनित्याकरणं कर्मेति ज्ञानात् दुरितनिवृत्त्यनुपपत्तेर्भगवद्वचनं
वृत्तिकारमतेनाघितं स्यादित्यर्थः कर्मणा पापमपनुदतीति श्रुतेर्नित्या
नुष्ठानात् दुरितनिबर्हणप्रसिद्धेस्तदनुष्ठानस्य फलान्तराभावात्तदक
र्मेति ज्ञात्वानुष्ठाने क्रियमाणे कथमशुभक्षयो नेति शंकते कथमिति
देवत्रेसस्वरज्ञानाद्विशुद्धिः परमा मतेति स्मरणात् कर्मणान्यथेति काशु
भक्षयाभावव्यंगीकृत्य परिहरति नित्यानामिति नित्यानुष्ठानादशुभ
क्षयेपि नास्मिन् प्रकरणे तद्विवक्षितं यज्ज्ञात्वा मोक्ष्यसेऽशुभादिति ज्ञाना
दशुभक्षयस्य प्रतिज्ञातत्वान्न च तज्ज्ञानफलाभावविषयमेष्टव्यमि-
त्याह न त्विति अशुभस्य फलाभावाज्ज्ञानकार्यत्वाभावात् न फलाभाव
ज्ञानादक्षयः सिध्यतीत्यर्थः किं चातीन्द्रियोऽर्थः शास्त्रान्निश्चीयते न चानि

त्यकर्मणां फलाभावज्ञानादशुभनिवृत्तिरित्यत्र शास्त्रमस्तीत्याह न
हीति नित्याकरणं कर्मेति ज्ञानमपि नाशुभनिवृत्तिफलत्वेन चोदित
मस्तीत्याह नित्यकर्मेति भगवद्वचनमेवात्र प्रमाणमित्याशंक्याह
नचेति साधारणमेव यत्ज्ञात्वेत्यादिभगवतो वचनं नतु नित्यानां फ
लाभावं ज्ञात्वेति विशेषविषयमित्यर्थः अशुभमोक्षणासंभवप्रदर्शने
न कर्मण्यकर्मदर्शननिराकरणन्यायेनाकर्मणि कर्मदर्शनं निराकरो
ति एतेनेति नामादिषु फलाय ब्रह्मदृष्टिवदकर्मण्यपि फलार्थं कर्मदृ
ष्टिविधानाच्चाशुभमोक्षणानुपपत्तिरित्याशंक्याह नहीति अत्रहि श्लो
के नित्यस्य कर्तव्यतामात्रे परमते विवादितं मतश्चाकर्मणि कर्मदर्शनं
विधीयते तत्फलायेति कल्पनापरस्य सिद्धांतविरुद्धेत्याह नित्यस्यापि
ति परमतेपि नित्यस्य कर्त्तव्यमात्रमस्माकेन विवादितं किंतु नित्या
नुष्ठाने प्रवृत्तिसिद्ध्यर्थं नित्याकरणात् प्रत्यवायो भवतीति ज्ञानमपि
कर्त्तव्यत्वेनात्र विवादितमेवेत्याशंक्याह नचेति न तावत्प्रवृत्तिरस्या वि
ज्ञानस्य फलं नियोगादेव तदुपपत्तेर्नापि फलांतरमनुपलंभादतोऽफ
लत्वादकरणात् प्रत्यवायो भवतीति ज्ञानं नात्र कर्त्तव्यत्वेन विवादित
मित्यर्थः किंचाकरणे कर्मदृष्टिविधावकरणस्यालंबनत्वेन प्रधान
त्वात् ज्ञेयत्वं वक्तव्यं तच्च तत्तुच्छत्वादनुपपन्नमित्याह नापीति अकरण
स्यासतो नामादिवदाश्रयत्वेन दर्शनासंभवेपि सामानाधिकरण्येनेदं
रजतमितिवद्दर्शनं भविष्यतीत्याशंक्याह नापि कर्मेति आदिशब्देन स
र्वात्कर्मादि गृह्यते फलतत्त्वस्तुतिर्वा सम्यग्ज्ञानस्य युक्तेन मिथ्याज्ञानस्या
नुपपत्तेरित्यर्थः स्वप्ने मिथ्याज्ञानमपि फलवदुपलब्धमित्याशंक्य मि
थ्याज्ञानस्याशुभाविरोधित्वान्न तस्मात्तन्निवृत्तिरित्याह मिथ्याज्ञानमे
वेति अशुभादेवाशुभानिवृत्तौ दृष्टांतेनाह नहीति अविवेकपूर्वकमि
दं रजतमिति सदसतोः सामानाधिकरण्यान्मिथ्याज्ञानं युक्तं कर्माकर्म
णोस्तु विवेकेन भासतोः सामानाधिकरण्याधीनं ज्ञानं सिंहदेवदत्तयो
रिव गौणं न मिथ्याज्ञानमिति शंकते नन्विति कर्माकर्मेति दर्शने फ
लाभावो गुणः अकर्म कर्मेति दर्शने तु फलाभावो गुणस्तन्निमित्तमि
दं ज्ञानं गौणमित्याह फलेति यथोक्तज्ञानस्य गौणत्वेपि प्रामाणिक

फलाभावापन्नतज्ञौणतोचितेति दूषयतिनेत्यादिना कर्माकर्मेत्या॰
दिगौणविज्ञानोपन्यासव्याजेननित्यकर्मकर्त्तव्यतया विवक्षितत्वा॰
ज्ञौणज्ञानस्याफलत्वमदूषणमित्याशंक्याह नापीति ज्ञानादशुभ
मोक्षणस्योक्तत्वस्यहानिरुक्तस्यनित्यानुष्ठानस्यकल्पनेत्यनेनव्यापा
रगौरवेणनकश्चिद्विशेषःसिध्यतीत्यर्थः उक्तमेवप्रपंचयतिस्वशब्दे
नेति नरकपातःस्यादतोविधेरेवानुष्ठेयानितानीतिशेषः यथोक्तवाच
कशब्दप्रयोगादेवापेक्षितार्थसिद्धिसंभवेभगवतोव्याजवचनकल्प॰
नमनुचितमित्याह तत्रेति प्रकृतेश्लोकेवृत्तिकृतांव्याख्यानेनपरमा॰
प्तस्यैवभगवतोविप्रलंभकत्वमापादितमिति तदीयंव्याख्यानमुपेक्ष
तव्यमितिफलितमाह तत्रैवमिति नित्यकर्मानुष्ठानसिद्ध्यर्थंव्याजरूप
मितिभगवद्वचनमुचितमित्याशंक्यस्वशब्देनापीत्यादिनाउक्तपरिपा
ट्यापि तदनुष्ठानबोधनसंभवान्नैवमित्याहनचैतदिति वस्तुशब्देननि
त्यकर्मानुष्ठानमुच्यते यथात्मप्रतिपादनंसुबोधत्वसिंध्यर्थंपौनःपुण्ये द्ध
नक्रियतेतथानित्यानामपिकर्मणामनुष्ठानंकर्मण्यकर्मेत्यादि शब्दा
न्तरेणोच्यमानंसुबोधंस्यादितिभगवतःशब्दान्तरयुक्तमित्याशंक्यतस्य
नित्यानुष्ठानवाचकत्वाभावान्नैवमित्याह नापीति किंचपूर्वमेवनित्या
नुष्ठानस्यस्पष्टमुपदिष्टत्वान्नतस्यसुबोधनार्थं शब्दान्तरमपेक्षितमित्याह
कर्मण्येवेति कर्माकर्मादिविज्ञानव्याजेननित्यकर्मानुष्ठानकर्त्तव्यतायां
तात्पर्यमित्येतन्निराकृत्यकर्माकर्मादिदर्शनेगौणमितिपक्षेदूषणान्तर
माह सर्वत्रचेति लोकेवेदेचयथाप्रशस्तेदेवतादितत्त्वेयच्चकर्त्तव्यमनुष्ठा
नादिहमग्निहोत्रादि तदेवबोद्धव्यमित्युच्यतेननिष्फलंकाकदंतादिकर्म
ण्यकर्मदर्शनंअकर्मणिचकर्मदर्शनं गौणत्वादेवाप्रशस्तमकर्त्तव्यंच
नातस्तद्बोद्धव्यमितिवचनमर्हतीत्यर्थः किंचकर्मादेर्मायामात्रत्वाद्गौण
मपितद्विषयंज्ञानंमिथ्याज्ञानमितिनतस्यबोद्धव्यत्वसिद्धिरित्याह नचेति
मिथ्याज्ञानस्यबोद्धव्यत्वाभावेपितद्विषयस्यबोद्धव्यतासिध्येदित्याशंक्य द्ध
वस्तुभासत्वान्नैवमित्याहनचसतुपस्थापितंचेति यत्पुनरकरणस्य प्र॰
त्यवायहेतुत्वंअकरणेगौणमाहुत्याकर्मशब्दप्रयोगेनिमित्तमिति तद्दूषय
ति नापीति अकरणात्प्रत्यवायोभवतीत्यत्रश्रुतिस्मृतिविरोधमभिधाय

युक्तिविरोधमभिदधाति असतइति असतः सद्रूपेणाभवनमभवनंच
निःस्वरूपत्वादनुपपन्नं निरस्तसमस्ततत्वस्यकिंचित्तत्वाभ्युपगमेसर्वप्र
माणानामप्रामाण्यप्रसंगादित्याहतच्चेति यत्तुनित्यानांफलराहित्यं
तत्राकर्मशब्दप्रयोगेनिमित्तमितितन्निरस्यतिनचेति नकेवलंविशुद्धे
श्वरफलाभावान्नित्यानां विध्यनुपपत्तिरपितथात्वर्थस्यक्लेशात्मक
त्वात्तत्रश्रुतफलाभावेनैवविधिरवकाशमासादयेदित्याह दुःखेति
दुःखरूपस्यापिधात्वर्थस्यसाध्यत्वेनकार्यत्वात्तद्विषयोविधिःस्यादिति
चेन्नेत्याह दुःखस्यचेतिस्वर्गादिफलाभावेपिनित्यानामकरणनिमित्त
निरयनिवासार्थंदुःखरूपाणामपिस्यादनुष्ठेयत्वमित्याशंक्याह तदक
रणेचेति फलांतराभावेपिमोक्षसाधनत्वात्मुमुक्षुणा नित्यानिक
र्माणि अनुष्ठेयानीत्याशंक्याह स्वाभ्युपगमेति हतिकारव्याख्याना
संभवेफलितमुपसंहरति तस्मादितिकोसौयथाश्रुतोर्थःश्लोकस्येत्या
शंक्याह तथाचेति १८

स्वामिकृतटीका

तदेवंकर्मादीनांदुर्विज्ञेयंतत्वंदर्शयन्नाह कर्मण्यकर्मेति परमेश्वरारा
धनलक्षणेकर्मणिविषयेअकर्मकर्मेदंनभवतीतियःपश्येत् तस्यज्ञाना
हेतुत्वेनबंधकत्वाभावात् अकर्मणिचविहिताकरणेकर्मयःपश्येत्प्रत्य
वायापादकत्वेनबंधहेतुत्वात् मनुष्येषुकर्मकुर्वाणेषुसबुद्धिमान्व्यव
सायात्मिकाबुद्धिमत्वाच्छ्रेष्ठः तेस्तोतिसयुक्तःयोगीतेनकर्मणाज्ञानयो
गाप्तेः सएवकृत्स्नकर्मकर्ताचसर्वतःसंप्लुतोदकस्थानीयेतस्मिन्कर्म
णिसर्वकर्मफलानामंतर्भूतत्वात् तदेवमारुरुक्षोःकर्मयोगाधिकार
अवस्थायांनकर्मणामनारंभादित्यादिनोक्तएवकर्मयोगःस्फुटीकृतःत
त्प्रपंचरूपत्वाच्चास्यपौनरुक्त्यदोषःअनेनैवयोगारूढावस्थायांयस्त्वा
त्मरतिरेवस्यादित्यादिनायःकर्मानुपयोगउक्तस्तस्याप्यर्थात्प्रपंचःकृतो
वेदितव्यः यदाआरुरुक्षोरपिकर्मबंधकंनभवतितदाआरूढस्यकुतो
बंधकंस्यादित्यत्रापिश्लोकोयोज्यतेकर्मणिदेहेंद्रियादिव्यापारेवर्तमाने
प्यात्मनोदेहादिव्यतिरेकानुभवेनाकर्मस्वाभाविकंनैष्कर्म्यमेवयःपश्ये
त्तथाकर्मणिचज्ञानरहितेदुःखबुद्ध्याकर्मत्यागेकर्मयःपश्येत्तस्यप्र

त्तिबंधकत्वेन मिथ्याचारत्वात् तदुक्तं कर्मेंद्रियाणि संयम्य य आस्ते म-
नसा स्मरन्निति य एवंभूतः स तु सर्वेषु मनुष्येषु बुद्धिमान् पंडितः तत्र हेतु
यतः कृत्स्नानि सर्वाणि यदृच्छया प्राप्तान्याहारादीनि कर्माणि कुर्वन्न-
पि स युक्त एव अकर्त्रात्मज्ञानेन समाधिस्थ एवेत्यर्थः अनेनैव ज्ञानिनः
स्वभावादापन्नं कलंजभक्षणादिकं न दोषः अज्ञस्य रागतः कृतं दोष इति
विकर्मणोपि तत्त्वं निरूपितं द्रष्टव्यं कर्मण्यकर्म यः पश्येत् इतिश्लोकार्धा-
भ्यां यदुक्तं अर्थद्वयं तदेव स्पष्टयति १८

पिशाचभाष्यं

इदानीं कर्माकर्मविकर्मणां बोधयंतं रूपं दर्शयितुमाह कर्मणीति क-
र्मणि शरीरेंद्रियव्यापारलक्षणे कर्मण्यकर्म नित्यसिद्धत्वात् आत्मस्वरू-
पं द्रष्टव्यमिति शेषः यथा मरीच्युदके उदकस्य स्वरूपभूता मरीचयस्तद-
भावे उदकस्य नैरात्म्यप्रसंगादेवं कर्मणि अकर्त्रात्मस्वरूपमस्ति तथा अ-
कर्मके वस्तुनि निश्चले कर्मस्वरूपं द्रष्टव्यं यथा नाविस्थितस्य निश्चलेत-
टनगे भ्रमेन कर्मदर्शनं मत एव यः कर्मणि अकर्मरूपं अकर्मणि कर्मरू-
पं पश्यति स मनुष्येष्वधिकारिषु पुरुषेषु बुद्धिमान् स च युक्तो योगी स च
कृत्स्नकर्मकृत्स्न सर्वकर्मकृदित्यर्थः तस्मात्त्वमपि कर्माकर्मणोर्यथा-
वत्स्वरूपपरिज्ञानेन कर्माणि कुर्वित्यर्थः १८

रामानुजभाष्यं

कर्माकर्मणोर्बोद्धव्यमाह कर्मणीति अकर्मशब्देनात्र कर्मेतरत्प्रस्तुत-
मात्मज्ञानमुच्यते कर्मणि क्रियमाण एवात्मज्ञानं यः पश्येत् अकर्म-
णि चात्मज्ञाने वर्तमान एव यः कर्म पश्येत् किमुक्तं भवति क्रियमाणमे-
व कर्मात्मयाथात्म्यानुसंधानेन ज्ञानाकारं यः पश्येत् तच्च ज्ञानं कर्मण्यनु-
मननतया कर्माकारं यः पश्येदित्युक्तं भवति क्रियमाणे हि कर्मण्यकर्तृभू-
तात्मयाथात्म्यानुसंधानेन तदुभयं संपन्नं भवति एवमात्मनो याथा-
त्म्यानुसंधानगर्भं कर्म यः पश्येत् स बुद्धिमान् कृत्स्नशास्त्रार्थवित् मनुष्ये-
षु युक्तो मोक्षार्हः स एव कृत्स्नकर्मकृत् कृत्स्नशास्त्रार्थकृत् १८

८५

अभिनवगुप्तकृतटीका

उभेवोद्बोधयितुमाह कर्मणीति आत्मीयेषु कर्मसु यः अकर्तृत्वादकर्मत्वं
पश्यति प्रशांततया अकर्मसु च परकृतेषात्मकृतत्वं जानाति परिपूर्णो-
दितस्वरूपत्वेन स एव सर्वस्य मध्ये बुद्धिमान् कार्त्स्न्येन साकल्येनासौ कर्म क
रोति अतोस्य केन कर्मणा फलं दीयतामित्युदितदशायां प्रशांतत्वेन कृत्स्ना
नि कर्माणि कृंतति छिनत्ति अतः सर्वमेव करोति न किंचिद्वा करोतीत्युपनि
षत् कर्माणि देहेंद्रियक्रियायामकर्म स्वात्मनि निष्क्रियत्वं श्रोत्रादीनि शब्दा-
दिषु वर्त्तंते वागादीनि वचनादानादौ मम किमायातमित्येवंलक्षणं यः पश्येत्
अकर्मणि च परैः प्रमातृभिः कृते कर्मणि पूजादौ कर्मक्रियां जानाति एते कर्त्तार
स्सर्वेहमेवेति दृष्ट्या पूजकेर विभेदेन सदा पूजेति पूजनमिति सिद्धाभाषाप्रमाणा
त् स एव मनुष्येषु सामान्यजनेषु मध्ये बुद्धिमान् देहेंद्रियादिष्वपि कर्तृत्वदर्शि
नादात्मनि निष्क्रियत्वदर्शनाच्च स एव कृत्स्नकर्मकृत् कर्त्रंतरेषु स्वरूपदृष्टव्य
वसायात् पूजनान्नास्ति मे तृप्तिर्नास्ति खेदोस्य पूजनात् पूजकेर विभेदेन सदा पू
जेति पूजनमिति सोमानंदपादाः ननु परकृते कर्मणि कथं स्वकीयकर्मदर्शने
न ह्यन्यकृतभोजनेन स्वकृतभोजनाकांक्षापगमः तस्मादकर्मणि च कर्म यः प
श्येदिति कथमिति चेत् ज्ञानिन एवंविधानुसंधानादिति भ्रमः यतो निष्पन्न-
निष्कंपविज्ञानशालिनः प्रमेयांतरप्रमात्रंतरज्ञानं तद्बहुविषयमनुसंधानमस्ति
यथा य एवाहं घटादीन्वेद्मि स एव पटादीन् एवं चैत्रमैत्रादिप्रमात्रंतरविषय
मनुसंधानं ज्ञेयं अत एव सिद्धपादैरपि पूजकेर विभेदश्चनुपदिष्टं तस्मात्स्व-
कृतं अकर्मणि चेति १८

परमार्थप्रपाटीका

अथैतदेव वि॰ ब्याह कर्मणीति वेदविहिते कर्मणि यः अकर्म नैष्कर्म्यं पश्येत् त
था अकर्मणि नैष्कर्म्यनिमित्तभूते कर्मैव पश्येत् एवमित्थः कार्यकारणरू
पत्वं पश्येत् स एव व्यवसायात्मिकबुद्धिमान् स एव कृत्स्नकर्मकृत् मुक्तो सर्व
कर्मफलानामंतर्भूतत्वात् अत्र फलितार्थस्तु अज्ञानभूमिके कर्मविमुक्त
मपि कारणं विकर्माकर्मणोर्ज्ञेयं मिथ्यासत्यत्वरूपयोः नौकारोहणकर्म-
१८ णा सरिदितिर्क्तं नेपुरस्तीगेहृते धावनमीततेन टगतो भूयो भवत्यन्यथा
तत्राकर्मणि कर्मकारणमिति [illegible] प्रायो मतः प्रत्ययस्तस्मात्स्वीयडुनायकेन

गदितंकर्मण्यकर्मेतिच २ यद्वानीयमानेघटेगेहाज्जलाहरणाहेतवेतदाह
तंनभस्तेनसहयातीतिभासतइति यद्वा हृदस्तंभितनौकास्थो वृक्षंस्था
वरमीक्षते मुक्तनौकास्थितोमर्त्योधावंतमनुपश्यतिपरपारस्थकस्मांश्चिव
हुचेताःप्रपश्यति स्थावरंविश्वमस्मात्मुक्तंधावन्प्रपश्यति १८

वनमालीटीका

कीदृशंतर्हिकर्मादितत्वंतदाहकर्मणीतियोविहितेकर्मणिक्रियमाणेत
र्यामिप्रेरितदेहेंद्रियादौकर्मभवति अहंनिर्विकारःस्वतोवर्तीयथादेहादि
कमीश्वरप्रेरितंकर्मणिप्रवृत्तंतथाहमपिनमदीयमिदंकर्मकिंत्वीश्वरीयंत
स्यैवपूजारूपंचेत्यकर्मस्वस्यकर्माभावंपश्येत् अकर्मणिकर्मविहायतू
ष्णींभावेमदीयंकर्ममयात्यक्तमकर्मणिहितिष्ठामीत्यभिमानरूपंकर्मयःपश्ये
तयथासकामंकर्मसंसृतिदंतथादेहतत्कर्मादावहंममेत्यभिमानोपिसं
सृतिदइतिकर्मपदेनोच्यते कर्तृत्वाभिमानेसत्यसतिचविकर्मनिषिद्धकर्म
त्याज्यंतच्चैवपश्यतीसोपिचशब्देनसूचितमनुष्येषुशास्त्राधिकारिषुसमो
त्तमोपयुक्तबुद्धिमान् सएवयुक्तःशास्त्रविचारवान् सएवमत्प्रसादहेतुमा
दायपरोक्तप्रयोजककृत्स्नकर्मकृत् स्वस्यकर्तृत्वाभिमानराहित्येननिःकामंभ
गवदाराधनरूपंकर्मतनोतिःकरणशुद्धिद्वाराऽविच्छिन्नस्नेहसंततिपूर्वं
केसर्वोत्तमत्वेनानंतगुणालयस्यहरेःपरोक्षंतन्महाप्रसादंततःस्वस्वरूपाने
दाविर्भावरूपामुक्तिरितिभावः १८

कुसुमवैजयंतीटीका

नत्रकर्माकर्मणोःस्वरूपंकेनप्रकारेणबोद्धमस्तीत्यपेक्षायांतत्प्रकारमाह
कर्मण्यकर्मेति योविद्वानकर्मणिक्रियमाणएवकर्मणिअकर्मकर्मेतरमा
त्मज्ञानंपश्येत् योकर्मणिकर्मान्यस्मिन्नात्मज्ञानेवर्तमानेकर्मानुष्ठीयमा
नंपश्येत् अयमर्थःयेनचकारणशुद्धयेऽनुष्ठीयमानेकर्मात्मज्ञानानुसंधिक
गर्भकत्वेनज्ञानाकारंपश्येत् तंज्ञानमपिकर्मानुगतत्वेनज्ञानाकारंपश्येत्
कर्मण्यनुष्ठीयमानेसतियत्कर्तृरूपात्मस्वरूपानुसंधानस्यांतर्हिउभयोरे
वकर्मज्ञानयोरेकात्मविषयत्वेनैकमेवफलंभवतीत्यतोद्वयोरेकरूपत्व
मेववक्ष्यतेचसांख्ययोगौपृथग्बालाःप्रवदंतिनपंडिताइतिसमग्रदुर्म

गी॰
टी॰
व॰

मनुष्येषु मोक्षोपायपरिशीलेषु बुद्धिमान् व्यवसायात्मिकाधीमान् स एव यु-
क्तः ज्ञानसमन्वितः स एव च कृत्स्नकर्मकृत् निखिलकर्मकर्त्ता भवति स एव
विचारवान् स एव ज्ञानवान् स एव कर्मवान् स एव मोक्षभागी भवतीत्यर्थः १८
कीदृशं तर्हि कर्मादीनां मधुसूदनीटीका तत्त्वमिति तदाह ॥
कर्मणि देहेन्द्रियादिव्यापारे विहिते प्रतिषिद्धे च अहं करोमीति धर्माध्यासे-
नात्मन्यारोपिते नौस्थेनाचलत्सु तटस्थवृक्षादिषु समारोपिते चलन इव
अकर्म आत्मस्वरूपालोचनेन वस्तुतः कर्माभावं तटस्थवृक्षादिष्विव यः पश्ये-
त्पश्यति तथा देहेन्द्रियादिषु त्रिगुणमायापरिणामत्वेन सर्वदा सव्यापारेषु
निर्व्यापारस्तूष्णीं सुखमास इत्यभिमानेन समारोपिते ऽकर्मणि व्यापारो-
पु॰ परमे दूरस्थचक्षुःसन्निकृष्टेषु पुरुषेषु गच्छत्स्वपि गमन इव सर्वदा सव्या-
पारे देहेन्द्रियादिस्वरूपपर्यालोचनेन वस्तुगत्या कर्म निरूप्यात्मप्रयत्नरूपं
व्यापारं यः पश्येत् उदाहृतपुरुषेषु गमनमिवौदासीन्यावस्थायामप्युदासी-
नोऽहमास इत्यभिमान एव कर्म एतादृशः परमार्थदर्शी स बुद्धिमानित्यादिना
बुद्धिमत्त्वयोगयुक्तत्वसर्वकर्मकृत्त्वैस्त्रिभिर्धर्मैः स्तूयते अत्र प्रथमपादेन
कर्मविकर्मणोः स्थाने कर्मशब्दः स्वविहितप्रतिषिद्धपरत्वात् द्वितीयपादे
त्त॰ न चाकर्मणोऽपि दर्शितमिति द्रष्टव्यं अत्र यत्त्वमन्यसे कर्मणो बंधहेतुत्वात्तू-
ष्णीमेव मया स्थातव्यमिति तन्न तथा सति कर्तृत्वाभिमाने विहितस्य
प्रतिषिद्धस्य वा कर्मणो बंधहेतुत्वाभावात् तथा च व्याख्यातं न मां कर्मा-
णि लिंपंतीत्यादिना सति च कर्तृत्वाभिमाने तूष्णीमहमास इत्यौदासीन्या-
भिमानात्मकं यत्कर्म तदपि बंधहेतुरेव वस्तुतत्त्वापरिज्ञानात् तस्मात्क-
र्मविकर्माकर्मणां तत्त्वमीदृशं ज्ञात्वा विकर्माकर्मणी परित्यज्य कर्तृत्वाभि-
हि॰ मानफलाभिसंधिहानेन विहितं कर्मैव कर्त्तव्यमित्यभिप्रायः अपरा व्याख्या कर्म-
णि ज्ञानकर्मणि दृश्ये जडे सद्रूपेण स्फुरणरूपेण चानुस्यूतं सर्वभ्रमाधिष्ठा-
नमकर्म अवेद्यं स्वप्रकाशचैतन्यं परमार्थदृष्ट्या यः पश्येत् तथाऽकर्मणि
च स्वप्रकाशे दृग्वस्तुनि कल्पितं कर्म दृश्यं मायामयं न परमार्थसद्दृग्दृश्य-
योः संबंधानुपपत्तेः यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति सर्वभूतेषु द्र
चात्मानं ततो न विजुगुप्सत इति श्रुतेः एवं परस्पराध्यासेऽपि शुद्धं वस्तु यः
पश्यति मनुष्येषु मध्ये स एव बुद्धिमान्नान्यः अस्य परमार्थदर्शित्वात् त्वा-

स्य चापरमार्थदर्शित्वात्सत्वशुद्धिसाधनयोगयुक्तः अंतःकरणशुद्ध्येका
ग्रचित्त अतः स एवांतःकरणशुद्धिसाधनकृत्स्नकर्मकृदिति वास्तवयथर्मे
वस्तूयते यस्मादेवं तस्मात्त्वमपि परमार्थदर्शी भव तावतैव कृत्स्नक
र्मकारित्वोपपत्तेरित्यभिप्रायः अतो यदुक्तं यज्ज्ञात्वा मोक्ष्यसेऽशुभादिति
यच्चोक्तं कर्मादीनां तत्त्वं वोद्धव्यमस्तीति स बुद्धिमानित्यादिस्तुतिश्च ता
त्सर्वं परमार्थदर्शने संगच्छते अन्यज्ज्ञानादशुभात्संसारान्मोक्षानुपपत्तेः
म४ अतत्त्वं चान्यद्बोद्धव्यमस्तीति न वा तज्ज्ञाने बुद्धिमत्त्वमिति युक्तैव परमा
र्थदर्शिनो व्याख्या यत्तु व्याख्यानं कर्मणि नित्ये परमेश्वरार्थेऽनुष्ठीयमाने
वंधहेतुत्वाभावादकर्मेदमिति यः पश्येत् तथाकर्मणि च नित्यकर्माकर
णे प्रत्यवायहेतुत्वेन कर्मेदमिति यः पश्येत् स बुद्धिमानित्यादि तदसंगत
मेव नित्यकर्मण्यकर्मेदमिति ज्ञानस्याशुभमोक्षहेतुत्वाभावात् मिथ्या
ज्ञानत्वेन तस्यैवाशुभहेतुत्वाच्च नचैतादृशं मिथ्याज्ञानं वोद्धव्यं तत्त्वं ना
प्येतादृशज्ञाने बुद्धिमत्त्वादिस्तुत्युपपत्तिर्भ्रांतत्वात् नित्यकर्मानुष्ठानं हि
स्वरूपेणांतःकरणशुद्धिद्वारोपयुज्यते न तत्राकर्मबुद्धिः क्वाप्युपयुज्यते
शास्त्रेणनामादिषुब्रह्मदृष्टिवदविहितत्वात् नापीदमेव वाक्यं तद्विधाय
कमुपक्रमादिविरोधस्योक्तेः एवं नित्यकर्माकरणमपि स्वरूपेणानित्यक
र्मविरुद्धकर्मलक्षकतयोपयुज्यते न तत्र कर्मदृष्टिः क्वाप्युपयुज्यते
नापि नित्यकर्माकरणात्प्रत्यवायः अभावात् अभावाद्भावस्योत्पत्त्ययो
गात् अन्यथा तदविशेषेण सर्वदा योत्पत्तिप्रसंगात् भावार्थाः कर्मशब्दा का४
स्तेभ्यः क्रियाप्रतीयेत एषोऽर्थो विधीयत इति न्यायेन भावार्थस्यैवापूर्व
जनकत्वात् अतिरात्रे षोडशिनं न गृह्णातीत्यादावपि संकल्पविशेषस्य
वापूर्वजनकत्वाभ्युपगमात् नेक्षेतोद्यंतमादित्यमित्याभिप्रजापतिव्रत
वत् अतो नित्यकर्मानुष्ठानार्हकाले तद्विरुद्धतयायदुपवेशनादिकर्म तदेव
नित्यकर्माकरणोपलक्षितं प्रत्यवायहेतुरिति वैदिकानां सिद्धांतः अतएव
वाऽकुर्वन्विहितं कर्मेत्यत्र लक्षणार्थे शतृ व्याख्यातः लक्षणहेत्वोः क्रिया
या इत्यविशेषस्मरणेऽप्यत्र हेतुत्वानुपपत्तेः तस्मात् मिथ्यादर्शनोपनोदस्य
स्तुतेन मिथ्यादर्शनव्याख्यानेन शोभते तरां नापि नित्यानुष्ठानपरमेतद्वाक्यं
नित्यानि कुर्यादित्यर्थे कर्मण्यकर्म यः पश्येदित्यादि तदवोधकं वाक्यं प्रयु

ज्ञानस्यभगवतःअतोकर्तृत्वापत्तेरित्यादिभाष्यएवविस्तरेणव्याख्यातंद्र
ष्टपरस्यते तदेवंपरमार्थदर्शिनःकर्तृत्वाभिमानाभावेनकर्मणिसमते
नपद्यते अतःकर्मसमाधिनैवेतेन १८

सदानंदीटीका

कीदृशंतर्हिकर्मादेस्तत्त्वमित्यत्रकथ्यते देहेंद्रियादिव्यापारेनिषिद्धेवि॰
हितेतथा १ कर्मण्यहंकरोमीतियमीथ्यासेप्रकल्पिते स्वात्मन्यसंगचि
द्रूपेनिरीहेनिष्क्रियेमले २ पश्यत्यकर्मयोवस्तुरूपासम्यग्विवेकतः
यथानौस्थनतीरस्थवृक्षेष्वविचलेष्वपि ३ कल्पितंचलनंतद्वक्रियेकर्म
कल्पितं अकर्त्रात्मविचारेणकर्माभावंचवस्तुतः ४ तीरस्थवृक्षेष्विव॰
यःपश्यत्यात्मस्वरूपवित् तथामायाविकारेषुसदादेहेंद्रियादिषु ५
सव्यापारेषुतद्धर्मस्तूष्णीमासेस्वत्वविति आरोपिताभिमानेनव्यापा
रेपरमाभिये ६ गच्छत्सुगमनेयद्वत्कल्पितंतत्तुपूरगैः सदादेहेंद्रिया॰
दीनांसव्यापारविचारणात् ७ यश्चकर्मनिहत्याचव्यापारंपरिपश्यति
उदासीनदशायामप्यहमासेस्ततादृशः ८ एवंरूपोभिमानोस्तिकर्मय
श्चेतिपश्यति एवंभूतसआत्मज्ञोबुद्धिमत्त्वादिभिर्गुणैः ९ स्तूयतेवासु
देवेनसम्यग्दर्शितयामुनिः अत्राद्यपादेसंप्रोक्तंतत्त्वंकर्मविकर्मणोः १०
विहितेप्रतिषिद्धेचकर्मशास्त्रप्रयोगतः अकर्मणोद्वितीयेनतत्त्वमत्रप्रद॰
र्शितं ११ सत्याकर्तृत्वबुद्धौहितूष्णीमासेहमित्यपि बंधहेतुरविद्यैवा॰
स्तुतत्त्वाविचारणात् तस्मात्त्वमीदृशंतत्त्वंकर्माकर्मविकर्मणां ज्ञात्वाक
र्मैवविहितंकुरुत्यक्तोभयंत्रिषु १३ यद्वाकर्मण्यदृश्येपिसिद्धेजडेहिज्ञान
कर्मणि सत्तास्फूर्त्यात्मनातत्त्वमनुस्यूतंसदद्वयं १४ भ्रमाधिष्ठानचेतन
न्यमकर्मावेद्यमानं परमार्थदर्शीवयःपश्यत्यद्वाविविक्तदृक् १५ तथा
कर्मणिदृग्वस्तुस्वप्रकाशेप्रकल्पितं कर्मदृश्यंमृषारूपंमायाकार्यंतदंरज
डे १६ दृग्दृश्ययोर्नसंबंधोविनाध्यासंभ्रमात्मकं अन्योन्याध्यासमावध्यय:
शुद्धंवस्तुपश्यति १७ सबुद्धिमान्मनुष्येषुतत्त्वदर्शितयोत्तमः सयुक्तो॰
योगफलभागीषुआसर्वकर्मकृत् १८ तस्मात्त्वमपियाथात्म्यंज्ञात्वास्त
त्योभवात्मनः इदमेवहिवोद्धव्यंतत्त्वंकर्मादिगोचरं १९ एवंज्ञानाद्विमुक्तः

स्यात्तं सारासारान्यवोधतः अत्र पद्येऽर्थीभिर्यत्कल्पितं स्वकपोलतः २०
वेडितं भाष्यकारैस्तद्व्याख्यानं वात्यसंगतं २१ १८

नीलकंठीटीका

यत्कर्मादेस्तत्वं वक्ष्यामीति प्रतिज्ञातं तदाह कर्मणीति कर्मणि कर्माक
र्मविकर्मात्मके देहेंद्रियादिव्यापारेऽविद्यया प्रत्यगात्मनि आरोपिते सति
तत्र अकर्म कर्माभावं नौस्थेन तीरस्थे चलने आरोपिते सति तत्त्वदृष्ट्या तत्र च
लनाभावमिव यः पश्येत् तथा चलं गुणवृत्तमिति न्यायेन त्रिगुणात्म
केषु देहेंद्रियादिषु नित्यकर्मवत्सु यश्च दूतारकादौ गत्यभावमिव तूष्णीं
भूतोऽहमस्मि न किंचित्करोमीत्यथास्ते अकर्मणि कर्माभावे कर्म तन्निग्रहा
ख्यप्रयत्नरूपं यः पश्यति स मनुष्येषु बुद्धिमान् तत्त्वदर्शी आत्मनि भ्रांतिज
नितव्यापारस्य अनात्मनि च तादृशनिर्व्यापारत्वस्य बाधात् स एव युक्तो यो
गी कृत्स्नकर्मकृच्च कर्मयोगफलस्य तत्त्वज्ञानस्य प्राप्तत्वादिति स्तौति मां च
आत्मनोऽकर्तृत्वं संघातस्यैव कर्तृत्वमिति भावयता कर्माणि कर्तव्यानी
त्यर्थः यद्यप्येतद्भूयः प्रपंचितं अव्यक्तोऽयमित्यादौ तथापि तत्त्वस्य दुर्ज्ञे
यत्वात् पुनः पुनरुच्यत इति प्रांचः यत्तु कर्मणि नित्ये परमेश्वरार्थे अनुष्ठीय
माने बंधहेतुत्वाभावादकर्मेदमिति यः पश्येत् तथाऽकर्मणि नित्यकर्माक
रणे प्रत्यवायहेतुत्वेन कर्मेदमिति च यः पश्येत् स बुद्धिमानिति तदसंगतमे
व नित्यकर्मणि अकर्मेदमिति ज्ञानस्याशुभमोक्षहेतुत्वाभावात् मिथ्या
ज्ञानत्वेन तस्यैवाशुभत्वाच्च नैवैतादृशं मिथ्याज्ञानं बोद्धव्यं तत्त्वेनाप्येता
दृशज्ञाने बुद्धिमत्त्वादिस्तुत्यनुपपत्तिरिति दिक् यत्तु कर्मणि ज्ञानकर्मणि
दृशे जडे सद्रूपेण स्फुरणरूपेण वानुस्यूतं सर्वभ्रमाधिष्ठानं अकर्म अवेद्यं स्व
प्रकाशं चैतन्यं परमार्थदृष्ट्या यः पश्येत् तथा अकर्मणि स्वप्रकाशे दृग्वस्तु
नि कल्पितं कर्म दृश्यं मायामयं न परमार्थसदिति यः पश्यति स बुद्धिमानि
ति परमार्थदर्शित्वाद्व्याख्यातैरेवगुणैः स्तूयत इत्यपि व्याचक्षुः तदप्यसंगत
मेव कर्म ऊरु कर्म प्रवक्ष्यामीत्यनुष्ठेयकर्मप्रस्तावे तत्त्वज्ञानावसरात् ना
पि कर्तुरीप्सिततमं कर्मेति पारिभाषिक्या कर्मसंज्ञया दृश्यस्य कर्मशब्दार्थ
त्वं ग्रहीतुं शक्यं तस्या वृद्धिरादिसंज्ञानामिवागमार्थनिर्णयानर्हत्वादिति
संक्षेपः वस्तुतस्तु कर्मणो हीति श्लोके कर्मविकर्माकर्मणां गतिशब्दितं

पर्यवसानं गहनत्वाद्बोधव्यमित्युपदिष्टं तद्व्याख्याने कर्मण्यकर्म यः प
श्येत्स मनुष्येषु बुद्धिमानिति तथाहि कर्मणां कर्माकर्मविकर्मरूपेणा
कर्मतद्वैपरीत्यं शास्त्रतो दृश्यते यथा कर्तुः कर्मणि श्रद्धाहीनस्य कृतो
प्यकृत एव भवतीत्यकर्मणि पर्यवस्यति दांभिकस्य तु विकर्मणि पर्य
वस्यति यथोक्तं अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् असदित्युच्यते
पार्थ न च तत्प्रेत्य नो इहेति चत्वारि कर्माण्यभयकराणि भयं प्रयच्छंत्यय
थाकृतानि मानाग्निहोत्रमुत मानमौनं मानेनाधीतमुत मानयज्ञ इति
च एवमौदासीन्यमकर्मापि शक्तस्यार्तपरित्राणाभावाद्धि कर्मणि पर्यव
स्यति दीक्षितस्य भगवत्ध्यानाद्यासक्तस्य वा स्वकाले पंचयज्ञादिकर वे
णादीक्षितो न ददातीत्यादिवचनात्सर्वधर्मान्परित्यज्येत्यादिवचनाच्चक
र्मण्येव पर्यवस्यति नित्यकर्मकाले प्रत्यवायहेतोरन्यस्याविहितस्याकर
णात् एवं विकर्मापि हिंसा अग्नीषोमीयं पशुमालभेतेति वचनाद्यज्ञे वक
र्मैव भवति सैव दृष्ट्वा नष्टे पशौ न कर्म विध्यर्थानिष्पत्तेः नापि विकर्म का
मकारेणाकृतत्वात् किंतु परिशेषात्कृताप्यकृतेवेत्यकर्मणि पर्यवस्य
ति एवं स्तेनप्रमोचने तत्समृध्यानां कर्मापि राज्ञो विकर्म स्तेनः प्रमुक्तो
राजनि पापं मार्ष्टीति वचनात् तदेव यतीनामुपलक्षणीयत्वात्कर्म ए
वं हिंसाफलके सत्यादौ दानफलके अनृतादौ च विकर्मत्वकर्मत्वे बोध्ये
तस्मात्कर्माकर्मविकर्माख्ये कर्मण्यकर्मतद्वैपरीत्यं यः पश्येत्स कार्या
कार्यविभागज्ञो वेदव्याख्यानामेषां प्रबोधात्तु बुद्धिमानित्युच्यते तथा किंक
र्मेति श्लोके यत्र कवीनामपि मोहोऽस्ति ययोश्च ज्ञानमशुभमोक्षहेतुः ते
कर्माकर्मणी प्रवक्ष्यामीत्युपदिष्टं तद्व्याख्यानमकर्मणि च कर्म यः पश्ये
त्स युक्त इति चकारो दर्शनद्वयसमुच्चयार्थः तेनयोर्बुद्धिमान्युक्तश्च सप
वकृत्स्नकर्मकृत् न त्वेकैकदृगपि ज्ञेयं तथाहि अकर्मणि स्पंदशून्ये कू
टस्थे वस्तुनि कर्म सस्पंदं बाह्यं वियदादि आभ्यंतरं प्रमात्रादिकं चाधारा
धेयभावेन वा उपादानोपादेयभावेन वा अधिष्ठानाध्यस्तभावेन वा पश्यं
तः शास्त्रविदः कर्माणि कुर्वंति तत्राद्यः सांख्यः असंगमपि संघातधर्मा
एव सन् कर्त्रादिरविवेकात्स्फटिके लौहित्यमिव भातीति मन्यते द्वितीय
स्तु कनककुंडलवत् ब्रह्माहं सर्वं ब्रह्मैवेति कर्म तत्साधनादिकं अहं

चब्रह्मैवेतिभावयन्करोति एतौ युक्तावप्यतिबुद्धिमानप्ययुक्तः करोति
तस्य सर्वं ब्रह्मैव भवति न त्वशुभमोक्षाय यो वा एतदक्षरं गार्ग्यविदित्वा
स्मिन्लोके यजति ददाति तपस्तप्यतेपि बहूनि वर्षसहस्राण्यन्तवदेवास्य
तद्भवतीति श्रुतेः यस्त्वयुक्तोपि निर्बुद्धित्वादकार्यमपि करोति स प्रत्यवै
ति पापाश्लेषनिमित्तस्यापरोक्षज्ञानस्याभावात् अनयोश्चाविद्याविद्याश
ब्दितयोः कर्मपरोक्षज्ञानयोः समुच्चयः श्रूयते विद्यां चाविद्यां चेति मंत्रे य
द्वा द्विविधं कर्मणोकर्मदर्शनं परोक्षमपरोक्षं च तत्रायथावत्ज्ञानकर्मस
मुच्चयात्र बुद्धिमानुच्यते अपरोक्षमपि द्विविधं उपास्यसाक्षात्कार
रूपं तत्त्वसाक्षात्काररूपं च तत्रायमपि व्याकृताव्याकृतरूपोपास्यभेदेन द्वि
विधं तत्रापि व्याकृतं सूत्रं कार्यं तद्दर्शी विगतदेहाहंकारत्वात् योगशास्त्रे वि
देह उच्यते अव्याकृतं कारणं तद्दर्शी प्रकृतिलय उच्यते अनयोरुपासनयोः
संभवासंभवसंज्ञयोः समुच्चयो विधीयते अन्यदेवाहुः संभवादित्यादिना
सोयं युक्त इत्युच्यते अस्याप्यग्रे कर्तव्यमवशिष्टमस्तीति नायमपि कृत्स्न
कर्मकृत् किं तु यस्य कर्मबाधेनाकर्मदर्शनं मुख्यमस्ति स एव कृतकृत्य
त्वान्मुख्यः कृत्स्नकर्मकृदिति एतेषायो मनुष्येषु देहाभिमानिषु बु
द्धिमानित्युक्तं तद्दर्शिवादकविरेव मध्यमोक्तं तद्दर्शिनावपि तत्त्वविषये
मूढत्वात्कवयोप्यत्र मोहिता इत्युक्तौ एतयोर्व्यवधानेनाशुभान्मुक्तिः
उत्तमस्तु जीवन्नेवाशुभान्मुक्त इति श्लोकार्थः प्रतिभाति व्याख्यातृणाप
मेनास्ति भाष्यकारेण तल्पता गुहावद्योतिनोप्यस्ति किं दीपस्यार्कंत
ल्पता यद्वा कर्माकर्मणी वक्तव्यत्वेन बोद्धव्यत्वेन चोपक्षिप्यात्र तयोर्ल
क्षणप्रदर्शनमुचितं अतो यदकर्मणा विशेषितं तदेव कर्मत्वान्मादिति
कर्मलक्षणं यच्च कर्मणा विशेषितं तदेवाकर्मेत्यकर्मलक्षणमिति व्या
ख्येयं अक्षरार्थस्तु कर्म यज्ञादिकं स्वसाधनं तत्राकर्म सदपूर्वं कूटस्थं
ब्रह्म यः पश्येत् कर्म तदंगेषु ब्रह्मदृष्टिमध्यस्येत् अहं क्रतुरहं यज्ञः स्व
धाहमहमौषधं मंत्रोहमहमेवाज्यमहमग्निरहं हुतमित्युक्तप्रकारेण
अन्यथा यत्कृतं तद्वृथा चेष्टारूपमेवातो गहना कर्मणो गतिः किं तदक
र्म यत्कर्मण्यपश्यत इत्याकांक्षायां यत्रैतत्कर्म पुण्यपापात्मकं दृश्यते
पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति तत्फलं च सुखदुःखादिकं

अहंसुखीअहंदुःखीनिमप्रत्यकूचेतनोऽकर्म तत्रैवेदंकर्मअस्पंदेस्पंदा
त्मकमसर्पेसर्पइवाध्यस्तमितियःपश्येदिति अयंभावःयथारज्ज्वामध्य
स्तंसर्पंपश्यन्नायंसर्पोरज्जुरियमितिवाक्यात्तस्यरज्जुत्वविदितप्राबल्या
दप्रतिपद्यमानोनरःसर्पमिमंरज्जुदृष्ट्योपास्स्वेतिनियोज्यते सचोपासना
दार्ढ्येसर्पंविस्मृत्यरज्जुतत्वमेवविंदति यस्तुवाक्यादेवरज्जुतत्वंविंदति
नतस्यप्रत्ययावृत्तिलक्षणायाउपास्त्याप्रयोजनमस्ति एवमकर्मण्यध्य॰
स्तकर्त्रादितत्वमसीतिवाक्याद्यथावत्ऽकर्मप्रतिपत्तिर्भवतिशुद्धसत्व
स्यअन्यस्यतुकर्त्रादीनेवाकर्मदृष्ट्याउपासीनस्यभावनादार्ढ्यात्कर्त्रादि
रूपतिरोधानेनाकर्मतत्वप्रतिपत्तिरिति यद्वाकर्मणीवअकर्मण्यपिवि
कर्मसाहितेअकर्मदृष्टिर्माभूदित्याशंक्याह कर्मणीति विहिताकरणे॰
प्रतिषिद्धाचरणेचकर्मदृष्टिरेवभवेत् अकर्मतोबिभ्यत्कर्मब्रह्मदृष्ट्या
कुर्यान्नत्वकर्मापितादृशदृष्ट्याकुर्यादित्यर्थः १८

आनंदी टीका

बोद्धव्यप्रकारमेवाह क्रिययाप्राप्तुमिष्टंकर्मकर्मणीस्वजातिविहि
तेनियतेवश्यकरणीयेअकर्मनित्यनैमित्तिकयोरभेदेनफलाग्रहणा
म दबंधकत्वंयःपश्येद्विचारयेत् एवंकर्मणिविपरीतेनिषिद्धेकर्मणिक कर्मणि
मबंधकत्वंयःपश्येत् तथैवाकर्मणिविहितनिषिद्धाभ्यामितरस्मिन्का
म्येकर्मणिकर्मस्वभावंबंधकत्वंयःपश्येत् एवमकर्मणिकर्मणामक॰
रणेसंन्यासेकर्मप्रत्यवायफलदत्वंयःपश्येत्समनुष्याणांमध्येबुद्धिमा
न् ज्ञानवानुक्तःसचकृत्स्नस्यसंपूर्णपुरुषार्थसाधकस्यकर्मणःसंपा
दकउक्तः तथाचविस्तीर्यलिखितमुपोद्घाते अविद्ययामृत्युंतीर्त्वेत्या
दिश्रुतिषु विहिताकरणात्तुभिरित्यादिस्मृतिषु तथायानिकर्माणि
काम्यानिप्रतिषिद्धानियानिपितानिबंधनत्पकुर्वंतेनित्यनैमित्तिका॰
न्यपीतिवैशेषिकप्रमाणोपपत्तेः १८

रामकंठीटीका

साचयथाऽवधार्यते तथाप्रतिपादयितुमाह ॥
यथोक्तज्ञाननिष्ठतयानुष्ठीयमानेशास्त्रचोदितस्वव्यापारेयस्तत्ववित् अ॰

कर्मकर्माभावं संसारबंधलक्षणकर्मकार्याकारणत्वेप्यश्नव·
त्पश्यति तथाकर्मणियथाविहितकर्मप्रतिषेधेश्वर्वाक्योपपत्त्यारा
गादिदोषानुषंगस्यदुरुच्छेदत्वात् बंधलक्षणकर्मकार्यकारणात्कर्म
त्वंपश्यति ज्ञानदृष्ट्यानिश्चिनोति समनुष्येषुमध्येप्रशस्ययातुद्याय
क्तः सएवमेहूर्णोपुरुषार्थसंपादकत्वात्कृत्स्नस्याविकल्पस्यकर्मणः
कर्तानुष्ठातोच्यते भोगमात्रफलेहिकर्मकृत्स्नमविकलांगमप्यनुष्ठित
मपवर्गलक्षणफलेप्रत्यहेतुत्वान्नकृत्स्नंभवति अतस्तदनुष्ठाताकृत
स्नकर्मकृदित्यर्थः एवमनेनश्लोकेनकर्मण्यकर्मयश्चेत्यदृश्यमस्तितद्या
ख्यातं (अथकर्मैवाकर्मभवतीतोनमूर्वंगुकमपिद्दृक्प्रतिपत्तयेस्ना
यन्निहृणोति लासिकीबलबोधनीटीका

अथकर्मैवाकर्मभवतीतिपतन्मूर्वंगुकमपिद्दृकप्रतिपत्तयेस्नात्व
न्निहृणोति यश्चेति) कर्मणीत्युपलक्षणार्थंकर्माकर्मविकर्मणा
नंचदुर्विज्ञेयं तदेवाहोथयितमाह कर्मणीति विहिततया स्वभा
वतोवाकर्मणिदेहेंद्रियक्रियमनुष्ठीयमानार्यमपि यथोक्तस्वस्वभा
वनिष्टत्तयाऽकर्मस्वात्मनिनिष्क्रियत्वं श्रोत्रादीनिशब्दादिषुवर्ततेनग
च गादीनिवचनादौ ममकिमायातमित्येवं नैवकिंचित्करोमीतिवस्य
माणयायुक्तायः पश्येत् ज्ञानदृष्ट्यानिश्चिनोति तथाऽकर्मणिकर्मे
न्द्रियाणिसंयम्येत्युक्तदृष्ट्याज्ञानरहितेकर्मत्यागेयः कर्मपश्येत् ज्ञा
नंतरेणमानसानांकर्मणामशक्यपरिहार्यतया तथारागादिदोषस्य
दुरुच्छेदतयाचबंधलक्षणकर्मकार्यकरणात्कर्मत्वंयोनिश्चिनोति
सएवमनुष्येषुमध्येतत्त्वतोबुद्धिमान् प्रत्यगात्मबोधयुक्तः सएवयुक्तः
प्रत्यगात्मनिसमाहितः सएवकृत्स्नकर्मकृत् कृत्स्नानिकर्माणि
कर्तुंजानातीति सएवकृत्स्नानिकर्माणिकृतवानीतिच सर्वकर्म·
कुर्वाणोप्यात्मनिष्ठतयामधुपानमत्तवन्नकिंचित्करोत्यऽहंकाराभा
वात् इत्यारुरुक्षुदशायां आत्मबोधयुक्तएवतत्समाहितश्चेनेरहस्यो
पदेशेतत्त्वतोजानाति नान्योदेहाभिमानतिरोहितः अथयोगारूढो

गी॰
टी॰
वं॰

वस्थायां अकर्मणि च परैः प्रमातृभिः कृते कर्मणि पूजादौ कर्म क्रि
यां जानाति ये ते कर्तारः सर्वेऽहमेवेति दृष्ट्या पूजकैरविभेदेन सदा पूजे॰
नि पूजनं इति सिद्धभाषाप्रामाण्यात् स एव मनुष्येषु मध्ये बुद्धिमा॰
नित्यादि ननु परकृते कर्मणि कथं स्वकीयकर्मदर्शनमिति चेत्
निष्पन्ननिष्कम्पविज्ञानशालिनो ज्ञानिनो यथा य एवाहं घटादीन्
वेद्मि स एव घटादीनिति प्रमेयान्तरगतमनुसंधानमस्ति एवं चैत्र
मैत्रादिप्रमात्रन्तरविषयेऽनुसंधानादिति ब्रूमः तदुक्तं ब्रह्मविन्मम
हि ज्ञाया यद्यत्कुर्वन्ति सर्वतः तदहं विदधे सर्वं करोमीत्येव भावये
त् १८ ॥

पंचोलीटीका

किंपुनः तत्कस्मादेव यद्बोद्धव्यं भगवता वक्ष्यामीति प्रतिज्ञायते तत्राह
कर्मणीति य आत्मतत्त्वविद् देहेन्द्रियान्तःकरणाश्रिते आत्मनि वास्तवार्थे प्रती
यमाने कर्मणि कर्माभावेन कर्म अकर्म रहितमात्मानं पश्येत् तत्र दृष्टांत
माह यथा अतिरंहसा चलन्त्या नौकायां नदीतीरे स्थितेषु वृक्षेषु प्रति
लोमेनाध्यारोपिते कर्मणि चलनलक्षणे भ्रान्त्या प्रतीयमानैरपि विवेकी
तेषु कर्माभावमचलत्वं पश्यति तथा कर्माणि देहेन्द्रियादिव्यापारोपरमे
ऽहं न करिष्यामीति देहेन्द्रियादिव्यापाराभावं भ्रान्त्या आत्मन्यारोपयति
तस्मिन्कर्माभावे यः कर्म पश्येत् तस्य कर्माभावस्याहंकारपूर्वकप्रयत्न
साध्यत्वात् अज्ञानिनः दुःखबुद्ध्या कर्मयोगस्य त्यागस्य मिथ्याचारत्वा
त्कर्मत्वं भवति स युक्तः योगी सकलकर्मकृत् तथा च बाह्यान्तरैः यः कर्म
णि परमेश्वरार्पणबुद्धिक्रियमाणे अकर्म अबंधकत्वात् कर्मेदं न भवति
इत्येव पश्यति यः अकर्मणि विहिताकरणे कर्मैव प्रत्यवायोत्पादक
त्वात् पश्यति स मनुष्येषु बुद्धिमान् युक्तः योगी सकलकर्मकृत् १८

रणवीरसंमिह्योधिनी ॥

कर्मण्यकर्मेति यः कर्मणि स्वजात्युचिते विहिते युद्धादिव्यापारे
अकर्म हिंसाप्रायत्वान्निंदितं कर्म पश्येत् परिहार्यमेतदिति वि
चारयेत् अकर्मणि अविहिते वर्णान्तरोचिते तपश्चर्यादौ यः क
र्म पश्येत् अनुष्ठेयमेतदिति जानीयात् स क्षत्रियप्रवरः बुद्धि॰

मात्मनुष्येषुबुद्धिंतकालिकांमानयंतीतिबुद्धिमानः बौद्धाः ते
द्विप्रत्यक्षमेवमानयंतिनपुनः परोक्षमपि नैवतेमनुष्यास्ते
षुनास्तिकेषुचार्वाकादिषुविषयेसयुक्तः युक्तंयोगः भावेक्तः
युक्तेनयोगेनसंगत्यासहवर्ततेयः सबौद्धयुक्तसंगतइतिया
वत् बौद्धशिष्योस्तेयइतिशेषः अतएव कृत्स्नकर्मकृत् कृत्स्ना
नांकर्माधिकारिणांकर्माणियथास्वंविहितानिकुर्वंततिष्ठिनती
ति क्षत्रियधर्मिणिधार्मिष्ठाः पापेपापासमेसमाः राजानमनुव
र्तंतेयथाराजातथाप्रजाइति स्मृते राज्ञोबौद्धमतानुसरणेनद
नुवर्तिनीनांप्रकृतीनामपिपरलोकासंभावनायांजातायांनि
यतधर्महानोयथारुचियत्किंचित्कर्तव्यतायांवर्णाश्रमविभा
गनिमित्तकर्मलोपाद्धर्मसांकर्यप्रवृत्तेतज्जन्यपापफलनरका
दिप्राप्तिः प्रत्यवायोराज्ञएवेतितंस्वकर्मैवानुष्ठेतितात्पर्यं यद्वा
कृतेततिष्ठिंदत्यंगानिपरस्परमसंयोगोथाइतिकृत् शुद्धतरस्य
ति अभिषुण्वंतीति कृत्स्नाःशुद्धाभिषिक्ताः क्षत्रियाः यद्वाकर्तन
कृत् दृष्टप्राधान्यात्तत्राभिषिक्ताराजन्यास्तेषांकर्माणिशुद्धयत्न
त्नभनादीनिकुर्वंततिष्ठिनतीतिकृत्स्नकर्मकृत् बौद्धादिपरम
कारुणिकत्वात् हिंसातोबिभ्यतः परार्थेस्वजीवमपिपरित्यजं
ति नपुनर्हिंसांकुर्वंतीति तन्मतानुवर्तिनि राज्ञि सतिप्रजाअपि
हिंसातोनिवर्तिष्यंतीतिवधभयाभावाद्दुष्टप्रचारेजातेलोके
महाननर्थप्रसक्तोसर्वकर्मलोपःस्याद्राजैववतत्फलभागितिता
दृशींबुद्धिंविहाय स्वकर्मणिकर्तव्यतानिश्चयात्मिकांतांस्वी
कुरुष्वेतिभावः अत्रापराव्याख्या कर्मणएककर्मणीति निर्धारणे
षष्ठीजातावेकवचनं तथाच कर्मिणांसामान्यतोयथावर्णा

अमं विहितानां कर्मणां मध्ये अकर्म अकारो वै विष्णुरिति श्रुतेः अ
स्य विष्णोर्विष्णुकर्तृकं कर्म यः पश्येत् तत्तदवतारे सर्वेश्वरेण वि
ष्णुना किमनुष्ठितमिति विचार्य मयापि तदनुवर्तिना तदेवानुष्ठे
यमिति निश्चिनुयात् एवं च कपिलाद्यवतारेषु तपःसंन्यासा
91 येव्रतेन स्वीकृतमिति तदेवास्माभिरपि श्रेयस्कामैः क्रियते इति
किमति घोरे शोकसंतापदायिनि युद्धव्यापारे नियोजयसीत्या
शंक्याह अकर्मणीति वाव्यथेन केवलं कर्मण्येवाकर्म पश्ये
किं च कर्मण्यपि विष्णुकृतकर्मणां मध्येपि कर्म स्ववर्णाश्रमो
चितं यः पश्येत् मां प्रति तदनुष्ठितं तदनुष्ठितं च यत्तदेवाहं क
र्तुमर्हामीति विचारयेत् यद्वर्णाश्रमानुकारिणा परमेश्वरेणाद
नुष्ठितं तदेव तद्वर्णाश्रमलिंगिना कर्तव्यं तथा च रामावतारे नि
न्दितमपि ताटकावालिवधलक्षणं कर्म केनापि परोपकार
फलेनानुष्ठितं अस्मिन् कृष्णावतारे पूतनाकंसादिबंधुवधः कृत
इत्यादि मत्कर्म विचार्य मा त्वमसमरारंभान्निवर्तस्वेति तात्पर्यं यश्चे
तादृशाविवेकपूर्वकप्रवृत्तिमान् स मनुष्येषु मध्ये बुद्धिमान् अ
स्यान्तरधीयुक्तः स एव युक्तः कर्मकौशलवान् स नद्य अत एव
कृत्स्नं संपूर्णं यथा स्यात्तथा कर्माणि करोतीति सर्वश्रेयोभाक्
स एवेति भावः १८ ॥

मधुभाष्य

कर्मणीति कर्मणि क्रियमाणे सति अकर्म यः पश्येत् विष्णो
र्वै कर्मनाहं चिन्त्यतिविंव: किं चित्करोमीति अकर्मणि च व्या
दौ अकरणावस्थायां परमेश्वरस्य यः कर्म पश्यति अयमेव
परमेश्वरः सर्वदा सर्वं रक्षणादि करोतीति स बुद्धिमान् ज्ञानी स
एव च युक्तः योगयुक्तः सर्वाकरणात् स एव च कृत्स्नकर्मकृत्

लत्वफलत्वात् एतदेव प्रपंचयति यस्येत्यादिश्लोकपं
चकेन उक्तप्रकारेण ज्ञानाग्निदग्धकर्माणं नवकामसं
कल्पाभावेनालं प्रसंगस्तेहं चत्यक्ता ज्ञानस्वरूपमाह पु
न नित्यतृप्त इति नित्यतृप्त निराश्रय स्वरूपोहमस्मीति त
था विधः कामादित्यागोपायमाह ॥१८॥

92

भाषा अनुवाद

जो कहा कि कर्म की गति गहन कहे जानने जोग नही है औ
र कहा कि कर्म अकर्म निषिद्ध कर्म का तत्व जानि कर कर्म
को करै सोई कर्मगति की कठिनाई देखावते हुये वह तत्व क
हते है जिसके यथार्थ ज्ञानमे पंडितभी मोहित होते औ जिसके
ज्ञानसे संसारसे छुटि जाते है उसको मै कहता हूं तुम सुनो यह
प्रतिज्ञा जो करी थी सो अब कहते हैं कि भगवत आराधन रूप
कर्म जब कि किसी तरह ज्ञान होने मे बाधा नंही करता तो वह
कृता कर्म है उसको अकर्म ही अर्थात् कर्म संन्यास ही जो देखते
है सोई कहा कि कर्मण्य कर्म यः पश्येत् और शास्त्र विहित कर्म
न करने से दोष होता फेरि वहीन करना ज्ञानका प्रतिबंधक क
हे बाधा का हेतु होताहै इससे शास्त्रोक्त कर्मको न करना ही
जो अकर्म उसी को कर्तव्य कर्म जो देखते है वेइ लोग कर्मकारी
पुरुषोंके मध्यमे बुद्धिमान हैं भगवान उन्हीकी प्रशंसा करतेहै
कि ऐसे ही कर्म अनुष्ठान करते जो ज्ञानयोग को प्राप्त होते सोई
योगी पुरुषहै और उनको भगवत आराधन रूपकर्मके अंतर्भूत
कहे अंगभूत समस्त कर्म करना आय गयाहै वही कहा कि सयुक्त
कृत्स्नकर्मकृत् यससे यह आया कि ज्ञानमार्गमे जाने की इच्छा
जिसको है उसको कर्मयोगअवस्था मे कर्म करना उचितहै सोई
३ अध्यायके ४ श्लोकमे कहा कि नकर्मणामनारंभा नैष्कर्म्यं पुरु
षोश्नुते और संन्यासी ज्ञान होने से फेरि कर्मका कुछ आवश्यक नंही
है सोई ३ अध्यायके १७ श्लोकमे कहा कि यस्त्वात्मरतिरेवस्यादात्म
तृप्तश्चमानवः इति ये दोनो बाते इसश्लोक से अच्छीतरह कहीगई
और जो कर्मेंद्रियाणि संयम्य यह ३ अध्यायके ६ श्लोकमे कहा
इंद्रियों से आत्मा भिन्नहै तथा कोई कर्म नंही कर्ता ऐसे जानि दृढ
समाधिमे जो रहते है और अनायास कहे वेमांगे प्राप्त भये अन्नको
भोजन करलेते वे सकल कर्म करते भी योगीहै और उनको विक

मे जोनिषिद्धकर्म मृगमांस भोजनादि दोषंभी नही क्यों कि उन्हे उस वस्तु का आग्रह नही है परंतु अज्ञानी को आग्रह औ रुचि है इससे मृग मांस खाने से दोषहै इससे निषिद्ध कर्म का तत्व कहा यहीतत्व जानि सबकर्ममे प्रवृत्त होना मैनेक हा है सोजानो १८

दोहा

कर्महि में अकर्म हि लखें अकर्ममाहि जोकर्म सोबुधमान
मनुष्यमे युक्त सर्व कर्म कृत् पर्म १८॥

यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितंबुधाः १९

शांकरभाष्यं

तदेतत् कर्मण्यकर्मादिदर्शनं स्तूयते यस्येति यस्य यथोक्तदर्शिनः सर्वे यावंतः समारंभाः सर्वाणि कर्माणि समारभ्यंते इति समारंभाः कामसंकल्पवर्जिताः कामैस्तत्कारणैश्च संकल्पैर्वर्जिताः मुधैव चेष्टामात्रा अनुष्ठीयंते प्रवृत्तेन चेल्लोकसंग्रहार्थं निवृत्तेन चेत् जीवनमात्रार्थं तं ज्ञानाग्निदग्धकर्माणं कर्मादावकर्मादिदर्शनं ज्ञानं तदेवाग्निस्तेन ज्ञानाग्निना दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य तमाहुः परमार्थतः पंडितं बुधाः ब्रह्मविदः १९

आनंदगिरिटीका

कर्मण्यकर्मदर्शनं पूर्वोक्तं स्तौति अनंतरश्लोकं प्रस्तौति तदेतदिति यथोक्तदर्शित्वं पूर्वोक्तदर्शनसम्पन्नत्वं समारंभशब्दस्य कर्मविषयत्वेन व्युत्पत्तिं किं तद्व्युत्पत्तिमित्याह समारभ्यंत इतीति कामसंकल्पवर्जितत्वे कथं कर्मणामनुष्ठानमित्याशंक्याह मुधैवेति उद्देशफलाभावे तेषामनुष्ठानं यादृच्छिकं स्यादित्याशंक्य प्रवृत्तेन निवृत्तेन वा तेषामनुष्ठानं यादृच्छिकं स्यादिति विकल्याक्रमेण निरस्यति प्रवृत्तेनेत्यादिना ज्ञानाग्नीत्यादि विभजते कर्मादाविति यथोक्तज्ञानं योगपमेव दहति नायोगपमिति विवक्षितत्वात्तस्मिन्नग्निपदं यथोक्तविज्ञानविरहिणामपि वैशेषिकादीनां पंडितत्वप्रसिद्धिमाशंक्य तेषां पंडिताभासत्वं विवक्षित्वा विशिनष्टि परमार्थत इति १९

स्वामिकृतटीका

यस्येत्यादि पंचभिः सम्यगारभ्यंते इति समारंभाः कर्माणि काम्यत इति कामः फलं तत्संकल्पेन वर्जिता यस्य भवंति तं पंडितमाहुः तत्र हेतुः यतः तैः समारंभैः शुद्धे चित्ते सति जातेन ज्ञानाग्निना दग्धान्यक

गी॰ टी॰ वं॰ र्मितानीतानिकर्माणियस्यतं आरूढावस्थायांतुकामःफलविषयःतदा-
र्थमिदंकर्तव्यमितिकर्मविषयःसंकल्पश्चताभ्यांवर्जिताशेषंस्पष्टं १९

पिशाचभाष्यं

तस्मात्यस्येति यस्यकर्माकर्मविदःसर्वाःक्रियाःकामसंकल्पवर्जिताः फलसंकल्परहितास्तंज्ञानाग्निदग्धकर्माणंकर्माकर्मतत्वज्ञानमेव ज्ञानाग्निस्तेनदग्धकर्माणंबुधाःब्रह्मविदःपंडितमाहुः १९

रामानुजभाष्यं

प्रपन्नेनक्रियमाणस्यकर्मणोज्ञानाकारताकथमुपपद्यतइत्यत्राह यस्येतियस्यमुमुक्षोःसर्वेद्रव्यार्जनादिलौकिककर्मपूर्वकनित्यनैमित्तिककाम्यरूपकर्मसमारंभाःकामवर्जिताःफलसंगरहिताःसंकल्पवर्जिताश्चप्रकृत्यातद्गुणैश्चात्मानमेकीकृत्यानुसंधानंसंकल्पःप्रकृतिवियुक्तात्मस्वरूपानुसंधानयुक्ततयातद्रहिताःतमेवंकर्मकुर्वाणंपंडितंकर्मांतर्गतात्मयाथात्म्यज्ञानाग्निनादग्धप्राचीनकर्माणमाहुःतत्वज्ञानकर्मणोज्ञानाकारत्वमुपपद्यते एतद्विद्वांसो १९

अभिनवगुप्तकृतटीका

अतएवकामेषुकाम्यमानेषुफलेषुसंकल्पंविहायक्रियमाणानिकर्माणिकथितकथयिष्यमाणस्वरूपेज्ञानाग्नावनुप्रविशंतदर्शनेन १९

परमार्थप्रपाटीका

स्प॰ अथैवं पश्यतःपुरुषस्यस्वरूपमाह यस्येतिपंचभिःयस्यपुरुषस्यसम्यगारभ्यंतइतिसमारंभाःकर्माणिकाम्यंतइतिकामःफलंतत्संकल्पेनवर्जिताभवंतितंपंडितमाहुःकिंभूतंज्ञानाग्निदग्धकर्माणंज्ञानाग्निनानिर्दग्धानिभर्जितबीजानिकर्माणियस्य १९

वनमालीटीका

कर्तृत्वाद्यभिमानराहित्येनकृतेकर्मज्ञानार्थंभवंतीत्याह

यस्येतिपंचभिः यस्यसर्वेस्वोचितकर्मारंभाः कर्माणीइदंफलमेनेनक
र्मणाभूयादितिफलासक्तिः कामः एतत्फलार्थमिदंकर्माहंकरि
ष्यइतिकर्मसंगः संकल्पस्ताभ्यांवर्जिताः हरिप्रेरणयादेहादौकर्म
जायतेहंतुकेवलोकर्तेतिज्ञानेनदग्धानिकर्माणिअनादिकाल
प्रवृत्तसंचयरूपाणिक्रियमाणानिकरिष्यमाणानियस्यतं बुधावे
दार्थज्ञाःपंडितमतिकुशलमाहुः १९

ऊत्तमवैजयंतीटीका

ननुकर्मज्ञानाकारंज्ञानंचकर्माकारंतुभिन्नत्वःकथंपश्येद्यतःक
र्मणःअत्यंतंत्वंज्ञानस्यचपरोक्षत्वमित्युभयोराकारस्यमहदंतरंदृ
श्यतेइतिचेत्तत्राहयस्येतिपंचभिःयस्यसर्वेइतियस्यमुमुक्षोर्ज
नस्यकाम्यतेइतिकामःफलंतस्यसंकल्पःऐहिकामुष्मिकानेक
विधस्वभोगाभिलाषरूपमानसंकर्मतेनवर्जितारहिताःयद्वाका
मश्चसंकल्पश्चताभ्यांवर्जिताःकामःफलंतद्रहिताःसंकल्परहिता
श्चभवंति यद्वाकामश्चसंकल्पश्चकामसंकल्पौताभ्यांवर्जिताःका
मोमद्व्यतिरेकेभ्योभूतप्रेतादिभ्योनानादेवेभ्योमोक्षंतंसाधनश्चा त्व
प्यभिलाषस्तेनरहिताःअनन्यविष्णुभक्ताइत्यर्थःसंकल्पश्चाहंब्रह्मस्व
रूपएवानादिज्ञानाज्ञानाध्यासेनैवजीवभावंप्राप्तइति अविद्यायाप
कल्पात्तदवच्छिन्नासर्वेजीवाअप्येकएवेतिमायावच्छिन्नईश्वरोतंतत्का
रणावच्छिन्नोजीवइतिईश्वरप्रतिबिंबाजीवाआभासावेत्यादिरूपःप्र
कृतिकार्यदेहादिरूपएवाहमितिवेत्याद्यनेकरूपोयःसंकल्पोमानसं
कर्मतेनरहिताःसंकल्पःकर्ममानसमित्यभिधानात्सर्वेसमस्ताःस
मारंभालौकिकवैदिककर्मणांप्रारंभाभवंतितंनिष्कामकर्मकर्तारं
मदनन्यभक्तपुरुषंपंडितंपंडासदसद्विवेकेनपूर्णाधीर्विद्यतेयस्य
सतंआहुर्वदंतिकेबुधाःशास्त्रज्ञाःअतएवज्ञानाग्निदग्धकर्माणंस्वा
भाविकभेदाभेदरूपोयःआत्माज्ञानरूपोज्ञातृकर्तृत्वभोक्तृत्वाश्र
यःप्रकृतिकार्यदेहाद्यचेतनवर्गभिन्नइत्याकारकंयज्ज्ञानंतदेवाग्निरू
पंतेनदग्धानिकर्माणिसंचितक्रियमाणानिपापपुण्यरूपाणियस्य
सतं तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौतद्व्यपदेशादितिन्या

यात् एवमात्मयाथात्म्यज्ञानात्कर्मणोपि ज्ञानाकारत्वं प्राप्यत इत्या
शयः १९

मधुसूदनीटीका

नैष्कर्म्यपरमार्थदर्शिनः
कर्तृत्वाभिमानाभावेन कर्मलिप्तत्वं प्रपंच्यते अस्यकर्मसमाधि
नेत्यमेन
यस्य पूर्वोक्तपरमार्थदर्शिनः सर्वे यावंतो वैदिका लौकिका वा समारं
भाः समारभ्यंत इति व्युत्पत्त्या नमात्रार्थकर्माणि कामसंकल्पवर्जिताः
कामः फलतृष्णा संकल्पोऽहं करोमीति कर्तृत्वाभिमानस्ताभ्यां वर्जिताः
लोकसंग्रहार्थं वा जीवनमात्रार्थं वा प्रारब्धकर्मवेगाद्वृथाचेष्टारूपा भवं
ति. ततः कर्मादावकर्मादिदर्शनं ज्ञानं तदेवाग्निः तेन दग्धानि शुभाशुभ
लक्षणानि कर्माणि यस्य तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्य
पदेशादिति न्यायात् ज्ञानाग्निदग्धकर्माणं तं बुधा ब्रह्मविदः परमा
र्थतः पंडितमाहुः सम्यग्दर्शी हि पंडित उच्यते न तु भ्रांत इत्यर्थः १९

[illegible]
[illegible] १९

सदानंदीटीका

यथार्थदर्शिनोध्यासाभावात्कर्माद्यसंगता प्रपंच्यते त्रिहरिणा श्लोके
षड्भिरतिस्फुटं १ यथोक्तदर्शिनो यस्य सर्वे श्रौताश्च लौकिकाः कर्मा
भिधाः समारंभाः फलाहंकारवर्जिताः २ शरीरयात्रामात्रार्थं संग्रहाय
वा वृथा चेष्टामात्रा भवंत्यात्मकामस्याद्वैतदर्शिनः ३ यत्कर्मादाव
कर्मादिदर्शनं ज्ञानमेव तत् अग्निस्तेन प्रदग्धानि यस्य कर्माणि सर्वशः
परमार्थेन तं प्राहुः पंडितं ब्रह्मविद्वराः पंडितस्तत्त्वदर्शी स्यान्न तु भ्रांतो
जडात्मकः ५ १९

नीलकंठीटीका

अविदुषां कर्मण्यकर्मभावनां दृढयित्वा विदुषां कर्मदर्शनं स्तौति य
स्य सर्वे समारंभा इत्यादिभिः षड्भिः यस्य विदुषः सर्वे समारभ्यंत इति स
मारंभाः कर्माणि कामेन फलेच्छया संकल्पेन अहमिदं करोमीत्यभि
मानेन च वर्जिताः तं ज्ञानाग्निना कर्मादावकर्मादिदर्शनेन दग्धानि अं
कुरीभावाच्च्यावितानि कर्माणि शुभाशुभानि येन तं पंडितं बुधा आहुः
१९

आनंदी टीका

एतदेवस्फुटयति समारभ्यंतइतिसमारंभाःकर्माणिकामाभोगा
स्तेषुसंकल्पःप्राप्तमिच्छातेनवर्जिताः ज्ञानाग्निनादग्धानिसंसारप्र
सवासमर्थानिकृतानिकर्माणियेनतंपंडितंकर्मण्यकर्मवेत्तारमाहुः १९

रामकंठीटीका

अथकर्मैवाकर्मभवतीत्येतत्सर्व उक्तमपिदृढप्रतिपत्तयेस्मारयन्विवृणोति ॥
काम्यंतइतिकामाःकर्मफलत्वेनप्रार्थ्यमानास्तेतेभोगास्तेषुसंकल्प
इच्छातेनरहिताःसर्वेसमस्तादृष्टानुश्रविकविषयनिष्ठाःसमारंभाःक
र्मप्रवृत्तयोयस्यतं यथोदितयथोक्तात्मतत्त्वज्ञानरूपेणानलेनदग्ध
कर्माणंदग्धानिसंसारांकुरप्रसवसामान्यहरणाद्भस्मीकृतानिक
र्मलक्षणानिनिर्वीजानियेनतंतादृशंपंडितंविद्वांसमाहुः परमार्थवि
दःयतःसर्वात्मनाकृतकृत्यत्वपर्यवसायिनीविद्वत्तासाचयथोक्त
ज्ञानवतएवसंभवति [illegible]
[illegible] १९ ॥

लासिकी ~~[illegible]~~टीका

अथकर्मैवाकर्मभवतीतिएतत्सर्वमुक्तमपिदृढप्रतिपत्तयेस्मारय
न्विवृणोति यस्येति यस्यसमारभ्यंतेइतिसमारंभाःसर्वाणिकर्मा
णिदृष्टानुश्रविकविषयनिष्ठानि काम्यतेइतिकामःफलंतत्संक
ल्पेनवर्जिताभवंति नन्वेवंचेत् किमुन्मत्तवत् फलानभिसंधिना
कर्मकरोतीत्याशंक्याह ज्ञानाग्नीतिकथयिष्यमाणाद्धेतलक्षण
ज्ञानाग्निनादग्धानिसंसारांकुरप्रसवसामर्थ्यहरणाद्भस्मीकृतानि
कर्मलक्षणानिनिर्वीजानियेनतंतादृशंपंडितमाहुर्बुधाःपरमार्थविद :
सम्यग्दर्शीहिपंडितउच्यते नतुभ्रांतइत्यर्थः ~~सर्वाणिकर्माणियोहलय~~
~~ति यस्येति कर्मणदृष्टानुश्रविकफलेछ्वा~~ १९

पंचोलीटीका

तदेतत्कर्मण्यकर्मादिदर्शनंस्तूयते यस्येति यस्यआत्मदर्शिनःस
र्वेसमारंभाःसर्वाणिकर्माणिकामसंकल्पवर्जिताःकर्मफलंकामः
संकल्पःफलेच्छाताभ्यांवर्जिताःतथाखज्ञानाग्निदग्धकर्माणंज्ञाना·

गी॰ टी॰ ४ ग्निनादग्धंशुभाशुभंकर्मयस्य तितंपंडितमाहुः १९

रणवीरसमिद्धोधिनी ॥

९८

यस्येति सम्यगारभ्यंतेऽइति समारंभाशुद्धादिव्यापारेस्मिनः संप्रवृ
प्रवृत्तोभवतिसचित् चेतनः प्रमास्यतरनिश्चयात्मकबुद्धिविशि
ष्टत्वेनस्मृतसकलधर्मतत्त्वः किंनैवकरोति अपितुसर्वंदुःसाध
मपिसाधयति यतोनियन्तमः नित्येनसर्वेश्वरेणात्समर्पितः
अंतर्भावितएषधीजन्मः एयस्यकर्माधिकारिणः तज्ज्ञादेःका
मसंकल्पवर्जिताः काम्यंतऽइतिकामाः पुत्रादयस्तेषांसंकल्पो
पुत्रेमरणायाशंकारूपस्तेनवर्जिता यस्यकर्माधिकारिणः तज्
ज्ञादेर्भवति बुधास्तंपंडितंपुरुषव्यवहारनिपुणमाहुः तत्रहेतुः
ज्ञानाग्निदग्धकर्माणमिति ज्ञानंप्रारभ्यमाणशुद्धादिव्यापारवि
षयकारमपानुष्ठेयतानिश्चयात्मिकाबुद्धिः तदेवाग्निः प्रादुर्भूता
नामन्यव्यापारेविषयकसंल्पतृणानांभस्मीकरणसाधर्म्यात्
तेनदग्धानिभस्मीकृतानि निर्बीजीकृतानिकर्माणि अन्यव्या
पारविषयसंकल्पायस्यतं १९ ॥

मधुभाष्य

१९ ॥

भाषा अनुवाद

अब कर्म एव कर्मयः पश्येत् इस श्लोकसे श्रुतिका तात्पर्य अर्थ जोकहा सोई पांच श्लोक से स्पष्ट करके कहतेहै किजिसके स व समारंभ कहे कर्म काम संकल्प वर्जित अर्थात् कामना रहि तहै उसी को बुध कहे बुद्धिमानलोग पंडित कहतेहै जिससे कर्म अनुष्ठानके द्वारा शुद्धचित होनेसे प्रगट हुये ज्ञानअग्निसे सकल कर्म दग्ध होजातेहै फेरि कर्मबंध उसको नंही होताहै और ज्ञा न आरूढ अवस्था मे कामका अर्थकर्म फल और उसके अर्थय ह कर्म हम को करना उचितहै परंतुज्ञान आरूढ पुरुष इनदो नो सेभी रहित है सोई कहा कि जिसके सब समारंभ कामना रहित होंसो पंडितहै १९

दोहा

जाके सर्वआरंभ है रहित कल्पनाकाम कर्मदग्ध ज्ञानाग्नि
तिहबुधकहै पंडित नाम १९ ॥

97

त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः क॰
र्मण्यभिप्रवृत्तोपि नैव किंचित्करोति सः २०

शांकरभाष्य

यस्त्वकर्मादिदर्शी सोऽकर्मादिदर्शनादेव निःकर्मा संन्यासी जीवन॰
मात्रार्थचेष्टः सन्कर्मणि न प्रवर्तते यद्यपि प्राग्विवेकतः प्रवृत्तः यस्तु॰
प्रारब्धकर्मा सन् उत्तरकालमुत्पन्नात्मसम्यग्दर्शनः स्यात्सकर्मणि प्रयो
जनमपश्यन् ससाधनं कर्म परित्यजत्येव स कुतश्चिन्निमित्तात् कर्मपरि॰
त्यागासंभवे सति कर्मणि तत्फले च संगरहिततया स्वप्रयोजनाभावाल्लो
कसंग्रहार्थं पूर्ववत्कर्मणि प्रवृत्तोपि नैव किंचित्करोति ज्ञानाग्निदग्ध
कर्मत्वात् तदीयं कर्माकर्मैव संपद्यत इत्येतदर्थं दर्शयिष्यन्नाह त्यक्त्वेति
त्यक्त्वा कर्मस्वभिमानं फलासंगं च यथोक्तेन ज्ञानेन नित्यतृप्तो निराकांक्षो
विषयेष्वित्यर्थो निराश्रय आश्रयरहित आश्रयो नाम यदाश्रित्य पुरुषार्थं
सिसाधयिषति दृष्टादृष्टेष्टफलसाधनाश्रयरहित इत्यर्थः तेनैवंभूते॰
न स्वप्रयोजनाभावात् ससाधनं कर्म परित्यक्तव्यमेवेति प्राप्ते ततो नि॰
र्गमासंभवात् लोकसंग्रहचिकीर्षया शिष्टविगर्हणापरिजिहीर्षया वा
पूर्ववत् कर्मण्यभिप्रवृत्तोपि निःक्रियात्मदर्शनसंपन्नत्वान्नैव किंचि॰
त्करोति सः २०

आनंदगिरिकृतटीका

विवेकात्पूर्वं कर्मणि प्रवृत्तावपि सति विवेके तत्र न प्रवृत्तिरित्याशंक्यां॰
गीकरोति यस्त्विति विवेकात् पूर्वमभिनिवेशेन प्रवृत्तस्य विवेकानंतरम॰
भिनिवेशाभावात् प्रवृत्त्यसंभवेपि जीवनमात्रमुद्दिश्य प्रवृत्त्याभासः संभ
वतीत्यर्थः सत्यपि विवेके तत्त्वसाक्षात्कारानुदयात् कर्मणि प्रवृत्तस्य क
थं तत्त्यागः स्यादित्याशंक्याह यस्त्विति प्रारब्धेति त्यक्त्वेत्यादि समनंतरश्लोक
मवतारयितुं भूमिकां कृत्वा तदवतारणप्रकारं दर्शयति स कुतश्चिदिति
लोकसंग्रहादिनिमित्तं विवक्षितं कर्मपरित्यागासंभवे सति तस्मिन् प्रवृत्तो
पि नैव करोति किंचिदिति संबंधः कर्मणि प्रवृत्तो न करोति कर्मेति कथमु
च्यते तत्राह स्वप्रयोजनाभावादिति कथं तर्हि कर्मणि प्रवर्तते तत्राह लो

केति प्रवृत्तेरर्थक्रियाकारित्वाभावं पश्वादिभिस्तद्विशेषादिति व्या
येन व्यावर्तयति पूर्ववदिति कथं तर्हि विवेकिनामविवेकिनां च वि
शेषः स्यादित्याशंक्य कर्मादौ संगासंगाभ्यामित्याह कर्मणीति उक्तेर्थे
समनंतरश्लोकमवतारयति ज्ञानाग्नीति एतमर्थं दर्शयिष्यन्निमं श्लो
कमाहेति योजना यथोक्तज्ञानेन कूटस्थात्मदर्शनेनेन स्वरूपभूतं संवि
त्साक्षादनुष्ठेयकर्माणि तत्फले च संगमपास्य विषयेषु निरपेक्षः प्रवृत्ते वि
द्वानित्याह त्यक्त्वेत्यादिना इष्टसाधनमपेक्षस्य कुतो निरपेक्षत्वमित्याशं
क्य विशिनष्टि निराश्रय इति यदाश्रित्येति यच्छब्देन फलसाधनमुच्यते
आश्रयरहितं इत्यस्यार्थं स्पष्टयति दृष्टेति तेन ज्ञानवता पुरुषेणैवंभूतेन
त्यक्त्वा कर्मफलासंगमित्यादिना विशेषितेनेत्यर्थः ततः समाधानात्क
र्मणः सकाशादिति यावत् निर्गमासंभवे हेतुमाह लोकेत्यादिना पूर्व
वत्ज्ञानोदयात्प्रागवस्थायामिवेत्यर्थः अभिप्रवृत्तोपि लोकदृष्ट्येति
शेषः नैव करोति किंचिदिति स्वदृष्ट्येति द्रष्टव्यं २०

स्वामिकृतटीका

किंच त्यक्त्वेति कर्मणि तत्फले चासक्तिं त्यक्त्वा नित्येन निजानंदेन तृप्तः अ
तएव योगक्षेमार्थमाश्रयणीयरहितः एवंभूतो यः स स्वाभाविके विहिते वा
कर्मण्यभितः प्रवृत्तोपि किंचिदपि नैव करोति तस्य कर्माकर्मतामापद्यत
इत्यर्थः २०

पैशाचभाष्यं

सपंडितः कर्मफलासंगं त्यक्त्वा निराश्रयः आश्रितत्वविवर्जितः कर्मण्य
भिप्रवृत्तोपि नैव किंचित्करोति सः कर्मणा तस्य बंधकत्वाभावादि
त्यभिप्रायः २०

रामानुजभाष्यं

एतद्विवरणेति त्यक्त्वेति कर्मफलासंगं त्यक्त्वा नित्यतृप्तो नित्ये स्वात्मन्येव तृप्तः निरा
श्रय अस्थिरप्रकृतावाश्रयबुद्धिरहितो यः कर्माणि करोति स कर्मण्य
भिप्रवृत्तोपि नैव किंचित्करोति कर्मापदेशेन ज्ञानाभ्यासमेव करो
तीत्यर्थः २०

अभिनवगुप्तकृतटीका उपक्रमं २० नास्ति

परमार्थप्रपाटीका

किंचत्यक्तेति कर्मफलानामासमंतात्संगंत्यक्त्वा निजानंदेन नित्यतृप्तः अतएव निराश्रयः आश्रयणीयरहितः एवंविधोयः सोऽभितः सर्वकर्मप्रवृत्तोपि नैवकिंचित्करोति कर्तृत्वाभिमानशून्योभवतितस्यकर्माकर्मतामेति २०

वनमालीटीका

निरभिमानितयाहर्याराधनरूपकर्मणोंतःकरणशुद्धिद्वाराहर्यापरोक्ष्यंततोमहाप्रसादस्ततःकर्मरूपाविद्यायाश्च हतिरितिभावः कर्मणि कर्तृत्वाभिमानरूपंफलेभोक्तृत्वाभिमानरूपंचसंगंत्यक्त्वानित्येनस्वानंदेनहरिणावातृप्तः हरिप्रसादाविर्भूतस्वानंदेनतृप्तइत्यर्थः निर्गतोभोगार्थमाश्रयोदेहादिर्यस्मात्सः स्वानंदतृप्तत्वेनस्वानुभवार्थमाश्रयस्यदेहादेरपेक्षानास्तीतिभावः एतादृशोलोकसंग्रहार्थंसंस्कारवशाद्वाकर्मण्यभिप्रवृत्तोपिसनैवकिंचित्करोति फलेविकारादिकंनकिंचित्प्राप्नोतीत्यर्थः २० भ्रि॰

कृष्णमैवैजयंतीटीका

पुनरेतदेवविवरणमुखेनाह त्यक्त्वाकर्मेति कर्मफलासंगंकर्मफलासंगः कामस्तंत्यक्त्वाकर्मफलकामंपरित्यज्येत्यर्थः नित्यतृप्तः नित्यरूपेणवर्तमानत्वनित्यप्रकृतिकार्यभूतेदेहादौयतोनिराश्रयः आत्मव्यतिरिक्तेऽस्थिररूपेप्राकृतवस्तुनियोगक्षेमार्थमाश्रयधीवर्जितः एवंभूतः सन्योधिकारीकर्माणिकरोतिसकर्मणिअभिप्रवृत्तोपिस्वाधिकाररूपेकर्तव्यकर्मणिविषयेअभिप्रभितःसम्यक्त्वेनवाप्रवृत्तोपिशक्तोपिसन्किंचिदपिस्वल्पमपिकर्मनैवकरोतिकर्मव्याजेनसाक्षात्सद्ज्ञानमेवकरोतीत्यनेनाविकर्मणःस्वरूपवंधकंबोधव्यमितिदर्शितं २०

॥भवतज्ज्ञानाग्निनाप्राक्तनानांप्रारब्धकर्मणां दाहः आगामिनांचानुत्पत्तिः ज्ञानोत्पत्तिकालेक्रियमाणेनतुपूर्वोत्तरयोरनन्तभी **मधुसूदनीटीका** वात्फलायभवेदितिभवेत् कस्यचिदाशंकानामपत्तुदति॥

॥कर्मणिफलेचासंगंकर्तृत्वाभिमानंभोगाभिलाषंचत्यक्त्वाअकर्तृभोक्तात्मसम्यग्दर्शनेनबाधित्वानित्यतृप्तः परमानंदस्वरूपलाभेनसर्वत्रनिराकांक्षः निराश्रयः आश्रयोदेहेंद्रियादिरद्वैतदर्शनेननिर्गतोयस्मात्सनिराश्रयोदेहेंद्रियाद्यभिमानशून्यः फलकामनायाःकर्तृत्वाभिमानस्यचनिवृत्तोहे

त्वगर्भक्रमेणविशेषणद्वयं एवंभूतोजीवन्मुक्तो व्युत्थानदशायांकर्मणि
वैदिकेलौकिकेवाअभिप्रवृत्तोप्रारब्धकर्मवशाल्लोकदृष्ट्याभितःसांगोपां
गानुष्ठानायप्रवृत्तोपिस्वदृष्ट्यानैवकिंचित्करोतिसः निष्क्रियात्मदर्शनेन
वाधितत्वादित्यर्थः २० [illegible]
[illegible]
[illegible] २०

मदानंदीटीका

सम्यग्ज्ञानेसमुत्पन्नेकार्यंतस्यनकिंचन कृतैः कर्मभिरस्पृहाभावत्वा
देवमुच्यते १ कर्तृत्वाहंकृतिंत्यक्त्वाफलेतृष्णांचकर्मणि परानंदात्म
लाभेननिराकांक्षोखिलेफले २ देहाद्यहंकृतेःशून्योदृष्ट्यांश्रयातिगः
एवंभूतःप्रवृत्तोपिलोकदृष्ट्यायथाविधि ३ लौकिकेवैदिकेवासौकर्म
णारब्धयोजितः स्वदृष्ट्यानिष्क्रियस्वात्मदर्शनध्वस्तविक्रियः ४ स्वमहि
म्निस्थितोधीरोनैवकिंचित्करोत्यसौ ५ २०

नीलकंठीटीका

ननुप्रायश्चित्तेनेवज्ञानाग्निनापूर्वकर्मदाहेपिक्रियमाणंतत्फलायभवेदि
त्यतआह त्यक्त्वेति आत्मलाभेननित्यतृप्तत्वात्फलासंगंत्यक्त्वानिराश्रय
त्वात् अहंकाराद्याश्रयेणहिकर्मक्रियते निराश्रयोनिरहंकारोयस्मात्
तःकर्मसंगंअहंकरोमीत्यभिमानंवत्यक्त्वाकर्माणिलौकिकेवैदिकेवा
अभितःसर्वांगोपसंहारेणप्रवृत्तोपिसन्नैवकिंचित्करोति अतोअस्यक्रि
यमाणमपिकर्मनफलायप्रभवतीत्यर्थः २०

आनंदीटीका

एतदेवहृदयेसन्निवेशयितुंपुनराह कर्मफलस्पृहात्यागेनैवस्पृहणीया
भावान्नित्यतृप्तः निराश्रयःस्वर्गादिफलसाधनभूताज्ज्योतिष्टोमादेराश्र
यान्निर्गतः कर्मणिनियतेआवश्यकेप्रवृत्तोपिनैवकिंचित्करोतितद्यक
स्यफलस्याग्रहणात् २०

एवंकर्मणोपवादःकर्मविद्वान्यपुनीति

रामकंठीटीका

व्याख्यानं नदेवविशिनष्टियतः॥
सएवंविधोयोगीपरमानंदमयपरमस्वभावस्वरूपावस्थितउद्दिनित्य

तृप्तः सकलबाह्यविषयरसपरिहीणकांक्षोत एव निराश्रयः स्वद्
एवव्यतिरिक्ताश्रयाद्यालंबनान्निष्क्रान्तः कर्मफलासंगं कर्मणां यज्ञ
दानतपःप्रभृतीनां फले स्वर्गादिभोगलक्षणमासंगमासक्तिं तदेव
प्रकृष्टं फलमिति तत्रलीनचित्तत्वं त्यक्त्वा सहजे कर्मण्यभिप्रवृत्तोऽनु
ष्ठाने व्यवसितोऽपि नैव किंचित्करोति [illegible]
[illegible]
[illegible] लासिकी [illegible] टीका

पूर्वोक्तमेवोद्दलयति त्यक्त्वेति कर्मस्वदृष्टानुश्रविकफलेषु चा
संगं लीनचित्तत्वं त्यक्त्वा नित्येन निजानन्देन तृप्तो विषयेषु निराकांक्ष
इत्यर्थः निराश्रयो योगक्षेमार्थमाश्रणीयरहितः स एवंविधो योगी
स्वाभाविके विहिते वा कर्मण्यभिप्रवृत्तोऽपि अनुष्ठाने व्यवसितोऽपि नैव
किंचित्करोति सदात्मनिष्ठस्य तस्य कर्माऽकर्मतामापद्यत इत्यर्थः २०

पंचोली [illegible] टीका

ब्रह्मवित् ज्ञानाग्निनिर्मितात्कर्मणि प्रवृत्तोऽपि फलासंगरहिततया
लोकसंग्रहार्थं कुर्वाणोऽस्ति इति ज्ञानाग्निदग्धकर्मत्वात्तदीयकर्म
अकर्मैव संपद्यत इत्याह त्यक्त्वेति यः कर्मफलासंगं कर्मणः फले
आसक्तिं त्यक्त्वा नित्यतृप्तः आत्मज्ञानेन सर्वदा तृप्तः सर्वकर्मण्य
भिप्रवृत्तोऽपि किंचिन्नैव करोति कृतमपि कर्म तस्य बंधहेतुर्न भवती
त्यर्थः २०

रागवीरसमिद्धोधिनी ॥

त्यक्त्वेति फलस्यैहिकस्य राज्यकीर्त्यादेः पारत्रिकस्य स्वर्गभो
गादेः पार्थवसानिकस्यापवर्गलक्षणस्येति त्रिविधस्यासंगो
संबंधो यत्र तादृशमकर्म निंदायां विपर्यये वा नञ् निंदितं वि
परीतं वा कर्म स्ववर्णे निषिद्धं वर्णांतरे च विहितं यत्तत्पश्वया
दिलक्षणं तत् त्यक्त्वा विहाय यः कर्मणि स्वजात्युचितेऽध्ययनादि
पारेभितः संमुखं प्रवृत्तो भवति स वित्तचेतनः प्रमास्यतरनिश्च

100

यात्मकबुद्धिविशिष्टत्वेन स्वतस्सकलधर्मतत्वः किंनैवकरोति
अपितुसर्वंउःसाधमपिसाधयति यतोनित्यतृप्तः नित्येनसर्वे
श्वरेणात्मसंतर्पितः अंतर्भावितण्यर्थोत्रतृप्तिः यस्मीत्तनाथि
तदनुशिष्टकर्माणिप्रवृत्तत्वात्सदायम् तेननतेनैवपरमेश्वरेणा
र्पितमहाभागइत्यर्थः यतोयंनिराश्रयः नविद्यतेईश्वरादन्यः
सिद्धिविषयेआश्रय आश्रयणीयोयस्येतिपरमेश्वरमेवकार्य
सिद्धिविषयेशरणीकृत्यस्वकर्माणिप्रवृत्तइतियावत् ॥ २०॥

मध्वभाष्य

२०॥

भाषा अनुवाद

और सर्व कर्म तथा कर्मके फलमे आसक्ति छोडकर नित्यआनंद हूए आत्मामे संतुष्ट मनुष्य अप्राप्त वस्तु की चेष्टा औ प्राप्त का पालनइन दोनोसे हूएहै इसीसे वे कोई कर्म मे प्रवृत्त होय पर उनका वह कर्म कर्म नहीहै अर्थात् उसके सब कर्म अकर्मता को प्राप्त है सोई कहतेहै कि कर्म के फल औ संग जो आसक्ति तिसे छोडि नित्य आत्म सुख से तृप्त वेपरवाह जो कर्ममे प्रवृत्त भीहै पर वह कुछ भी नहीं करताहै यह जानो २०

दोहा

त्यागें कर्मफलसंग नित तृप्त निराश्रय जोय कर्महि मह
वर्ततसदा करे न किंचित सोय २०॥

निराशीर्यतचित्तात्मात्यक्तसर्वपरिग्रहः शारी-
रंकेवलंकर्मकुर्वन्नाप्नोतिकिल्बिषं २१

शांकरभाष्यं

यःपुनःपूर्वोक्तविपरीतःप्रागेवकर्मारंभाद्ब्रह्मणि सर्वांतरेप्रत्यगात्मनि
निष्क्रियेसंजातात्मदर्शनः सदृष्टादृष्टेष्टविषयाशीर्विवर्जिततया दृष्टा
दृष्टार्थेकर्मणिप्रयोजनमपश्यन् सैषणंकर्मसंन्यस्यशरीरयात्रामात्र
चेष्टोयतिर्ज्ञाननिष्ठोमुच्यतइत्येतमर्थंदर्शयितुमाह निरितिनिराशीर्नि
र्गताः आशिषोयस्मात्सनिराशीः यतचित्तात्मा चित्तमंतःकरणमात्मा
बाह्यःकार्यकरणसंघातस्तावुभावपि यतौसंयतौयेनसयतचित्तात्मात्य
क्तसर्वपरिग्रहः त्यक्तःसर्वःपरिग्रहोयेनसत्यक्तसर्वपरिग्रहःशारीरंशरीर
स्थितिमात्रप्रयोजनंकेवलंकर्मतत्राप्यभिमानवर्जितं कर्मकुर्वन्नाप्नोति
नप्राप्नोति किल्बिषमनिष्टरूपंपापंधर्मंचधर्मोऽपि मुमुक्षोरनिष्टरूप-
त्वात् किल्बिषमेवबंधापादकत्वात् किंचशारीरंकेवलंकर्मेत्यत्र किं
शरीरनिर्वर्त्यंशारीरंकर्माभिप्रेतमाहोस्विच्छरीरस्थितिमात्रप्रयोजनंशा
रीरंकर्मेति किंचातोयदिशरीरनिर्वर्त्यंशारीरंकर्मयदिवाशरीरस्थितिमात्रप्र
योजनं शारीरमित्युच्यतेयदाशरीरनिर्वर्त्यंकर्मशारीरमभिप्रेतं स्यात्तदादृ-
ष्टादृष्टप्रयोजनंकर्मप्रतिषिद्धमपिशरीरेणकुर्वन्नाप्नोतिकिल्बिषमिति
ब्रुवतो विरुद्धाभिधानंप्रसज्येतशास्त्रीयंचकर्मदृष्टादृष्टप्रयोजनंशरीरेण
कुर्वन्नाप्नोतिकिल्बिषमित्यपिब्रुवतोऽप्राप्तप्रतिषेधप्रसंगः शारीरंकर्म
कुर्वन्निति विशेषणात् केवलशब्दप्रयोगाच्चवाङ्मनसनिर्वर्त्यंकर्म विधि
प्रतिषेधविषयं धर्माधर्मशब्दवाच्यंकुर्वन्प्राप्नोतिकिल्बिषमित्युक्तंस्यात्
तत्रापिवाङ्मनसाभ्यां विहितानुष्ठानपक्षेकिल्बिषप्राप्तिवचनं विरुद्धमाप
द्येतप्रतिषिद्धसेवापक्षेऽपि भूतार्थानुवादमात्रमनर्थकंस्यात् यदातु
शरीरस्थितिमात्रप्रयोजनंशारीरंकर्माभिप्रेतं भवेत्तदादृष्टादृष्टप्रयोज
नंकर्म विधिप्रतिषेधशास्त्रगम्यं शरीरवाङ्मनोनिर्वर्त्यं अन्यदकुर्वंस्तै-
रेवशरीरादिभिःशरीरस्थितिमात्रप्रयोजनंकेवलशब्दप्रयोगादहं करो-
मीत्यभिमानवर्जितः शरीरादिचेष्टामात्रंलोकदृष्ट्याकुर्वन्नाप्नोतिकि

ल्बिषमेवंभूतस्यपापशब्दवाच्यकिल्बिषप्राप्त्यसंभवात् किल्बिषंसं
सारंनाप्नोति ज्ञानाग्निदग्धसर्वकर्मत्वादप्रतिबंधेनमुच्यतएवेति
पूर्वोक्तसम्यग्दर्शनफलानुवादएवैषः एवंशारीरंकेवलंकर्मत्यस्या
र्थस्यपरिग्रहेनिरवद्यंभवति २१

आनंदगिरिकृतटीका

सत्यपिविक्षेपकेकर्मणिकूटस्थात्मानुसंधानस्य सिद्धेःकैवल्यहेतु
त्वंविक्षेपाभावेसुतरांतस्य तद्धेतुत्वसिद्धिरित्यभिप्रेत्याह यःपुनरिति
पूर्वोक्तविपरीतत्वंलोकसंग्रहादिनिरपेक्षत्वं तदेववैपरीत्यंस्फोरयति
प्रागेवेति ससाधनसर्वकर्मसंन्यासेशरीरस्थितिरपिकथमित्याशंक्या
ह शारीरेति नहितथाविधचेष्टानिविष्टचेतस्तया सम्यग्ज्ञानबहिर्मु
खस्यकुतोमुक्तिरित्याशंक्य यथोपदिष्टचेष्टायामनादरान्नैवमित्याह
ज्ञाननिष्ठइति इतिदर्शयितुमिमंश्लोकमाहेति पूर्ववत् आशिषःप्रार्थ
नाभेदास्तृष्णाविशेषाः आशिषोविदुषोनिर्गतत्वेहेतुमाह यतेति
चित्तवदात्मनःसंयमनंकथमित्याशंक्याह आत्मावाह्यइतिद्वयोःसंय
मेनसत्यर्थसिद्धमर्थमाह त्यक्तेतिसर्वपरिग्रहपरित्यागेदेहस्थितिरपि
दुःस्थास्यादित्याशंक्याह शारीरमिति मात्रशब्देनपौनरुक्त्यादनर्थकंके
वलपदमित्याशंक्याह तत्रापीति शारीरंकेवलमित्यादौशारीरपदार्थं
स्फुटीकर्तुमुभयथासंभावनया विकल्पयति शारीरमिति शरीरनि
र्वर्त्यंशारीरमित्यस्मिन्पक्षेकिंदूषणं शारीरस्थितिमात्रं शारीरमित्यस्मि
न् वापक्षेकिंफलमिति पूर्ववादीपृच्छतिकिंचातइति शरीरनिर्वर्त्यं
शारीरमित्यस्मिन्पक्षेसिद्धांतीदूषणमाह उच्यतइति शरीरेणयन्निर्व
र्त्यंतत्किंप्रतिषिद्धंविहितंवाप्रथमेविरोधःस्यादित्याहयदेति प्रतिषिद्धा
चरणेपिनानिष्टप्राप्तिरित्युक्तेप्रतिषेधशास्त्रविरोधःस्यादित्यर्थः द्विती
येविहितकरणेसत्यनिष्टप्राप्त्यभावादप्रसक्तप्रतिषेधःस्यादित्याह शास्त्री
यंचेति दृष्टप्रयोजनंशारीर्यादिकं कर्मादृष्टप्रयोजनंस्वर्गसाधनं ज्यो
तिष्टोमादिकंकर्मेतिविभागः शरीरनिर्वर्त्यंकर्मशारीरमभिमतमिति
पक्षेदूषणांतरमाह शारीरमिति वाचामनसावाकर्मणोऽनुष्ठाने सं

स्यासिनोभवत्येव किल्बिषप्राप्तिरित्याशंक्याह तत्रापीति वाङ्मनो
भ्यांविहितानुष्ठानेवाप्रतिषिद्धकरणेवाकिल्बिषप्राप्तिः संन्यासिन
स्यादिति विकल्प्याद्येजपध्यानविधिविरोधःस्यादित्युक्ताद्वितीयंदूषयति
प्रतिषिद्धेति शरीरनिर्वर्त्यंकर्मशरीरमिति पक्षमेवंप्रतिक्षिप्यद्वितीयप
क्षेलाभंदर्शयति यदात्विति अन्यदेहस्थितिप्रयोजनात् कर्मणःसका
शादितिशेषः तत्रापिविद्वद्भिःस्वरूपानप्रवृत्तिरिति सूचयति लोकेति
विद्वदुक्तयारीत्यावर्त्तमानोनाप्नोतिकिल्बिषमित्यत्रविवक्षितमर्थमा
ह एवंभूतस्येतिविधिनिषेधगम्यंकर्मदेहस्थितिहेतुव्यतिरिक्तमकुर्वतइ
त्यर्थः शारीरंकेवलंकर्मकुर्वन्नाप्नोतिकिल्बिषमित्यस्योक्तेनप्रकारेण
परिग्रहे शारीरंकेवलमिति विशेषणद्वयंनिर्दोषंसिध्यतीतिफलित
माह एवमिति २१

स्वामिकृतटीका

किंच निराशीरिति निर्गताआशिषःकामनायस्मात् यतंनियतं
चित्तमात्माचशरीरंचयस्यत्यक्ताःसर्वेपरिग्रहायेनसःशारीरंशरीर
मात्रनिर्वर्त्यंकर्तृत्वाभिनिवेशरहितंकर्मकुर्वन्नपिकिल्बिषंबंधनंन
प्राप्नोति योगारूढपदेशरीरनिर्वाहमात्रोयोगिस्वाभाविकंभिक्षा   प८
टनादिकुर्वन्नपिकिल्बिषंविहिताकरणनिमित्तदोषंनप्राप्नोतीत्यर्थः   २१

पिशाचभाष्यं

निराशीःप्रार्थनारहितःयतचित्तात्मासंयतांतःकरणःत्यक्तसर्वप
रिग्रहःशारीरंकेवलंकर्मशरीरस्थितिसाधनंकर्मकुर्वन्नाप्नोतिकि
ल्बिषंपापं २१

रामानुजभाष्यं

पुनरपिकर्मणोज्ञानाकारमेवेवविशोध्यते निराशीरिति निराशीः
निर्गतफलाभिसंधिः यतचित्तमनाःत्यक्तसर्वपरिग्रहः आत्मैकप्रयो
जनतयाप्रकृतिप्राकृतवस्तुनिममतारहितोयावज्जीवंकेवलंशारीर
मेवकर्मकुर्वन्किल्बिषंसंसारंनाप्नोतिज्ञाननिष्ठाव्यवधानरहितकेव
लकर्मयोगेनैवंरूपेणात्मानपश्यतीत्यर्थः २१

अभिनवगुप्तकृतटीका

अभिप्रहृतोपिअभिमुखेनप्रहृतोपिशारीरोपियोगीन्द्रियव्यापारात्म
कंकर्मशारीरं यत्मनोबुद्धिभ्यांनतथानुरंजितं २१

परमार्थप्रपाटीका

किंचनिराशीरिति निराशोऽ[illegible]मेभूयादित्याशीर्विरहितः य
तनियतचित्तमात्माशरीरंचयस्यतया त्यक्ताःसर्वपरिग्रहाश्चयेनत-
वोयेनसकेवलंशारीरंकर्मशरीरनिर्वाहमात्ररूपंकर्मकुर्वन्किंषूप्रति लि२
ग्रहादिदोषंनप्राप्नोति २१

वनमालीटीका

कामत्यागोपायमाह निराशीरिति निर्गताइहामुत्रफलभोगाआ-
शिषअभिलाषायस्मःयतौनियमितौचित्तात्मानौयेनसचित्तमतः
करणमात्मावाह्येन्द्रियसहितदेहःयतोजितेन्द्रियोगतत्पसत्वात्यक्त
सर्वपरिग्रहःत्यक्ताःसर्वपरिग्रहाभोगोपकरणानियेनसःपतादृ
शोपिप्रारब्धकर्मवशाच्छारीरंशरीरस्थितिप्रयोजकंभिक्षाटना-
दिकंकेवलकर्तृत्वाभिमानशून्यंकुर्वन्नपिकिल्बिषंसंसारंनाप्ना-
प्नोति मुमुक्षोर्निराशीरित्यादिकंसाधनंजीवन्मुक्तस्यस्वाभाविक
मितिभावः २१

ऊसमवैजयंतीटीका

पवमाहकर्तोर्दशामुक्तेदानींकर्मणोज्ञानाकारमात्रत्वंवदन्नाद्य-
फदशामाहत्रिभिः निराशीरिति निराशीःनिर्गताआशीरैहिकामु
ष्मिकफलविषयिनीवांछायस्मा[illegible]सःयतचित्तात्मावशीकृत
चित्तमनाःत्यक्तसर्वपरिग्रहःत्यक्ताः[illegible]सर्वेषांप्राकृतवस्तूनांपरि
ग्रहास्संग्रहायेनसःआत्मैकदर्शनेनकृतार्थत्वान्नेतरवस्त्वपेक्षेत्यर्थः
केवलंशारीरंशरीरमात्रनिर्वाहप्रयोजनायकर्मनिषिद्धमपिकुर्वन्स
नकिल्बिषंपापरूपंसंसारंनाप्नोतिकदाचिदपिनप्राप्नोतिकेवलेन
लानेकाकाररूपेणकर्मयोगेनेवात्मयाथात्म्यरूपमवलोकतइत्यर्थः
: २१ ॥

१ तत्यक्तांगपरिग्रहाःसंग्रहायेन
२ सः आत्मैकदर्शनेन ते

यदात्यंतविक्षेपोरपि ज्ञप्तिः
तदा शरीरस्थितिमात्रहेतो

मधुसूदनीटीका

क्षेमादेः सम्यग्ज्ञानवशात्फलाज्जनकत्वं
रविक्षेपोकस्य भिक्षाटनादेर्नित्यत्वं बंधहेतुत्वमिति

केशुत्पन्नाये नाह ॥

निराशीर्गततृष्णोयतचित्तात्मा चित्तमंतःकरणमात्मा बाह्येंद्रियसंहि
तो देहः तौ संयतौ प्रत्याहारेण निगृहीतौ येन सः यतो जितेंद्रियोऽतो वि
गततृष्णत्वात्त्यक्तसर्वपरिग्रहः त्यक्ताः सर्वे परिग्रहा भोगोपकरणा
नि येन सः एतादृशोपि प्रारब्धकर्मवशाच्छारीरं शरीरस्थितिमात्रप्रयो
जनं कौपीनाच्छादनादिग्रहणभिक्षाटनादिरूपं यतिधर्मशास्त्राभ्यनुज्ञा
तं कर्म कायिकं वाचिकं मानसं च तदपि केवलं कर्तृत्वाभिमानशून्यं
पराध्यारोपितकर्तृत्वेन कुर्वन्परमार्थतोऽकर्त्रात्मदर्शनान्नाप्नोति कि
ल्बिषं धर्माधर्मफलभूतमनिष्टं संसारं पापवत्पुण्यस्याप्यनिष्टफल
त्वेन किल्बिषत्वात् यत्तु शारीरनिर्वर्त्यं शारीरमिति व्याचख्यते तन्मते
केवलं कर्म कुर्वन्नित्यतोधिकार्थालाभाद्व्यावर्तकत्वेन शारीरपदस्य
वैयर्थ्यं अथ वाचिकमानसिकव्यावर्तनार्थमिति ब्रूयात् तदा कर्मपद
स्य विहितमात्रपरत्वे शारीरं विहितं कर्म कुर्वन्नाप्नोति किल्बिषमिति अ
प्रसक्तप्रतिषेधोनर्थकः वाचिकं मानसिकं च विहितं कर्म कुर्वन्प्राप्नोति
किल्बिषमिति शास्त्रविरुद्धमुक्तं स्यात् विहितप्रतिषिद्धसाधारणपर
त्वे त्वेवमेव व्याख्यातमिति भाष्य एव विस्तरः [illegible]
[illegible]
[illegible]
पा॰ यत्[illegible] २१ ॥

सदानंदीटीका

यदा त्वात्यंतविक्षेपकारणैरपि कर्मभिः सम्यग्ज्ञानान्नलेपोस्ति तदा
भिक्षाटनादिभिः १ नास्ति बंधो ब्रह्मविदः किमु वा अमितीर्यते वीततृ पा॰
ष्णो वशी नीतं चित्तं देहेंद्रियैः सह २ येन सोत्यंतवैराग्यात्त्यक्तभोगोप
कारकः एतादृशोपि प्रारब्धवशाद्भिक्षाटनादिकं ३ शरीरस्थितिमा
त्रार्थं कायिकं वाचिकं तथा मानसं कर्म कर्तृत्वाध्यासशून्यः समा
चरन् ४ अकर्त्रात्मदृशा नासौ धर्माधर्मफलं यतिः संसारं किंचनाप्नो
ति वा पितृत्वाच्छुभाशुभं ५ यतो निष्टहेतुत्वात्पुण्यमप्यस्य किल्बिषं
६ २१ ॥

नीलकंठीटीका

नन्वेतस्मात्क्षीणात्कर्मकरणादकरणं श्रेय एव तदहमित्याशंक्याग्र
हस्य स्वतन्त्रप्रत्यवायावहमिति व्यतिरेकमुखेनाह निराशीरिति यो
निष्परिग्रहस्त्यादिपरिग्रहरहितः संन्यासी स चेन्निराशीः योगैश्वर्य
मप्यनिच्छन् यतचित्तबुद्धिः आत्मा च देहेंद्रियसंघातो येन स यतचि
त्तात्मा समाधिकाले निरुद्धबाह्याभ्यन्तरवृत्तिरित्यर्थः स व्युत्थान
काले शारीरं शरीरस्थितिमात्रप्रयोजनं भिक्षाटनादि तदपि केवलं
कर्तृत्वाभिमानशून्यं पराध्यारोपितकर्तृत्वेन कुर्वन्नपि किल्बिषं
यावज्जीवमग्निहोत्रं जुहुयादिति यावज्जीवाधिकारचोदिताग्निहो
त्राद्यकरणजं प्रत्यवायं नाप्नोति विधितस्तेषां त्यागात् यस्तु सपरि
ग्रहः स निराशीरपि यतचित्तात्मापि केवलमपि शारीरं कर्म कुर्वन्वि
हिताकरणात्किल्बिषं प्राप्नोत्येवेत्यर्थः २१

आनंदी टीका

इदं मे भूयादिदं मे मा भूयादिति रागद्वेषपूर्विका या आशिषः प्रार्थना
या निर्गतो निराशीः यतः एव यतो निरुद्धो चित्तमात्मा शरीरं च यस्य सः
चित्तं हि पूर्वं वस्त्वभिलषति ततः शरीरं चेष्टते तथा नायमिति इत्थं
केवलं रागद्वेषाभ्यां विना शारीरं शरीरनिर्वर्त्यं दर्शनस्पर्शनादिकं
शरीरस्थितिहेतुकमशनादिकं कुर्वन्किल्बिषं नाप्नोति २१ ॥

रामकंठीटीका

तस्य योगिनः प्रशंसार्थमेवाह ॥

तस्य विधस्य योगिनः सर्वस्य कर्मणो बंधलक्षणस्वकार्यसम्पादनासामर्थ्यात् यथो
प्रागेव व्याख्यानमेतत् २१

लासिकी [illegible] टीका

किंच निराशीरिति निर्गताशीः कामना यस्मात् यतं स्वरूपप्रत्यवा
मर्षेन नियतं चित्तं येन तादृश आत्मा स्वस्वरूपं यस्य त्यक्ताः सर्वे परिग्र
हा ममताश्रया येन स ईदृशो योगारूढः केवलं विहितकर्म विना कृतं
कर्तृत्वाभिमानरहितं वा शारीरं शरीरनिर्वाहमात्रोपयोगि स्वाभावि

केंकर्मभिक्षाटनादि कुर्वन्नपि किल्विषंविहिताकरणनिमित्तंदोषंनप्राप्नोति २१

पंचोलीटीका

यः पुनः पूर्वोक्तविपरीतः कर्मारंभात्प्रागेवब्रह्मणि संजातात्मदर्शनः सकलकर्मणिप्रयोजनमपश्यन् संसाधनकर्मसंन्यस्यशरीरयात्रामात्रचेष्टोपपत्तिर्ज्ञाननिष्ठोभवतीत्यत्राह निराशीरिति निराशीर्निःस्पृहः यतचित्तेंद्रियदेहः त्यक्तसर्वपरिग्रहः पुमान्केवलंशारीरमभिमानरहितंशरीरस्थितिमात्रंकर्मव्यापारंकुर्वन्किल्विषंनाप्नोति २१

रमावीरसमिद्बोधिनी॥

निराशीरिति आशासनमाशीर्वधुपुत्रादिविषयेषणाफलाकांक्षावासानिर्गतायस्मात्सनिराशीर्जयपराजययोरनियतत्वान्नफलोद्देशेनप्रवृत्तइतियावत् अतएवयतचित्तात्मा यतंस्ववशेस्थापितंचित्तंचेतआत्माबुद्धिश्चयेन यद्वायतोनिगृहीतोनिवारितश्चित्तस्यात्मासंकल्पात्मकयत्नोयेन अतएव त्यक्तःसर्वःपरिग्रहःपुत्रमित्रादिलक्षणोयेनसः केवलंशरीरंकर्मगृहादिलक्षणंकर्मेंद्रियव्यापारंकुर्वन्सन् किल्विषंगुरुबांधवादिवधजन्यंपापंनाप्नोति २१॥

मधुभाष्य

निराशीरिति यतचित्तात्माभूत्वानिराशीरित्यर्थः आत्मामनः परिग्रहत्यागोऽनभिमानं नैवकिंचित्करोमीत्यस्याभिप्रायमाह प्राप्नोतिकिल्विषमिति यतचित्तात्मनोलक्षणमाह २१॥

105

विलेप कारी कर्म ही को तो शास्त्र बंधन का हेतु कहते हैं और आपने कर्म की प्रशंसा करि जनकादि को दृष्टांत देखाय प्रथम अवस्थामे अधिकार और ज्ञान प्राप्त भये भी निरहंकार कर्म करने से अदोष कहा इससे सर्वथा कर्म करना प्राप्त होता है इस संदेह पर कहते हैं कि जो सर्व कामना परित्याग करि निष्काम हो तथा मन इंद्री शरीर अपने वशीभूत राखि सकल विषय से निवृत्त हैं और शरीर निर्वाह मात्र के अर्थ कर्तृत्व अभिमान रहित हो कर्मो को करते हुये भी वे मनुष्य कर्म बंध को नहीं प्राप्त होते हैं अर्थात् कर्मजनित किल्बिष जो पाप सो नहीं लगता है सोई कहा कि नि राशीर्यत चितात्मा त्यक्त सर्व परिग्रहः २१ ॥

दोहा

निःस्पृहा चितवश किये दियो कुटंब सम त्याग केवल क
र्म शरीर कर पाप न ताकों लाग २१॥

106

यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः समः
सिद्धावसिद्धौ च कृत्वापि न निबध्यते २२

शांकरभाष्यं

त्यक्तसर्वपरिग्रहस्य यतेरन्नादेः शरीरस्थितिहेतोः परिग्रहस्याभावात्
याचनादिना शरीरस्थितौ कर्तव्यतायां प्राप्तायामयाचितमसंक्लृप्तमुपप
न्नं यदृच्छयेत्यादिना वचनेनानुज्ञातं यतेः शरीरस्थितिहेतोरन्नादेः प्रा
प्तिद्वारमाविष्कुर्वन्नाह यदृच्छेति यदृच्छालाभसंतुष्टोऽप्रार्थितोऽय
त्नतो लाभो यदृच्छालाभस्तेन संतुष्टः संजातालंप्रत्ययः द्वंद्वातीतो द्वं
द्वैः शीतोष्णादिभिः हन्यमानोऽविषण्णचित्तो द्वंद्वातीत उच्यते विमत्सरो
विगतमत्सरो निर्वैरबुद्धिः समस्तुल्यो यदृच्छया लाभस्यापि सिद्धाव
सिद्धौ च य एवंभूतो यतिरन्नादेः शरीरस्थितिहेतोः लाभालाभयोः समो
हर्षविषादवर्जितः कर्मादावकर्मादिदर्शी यथाभूतात्मदर्शननिष्ठः
शरीरस्थितिमात्रप्रयोजने भिक्षाटनादिकर्मणि शरीरादिनिर्वर्त्ये नैव
किंचित्करोम्यहं गुणा गुणेषु वर्तंत इत्येवं सदा संपरिचक्षाण आत्मनः
कर्तृत्वाभावं पश्यन्नैव किंचिद्भिक्षाटनादिकं कर्म करोति लोकव्यव
हारसामान्यदर्शनेन तु लौकिकैरारोपितकर्तृत्वे भिक्षाटनादौ कर्म
णि कर्ता भवति भिक्षाटनादिचेष्टास्वप्यकर्तृत्वाय तु सत्यामेव विदु
षः स्वानुभवेन तु शास्त्रप्रमाणादिजनितेनाकर्तैव स एवं पराध्यारोपि
तकर्तृत्वः शरीरस्थितिमात्रप्रयोजनं भिक्षाटनादिकं कर्म कृत्वापि न
निबध्यते बंधहेतोः कर्मणः सहेतुकस्य ज्ञानाग्निना दग्धत्वादित्युक्तानुवा
द एवैषः २२

आनंदगिरिकृतटीका

पूर्वश्लोकेन संगतिं दर्शयन्नुत्तरश्लोकमुत्थापयति त्यक्तेति अन्नादेरि
त्यादिशब्देन पादुकाच्छादनादि गृह्यते याचनादिनेत्यादिपदेन सेवाकृ
घाद्यकपाटीयते भिक्षाटनार्थं प्रयोगात् प्राक्काले केनापि योग्येनानि
वेदितं भैक्ष्यमयाचितमभिप्रायमुपनीतं च वर्जयित्वा संकल्पमंतरेण प
चभ्यः सप्तभ्यो वा गृहेभ्यः समानीतं भैक्ष्यमसंक्लृप्तं सिद्धमन्नं भक्तजनैः

स्वसमीपमुपानीतमुपपन्नं यदृच्छयास्वकीयप्रयत्नव्यतिरेकेणेति
यावत् आदिशब्देन माधुकरमसंक्लृप्तं प्राक्प्रणीतमयाचितं तात्का
लिकोपपन्नं च भैक्ष्यं पंचविधं स्मृतमित्यादि गृह्यते आविष्कर्तुमिदं
वाक्यमाहेतियोजनीयं परोत्कर्षामर्षपूर्विका स्वस्योत्कर्षवाञ्छा
विगतायस्मादिति व्युत्पत्तिमाश्रित्यविवक्षितमर्थमाह निर्वैरेति स
क्षेपतो दर्शितमर्थं विशदयति यएवंभूत इति तथापि प्रकृतस्य यते
र्भिक्षाटनादौ कर्तृत्वं प्रतिभाति तदभावे भिक्षाटनाद्यभावेन जीवना
भिभावप्रसंगादित्याशंक्याह लोकेति लौकिकैरविवेकिभिः सहव्यव
हारस्य स्नानाचमनभोजनादिलक्षणस्याविडंबस्यापि सामान्येन दर्शना
त् तदनुसारेण लौकिकैरध्यारोपितकर्तृत्वभोक्तृत्वादिहानापि लो
कदृष्ट्या भिक्षाटनादौ कर्तृत्वमनुभवतीत्यर्थः कथं तर्हि तस्याकर्तृत्वं
तत्राह स्वानुभवेनेति यदृच्छेत्यादिपादत्रयं व्याख्याय कृत्वापीत्यादि
चतुर्थपादं व्याचष्टे स एवमिति भिक्षाटनादिना प्रातिभासिकेन कर्म
णा विडंबेवद्धत्वाभावेपि कर्मणान्तरेण निबद्धत्वं भविष्यतीत्याशंक्या
ह बंधेति ज्ञानाग्निदग्धत्वादित्येवं शारीरं केवलमित्यादावुक्तस्याय
मनुवाद इति योजना यथोक्तस्य कर्मणो युक्त्या महाविरोधाभ्युपगम
सूचनार्थोपि शब्दः २२

स्वामिकृतटीका

किंच यदृच्छेति अप्रार्थितोपस्थितो लाभो यदृच्छालाभस्तेन संतुष्टः
द्वंद्वानि शीतोष्णादीन्यतीतोऽतिक्रान्तः तत्सहनशील इत्यर्थः विमत्स
रो निर्वैरः यदृच्छालाभस्यापि सिद्धावसिद्धौ च समो हर्षविषादरहितः
य एवंभूतः स पूर्वोत्तरभूमिकयोर्यथायथं विहितं स्वाभाविकं वा कर्म
कृत्वापि न बध्यते न प्राप्नोतीति २२

पैशाचभाष्यं

यदृच्छालाभसंतुष्टः अप्रार्थितलाभसंतुष्टः द्वंद्वातीतः शीतोष्णसु
खदुःखादिरहितः विमत्सरः क्रोधवर्जितः कर्मणः फलभावाभावयोः
समचित्तस्स एवंभूतः कृत्वापि न निबध्यते न कर्मफलशरीरादि प्राप्नो
ति २२

रामानुजभाष्यं

यदृच्छालाभेतियदृच्छाशामशरीरधारणहेतुवस्तुसंतुष्टःद्वंद्वातीतःया
वत्साधानसमाप्तिवर्जनीयशीतोष्णादिसहःअन्यकृतोपद्रवपरिपातेहेतु
भूतस्वकर्मेतिविनृपणोनपरेषुविगतमत्सरःसमःसिद्धावसिद्धौचयुद्धादि
कर्मस्वजयादिसिद्ध्यसिद्ध्योःसमचित्तःकर्मैवकृत्वापिज्ञाननिष्ठांविनापिन
निबध्यतेनसंसारंप्रतिपद्यते २२

अभिनवगुप्तकृतटीका

कर्मकर्तरिप्रयोगःस्वयमेवस्वात्मानंवध्नाति फलवासनाकालुष्य
मुपाददानोगृह्णानइत्यर्थः अन्यथाजडानांकर्मणांवंधनेस्वातंत्र्येन
तथाहृदयंगमं २२

परमार्थप्रपाटीका

किंचयदृच्छेति अप्रार्थितोपस्थितोलाभोयदृच्छालाभस्तेनसंतुष्टः
सोपिनिर्वाहमात्रपर्याप्तःमात्रयाःकस्यचिद्धनमितिश्रुतेःद्वंद्वानि
शीतोष्णादीनिअतीतःविमत्सरोनिर्वैरःसिद्धावसिद्धौसमोहर्षवि
षादरहितःसपूर्वोक्तनरदशयोर्यथायथंकर्मकुर्वन्नवंधंनप्राप्नोति २ २

वनमालीटीका

मुक्तस्यजीवन्मुक्तस्यलक्षणमाह यदृच्छेतिशास्त्रानुमतस्यान्ना
देरयत्नेनैवलाभोयदृच्छालाभस्तेनसंतुष्टस्तदधिकतृष्णारहितः न
नुस्वप्रयत्नमंतरेणालाभेशीतादिपीडितंकथंजीवेदतःआहद्वंद्वा
तीतःद्वंद्वानिक्षुत्पिपासाशीतोष्णवर्षादीनि अतीतोतिक्रांतःस
माधौतेषामस्फुरणात् व्युत्थानकालेस्फुरणेपितितिक्षयामहाभू
दर्तिमत्ग्राहजस्येवपरमानंदघनात्मस्वरूपेस्थिरीकृतचित्तस्यदेहे
तोभाभावात् अतएवपरस्यलाभेस्वस्यालाभेचविमत्सरःपरोत्क
र्षासहनपूर्विकाखेतात् कर्षवांछामत्सरस्तद्रहितः अतएवसमस्तु
ल्यायदृच्छालाभस्य [illegible] सिद्धौचनहृष्टःनाप्यसिद्धौविषण्णःदे
हादौविगताहंममेत्यभिमानःप्रारब्धकर्मवशात्तुभिक्षाटनादि

गीं टीं चं

कंकृत्वापिननिबध्यते २२ ॥

अस्त्रमवैजयंतीटीका

किंचदेहनिर्वाहार्थमपियत्नेनकरोतीत्याह यदृच्छेति यदृच्छाला
भसंतुष्टः यदृच्छयास्वप्रयत्नेनविनायोलाभःअन्नाच्छादनादीनां
प्राप्तिस्तेनसंतुष्टः समत्क्रोषयुक्तः द्वंद्वातीतः द्वंद्वानिशीतोष्णद्वं
त्पिपासादीन्यत्युलंघ्येतःशामकालधर्मानवर्जनीयान्सर्वानेतान्या
वत्साधनसमाप्तितावदव्याकुलचित्तेनसहतीत्यर्थः विमत्सरः परो
त्कर्षासहनपूर्विकास्वोत्कर्षवांछामत्सरःविगतोमत्सरोयस्मान्स
अतएवसमः सिद्धावसिद्धौचयदृच्छालाभस्यवस्त्वतःसिद्धौशमो
सत्यानहर्षयुक्तःतस्यासिद्धावशमोचसत्यानविषादयुक्तःकिंतुस
मउभयोरपिहर्षविषादरहितःएवंभूतःसदेहनिर्वाहार्थंकर्मकृत्वा
पिननिबध्यतेभिक्षाटनादिकर्मणानलिप्यतइत्यर्थः तथाचशास्त्र
भक्ष्यंचरेदित्यपक्रम्यअयाचितमसंक्लृप्तमुपपन्नंयदृच्छयेतियाच्ञा
दिकंप्रयत्नंवारयति मनुरपिनचोत्पातनिमित्ताभ्यांननक्षत्रांगा
विद्ययानानुशासनवादाभ्यांभिक्षांलिप्सेतकर्हिचिदितियततो
भिक्षार्थंग्रामंप्रविशेदित्यादिशास्त्रेस्वप्रयत्नःकर्तव्यएवकृत्येवंशा
स्त्रीत्याप्रयत्नस्यकर्तव्यत्वात्कर्म व्यत्वेशास्त्रमतयत्रव्यवस्थाकौपीने
युगलंवासःकंथाशीतनिवारणीपादुकेचापिगृह्णीयात्कुर्यान्ना
न्यस्यसंग्रहमितिशास्त्रात् यत्नेविनाकौपीनादिलाभस्याभावाद
तःप्रयत्नःकर्तव्यःयत्नंविनापिप्रारब्धवशात्कौपीनादिलाभःसि
द्धत्येवातोयत्नोनकर्तव्यएवस्वभावप्रपद्यतेऽतोनशास्त्रविरोध
इत्यर्थः २२

त्यक्तसर्वपरिग्रहस्ययतेःशारीरस्थि
ग्रासाच्छादनादिव्यतिरेकेणशारीरस्थितेरसंभ

मधुसूदनीटीका

तिमात्रप्रयोजनंकर्माभ्यनुज्ञातंतत्रा

नियमयाह वात् याञ्चादिनास्वप्रयत्नेनान्नादिकं संपाद्यमितिप्राप्ते

शास्त्रानुमतप्रयत्नव्यतिरेकोयदृच्छातयैवयोलाभोन्नाच्छाद
नादेःशास्त्रानुमतस्यसयदृच्छालाभःतेनसंतुष्टस्तदधिकतृष्णार
हितः तथाचशास्त्रंभैक्ष्यंचरेदितिप्रकृत्य अयाचितमसंक्लृप्तमु
पपन्नंयदृच्छयेतियाच्ञासंकल्पादिप्रयत्नंवारयति मनुरपिनचोत्पा
ये

त्तनिमित्ताभ्यां न नक्षत्रांगविद्यया नानुशासनवादाभ्यां भिक्षां लि-
प्सेत कर्हिचिदिति यतयो भिक्षार्थं ग्रामं प्रविशंतीत्यादिशास्त्रानुम
तस्तु प्रयत्नः कर्तव्य एव एवं लब्धव्यमपि शास्त्रनियतमेव कौपीन
युगलं वासः कंथां शीतनिवारिणीं पादुके चापि गृह्णीयात्कुर्यान्ना
न्यस्य संग्रहमित्यादि एवमन्यदपि विधिनिषेधरूपं शास्त्रमूह्यं ननु
स्वप्रयत्नमंतरेण लाभे शीतोष्णादिपीडितः कथं जीवेदत आह द्वंद्वा
तीतः द्वंद्वानि क्षुत्पिपासाशीतोष्णवातवर्षादीनि अतीतोऽतिक्रांतः स
माधिदशायां तेषामस्फुरणात् व्युत्थानदशायां स्फुरणेऽपि परमानंदा
द्वितीयाकर्त्रभोक्त्रात्मप्रत्ययेन बाधात् तैर्द्वंद्वैरुपहन्यमानोऽप्यक्षुभि
तचित्तः अत एव परस्य लाभे स्वस्यालाभे च विमत्सरः परोत्कर्षासहन मः
पूर्विका स्वोत्कर्षवांछा मत्सरः तद्रहितः अद्वितीयात्मदर्शनेन निर्वैर-
बुद्धिः अत एव समः तुल्यो यदृच्छालाभस्य सिद्धावसिद्धौ न हृष्टः नाप्य सिद्धौ
सिद्धौ विषण्णः स स्वानुभवेनाकर्तैव परैरारोपितकर्तृत्वः शरीरस्थिति
मात्रप्रयोजनं भिक्षाटनादिकं कर्म कृत्वापि न निबध्यते बंधहेतोः सहे
भिक्षा तुकस्य कर्मणो ज्ञानाग्निना दग्धत्वादिति पूर्वोक्तानुवादः [illegible]
[illegible]
[illegible]
[illegible]
[illegible] २२

सदानंदीटीका

यतेरकिंचनस्यापि शरीरस्थितिकारणं याच्ञादिना न संपाद्यमन्नादी
त्याह विशेषणैः १ लाभो स्वप्रार्थितो यत्नात्तेनालं प्रत्ययगतः शास्त्रानुम
तभिक्षादिलाभात्संतुष्ट एव वा २ स्वप्रयत्नं विना लाभे शीतोष्णादिभि
रर्दितः द्वंद्वैरत्वव्यथितो यो निर्वैरः सर्वजंतुषु ३ शरीरस्थितिहेतोः स्वला
भेलाभे विकाररधीः स्वानुभूत्या स चाकर्तैवान्यैरारोपितक्रियः ४ भि
क्षाटनादिकं कृत्वा बंधं नाप्नोति किंचन ५ २२

नीलकंठीटीका

गी॰
टी॰
वं

109

नत्रसपरियहः ऊर्ध्वंबभरणाय्ययतयाकथंवित्तव्ययायासमाध्या
न्यग्निहोत्रादीन्यनुतिष्ठेदित्याशंक्याह यदृच्छेतियदृच्छयाअप्रा
र्थितोपनतोलाभोयदृच्छालाभस्तेनसंतुष्टः तथाहिऋतामृताभ्यां
जीवनंब्राह्मणस्यविधायव्याख्यातं ऋतमुञ्छशिलंप्रोक्तममृतंस्या
दयाचितमिति द्वंद्वातीतः बहुलाभेअलाभेवासहाद्वंद्वैःबाध्यतीनः
विमत्सरः परस्यलाभंदृष्ट्वासंतापहीनः समः यदृच्छालाभेनैवछिन्नपञ्च
चात्तर्मान्यादेर्नित्यकर्मणः सिद्धौअसिद्धौवासमोनिर्विकारएवंभूत
इष्ट्यादीनिकृत्वापितत्फलेनस्वर्गादिनाननिबध्यतेअपिशब्दात्तज्जेना
प्रत्यवायेनननिबध्यते बंधहेतोःकर्मणस्तत्त्वज्ञानेनैवदाहात् तथा
चस्मृतिःन्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः श्राद्धकृत्सत्य
वादीचगृहस्थोपिविमुच्यतइति भाष्येत्वयंश्लोकःसंन्यासिपरत्वेनैव
व्याख्यातः २२

आनंदी टीका

यदृच्छालाभः प्रार्थनांविनावस्तुप्राप्तिः २२

रामकंठीटीका

यद्यपिकर्माकर्मणोरेवबोद्धव्यंव्याख्यातंतथापिविकर्मणोरेव
मेवबोद्धव्यमव्याख्यातं यतःकर्मपरिकर्मपरिहारस्यज्ञानशून्यस्यसतो
यत्रबंधकत्वमुक्तं तत्रवर्णाश्रमसमयविरुद्धस्यकर्मणोबंधकत्वेका
भ्रांतिरिति तस्यापिसर्वात्मनापरिहार्यत्वेनबोद्धव्यंव्याख्यातं २२
इदानींकर्मसर्वथाकर्तव्यमितिनिश्चयेनकर्म [illegible]
दिष्टप्रायत्नकस्य [illegible] यथलोकेयंकर्मबंधन [illegible]
तोयत्नलक्षणविशिष्ट [illegible]
महात्मेत्यव [illegible]

लासिकी [illegible] टीका

किंच यदृच्छयेति अप्रार्थितोपस्थितलाभोयदृच्छालाभस्तेनसंतुष्ट
स्तदर्थिकेनप्रयासरहितः द्वंद्वानिशीतोष्णादीन्यतीतोतिक्रांतः विमत्स
रोनिर्वैरः यदृच्छालाभस्यसिद्धावसिद्धौचसमोहर्षविषादरहितः यथा-

वंभूतोयोगारूढः सपूर्वोत्तरभूमिकयोर्यथायथंविहितंस्वाभा-
विकंवाकर्मकृत्वापिनबंधंप्राप्नोति कर्मकर्तरिप्रयोगः २२

पंचोलीटीका

अयाचितमसंकल्पमुपपन्नंयदृच्छया शरीरादिनावचनेनअनु-
ज्ञातंयतेः शरीरस्थितिहेतोरन्नादेः प्राप्तिद्वारमाविष्कुर्वन्नाह य
दृच्छेति यदृच्छालाभसंतुष्टः अप्रार्थितलाभसंतुष्टः द्वंद्वातीतः
द्वंद्वैः शीतोष्णादिभिः अहतोपिअविसंवृतिः सिद्धौअसिद्धौचला
भालाभयोः समस्तुल्यः हर्षविषादरहितः कर्मकुर्वन्नपिकर्मणा
ननिबध्यते २२

रणवीरसमिद्धोथिनी॥

यदृच्छेति अप्रार्थितोपस्थितोलाभोयदृच्छालाभः सचात्रप्र
क्रांतत्वाद्भीष्मद्रोणादितुल्यमहावीरपुरुषप्रतिद्वंद्विकयुद्धप्र
तियोगिकः तेनसंतुष्टः एतस्यैवविवरणंद्वंद्वातीतइति द्वंद्वं
कलहयुग्मयोरितिकोषात्द्वंद्वंयुद्धं स्वल्पतीवचनिर्भरइति
कोषात्इतिप्राह्योतिशये तथाचद्वंद्वंयुद्धमतिप्रायेनेतःप्राप्तः
यतोविमत्सरः मत्सरोन्यशुभद्वेषतद्रूपणयोस्त्रिष्विति को
षात्मत्सरोन्यदीयशुभविषयकोद्वेषोविशिष्टोस्येति एतेम
मप्रतिद्वंद्विनः स्वधर्मभूतेयुद्धेप्रवृत्तास्तस्मात्वानिहत्तंमामना
यासमेवयत्जित्यराज्यप्राप्त्यादिलक्षणंकल्याणंकिंप्राप्स्यु-
स्ततश्चप्रतिप्रवृत्तोहंसमूलघातमेतान्निहन्मीतिदृतकोयः
सिद्ध्यसिद्ध्योर्विषयेसमः अतएवगुरुवधादिकंकृत्वापिनानिब
ध्यतेतिबद्धोभवति पापासंगेनेतिशेषः २२॥

मधुभाष्य
यदृच्छालाभेति कथंद्वंद्वातीतमित्याह समःसिद्धावितिउपसं
हरति २२॥

140

भाषा अनुवाद

और यदृच्छा लाभ संतुष्ट कहे मांगे विना आपसे आप प्राप्त जो यथालाभ तिससे जो संतुष्ट है अर्थात् उत्तम अधम अधिक अल्प लाभसे हर्ष विषाद रहित है और शीत उष्ण हानि लाभ सुख दुःख वैर प्रीति आदि द्वंद्व भाव रहित है तथा सिद्धि असिद्धि मे समभाव है वे पुरुष कर्म करते भी संसार गति को नही प्राप्त होते अर्थात् कर्म बंधन मे नही पडते हैं सोई कहा यदृच्छा लाभ संतुष्टो द्वंद्वातीतो विमत्सर इति २२ ॥

दोहा

यथा लाभ संतुष्ट हय द्वंद्व विमतसर हीन सम जिह सिद्धि
असिद्धि हैं करें भी बंधन छीन २२ ॥

गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः यज्ञा-
याचरतः कर्म समग्रं प्रविलीयते २३

शांकरभाष्यं

त्यक्त्वा कर्मफलासंगं इत्यनेन श्लोकेन यः प्रारब्धकर्मा सन् यदा
निःक्रियब्रह्मात्मदर्शनसंपन्नः स्यात् तदा तस्यात्मनः कर्तृकर्मप्रयो-
जनाभावदर्शिनः कर्मपरित्यागे प्राप्ते कुतश्चिन्निमित्तात्तदसंभवे
सति पूर्ववत्तस्मिन् कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति स इति च
कर्माभावः प्रदर्शितः यस्यैवं कर्माभावो दर्शितस्तस्यैव गतसंगस्येति
गतसंगस्य सर्वतो निवृत्तासक्तेर्मुक्तस्य निवृत्तधर्माधर्मादिबंधनस्य ज्ञानाव-
स्थितचेतसो ज्ञाने एवावस्थितं चेतो यस्य सोऽयं ज्ञानावस्थितचेतास्त-
स्य यज्ञाय यज्ञनिर्वृत्यर्थमाचरतो निर्वर्तयतः कर्म समग्रं सहाग्रेण क-
र्मफलेन वर्तत इति समग्रं कर्म तत्समग्रं प्रविलीयते विनश्यतीत्यर्थः २ ३

आनंदगिरिकृतटीका

गतसंगस्येत्यादिश्लोकस्याव्यवहितेन संबंधं वक्तुं वृत्तं कीर्तयति त्यक्त्वे-
ति अनेन श्लोकेन नैव किंचित्करोति स इत्यत्र कर्माभावः प्रदर्शित इति
संबंधः कस्य कर्माभावप्रदर्शनमित्याशंकायामाह यः प्रारब्धेति
प्रारब्धकर्मा सन् योऽवतिष्ठते तस्य कर्माभावः प्रदर्शितस्तद्विरोधः स्या-
दित्याशंक्यावस्थाविशेषे तत्प्रदर्शनान्मैवमित्याह यदेति नन्वज्ञान-
वतः क्रियाकारकफलाभावदर्शिनः कर्मपरित्यागश्रौव्यात् कर्मा-
भाववचनमप्राप्तप्रतिषेधः स्यादित्याशंक्याह आत्मन इति लोक-
संग्रहादिनिमित्तं प्रागेवोक्तमविद्यावस्थायामिव पूर्ववदित्युक्तं प-
वं वृत्तमनूद्योत्तरश्लोकमवतारयति यस्येति यथोक्तस्यापि विद्याव-
तो मुक्तस्य भगवत्प्रीत्यर्थं कर्मानुष्ठानोपलंभात्तत्तो बंधारंभः संभा-
व्येतेत्याशंक्याह यज्ञायेति धर्माधर्मादीत्यादिशब्देन रागद्वेषादिसं-
ग्रहः तस्य बंधनत्वं कारणत्वात्तत्त्वात्प्रतिपत्तव्यं यज्ञनिर्वृत्यर्थं यज्ञश-
ब्दितस्य भगवतो विष्णोर्नारायणस्य प्रीतिसंपत्यर्थमिति यावत्

गी॰
टी॰
च॰

ज्ञानमेववांछतोज्ञानस्यप्रतिबंधकंकर्मपरिशंकितंपरिहरति का
र्मेति समग्रेणोत्संगीकृत्यव्याचष्टेसहेत्यादिना २३

स्वामिकृतटीका

किंच गतेति गतसंगस्यनिष्कामस्यरागादिभिर्मुक्तस्यज्ञानेवास्थितंचि
राधनाः
त्तंयस्यतस्ययज्ञायपरमेश्वरार्थंकर्माचरतःसतःसमग्रंसवासनंकर्म
112
प्रविलीयतेकर्मभावमापद्यते आरुरुक्षोर्योगपदेयज्ञायेतियज्ञसंर
क्षणार्थंलोकसंग्रहार्थमेवकर्मकुर्वतइत्यर्थः २३

पिशाचभाष्यं

गतसंगस्यफलसंकल्परहितस्यज्ञानावस्थितचेतसःपरमात्मनि
व्यवस्थितबुद्धेःयज्ञायईश्वराराधनार्थमाचरतःकर्मानुष्ठितस्तत्कर्म
समग्रंप्रविलीयतेअफलप्रदभवेनअबंधकंभवति २३

रामानुजभाष्यं

गतसंगस्येति आत्मविषयज्ञानावस्थितमनसोनैर्विगतरागादिसं
गस्यातएवनिखिलपरिग्रहविमुक्तस्योक्तलक्षणयज्ञादिकर्मनिर्वृत्तये
वर्तमानस्यपुरुषस्यबंधहेतुभूतंप्राचीनंकर्मसमग्रंप्रविलीयते २३

अभिनवगुप्तकृतटीका

यज्ञायेतिजातावेकवचनंयज्ञावक्ष्मानलक्षणाः २३

परमार्थप्रपाटीका

किंचगतसंगस्येति गतसंगस्यरागादिभिर्विमुक्तस्यज्ञानावस्थित
मात्मज्ञानेकतत्परंचेतोयस्यएवंभूतस्ययज्ञायपरमेश्वरार्थंयागार्थंवा
कर्माचरतःसमग्रंसवासनंप्रविलीयते अकर्मतामापद्यते २३

वनमालीटीका

त्यक्तसर्वपरिग्रहस्ययदृच्छालाभसंतुष्टस्ययतेःशारीरंभिक्षाटनादिकं

कर्मवंधहेतुर्नभवतीत्युक्तेर्गृहस्थस्यजनकादेर्यज्ञयुद्धादिकंकर्मवं
धहेतुःस्यादित्याशंकामपाकर्तुंत्यक्त्वाकर्मफलासंगमित्युक्तंविवृ
णोतिगतसंगस्येतिगतसंगस्यफलासक्तिशून्यस्यसत्रकर्तृत्वा
भिमानमुक्तस्यचज्ञानेनब्रह्मापरोक्षेणावस्थितंस्थिरीभूतंचित्तंयस्य
तस्ययज्ञायविष्णवेतत्पूजार्थंविहितंकुर्वाणस्यसमग्रंप्रारब्धभि ग
न्नंकर्मप्रविलीयते नश्यतिवंधकंनभवतीत्यर्थः भवत्वे[illegible]याकर्म
भवत्यहंतुस्वतोकर्त्तातेनस्वपूजारूपेणकर्मणास्वकारितेनसएव
प्रीणात्वितिकुर्वाणस्यकर्माणिसकामानांवंधहेतवोपिमुक्तिपराणां
वभवतीतिभावः २३

ऊसत्मवेजयतीटीका

किंचगतसंगस्येति गतोविगतःसंगःफलसंगःफलकामोयस्मा
त्सतथानिष्कामस्येत्यर्थःमुक्तस्यप्राकृतवस्तुपरिग्रहशून्यस्यज्ञाना
वस्थितचेतसःआत्मयाथात्म्यज्ञानेऽवस्थितंस्थिरीभूतंचेतोयस्यस
तस्य अविरतस्वस्वरूपचिंतनपरस्येत्यर्थः यज्ञायविष्णुप्रीतयेआचर
तस्तत्कर्माचरतएवंभूतस्यमुमुक्षोःसमग्रंकृत्स्नंबंधकरूपंप्राची
नंकर्मप्रविलीयतेसमग्रंकर्माकर्मभावमापद्यतेत्यर्थः २३

मधुसूदनीटीका

+ त्यक्तसर्वपरिग्रहस्ययदृच्छालाभसंतुष्टस्य येतर्यच्छरीरस्थितिमात्रप्रयोजनंभिक्षा
टनादिरूपंकर्मतत्कृत्वाननि बध्यत इत्युक्तेगृहस्थस्यब्रह्मविदोज
नकादेर्यज्ञादिरूपंयत्कर्मतद्बंधहेतुःस्यादितिभवेत्कस्यविदाशंकातामपनेतुंत्यक्त्वाकर्मफलासंग
मित्यादिनो+ विवृणोति
गतसंगस्यफलासंगशून्यस्यमुक्तस्यकर्तृत्वभोक्तृत्वाध्यासशून्य
स्यज्ञानावस्थितचेतसः निर्विकल्पकब्रह्मात्मैक्यबोधएवावस्थितंवि
तेयस्यतस्यस्थितप्रज्ञस्येत्यर्थः उत्तरोत्तरविशेषणस्यपूर्वपूर्वहेतुत्वेना
न्वयोद्रष्टव्यःगतसंगत्वंकुतःयतोध्यासहीनत्वंतत्कुतोयतःस्थित ध
प्रज्ञत्वमिति ईदृशस्यापिप्रारब्धकर्मवशाद्यज्ञाययज्ञसंरक्षणार्थंज्यो
तिष्टोमादियज्ञेश्रेष्ठाचारत्वेनलोकप्रवृत्त्यर्थं यज्ञायविष्णवेतत्प्री
त्यर्थमितिवा आचरतःकर्मयज्ञदानादिकंसमग्रंसहाग्रेणफलेन
विलीयतइतिसमग्रंप्रविलीयते प्रकर्षेणकारणोच्छेदेनतत्त्वदर्शना
द्विलीयतेविनश्यतीत्यर्थः २३ [illegible] २३ ॥
[illegible]

सदानंदीटीका

तत्वज्ञस्य गृहस्थस्य कर्म यज्ञादिकं कृतं नैव बंधकमित्याह पूर्वोक्त-
मपि केशवः १ फलासंगविहीनस्य निर्गताध्यासकस्य च निर्विक-
ल्पात्मतत्वैकबोधे यस्य स्थितं मनः २ ईदृशस्यापि प्रारब्धवशाल्लो-
कप्रवृत्तये कुर्वतः कर्म यज्ञादि विष्णुप्रीत्यर्थमेव वा ३ सहायेण क-
लैनैतत्कर्म ज्ञस्य विनश्यति फलं चाजनयित्वैव मूलोच्छेदादशोकया
ध २३

नीलकंठीटीका

त्यक्त्वा कर्मफलासंगमित्यादिना श्लोकत्रयेण विद्वान्कर्माणि कुर्व-
न्नपि करोति अतो न लिप्यते लेपाभावाच्च न बध्यत इत्युक्तं तत्किं कर्म-
णां फलदानशक्तिप्रतिबंधो वा ज्ञानेन क्रियते उत निरन्वयोच्छेद एवे-
त्याशंकायां मुक्तस्यापि पुनः संसारप्रसक्तिं पश्यन् द्वितीयमभ्युपगच्छ-
ति गतसंगस्येति यतः विद्वान् गतसंगः कर्तृत्वाभिमानशून्योऽतो न
करोतीत्युक्तं यतो मुक्तः फलकामनामुक्तः अतो न लिप्यत इत्युक्तं
यतो यज्ञायैव यज्ञेश्वरप्रीत्यर्थमेवाचरति न फलांतरार्थं प्राप्त्याभा-
वात् अतस्तमेवोत्पाद्यकृतार्थैः कर्मभिर्न बध्यत इत्युक्तं यतो ये ज्ञाने स-
म्यग्दर्शने वा स्थितचेताः प्रतिष्ठितप्रज्ञः अत ईश्वरप्रीतिफलस्य ज्ञाननि-
ष्ठाप्राप्तिरूपस्यापि प्रागेव लाभात् अस्य गतसंगस्य मुक्तस्य यज्ञाय
कर्म चरतो ज्ञानावस्थितस्य सर्वं कर्म क्रियमाणादिकं सर्वप्रकारेण
निष्प्रयोजनं सत्समग्रं अग्रेण फलेन वा सत्तया वा सह समग्रं प्रकर्षे-
ण निरन्वयं विलीयते नश्यत्यतो न कदाचिदपि प्रादुर्भवति अयं चाक्रि-
यमाणकर्मप्रलयो विद्वद्दृष्ट्यैव स्वाभाविकस्य तेषां फलजननसाम-
र्थ्यस्य वन्ध्याल्पवदप्रत्याख्येयत्वात् अत एव ज्ञानेन पूर्वकर्मणो दा-
ह उत्तरेषामश्लेषश्च श्रूयते न तूत्तरेषामपि दाहः तद्यथेषीकातूलम-
ग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंते इति तं विदित्वा न कर्म-
णा लिप्यते पापकेनेति च तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां
द्विषंतः पापकृत्यामिति विदुषोथ नस्यैव कर्मणामप्यन्यत्रगमनदर्श-
नान्न तेषां वस्तुहत्याफलंस्तीति ध्येयं २३

आनंदीटीका

कर्मण्यकर्मयःपश्येदित्येतन्निर्णीयकर्मलक्षणमारभते यज्ञा·
येश्वरार्थंवक्ष्यमाणनीत्याकर्मारभतः समग्रंकर्मप्रविलीयते का·
मेत्रह्मोऽज्ञवविद्वील्युपदिश्यमानेपरमकारणेप्रकर्षेणात्तयस्यमो·
त्तस्योत्पादनद्वारेणलीनंभवतिनतद्विनाश्रमिवनश्यति २३

+इदानींकर्मसर्वथाकर्तव्यमिति
प्राग्रुक्तस्य यज्ञार्थात्कर्मणोन्यत्र

रामकंठीटीका

सामान्येनकर्ममात्रमनुष्ठेयत्वेनोपदिष्टं
लोकोयंकर्मबंधनइत्यनेनतद्विनाययज्ञलक्षणविशिष्ट
रूपतामात्तकफलत्वंच योगिना रूपप्रतिपादनद्वारेणैव

लावयत्राह +यथोक्तेज्ञानेवस्थितचेतसप्रतिलब्धप्रतिष्ठप्रज्ञस्यातएवनिवृत्तवि
षयाद्यासंगस्य ततश्चमुक्तस्यात्मनात्मविवेकसमाधिसिद्धिलाभा
देहाद्यात्मप्रत्ययरूपान्महतोबंधान्निष्क्रांतस्यमतः वक्ष्यमाणभेदाय
यज्ञाय यजमानायतदर्थंकर्मशास्त्रविहितांक्रियामारभमानस्यकु
र्वतएवसमग्रंकायिकवाचिकमानसिकभेदेनसंग्रहाद्विप्रकारमा·
वांतरभेदेनत्वपरिसंख्येयंविलीयतेविगलितब्रह्मप्राप्तिहेतुत्वाद्धि
नश्वरफलारंभकत्वलक्षणंस्वरूपमस्यनश्यतीत्यर्थः कथंक्रियमाण
मेवकर्मप्रविलीयते इतिविवेकसमाधिसिद्धिनांतरीयकांब्रह्मोत्हेत
सिद्धिंकर्मप्रविलयकारणभूतांप्रतिपादयितुमाह २३

लासिकी[illegible]टीका

किंच गतसंगस्येति ज्ञानेवस्थितचेतसः प्रतिलब्धप्रतिष्ठप्रज्ञस्यात·
एवजीवतएवमुक्तस्यदेहाद्यात्मप्रत्ययरूपबंधनान्निष्क्रांतस्यातएव
गतसंगस्यनिवृत्तविषयाद्यासंगस्ययज्ञायवक्ष्यमाणलक्षणायय
ज्ञसंरक्षणार्थंवा कर्मकायिकवाचिकमानसिकभेदेनत्रिविधमा·
चरतोपि समग्रंसवासनंकर्मप्रविलीयते कर्मभावमापद्यतेनश्य
तीत्यर्थः २३

पंचोलीटीका

ब्रह्मविदोपिकुतश्चिन्निमित्ताल्लोकसंग्रहार्थंकर्मणिप्रवृत्तस्यकर्मबं
धकंनभवतीत्याह गतसंगस्येति गतसंगस्यकर्मादौसंगरहितस्य
मुक्तस्यनिवृत्तकर्मादिबंधनस्यज्ञाननिष्ठस्ययज्ञायपरमेश्वरार्थंकर्म
कुर्वतः समग्रंप्रग्रेणफलेनसहाविलीयतेआत्मनिविलयंयाति २३

श्रीगीतार्थसन्दीपिनी॥

गतसंगस्येति गतः प्राप्तः संगः अहंकारादिभिर्येन गतोहंकारे भू तः संगः प्रोक्तलक्षणकामसंकल्पो यस्मात् तस्य अतएव मु क्तस्य शोकमोहान्निष्क्रांतस्य ततश्च ज्ञाने प्रोक्तलक्षणे निश्च येवस्थितं चेतो यस्य तस्य यज्ञाय परमेश्वरप्रीणनार्थं कर्म का यिकं शुद्धादिव्यापारं कुर्वतः समग्रं सकलं प्राकृजातं प्रविलीयते विनश्यतीति यद्वा समग्रशब्दः सर्वपर्यायः समान्सर्वान्ग्रसती ति समग्रं अन्यतोपि वेति उः सर्वग्रासकं कर्म शुद्धलक्षणं का यिकं व्यापारं कुर्वतः कर्म प्रविलीयते ईश्वरप्रवलीनो भवति ईश्वरस्तदनुमोदते इति न पापसंगेन बध्नातीति भावः २३॥

मधुभाष्य

गतसंगस्येति गतसंगस्य फलस्नेहरहितस्य मुक्तस्य प रीराद्यनभिमानिनः ज्ञानावस्थितचेतसः परमेश्वरज्ञानि नः ज्ञानावस्थितचेतसस्तस्य पश्यति २३॥

भाषा अनुवाद

औरभी कहते है कि गतसंगस्य कहे जिसका देह गेह औ विषय से संग आसक्ति चलीगई औ काम क्रोध से मुक्त कहे छूट गया है और चित्त ज्ञानरूप परब्रह्म मे स्थितहै ऐसे गुणों से युक्त मनुष्य के यज्ञ रक्षार्थ किम्वा लोक शिक्षार्थ या शरीर यात्रार्थ अथवा भगवदाराधनार्थ किये हुये संपूर्ण कर्म वासना समेत विलीन हो जाते हैं २३ ॥

दोहा

संग रहित अरु मुक्त जो ज्ञानहि मे स्थित चित यज्ञहेत करै
कर्म सम लीन होत है नित २३॥

115

ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतं ब्रह्मै
वतेनगंतव्यंब्रह्मकर्मसमाधिना २४ ॥

शांकरभाष्यं

यस्मात्पुनःकारणात्क्रियमाणंकर्मस्वकार्यारंभमकुर्वत् समग्रं
प्रविलीयतइत्युच्यते यतःब्रह्मेति ब्रह्मार्पणंयेनकरणेनप्रकारेणब्र
ह्मविद्धविरग्नावर्पयति तद्ब्रह्मैवेतिपश्यति तस्यात्मव्यतिरेकेणाभा
वं पश्यतियथाशुक्तिकायांरजताभावंपश्यति तद्वदुच्यतेब्रह्मैवार्प
णमितियथा यद्रजतंतच्छुक्तिकैवेतिब्रह्मअर्पणमित्यसमस्तेपदे य
दर्पणबुद्ध्यागृह्यतेलोकेतदस्य ब्रह्मविदोब्रह्मैवेत्यर्थः ब्रह्महविस्त
थायद्धविर्बुद्ध्यागृह्यमाणं तद्ब्रह्मैवास्यतथाब्रह्माग्नाविति समस्तं
पदमग्निरपिब्रह्मैवयत्रहूयते ब्रह्मणाकर्त्राब्रह्मैवकर्तेत्यर्थः यत्तेन
हुतंहवनक्रियापि तत्ब्रह्मैवयत्तेनगंतव्यं फलंतदपिब्रह्मैवब्रह्मकर्म
समाधिना ब्रह्मैवकर्मब्रह्मकर्म तस्मिन्समाधिर्यस्यसब्रह्मकर्मस
माधिस्तेन ब्रह्मकर्मसमाधिनाब्रह्मैवगंतव्यमेवं लोकसंग्रहंचिकीर्षु
णापिक्रियमाणंकर्मपरमार्थतोऽकर्मब्रह्मबुद्ध्युपमृदितत्वात्तदेवं
सतिनिवृत्तकर्मणोऽपिसर्वकर्मसंन्यासिनःसम्यग्दर्शनस्तुत्यर्थंयज्ञ
त्वसंपादनंज्ञानस्यसुतरामुपपद्यते यदर्पणाद्यधियज्ञेप्रसिद्धंतदस्या
ध्यात्मंब्रह्मैव परमार्थदर्शिनइति अन्यथासर्वस्यब्रह्मत्वेऽर्पणादीना
न२ मेव विशेषतोब्रह्मत्वाभिधानमनर्थकंस्यात् तस्माद्ब्रह्मैवेदं सर्वमित्य
भिजानतःविदुषःसर्वकर्माभावःकारकबुद्ध्यभावाच्च नहिकारकबु
द्धिरहितं यज्ञाख्यंकर्मदृष्टं सर्वमेवाग्निहोत्रादिकं कर्मशब्दसमर्पि
तदेवताविशेषसंप्रदानादिकारकबुद्धिमत्कर्त्रभिमानफलाभिसंधि
मच्चदृष्टं नोपमृदितक्रियाकारककर्मफलभेदबुद्धिमत्कर्तृत्वाभि
मानफलाभिसंधिरहितंच इदंतुब्रह्मबुद्ध्युपमृदितार्पणादिकारक
क्रियाफलभेदबुद्धिमत्कर्मातोऽकर्मैव तत्तथाचदर्शितं कर्मण्यभिप्र
वृत्तोपिनैवकिंचित्करोतिसः गुणागुणेषुवर्तंतेनैवाकिंचित्करोमीति
युक्तोमन्येततत्त्वविदित्यादिभिस्तथाचदर्शयन् तत्रतत्रक्रियाकारक

गी॰
टी॰
च॰

फलमेवभेदबुद्ध्युपमर्दंकरोतिदृष्टाचकामाग्निहोत्रादौ कामोपमर्दे
नकाम्यादग्निहोत्रादिहानिस्तथामतिपूर्वकामतिपूर्वकत्वादीनां पू
र्वविधेनकारकात्मनाकर्मणांकार्यविशेषस्यारब्धत्वंदृष्टंतथेहापि
ब्रह्मबुद्ध्युपमर्दितार्पणादिकारकक्रियाफलभेदबुद्धेर्बाह्यचेष्टामात्रे
णकर्मापिविदुषोऽकर्मसंपद्यतेऽतउक्तं समग्रंप्रविलीयतइति अत्र
केचिदाहुर्यद्ब्रह्मतदर्पणादीनिब्रह्मैवकिलार्पणादिनापंचविधेनका
रकात्मनाव्यवस्थितंसत्तदेवकर्मकरोतितत्रनार्पणादिबुद्धिर्निवर्त्तते
किंत्वर्पणादिषु ब्रह्मबुद्धिराधीयतेयथाप्रतिमादौ विष्णवादिबुद्धिर्य
थाचनामादौ ब्रह्मबुद्धिरेवंसत्यमेवमपिस्याद्यदि ज्ञानयज्ञस्तुत्यर्थं
प्रकरणंनस्यात्अत्रतुसम्यग्दर्शनं ज्ञानयज्ञशब्दितमनेकान्यज्ञ॰
शब्दितान् क्रियाविशेषानुपन्यस्य श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानय
ज्ञइतिज्ञानंस्तौतिअत्रचसमर्थमिदंवचनं ब्रह्मार्पणमित्यादिज्ञानस्य
यज्ञत्वसंपादनेअन्यथासर्वस्य ब्रह्मत्वेऽर्पणादीनामेव विशेषतोब्र॰
ह्मत्वाभिधानमनर्थकंस्यात् येत्वर्पणादिषुप्रतिमायांविष्णुदृष्टिवत्
ब्रह्मदृष्टिःक्षिप्यतेनामादिष्विव चेतिब्रुवतेनतेषांब्रह्मविद्योक्तेहविव
क्षितास्यादर्पणादिविषयत्वात् ज्ञानस्यनचदृष्टिसंपादनज्ञानेन मोक्ष
फलंप्राप्यते ब्रह्मैवतेनगंतव्यमितिचोच्यते विरुद्धंचसम्यग्दर्शनमंतरे
णमोक्षफलंप्राप्यतइति प्रकृतविरोधश्चसम्यग्दर्शनंचप्रकृतं कर्मण्य
कर्मयःपश्येदित्यत्रांतेचसम्यग्दर्शनेनतस्यैवोपसंहारात् श्रेयान्द्रव्यम
याद्यज्ञात् ज्ञानयज्ञःपरंतप ज्ञानंलब्ध्वापरांशांतिमित्यादिना सम्यग्
दर्शनस्तुतिमेव कुर्वन्नुपक्षीणोऽध्यायःतत्राकस्मादर्पणादौ ब्रह्मदृ॰
ष्टिरप्रकरणेप्रतिमायामिवविष्णुदृष्टिरुच्यतइत्यनुपपन्नं तस्माद्य॰
थाव्याख्यातार्थएवायंश्लोकः २४

आनंदगिरिकृतटीका

नाभुक्तंक्षीयते कर्मेतिस्मृतिमाश्रित्यशंकते कस्मादिति समस्तस्य
क्रियाकारकफलात्मकस्यद्वैतस्य ब्रह्ममात्रत्वेनबाधितत्वात् ब्रह्मवि
दोब्रह्ममात्रस्यकर्मप्रविलीयते सर्वमितियुक्तमित्याहउच्यतइति अ॰

स्मविदो ब्रह्मैव सर्वं क्रियाकारकफलजातं द्वैतमित्यत्र हेतुत्वेना
नंतरश्लोकमवतारयति यत इति अर्पणशब्दस्य करणविषयत्व
दर्शयन्नर्पणं ब्रह्मेति पदद्वयस्य सामानाधिकरण्यं साधयति ये
नेति यद्रजतं सा शुक्तिरितिवत् बाधायामिदं सामानाधिकरण्य
मित्याह तस्येति तत्र दृष्टान्तमाह यथेति उक्तेऽर्थे पदद्वयमवतारय
ति तद्वदुच्यत इति उक्तमेवार्थं स्पष्टयति यथायादिति समासमाख्या
व्यावर्तयति ब्रह्मेति पदद्वयपक्षे विवक्षितमर्थं कथयति यदर्पणेति
ब्रह्महविरिति पदद्वयमवतार्य व्याचष्टे ब्रह्मेत्यादिना यदर्पणबुद्ध्या
गृह्यते तद्ब्रह्मविदो ब्रह्मैवेति यथोक्तं तथेहापीत्याह तथेति ब्रह्मेति
षष्ठी ब्रह्मविदमधिकरोति पूर्ववदसमासमाशंक्य व्यावर्तयन् प
दांतरमवतार्य व्याकरोति तथेति प्रागुक्तासमासवदिति व्यतिरेकः
तत्र विवक्षितमर्थमाह अग्निरपीति ब्रह्मणेति पदस्याभिमतमर्थ
माह ब्रह्मणेति कर्त्रा हूयत इति संबंधः कर्ता ब्रह्मणः सकाशाद्व्य
तिरिक्तो नास्तीत्येतदभिमतमित्याह ब्रह्मैवेति हुतमित्यस्य विवक्षित
मर्थमाह यत्नेनेति ब्रह्मैव तेनेत्यादिभागं विभजते ब्रह्मैवेत्यादिना
ब्रह्मकर्मेत्याद्यवतार्य व्याकरोति ब्रह्मेति कर्मत्वं ब्रह्मणो ज्ञेयत्वात्
प्राप्यत्वाच्च प्रतिपत्तव्यं एवं ब्रह्मार्पणमंत्रस्य ब्रह्मपरत्वमुक्त्वा तात्प
र्यार्थमाह एवमिति निवृत्तकर्माणं सन्यासिनं प्रति कथमस्य म
न्त्रस्य प्रवृत्तिरित्याशंक्याह निवृत्तेति यथावाग्यज्ञाद्युपासनासमर्थ
स्याज्ञस्य संकल्पात्मकयज्ञो दृष्टस्तथा ज्ञानस्य यज्ञत्वसम्पादनं
स्तुत्यर्थं सुतरामुपपद्यते तेन स्तुतिलाभात् कल्पनायाः स्वाधीन
त्वादित्यर्थः ज्ञानस्य यज्ञत्वसंपादनमभिनयति यदर्पणादीति के
न प्रमाणेनात्र यज्ञत्वसंपादनमवगतमित्याशंक्य अर्पणादीनां वि
शेषतो ब्रह्मत्वाभिधानानुपपत्तेरित्याह अन्यथेति ज्ञानस्य यज्ञत्वे संपादिते
फलितमाह तस्मादिति आत्मैवेदं सर्वमित्यात्मव्यतिरेकेण सर्वस्यावस्तुत्वे
प्रतिपाद्यमानस्य कर्माभावे हेत्वन्तरमाह कारकेति कारकबुद्धेस्तदा
भिमानस्याभावेऽपि किमिति कर्म न स्यादित्याशंक्याह नहीति उक्तमेवा
न्वयव्यतिरेकाभ्यां द्रढयति सर्वमेवेति इंद्रायेत्यादिना शब्देन समर्पितो देव

गी॰ त्ताविशेषः संप्रदानं कारकमादिशब्दादीप्स्यादिकरणकारकं तद्वि
टी॰ षयबुद्धिमत्कर्त्ताहमित्यभिमानपूर्वकं मोक्षफलमस्येति फलाभिसं
च॰ धिमच्च कर्म दृष्टमिति योजना अन्वयमुक्त्वा व्यतिरेकमाह नेत्यादिना
उपमर्दिता क्रियादिभेदविषया बुद्धिर्यस्य तत्कर्म तु तथा कर्तृत्वाभिमा
नपूर्वको मोक्षे फलमस्येति योभिसंधिस्तेन रहितं च न कर्म दृष्टमित्य
न्वयः तथापि ब्रह्मविदो भासमानकर्माभावे किमायातमित्याशंक्या
117 ह इदमिति यदिदं ब्रह्मविदो दृश्यमानं कर्म तदहमस्मि ब्रह्मेति बुद्ध्या
निराकृतकारकादिभेदविषयबुद्धिमतस्तस्य कर्मैव न भवति तत्त्वज्ञाने
सति व्यापके कारकादिव्यवर्तमाने व्याप्यं कर्मापि व्यावर्तयति तत्त्ववि
दः शारीरादिचेष्टाकर्माभावः कर्मव्यापकरहितत्वात् सगुणचेष्टाव
प्र॰ ४ दित्यर्थः ज्ञानवतोऽहं ज्ञानकर्माकर्मैवेत्यत्र भगवदनुमतिमाह तथा
वेति ब्रह्मविदो दृष्टं कर्म नास्तीत्युक्तेऽपि तत्कारणानुपमर्दात् पुनर्भवि
ष्यतीत्याशंक्याह तथा च दर्शयिष्यतीति अविद्वानिव विद्वानपि कर्मणि
प्रवर्तमानो दृश्यते तथापि तस्य कर्माकर्मैवेत्यत्र दृष्टांतमाह दृष्टावेति
विद्वत्कर्मापि कर्मत्वाविशेषादितरकर्मवत् फलारंभकमित्याशंका
न युक्तेत्याह तथेति इदं कर्मैव कर्तृत्वस्य च फलभोक्तृत्वमिति मति
स्तत्सर्वकार्यं तत्सर्वकार्याणि च कर्माणि तेषामवांतरभेदसंग्रहार्थमा
दिपदं दार्ष्टांतिकमाह तथेति सम्यग्विद्वत्प्रकरणपरामृष्टषष्ठ्योः स
मानाधिकरण्योक्तेः पूर्वपूर्ववाक्यमनुकूलयति अत इति ब्रह्मार्पणम
व्या॰ १ न्त्रस्य स्वव्याख्यानमुक्त्वा स्वयूथ्यव्याख्यानमनुवदति अत्रेति प्रसिद्धोद्देशेना
प्रसिद्धविधानस्य न्याय्यत्वादप्रसिद्धोद्देशेन प्रसिद्धविधानं कथमित्याशं
क्याह ब्रह्मैवेति किलेत्यस्मिन् व्याख्याने सिद्धांतिनोऽसंप्रतिपत्तिं सूचय
ति कर्तृकर्मकरणसंप्रदानाधिकरणरूपेण पंचविधेन ब्रह्मैव व्यवस्थि
तं कर्म करोतीत्यंगीकारात्तदप्रसिद्ध्यभावात्तदनुवादेनार्पणादिषु विरुद्ध
स्तद्दृष्टिविधिरित्यर्थः दृष्टिविधिपक्षे सिद्धांताविशेषं दर्शयति तत्रेति अ
र्पणादिषु कर्तव्यां ब्रह्मबुद्धिं दृष्टांताभ्यां स्पष्टयति यथेत्यादिना दृष्टिवि
धाने विधेयदृष्टेर्मानसक्रियात्वेन समस्तानन्वयाभावात् प्रकरणभंगः
स्यादित्यभिप्रेत्य परिहरति सत्यमेवमिति विधिरस्मिन्न दृष्टिस्तुतिपरमेव

प्रकरणं न ज्ञानस्तुतिपरमित्याशंक्य प्रकरणपर्यालोचनया ज्ञानस्तु
तिरेवात्र प्रतिभातीति प्रतिपादयति अत्रान्विति किंच ब्रह्मार्पणमंत्रस्या
पि सम्यग्ज्ञानस्तुतौ सामर्थ्यं प्रतिभातीत्याह अत्र चेति नन्वर्पणादि
षु ब्रह्मदृष्टिं कुर्वतामपि ब्रह्मविद्यैवात्र विवक्षितेति पक्षभेदाभिद्धि
ति चेत्तत्राह यद्यप्विति यथा ब्रह्मदृष्ट्या नामादिकमुपास्यं तथार्पणादि
षु ब्रह्मदृष्टिकरणे सत्यर्पणादिकमेव प्राधान्येन ज्ञेयमिति ब्रह्मविद्याया
ध्याकेन वाक्येन विवक्षिता न स्यादित्यर्थः किंच ब्रह्मैव तेन गंतव्यमिति
ब्रह्मप्राप्तिफलाभिधानादपि दृष्टिविधानमश्लिष्टमित्याह नचेति न
चार्पणाद्यालंबना दृष्टिर्ब्रह्म प्रापयत्यप्रतीकालंबनान्नयतीति न्यायवि
रोधादिति भावः दृष्टिविधानेपि नियोगबलादेव स्वर्गवददृष्टान्मोक्षो
भविष्यतीत्याशंक्याह विरुद्धं चेति ज्ञानादेव कैवल्यमुक्त्वा मार्गान्त
रापवादिन्याः श्रुत्या विरुद्धो मोक्षस्य अविद्यानिवृत्तिलक्षणस्य दृष्टस्य
नैयोगिकत्ववचनमित्यर्थः दृष्टियोगान्मोक्षो भवति इत्येतत्करणा
विरुद्धं चेत्याह प्रकृतेति तदेव प्रपंचयति सम्यग्दर्शने चेति अन्ते च स
म्यग्दर्शनं प्रकृतमिति संबंधः तत्र हेतुः तस्यैवेति सम्यग्ज्ञानेनोपक्र
मस्य तेनैवोपसंहारेपि मध्ये किंचिदन्यदुक्तमिति प्रकरणस्यातद्विषय
त्वमित्याशंक्याह श्रेयानिति प्रकरणे सम्यग्ज्ञानविषये सत्यनुपपन्नो
दर्शनविधिरिति फलितमाह तत्रेति ब्रह्मार्पणमंत्रे परकीयव्याख्याना
संभवे स्वकीयव्याख्यानं व्यवस्थितमित्युपसंहरति तस्मादिति २४

स्वामिकृतटीका

तदेवं परमेश्वराराधनलक्षणं कर्म ज्ञानहेतुत्वेन बंधकत्वाभावादकर्मे
वा ज्ञानावस्थायां तु अकर्त्रात्मज्ञानबाधितत्वात् स्वाभाविकमपि कर्माक
र्मैवेति कर्मण्यकर्म यः पश्येदित्यनेनोक्तः कर्मविलयः प्रपंचितः इदा
नीं कर्माणि तदंगेषु ब्रह्मैवानुस्यूतं पश्यतः कर्मविलयमाह ब्रह्मार्पणमि
ति अर्प्यतेनेनेत्यर्पणं स्रुवादि तदपि ब्रह्मैव अर्प्यमाणं हविरपिहुतादिकं
ब्रह्मैव ब्रह्मैव अग्निस्तस्मिन् ब्रह्मणा कर्त्रा हुतं होमः अग्नि[illegible] कर्त्ता च क्रि
याच ब्रह्मैवेति भावः एवं ब्रह्मण्येव कर्मात्मके समाधिस्थितेनाग्रयस्य

गी॰ टी॰ व॰

तेन ब्रह्मैव गंतव्यं प्राप्यं न तु फलांतरमित्यर्थः २४

पिशाचभाष्ये

अथ यमपरो योगः ब्रह्मार्पणमिति ब्रह्म परमात्मा अर्प्यते हूयते तेने-
ति अर्पणं स्रुक्वादिस्तदेव ब्रह्म तदेव हूयत इति हविः चरुपुरोडाशादि-
कं तथा ब्रह्मैवाग्निस्तत्र ब्रह्मणा हुतं प्रक्षिप्तं यस्य पतत्सर्वं तेन पुरुषेण
ब्रह्मैव गंतव्यं कथंभूतेन ब्रह्मकर्मसमाधिना ब्रह्मात्मके कर्मणि समा-
चित्तैकाग्र्यं [illegible] यस्य तेन ब्रह्म धिः प्रतिपत्तिर्यस्य तेन [illegible] विडंबनेन [illegible] क
[illegible] पासनं [illegible] विडंबनमाह दैवमेवापरे इति दै-
[illegible]
[illegible] नियमपूर्वं [illegible] २४

रामानुजभाष्ये

प्रकृतिवियुक्तात्मस्वरूपानुसंधानयुक्ततया कर्मणो ज्ञानाकारत्व-
मुक्तं इदानीं सर्वस्य सपरिकरस्य कर्मणः परब्रह्मरूपपरमपुरुषात्म-
त्वानुसंधानयुक्ततया ज्ञानात्मकत्वमाह ब्रह्मार्पणमिति हविर्विशि-
ष्यते अर्प्यतेनेनेत्यर्पणं स्रुगादि वस्तु तद्ब्रह्मकार्यत्वाद्ब्रह्म यस्य हविषो-
तद्ब्रह्म^ ऽर्पणं तद्ब्रह्म येन हविः अर्पणं ब्रह्म हविः स्वयं ब्रह्मभूतं ब्रह्माग्नौ ब्रह्मणा
ति^ कर्त्राहुतमिति सर्वं ब्रह्मात्मकत्वाद्ब्रह्ममयमिति यः समाधत्ते स ब्रह्मक-
र्मसमाधिस्तेन ब्रह्मकर्मसमाधिना ब्रह्मैव गंतव्यं ब्रह्मात्मकतया ब्रह्म-
भूतमात्मस्वरूपं गंतव्यं मुमुक्षुणा क्रियमाणं कर्म परब्रह्मात्मकमे-
वेत्यनुसंधानयुक्ततया ज्ञानाकारं साक्षादात्मावलोकनसाधनं ना-
ज्ञाननिष्ठाव्यवधानेनेत्यर्थः २४ ॥

अभिनवगुप्तकृतटीका

यत्तावेतदुक्तं तत्स्वरूपं सामान्यं तावदाह ॥ ब्रह्मण्यर्पणं नमपव

[illegible]

प्रवृत्तस्य पुनस्तत्रैवानुप्रवेशनं यस्य तत् ब्रह्मस
मंत्रविद्यात्मकं यत् एतद्धविस्तत् ब्रह्मणापर-
मबोधे प्रशांतेग्नौ ब्रह्मणा येन केनचित्कर्मणा हुतेन
दीप्यभिहृदये समर्पितं इतीदृशं ब्रह्मकर्मैव समा-
धिर्यस्य योगिनः ३ तेन ब्रह्मैव गंतव्यं ज्ञेयं नान्यत्किंचि
त् अन्याभावात् सदिवा तदर्थेन यदर्थादेपदेवंस
वेद्यः यत्केवलब्रह्मस्वरूपेण यजमानेन ब्रह्माग्नौ ब्र-
ह्महविर्हुतं ब्रह्माणि ब्रह्मस्वभावे देवतोद्देशेनार्पणं
यस्य तदेवंभूतं यज्ञस्य कर्मैतदेव समाधिरात्मस्वरूप
लाभोपायत्वात् तेन ब्रह्मकर्मसमाधिना नान्यफ
लमवाप्यते अपितु ब्रह्मैवेति ये यथा मां प्रपद्यंते इति
हिनिर्वाहितं मितस्वरूपीकृतमदात्मकयज्ञस्वभा
वा इति तादृशफलभागिन इत्यन्यात् अपरिमितपः
विहीणामदात्मकयज्ञस्वरूपवेदिनस्त्वकथंपरिमि

ख

गीं
टीं
४ं

तफललवलाभ[illegible]भागिनोभवेयुरितितात्पर्यं
इत्यनेनश्लोकेनवक्ष्यमाणेष्वश्लोकैः परमरहस्य
मुपनिबद्धं तच्चाऽस्माभिर्मितबुद्धिभिरप्यथा
बुद्धियथागुर्वाम्नायंचविहृतम् एवंसंप्रदाय
क्रममन्तरेणैतत्तभश्चित्रमिवचित्तमपारोहनी
तिनवयमुपालंभनीयाः अत्रहविशेषग्नेःकरा
णानांचहृम्मादीनांक्रियायाश्चत्रस्यविशेषणत्व
मितिकैश्चिदुक्तंतदुपेक्ष्यमेवतेषांरहस्यसम्प्रदा
यक्रमेत्त्वणात्वात् २४ ॥ ॥

परमार्थप्रपाटीका

अथोपक्रान्तप्रमेयमुपसंहरन्नाह ब्रह्मार्प
णमिति अर्पणावितस्पदान ॥ ॥

सेकस्यायस्तत् ब्रह्मरूपत्वाद्ब्रह्मैव तथाहविः समित्तिलाज्यादि वैराज
ब्रह्मणःपात्रस्थिरूपत्वाद्ब्रह्मैव अग्निरपि वैश्वानरापरपर्यायब्रह्मैवातस्मि
न्येनपुरुषेणाहुतंसोपिब्रह्मैवइति ज्ञात्वायेनाक्रियतेतेनब्रह्मैवगंत
व्यंप्राप्तव्यं किंभूतेन ब्रह्मकर्मसमाधिना ब्रह्मार्पणं कर्मब्रह्मकर्मतास्मि
न्समाधिस्थितैकाग्र्यं स्थितेन [illegible]
[illegible] २ ४
[illegible]

वनमालीटीका

कर्त्रादिकारकषट्कस्य तत्साध्यक्रियायास्तत्फलस्य च ब्रह्माधीनत्वं चिंतयन् कर्म कुर्वाणः कर्मभिर्न लिप्यत इत्याह ब्रह्मेति अर्प्यतेनेनेतिकरणमधिकरणं देशकालादि एवं हविस्त्यागप्रदेयक्रिययोः मात्मकंकारकं तदपि ब्रह्म एवं यत्र प्रक्षिप्यतेग्नौ सोपि ब्रह्मैव ब्रह्माग्नाविति समस्तपदं एवं येन कर्त्रा यजमानेन हविस्त्यज्यते येन र्त्विजा वा हुतं सोपि ब्रह्म तेन यागकृता यज्ञस्य फलं तदपि ब्रह्मैव हवनरूपा क्रियापि ब्रह्म सर्वत्रार्पणादिषु ब्रह्माधीनत्वाद्ब्रह्मपदप्रयोगः धान्यमसि धिनुहि देवानिति [illegible] पदस्य धान्याधीने तंडुले प्रयोगात् ब्रह्माश्रितत्वाद्ब्रह्मव्यपदेशः समर्थः पदविधिरित्यत्र समर्थपदाश्रितत्वेन पदविधौ समर्थपदप्रयोगात् ब्रह्माश्रितत्वेन यस्मिन्नयोरित्यादिनाप्रसिद्धे ततोजातत्वाद्वा तद्व्यपदेशः ब्राह्मणोस्य मुखमित्यादिवदिग्यणः सम्प्रसारणमित्यत्र सम्प्रसारणाज्जातो वर्णः सम्प्रसारणमिति महाभाष्योक्तेः अस्तु वा सर्वत्र समस्तपदं ब्रह्मार्पणमित्यादि तथा च ब्रह्माधीनक्रियाया ब्रह्माधीनं फलमित्यत्र संधानेन कर्मकरणादंतःकरणशुद्धिद्वारा ज्ञानभक्तिमहाप्रसादमुक्तिपर्यवसायि भवति कर्म न तु स्वर्गादिमात्रफलदमिति भावः २४

कुसुमवैजयंतीटीका

एवंप्रकृतिसंबंधरहितात्मस्वरूपानुसंधानत्वेनकर्मणोज्ञानाकार

गी॰ टी॰ ४

120

त्वमुक्त्वेदानीं समस्तस्य सांगस्य कर्मणः प्रकृष्टोत्तमपरं ब्रह्मात्मकत्वे
नज्ञानरूपतामाह ब्रह्मार्पणमिति ब्रह्मार्पणं अर्प्यतेऽस्मै इत्यर्पणमिंद्र
चंद्रादिदेवतं ब्रह्म यद्वा अर्प्यतेऽनेनेत्यर्पणं स्रुक्स्रुवादि तद्ब्र
ह्म हविरर्पणमाज्यादि तदपि ब्रह्मैव ब्रह्माग्नौ ब्रह्मरूपे होमाधारेऽग्नौ
ब्रह्मणा ब्रह्मरूपेण यजमानाध्वर्य्यादिना कर्त्रा हुतं त्यक्तं नितिभवा
ब्रह्मकर्मसमाधिना ब्रह्मैव कर्म ब्रह्मकर्म तस्मिन्समाधिश्चित्तैकाग्र्यं
यस्य तथा तेन तेन मुमुक्षुणा प्रकृष्टेण ब्रह्मैव गंतव्यं ब्रह्मात्मकत्वेन ब्र
ह्मरूपमात्मस्वरूपं गंतव्यं प्राप्यं सर्वस्य यज्ञादिकर्मणः स्रुग्देवहविर
ग्नियजमानाध्वर्य्यादीनां कर्तृकर्मकरणसंप्रदानापादानाधिकरण
रूपषट्कारकात्मकानामंगानां ब्रह्मात्मकत्वाद्ब्रह्मकार्यत्वाद्ब्रह्म
व्याप्यत्वाद्ब्रह्माधेयत्वाद्ब्रह्माधीनस्थितिप्रवर्तिकत्वाद्ब्रह्माश्रयत्वाद्वि
ब्रह्मस्वरूपत्वाच्च सर्वमपि कारकं यज्ञादिकं कर्म ब्रह्मैवेत्येवं यः स्वयमपि
ब्रह्मस्वरूपः सन्कर्म कुर्यात्स ब्रह्मैव प्राप्नुयादिति भगवदाशयः २४

ननु क्रियमाणं कर्म फलमजनयित्वैव कथं नश्यति ब्रह्मबोधेन तत्कारणोच्छेदादित्याह ॥

मधुसूदनीटीका

अनेककारकसाध्या हि यज्ञादिक्रिया भवति देवतोद्देशेन द्रव्यत्या
गो यागः स एव त्यज्यमानद्रव्यस्याग्नौ प्रक्षेपाद्धोम इत्युच्यते तत्रोद्दे
श्य देवता संप्रदानं त्यज्यमानं द्रव्यं हविः शब्दवाच्यं साक्षाद्धात्वर्थक
र्म तत्फलं तु स्वर्गादि व्यवहितभावनाकर्म एवं धारकत्वेन हविषोग्नि
प्रक्षेपसाधकतमतया जुह्वादि करणं प्रकाशकतया मंत्रादीनि क
रणमपि कारकज्ञापकभेदेन द्विविधं एवं त्यागांशे प्रक्षेपांशे च क्रिये
तत्राद्यायां यजमानः कर्ता प्रक्षेपे तु यजमानपरिक्रीतोऽध्वर्युः प्रक्षेपा
धिकरणं चाग्निः एवं देशकालादिकमप्यधिकरणं सर्वक्रियासाधार
णादृष्टं तदेवं सर्वेषां क्रियाकारकव्यवहाराणां ब्रह्माज्ञानकल्पिता
नां रज्ज्वज्ञानकल्पितानां सर्पधारादीनां रज्जुतत्त्वज्ञानेनेव ब्रह्म
तत्त्वज्ञानेन बाधे बाधितानुवृत्त्या क्रियाकारकादिव्यवहाराभासो दृश्य
मानोऽपि दग्धपटन्यायेन न फलाय कल्पत इत्यनेन श्लोकेन प्रतिपाद्य
ते ब्रह्मदृष्टिरेव च सर्वयज्ञात्मिकेति स्तूयते तथाहि अर्प्यतेऽनेनेति

करणव्युत्पत्त्यार्पणंजुह्वादिमंत्रादिच एवमर्प्यतेऽस्मैइतिव्यु
त्पत्त्यार्पणंदेवतारूपंसंप्रदान मेवमर्प्यतेऽस्मिन्नितिव्युत्पत्त्यार्पणं
अधिकरणंदेशकालादि तत्सर्वंब्रह्मणिकल्पितत्वाद्ब्रह्मैवरज्जुक
ल्पितभुजंगवदधिष्ठानव्यतिरेकेणासदित्यर्थः एवंहविःत्यागप्र
क्षेपक्रिययोःसाक्षात्कर्मकारकंतदपिब्रह्मैव एवंयत्रप्रक्षिप्यते
ऽग्नौसोऽपिब्रह्मैवब्रह्माग्नाविति समस्तपदं तथायेनकर्त्रायजमानेना
र्पणंचत्यज्यतेप्रक्षिप्यतेचतदुभयमपिकर्तृकारकं कर्तरिवि
हितयातृतीययानूद्यब्रह्मेतिविधीयतेब्रह्मणेति एवंहुतमिति हव
नंत्यागक्रियाप्रक्षेपक्रियाचतदपिब्रह्मैव तथातेनहवनेनयद्गंत
व्यंस्वर्गादिव्यवहितंकर्मतदपिब्रह्मैव अत्रत्वएवकारःसर्वत्रसंबध्य
ते हुतमित्यत्रापिइतःएवब्रह्मेत्यनुषज्यतेव्यवधानाभावात्साकां
क्षत्वाच्च विद्यतिस्थामायुनात्वित्यादावाक्षिहोणेत्यादिपरवाक्यशे
षवत् अनेनरूपेणकर्मणिसमाधिर्ब्रह्मज्ञानंयस्यसकर्मसमाधिः
तेनब्रह्मविदाकर्मानुष्ठात्रापिब्रह्मपरमानंदाद्वयंगंतव्यमित्यनुष
ज्यते साकांक्षत्वादव्यवधानाच्चयातेअग्नेरजाशयेत्यादौतनूर्वर्षिष्ठे
त्यादिपूर्ववाक्यशेषवत् अथवाअर्प्यतेअस्मैफलायेतिव्युत्पत्त्यार्पणंदे
नैवस्वर्गादिफलमपिब्रह्मैव तथाचब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमा
धिनेत्यनेनतदर्थज्ञानफलकथनायैवेति समंजसं अस्मिन्पक्षेब्रह्म
कर्मसमाधिनेत्येकंवापदं पूर्वंब्रह्मपदंहुतमित्यनेनसंबध्यते चर
मंगंतव्यपदेनेतिभिन्नंवापदं एवंचनानुषंगद्वयक्लेशइतिद्रष्टव्यं
ब्रह्मगंतव्यमित्यभेदेनैवतत्प्राप्तिरुपचारात् अतएवनस्वर्गादिव
त्फलत्वेनगंतव्यं विद्ययाअविद्यककारकव्यवहारोच्छेदात् नहु
क्तेवार्तिककारैः कारकव्यवहारेहिशुद्धंवस्तुनवीक्ष्यते शुद्धेवस्तुनि
सिद्धेचकारकव्याप्तिंकृतइति अपर्णादिकारकस्वरूपानुपमर्दे
नैवतत्रनामादाविवब्रह्मदृष्टिःक्षिप्यते संपत्मात्रेणफलविशेषाये
तिकेषांचिद्व्याख्यानंभाष्यकारैरेवनिराकृतमुपक्रमादिविरोधात् ब्र
ह्मविद्याप्रकरणेसंपन्मात्रस्याप्रसक्तत्वादित्यादियुक्तिभिः अनुना
[illegible]

[illegible] २४

सदानंदीटीका

ननुज्ञानेसमुत्पन्नेपूर्वकर्मविनश्यतु क्रियमाणंकथंकर्मजनयि
त्वाफलंविदः १ नश्यतीत्यत्रब्रह्मैक्यबोधेनेत्याहमाधवः बहुकार॰
कसाध्यास्तिक्रियायागादिकाखिला २ देवतोद्देशतोद्रव्यत्यागोया
गउदाहृतः सएवत्यज्यमानस्यद्रव्यस्याग्नौयथाविधि ३ प्रक्षेपाद्धो
मइत्युक्तस्तत्रोद्देश्यास्तुदेवता संप्रदानंहविःशब्दवाच्यंद्रव्यंयदस्ति
तत् ४ साङ्गाङ्गात्वर्थकर्मास्तितत्फलंतुस्वरादिकं भावनाकर्मय
नः स्मान्नैतद्व्यवहितंभवेत् ५ एवंजुह्वादिकरणंप्रक्षेपेत्यंतसाधकं
भासकत्वेनमंत्रादिकरणंहिविधंतथा ६ त्यागप्रक्षेपभेदेनक्रिया
पिद्विविधेरिता त्यागेयजमानःकर्ताप्रक्षेपोधर्युकर्तृकः ७ प्रक्षेपा
धिकरणंस्यादग्निःस्वर्गादिकंफले तदेवमखिलंयज्ञक्रियाकारक
वस्तुयत् ८ ब्रह्माज्ञानेनतत्रैवाध्यस्तंरज्जौस्त्रगादिवत् ब्रह्मज्ञाने॰
नबाधेनभासमानमपिस्फुटं ९ कल्पतेनैवबंधायययथास्वप्नप्रजा
गरे ब्रह्मदृष्टिरियंसर्वयज्ञरूपतयाधुना १० स्तूयतेहरिणासम्यगह
ष्टिदार्ढ्यायतत्तद्विदां अर्पणंवार्प्यतेनेनजुह्वादिकरणंहियत् ११
अर्प्यतेस्माइतिप्रोक्तंसंप्रदानंचदेवता अर्प्यतेस्मिंस्तुदेशायाधारोपि
करणंतथा १२ ब्रह्मण्यारोपितत्वात्तत्सर्वंब्रह्मैवनेतरत् कल्पितस्य
पृथक्सत्ताधिष्ठानान्नास्तिसर्वथा १३ त्यागादिकक्रियाकर्महविर्ब्र
ह्मैववस्तुसत् यत्रप्रक्षिप्यतेग्नौतत्सोपिब्रह्मैवकेवलं १४ यज्यते॰
क्षिप्यतेयेनसकर्ताब्रह्मवित्स्वयं त्यागप्रक्षेपरूपायाक्रियाब्रह्मैवतत्
हुतं १५ हुतेनतेनगंतव्यंफलंब्रह्मस्वरादितत् कर्मरूपेणतद्रूपेणस॰
माधिर्यस्यधीमतः १६ तेनब्रह्मविदाब्रह्मगंतव्यंचित्स्वरूपकं १७ २ ४

नीलकंठीटीका

कुतोविदुषांकर्माणिप्रविलीयंतइत्याशंक्याह ब्रह्मार्पणमिति य
तस्तेविद्वांसःसविकल्पसमाधौसर्वंजगत्प्रत्यक्चितिशक्तिनिर्मितं

पश्यंति तथाचश्रुतिः किंकारणमित्युपक्रम्यकालःस्वभावइति·
कालादीनिलोकदृष्ट्यानोकानिकारणान्युपदिश्यकारणंनिर्णीयते
ध्यानयोगानुगताअपश्यन्देवात्मशक्तिंस्वगुणैर्निगूढामितिसमाधि
नादर्शयति तथाचसमाधिनासर्वस्यब्रह्मणिकल्पितत्वंपश्यतांतेषां
यदर्पणंअर्पणसाधनंमंत्रस्त्रुगादितत्ब्रह्मैव एवशब्दःसर्वत्रानुषंज·
नीयः यदर्पणीयंहविस्तदपिब्रह्मैव यत्हुतंहवनक्रियाहुतंतदर्पितंदे·
वताग्न्यादिवातदपिब्रह्मैव यत्ब्रह्मोहुतंतदपिब्रह्मणैवहुतं अत्र·
ब्रह्मणीतिपदमध्याहर्तव्यं यत्यजमानेनहुतंतद्ब्रह्मणैवहुतं यत्तेन
कर्मणागंतव्यंप्राप्तव्यंफलंतदपिब्रह्मैव किंबहुनायत्किंचित्तस्यकर्म
शयनासनादिकंतत्सर्वंब्रह्मैव तत्रकारणंसमाधिनासमाधिजेना·
त्मसाक्षात्कारेण यतःसर्वमस्यब्रह्मात्मकंब्रह्मचप्रत्यगात्मभूत अ·
तःप्रदेयस्यफलस्याभावात्कर्माणिप्रविलीयंतेदाह्याभावाद्दहनइवे
तिभावः यत्तुकर्माणितदंगेषुचनामादिष्विवब्रह्मदृष्टिरत्रविधीयतइ
तिव्याख्यानंतत्तुउपक्रमादिविरोधात्ब्रह्मविद्यायाःप्रकृतत्वाच्चासं·
गतमितिभाष्यएवनिरस्तं याहिब्रह्मविदांकर्मांगेषुतात्विकीब्रह्म
दृष्टिःकीर्तितासार्थितप्रत्तलक्षणवद्ब्रह्मविदामनुष्ठानायैवफलतो
भवतीतिनतत्रतस्यास्तात्पर्यंवर्णनीयमितिदिक् २४

आनंदीटीका

योयत्कार्यःसतत्रैवलीयतइति प्राप्तेकर्मणोब्रह्मात्मत्वंदर्शयति
ब्रह्मणेब्रह्मस्वरूपायैसंप्रदानभूतायैदेवतायैअर्पणंयस्यतद्दर्पणंहवि
राज्यतिलादिकंहवनीयद्रव्यंब्रह्मब्रह्मस्वरूपंसत् ब्रह्माग्नौब्रह्मा·
त्मकेएवाग्नौश्रौतेस्मार्तेवाधिकरणेब्रह्मणाब्रह्मात्मकेनैवमंत्रेण·
करणेनहुतंयजमानऋत्विगादिभिर्ब्रह्मात्मकैःकर्तृभिर्हवनक्रिया
कर्मतामापादितं तेनेत्थंभूतेनहुतेनहवनक्रियया ब्रह्मकर्मसमा·
धिनाब्रह्मात्मकेकर्मणिसमाधिःसर्वेषुकारकेषुब्रह्मबुद्धिर्यस्यय
स्येदृशेनपुरुषेणब्रह्मैवगंतव्यंप्राप्यंक्रियाफलं अत्रैषवाक्यार्थःस
र्वेषुक्रियाकारकेषुब्रह्मणोव्याप्तिज्ञानेनाहंब्रह्मास्मीतिभावितात्मा

गी॰ टी॰ ४॰

नयैवभावनयाकर्मकुर्वाणोमोक्षमाप्नोतीति २४

रामकंठीटीका

तेनगतसंगादिविशेषणविशिष्टेनयोगिनाब्रह्मैवगंतव्यमतःसमग्रं
तस्यकर्मप्रविलीयतेइतिसंबंधः तदेतद्व्याख्यायते तेनयोगिनाब्रह्म
त्वादिधर्मयोगात् ब्रह्मशब्दवाच्यपरमार्थतत्वमेव योगयतावशान्नि
र्विकल्पतयाप्रकाशमानंगंतव्यंसंप्रदानत्वेनोपस्थातव्यं नहितथा
विधस्ययोगिनः तत्तत्फलाभिसन्धिनातत्तद्देवतान्तरंसम्प्रदानत
यागंतव्यत्वमर्हति कीदृशेनतेनगंतव्यं ब्रह्मकर्मसमाधिना सम
न्मिषितेविज्ञानात्मकेदिव्येचक्षुषियथोक्तब्रह्माभेदेनप्रथमानंक
र्मब्रह्मकर्म सएवसमाधिनिरुत्तरोयोगोयस्यसतथातेनतादृशेन
कीदृशंब्रह्मगंतव्यं ब्रह्मणाब्रह्माभिन्नस्वरूपतयास्वात्मानंमन्यमाने
नयजमानेनहुतंतर्पितंब्रह्मस्वरूपतया प्रतिपन्नेग्नौजातवेदसि की
दृशेब्रह्मब्रह्मार्पणे ब्रह्मरूपतयैवप्रतीयमानमर्पणमाज्यपयःसो
मादियागद्रव्योपकरणसाधनंहस्तादियत्रतत्तादृशंतथाब्रह्मह
विःब्रह्मत्वेनैवप्रतिपाद्यमानंहविःहूयमानमाज्यादिद्रव्यंयत्रतत्तथा
विधं इदमनेनप्रतिपादितं यद्यद्वस्तु यथायथाप्रकाशते तत्तत्प्रका
शमानत्वादेवप्रकाशादभिन्नस्वरूपंसत्परमात्मव्यतिरिक्तंपरमार्थतः
पदार्थजातंनकिंचित्संभवतीतितत्वविद्भिःस्वसंवेदनसंवेद्यत्वान्नि
ष्कंपोपपत्त्युपलब्धिप्रदर्शनक्रमेणव्यवस्थापितोप्ययमात्मैश्वर्याद्वय
नयोनयस्यकस्यचित्प्रतिपत्तिगोचरतामुपगच्छति परमेश्वरेणैववि
हितनियतत्वात् तदयमैश्वरोनियमःस्वेच्छावभासितान्योन्यभिन्नस्वरू
पेषुविश्वपरिसंख्येयेषुप्रमातृषुकेचिदेवस्वेच्छावशादसावनुगृह्णा
ति तस्यचानुगृहीतमात्रस्यतत्वावलोकव्यवधायकसंदेहमहा
गिरीन्द्रनिर्दलनदंभोलिधाराभिन्नोन्मिषति तत्प्रभावाश्चयथोक्त
तत्वज्ञानंशास्त्रात्मकमाम्नायोपदेशादिनोपनमति तस्मिंश्चाविष्कृत
प्रज्ञासिद्धासिंधुनिर्धौतनिखिलविकल्पकलंकयापरमयाप्रज्ञया
निरंतरमनुशील्यमानेदेहिदेहविवेकज्ञानलक्षणमद्वैतप्रहारम

प्राप्तं भवति तत्र लब्धप्रवेशोऽस्मिन्ब्रह्मार्पणविधाने धिकृतो॰
योगी भवत्यत उक्तं गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः यज्ञा
याचरतः कर्म समग्रं प्रविलीयते तेन च ब्रह्मैव गंतव्यमिति यज्ञा
य्यस्य कर्मणः प्राधान्याद्दृष्टादृष्टविषयसकलक्रियोपलक्षणा
र्थत्वेन ग्रहणमिह वेदितव्यं यतः पश्यंशृण्वन्जिघ्रन्नित्यादिना सर्वासु क्रि
यास्वेतां ब्रह्मदृष्टिं भावनामभियास्यत्येव [illegible]
[illegible]
[illegible]
[illegible]
[illegible] २४

लासिकी [illegible]टीका

कथं क्रियमाणमेव कर्म प्रविलीयत इति समाधिसिद्धिनान्तरीय
कां ब्रह्मदृष्टिं तत्सिद्धिं कर्मप्रविलयकारणभूतां प्रतिपादयितुमाह ब्रह्मा
र्पणमिति तेनैव गतसंगादिविशेषणविशिष्टेन योगिना ब्रह्म गंतव्य
मतः समग्रं कर्म तस्य प्रविलीयत इति संबंधः तेनैव योगिना ब्रह्म निरु
पाधिकं परमार्थतत्त्वं संप्रदानत्वेन दृष्टं गंतव्यं प्राप्तं शक्यं योग्यं वा कीदृ
शेन ज्ञानात्मकच्छद्मरुन्मीलनेन ब्रह्मैव कर्म ब्रह्माभेदेन प्रथमानकर्म
तस्मिन्समाधिर्निरुक्तो योगो यस्य तेन पुनः कीदृशेन ब्रह्मणा ब्रह्माभि
न्नस्वरूपेण यजमानात्मकेन कीदृशं ब्रह्म ब्रह्मार्पणं ब्रह्मरूपतया प्र॰
तीयमानमर्पणं स्रुक्स्रुवादि यत्र तत् तथा ब्रह्म हविर्ब्रह्मत्वेन भास॰
माने हविराज्यादि द्रव्यं यत्र तत् तथा ब्रह्माग्नौ ब्रह्मरूपतया प्रतिपन्ने
ऽग्नौ हुतं तर्पितं इदमनेन प्रतिपादितं यद्यद्वस्तु यथा प्रकाशते तत्प्रका
शमानत्वात् प्रकाशादभिन्नस्वरूपं प्रकाशाद्व्यतिरिक्तं परमार्थतः प
दार्थजातं न किंचित्संभवतीति तदुक्तं कालिकाक्रमे तत्तद्रूपतया ज्ञा
नं बहिरंतः प्रकाशते ज्ञानादृते नार्थसत्ता ज्ञानरूपं ततो जगत् नहि ज्ञा
नादृते भावाः केनचिद्विषयीकृताः ज्ञानं तदात्मतां प्राप्तमेतस्मादवसी

यतेइति तथाश्रीप्रत्यभिज्ञायां प्रागिवार्थोप्रकाशःस्यात्प्रकाशा
त्मतयाविनान्यप्रकाशोभिन्नःस्यादात्मार्थस्यप्रकाशता भिन्नेप्र
काशेचाभिन्नेसंकरोविषयस्यतत् प्रकाशात्माप्रकाशेपार्थोनाप्र
काशश्चसिद्ध्यतीति एवंविद्ब्रह्मैवेत्युच्यते इत्येवंतत्त्वविद्भिर्व्यवा
स्थापितोयमद्वयनयोनयस्यकस्यचिदीश्वरानुग्रहेणविनाप्रतिपत्ति
५मा गोचरतामुपैति तदुक्तं गमेषु यत्रास्तिसर्वलोकस्यतदस्तीतिवि
रुध्यते निगद्यतेयदादेविहृदयेनप्ररोहति एतस्मात्कारणाद्देवि
देवताभिःप्रगोपितं तेनसिद्धेनदेवेशिकिंनसिध्यतिभूतलेइति
यदिकस्यचिदीश्वरानुग्रहात्तत्त्वविदीश्वरानुग्रहेणगुरूपदेशेनो
पलब्धदेहात्मविवेकस्य ततउक्तोपपत्याप्रत्यगात्मसमाधानप
रिशीलनतारतम्यतत्परस्याहंतलक्षणज्ञानद्वारमपावृतंभवति
सयोगीतत्रलब्धप्रवेशोस्मिन्ब्रह्मार्पणविधानेविकृतोभवति ते
नैवब्रह्मगंतव्यमित्युक्तं अनेनचाहंब्रह्मास्मीतितत्त्वमस्यादिवाक्य
जन्यब्रह्मसाक्षात्कारेणःज्ञाननत्कार्यनिवृत्तिलक्षणःप्रत्यक्षवा
थ एवंविवक्षितः नतुशास्त्रीयोयौक्तिकोवाबाधःपंडितैरस्माभि
मतः अयमेवसर्वत्र ब्रह्मदर्शनलक्षणज्ञानयज्ञःसर्वयज्ञोपायप्रा
प्यत्वात्सर्वयज्ञेभ्यःश्रेष्ठः २४

पंचोलीटीका

कस्मात्पुनःकारणात्क्रियमाणंस्वकार्यप्रारंभमकुर्वतःसमग्रं
प्रविलीयतेइत्याह ब्रह्मार्पणमिति अर्प्यतेहूयतेयेनस्रुगादिना
तदर्पणंब्रह्मैवहविरपिहुतादिकंब्रह्मैवाग्निरपिब्रह्मैवतस्मिन्नग्नौ
ब्रह्मणाकर्त्राहुतहोमःब्रह्मैवएवंयःपश्यतितेनब्रह्मकर्मसमा
धिनाब्रह्मात्मकेकर्मणिसमाधिःचित्तैकाग्रतायस्यसः तेनब्रह्मै
वगंतव्यंनफलांतरमित्यर्थः २४

रमावीरमसिद्धबोधिनी

ब्रह्मार्पणमिति वेदस्तत्त्वंतपोब्रह्मेत्यनुशासनाद्ब्रह्मशब्दोयथ

पिवेदसामान्यंब्रूते तथाप्यग्नौविन्याद्दिपोषावगमइतिन्यायाद्धु
हुतदधिकारिब्रह्मादिमत्ताचौविन्याद्धनुर्वेदरूपविशेषपरः
तेनेचहवनक्रियायामनुपपन्नकर्तृताकेनस्वाधिकारीक्षत्रि
यप्रवरोलक्ष्यते तथाचब्रह्मणाधनुर्वेदाधिकारिणाक्षत्रियवी
रेणेत्यर्थःसिद्धः ब्रह्महविरित्यत्रापिब्रह्मपदाद्धोनस्वाभिधेयस्य
धनुर्वेदस्यहविरारोपणाद्धवनक्रियायांकर्मत्वासिद्धेस्तदधिका
रिणःप्रतिहद्विनःक्षत्रियहन्तयोग्वीरपुरुषालक्ष्यंते तथाचहूय
तेउपकृत्याग्नौप्रक्षिप्यतेयत्पश्वादितद्धविः ब्रह्मधनुर्वेदाधिका
रिणःप्रतिपक्षापवद्धविरालभनीयमश्वादिकमित्यर्थः ब्रह्मा
ग्नावित्यत्रापिवह्न्यारोपेणतादृशमहावीररूपहूयमानद्रव्यप्र
क्षेपाधिकरणत्वानुपपत्तेः स्वप्रतिपाद्यपुरुषंलक्ष्यते तथाचपु
रुषरूपेग्नावित्यर्थः ब्रह्मार्पणमित्यत्रब्रह्माविप्रःप्रजापतिरित्य
नुशासनाद्ब्रह्माप्रजापतिःपरमेश्वरः तस्मैअर्प्यतेदीयतेयत्ताद
र्पणहविरित्यर्थः अन्वितार्थस्तु येनब्रह्मणाक्षत्रियप्रवरेणब्रह्मा
ग्नौपुरुषयज्ञाद्धवनीयाग्नौब्रह्महविः पशुमनुष्यात्मरूपमालभनी
यंपश्वादिहुतमत्तदेवतामंत्रोद्देशेनशस्त्रादिभिरुपाकृत्यस्वर्गा
दिलोकान्स्थापितं कीदृशंतत्ब्रह्मार्पणं अनेनपुरुषयज्ञेनपरमे
श्वरोमेप्रीयतामितिसंकल्प्यब्रह्मणेपरमेश्वरायार्प्यतेयत्तत् य
थाश्वमेधादौयज्ञेइंद्रादिदेवतोद्देशेनाश्वादिकं हविरुपाक्रियते
एवंपुरुषयज्ञेपिपरमेश्वराज्ञांपुरस्कृत्यतत्प्रीणनार्थंदुष्टशत्रुवा
तःक्रियते इतितात्पर्यं अतएव परित्राणायसाधूनांविनाशाय
चदुष्कृतां धर्मसंस्थापनार्थायसंभवामियुगेयुगे इत्युक्तेरी
श्वरेणावतीर्यदुष्टवधादिकंक्रियते तस्यानेनैवसंपादनादेवं
एवंपरमेश्वरप्रीतिर्भवतीतिभावः एतादृशस्यपुरुषयज्ञस्यफलमाह

ब्रह्मैवेति तेन क्षत्रियप्रवरेण ब्रह्म सर्वतत्त्वोपरि वर्तमानं परमे
श्वराख्यं तत्त्वं तत्सायुज्यमेव गंतव्यं प्राप्तव्यमस्ति अतिकर्मणैव
तस्य मुक्तिरपि प्रतिपादिता कथंभूतेन तेन ब्रह्मकर्मसमाधि
ना ब्रह्मयजुर्वेदस्तत्प्रोक्तं यत्कर्म प्राणादिसंधानादिकं प्रतिपक्ष
प्रयुक्तास्त्रादिनिवारक प्रत्यस्त्रादिमोक्षणादिकं च तत्र समाधिः
सावधानता प्रमादो यस्य तेन यद्वा ब्रह्मयजुर्वेदाधिकारी क्षत्रि
यस्तं प्रतीश्वरेण विहितं यत्कर्म समरचर्यादिलक्षणं तत्र समा
धिस्थितस्थैर्यं निश्चयदार्ढ्यं यस्येति २४ ॥

मधुभाष्य

ब्रह्मार्पणमिति सर्वं तद्ब्रह्मेत्युच्यते तदधीनसत्ताप्रतीति
त्वात् न तु तत्स्वरूपत्वात् उक्तं हि त्वदधीनं यतः सर्वमतः
सर्वो भवानिति वदंति सूरयः सर्वेन तु सर्वस्वरूपत इति पा
द्मे सर्वं तत्प्रततानेत्रमिति च एतं ह्येव बह्वृचा इत्यादि च समा
धिना सह ब्रह्मैव कर्म यस्य तेन भेदनाद्र २४ ॥

जो यह शंका करो कि धर्म शास्त्र तो वेद का अर्थही है औ तिसमे
लिखते है कि ना भुक्तं क्षीयते कर्म अर्थात् विना भोग किये कर्म
क्षीण नही होता कर्मका फल भोगना ही पडता है तो इसपर क
हते है कि संपूर्ण क्रिया औ कारक तथा फल रूप जो कछु हैतेहै
सो सब ब्रह्ममात्र कहे ब्रह्म छोड और कछु नहीहै ऐसे ज्ञानवान
ब्रह्मज्ञानी ब्रह्मरूप पुरुष के यावत कर्म विलीन हो जातेहै इसमे
कछु संदेह नही सोई उपनिषद मे कहा है कि ब्रह्म विदो ब्रह्मैव
सर्वे क्रिया कारक फल जातं भवति सोई कहते है कि ब्रह्मके अर्थ
और ब्रह्मही हवि तथा ब्रह्मरूप अग्निमे ब्रह्मही ने दियाहै इस प्रका
र जो जानता है अर्थात् होम अग्नि स्रुवा हवि कर्त्ता क्रिया घृत आ
दि सब सामग्री और जिसको दिया जाय यह सब जो है सो ब्रह्म अति
रेक और नहीहै ब्रह्मकर्ममे है समाधि कहे चित्त वृत्ति जिसकी
सो अवश्य ब्रह्म को प्राप्त होताहै जैसे इन कर्मो की कर्ममे गिन
ती नही तैसेही भगवत आराधन कर्मकी भी कर्ममे गणना ना
हीहै ऐसे कर्म जो हैं सो अकर्म ही है फेरि इनका फल भोगना
कहांहै और जो फलहै तो ब्रह्म या भगवत प्राप्ति रूप हीहै और नही २४

चौपई

ब्रह्महि मे सो अर्पण होई ब्रह्म हवि यह जानो सोई ब्रह्म
अनलमें प्रेमसमेत ब्रह्म आहूत हूं नितदेत ब्रह्महि
मे सो जाय समाय ब्रह्मकर्म समाधिको पाय २४॥

125

दैवमेवापरे यज्ञं योगिनः पर्युपासते, ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति २५

शांकरभाष्यं

तत्र अधुना सम्यग्दर्शनस्य यज्ञत्वं संपाद्य तत्स्तुत्यर्थमन्येपि यज्ञा उपक्षिप्यंते दैवमेवेत्यादिना देवमेव देवा यज्यंते येन यज्ञेनासौ दैवो यज्ञस्तमेवापरे यज्ञं योगिनः कर्मिणः पर्युपासते कुर्वंतीत्यर्थः ब्रह्माग्नौ सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदं ब्रह्म यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतर इत्यादिवचनोक्तमशनायादिसर्वसंसारधर्मवर्जितं नेति नेतीति निरस्ताशेषविशेषं ब्रह्मशब्देनोच्यते ब्रह्म च तदग्निश्च स होमाधिकरणत्वविवक्षया ब्रह्माग्निस्तस्मिन् ब्रह्माग्नावपरेऽन्ये ब्रह्मविदो यज्ञं यज्ञशब्दवाच्य आत्मा आत्मनामसु यज्ञशब्दस्य पाठात् तमात्मानं यज्ञं परमार्थतः परमेव ब्रह्म संतं बुद्ध्याद्युपाधिसंयुक्तमध्यस्तसर्वोपाधिधर्मकमाहुतिरूपं यज्ञेनैवात्मनैवोक्तलक्षणेनोपजुह्वति प्रतिक्षिपंति सोपाधिकस्यात्मनो निरुपाधिकेन परब्रह्मस्वरूपेणैव यद्दर्शनं स तस्मिन् होमस्तं कुर्वंति ब्रह्मात्मैकत्वदर्शननिष्ठाः संन्यासिन इत्यर्थः २५

आनंदगिरिकृतटीका

ज्ञानस्य यज्ञत्वं संपाद्य पूर्वश्लोके स्थिते सत्यधुना तस्यैव ज्ञानस्य स्तुत्यर्थं यज्ञान्तरनिर्देशार्थमनंतरग्रंथप्रवृत्तिरित्याह तत्रेति सर्वस्य श्रेयःसाधनस्य मुख्यगोणवृत्तिभ्यां यज्ञत्वं दर्शयन्नादौ यज्ञद्वयमादर्शयति दैवमेवेति प्रतीकमादाय दैवयज्ञं व्याचष्टे देवा इति सम्यग्ज्ञानाख्यं यज्ञं विभजते ब्रह्माग्नाविति तत्र ब्रह्मशब्दार्थं स्फुटयन्बृंहभेन स्पृशयति सत्यमिति यदजमनंतमविपरीतमपरिच्छिन्नं ब्रह्म तस्य परमानंदत्वेन परमपुरुषार्थत्वमाह विज्ञानमिति तस्य ज्ञानाधिकरणत्वेन ज्ञानत्वमौपचारिकमित्याशंक्याह यत्साक्षादिति जी

व्रह्मविभागे कथमपरिच्छिन्नत्वमित्याशंक्य विशिनष्टि यस्मात्मेति प
रस्यैवात्मत्वं सर्वस्माद्देहादेरव्याकृतान्तादान्तरत्वेन साधयति सर्वान्त
र इति विधिमुखेन सर्वमेवोपनिषद्वाक्यं व्रह्मविषयमादिशद्दार्थः निषे
धमुखेन व्रह्मविषयमुपनिषद्वाक्यमशेषमेवार्थतो निवध्नातीति अशनाये
ति व्रह्मण्येव अग्निशब्दप्रयोगे निमित्तमाह सहोमेति ज्ञाद्युपलक्षितयास
र्वस्य दाहकत्वाद्विलयस्य वा हेतुत्वादिति द्रष्टव्यं यज्ञशब्दस्यात्मनि त्वंप
दार्थे प्रयोगे हेतुमाह आत्मनामस्त्विति आधाराधेयभावेन वा स्वत्वा
भेदं व्रह्मात्मनोर्व्यावर्तयति परमार्थत इति कथं तर्हि होमो न हि तत्रैवे
व तत्र होमः संभवतीत्याशंक्याह उपाधीति उपाधिसंयोगफलं कथ
यति अध्यस्तेति उपाध्यध्यासद्वारा तद्धर्माध्यासे प्राप्तमर्थं निर्दिशति
आहुतीति इत्थंभूतलक्षणात्तृतीयामेव व्याकरोति उक्तेति अशना
यादि सर्वसंसारधर्मवर्जितेन निर्विशेषेण स्वरूपेणेति यावत् आत्मनो
व्रह्मणि होममेव प्रकटयति सोपाधिकस्येति परस्यत्वंपदार्थस्फोरयति
व्रह्मेति २५

स्वामिकृतटीका

यत देवयज्ञत्वेन संपादितं सर्वत्र व्रह्मदर्शनलक्षणं ज्ञानं सर्वयज्ञोपाय
प्राप्यत्वात् सर्वयज्ञेभ्यः श्रेष्ठमित्येव स्तोतुमधिकारिभेदेन ज्ञानोपा
यभूतान् वहून्यज्ञानाह दैवमेवेत्यादिभिरष्टभिः श्लोकैः दैवा इन्द्रव
रुणादयः इज्यन्ते यस्मिन् उपकरणैरादिषु व्रह्मबुद्धिरहितत्वदर्शिनस्तं दैव
मेवयज्ञमपरे कर्मयोगिनः पर्युपासते श्रद्धयानुतिष्ठंति अपरे ज्ञान
योगिनः व्रह्मरूपेऽग्नौ यज्ञेनैवोपायेन व्रह्मार्पणमित्युक्तप्रकारेण
यज्ञमुपजुह्वति यज्ञादि सर्वकर्माणि प्रविलापयंतीत्यर्थः सोयं
ज्ञानयज्ञः २५

पिशाचभाष्य

स्तेषां इदं दैवं सोमयागादि अपरे योगिनः अनुष्ठानमंतरेणापि दैव
मेव यज्ञं ध्यानेन निष्पादयंति सत्वगुणप्रधानं व्रह्मैवाग्निरूपेण उपास्यं व्र
ह्माग्निः तस्मिन् व्रह्माग्नौ अपरे तु यज्ञं परमात्मानं यज्ञेन सोमयागादि
नाऽपजुह्वति ध्यानेन संपादयंति होममित्यर्थः २५

पूर्वश्लोके विद्वद्धीर्पणा
दिपंचकव्रह्मोपासन
प्रसंगेनोपासनान्तराणि
सत्वगुणप्रधानमविद्वद्धामा
ह दैवमेवापर इति विद्वद्धा
मात्मैवेदं सर्वमिति परमा
र्थद्रूपत्वं नियमागतमुप
दिश्यदानीं व्रह्मदृष्टिकृतं
व्यतयोपदिश्यते दैवा इन्द्रा
दय

१२६

रामानुजभाष्यं

एवंकर्मणोज्ञानाकारतांप्रतिपाद्यकर्मयोगभेदानाह दैवमिति दैवंदेवार्चनरूपंयज्ञमपरेकर्मयोगिनःपर्युपासतेसेवंतेतत्रएवनिष्ठांकुर्वंतीत्यर्थः अपरेब्रह्माग्नौयज्ञंयज्ञेनैवोपजुह्वति अत्रयज्ञशब्दोहविःस्रुगादियज्ञसाधनेवर्ततेब्रह्मार्पणंब्रह्महविरितिन्यायेन होममेवनिष्ठांकुर्वंतीत्यर्थः २५

अभिनवगुप्तकृतटीका[illegible] २५ [illegible]

परमार्थप्रपाटीका

अथ हूयतेयस्मिन्निति यज्ञ इतिव्युत्पत्त्यायज्ञरूपत्वेनोपपादितंब्रह्मानुभवलक्षणंज्ञानंतत्सर्वयज्ञेभ्यः श्रेष्ठमितिदर्शयितुंतथातदधिकारिभेदात्तद्रूपेतिवक्तुंद्वादशयज्ञानाह

दैवमित्यादिनाष्टभिः दैवमिति अपरेयोगिनःकर्मकुशलाःदैवंयज्ञंपर्युपासते देवसंबंधोदैवःइंद्रसूर्यवरुणादयइज्यंतेयस्मिन्नितिदैवस्तंयज्ञंपरितःसर्वत्रदेवेषुब्रह्मबुद्धिरादित्येनोपासतइत्यर्थः अपरेज्ञानयोगिनस्तुयज्ञेनज्ञानयज्ञेनकृत्वायज्ञंकर्मरूपंब्रह्मरूपेग्नौजुह्वतिप्रविलापयंतीत्यर्थः २५

वनमालीटीका

एवंसामान्यतःकर्मीकृतंज्ञयज्ञोपासनादिभेदेनभिन्नमित्याह दैवमितिअष्टाभिःअपरेयतयोदैवमेवदैवंविष्णुयज्ञंयथातथोपासतेयज्ञरूपिणमुपासतेमनसाध्यायंतइत्यर्थः अपरेवनस्था[illegible]ःयज्ञेनांतर्यामिणाविष्णुनाप्रेरिताएवब्रह्मरूपाग्नौयज्ञंस्वोचितक्रियांजुह्वति यथादर्भान्जुहोतीत्यत्राग्नौदर्भार्पणेनहोमोभवति तथास्वकृतस्यकर्मणोंतःस्थोभगवानेवकर्मकारयतितेनसएवप्रीणात्वित्यर्पणेनहोमोभवतीत्यर्थः अग्न्यादिगतंतमुद्दिश्यपतत्त्वीतयेतत्स्वेरणयाहविस्त्यागंकरोमीतिज्ञात्वातत्कृत्वाचांतःकरणशुद्ध्यादिद्वारामोक्षंलभतइतिभावः २५

ऊसमेवैजयंतीटीका

एवंकर्मणोब्रह्मानुसंधानत्वेनज्ञानाकारत्वमुक्त्वेदानींकर्मयोगा

गी॰
टी॰
च॰

127

स्यानेकान्भेदानाहदैवमित्यष्टभिः दैवमेवेति अपरेयोगिनःकर्म
योगिनोदेवमेवदेवपूजनरूपमेवयज्ञंपर्युपासतेसेवन्तेतस्मिन्ने
वनिष्ठांकुर्वंतीत्यर्थः अपरेपिकर्मयोगिनोब्रह्माग्नौउक्तन्यायेनब्रह्म
रूपेग्नौयज्ञेनस्रुगादिनायज्ञेनयज्ञंसर्पिःतिलादिकंजुह्वतिहव
नंकुर्वंतिहोमएवनिष्ठांकुर्वंतीत्यर्थः २५

अधुनासम्यग्दर्शनस्य
मैत्रेष्यितेननरपितस्य

मधुसूदनीटीका

यज्ञरूपत्वेनस्तावकतयाब्रह्मार्पण
स्तत्यर्थमितरान्यज्ञानुपन्यस्यति ॥

देवाइंद्राग्न्यादयइज्यंतेयेनसदैवः तमेवयज्ञंदर्शपूर्णमासज्योतिष्टो
मादिरूपमपरेयोगिनःकर्मिणःपर्युपासतेसर्वदाकुर्वंतिनज्ञानयज्ञं
एवंकर्मयज्ञमुक्त्वांतःकरणशुद्धिद्वारेणतत्फलभूतंज्ञानयज्ञमा
ह ब्रह्माग्नौसत्यज्ञानानंतानंदरूपंनिरस्तसमस्तविशेषंब्रह्मत
त्पदार्थः तस्मिन्नग्नौयज्ञेनप्रत्यगात्मानंत्वंपदार्थंयज्ञेनैवयज्ञशब्द
आत्मनामसयास्केनपठितः इत्थंभूतलक्षणेतृतीया एवकारोभे
दाभेदव्यावृत्त्यर्थः त्वंपदार्थाभेदेनैवोपजुह्वति तत्स्वरूपतयापश्य
तीत्यर्थः अपरेपूर्वविलक्षणास्तत्वदर्शननिष्ठाःसंन्यासिनइत्यर्थः
[illegible] तं॰
[illegible]
[illegible]
[illegible] २५

सदानंदीटीका

एवंसंपाद्ययज्ञत्वंसम्यग्दृष्टेरथाधुना तत्स्तुत्यर्थमन्यान्यज्ञानुपा
न्यस्यतिकेशवः१ देवाइंद्रमुखायेनेज्यंतेयज्ञःसदैवकः तंकुर्वंति
सदायज्ञंयोगिनःकर्मिणोपरे २ सत्यज्ञानमनंतंयन्निर्विशेषंनिरं
जनं तत्पदार्थःपरंब्रह्मतदेवाग्निःकृताश्रयः ३ तस्मिन्नग्नौविदा
त्मानंत्वंपदार्थंप्रभुत्तवः यस्ततोब्रह्मसंततंयज्ञेनुज्ञ्यादिसयुते ४
श्राद्रूतिरूपमप्यत्वंब्रह्मत्वेनैवजुह्वति सर्वोपाधिपरित्यागाद्ब्रह्मा
त्मैकमखंडितं ५ पश्यंतिब्रह्मनिष्ठास्तेभेदंसम्यग्गिरःसएव यज्ञेव

नैवसंपाद्यब्रह्मात्माभेददर्शिनं ९ तत्कोतं पद्मनेमध्येतत्साधन
मवेक्षुवै श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञइतीहसा संस्तुतिर्ज्ञानिय
ज्ञस्यसम्यग्भगवतोच्यते ७ २५

नीलकंठीटीका

एवंसम्यग्दर्शनस्ययज्ञत्वंसंपाद्यतत्स्तुत्यर्थंयज्ञांतराण्युपदिशति
दैवमेवेत्यादिना दैवंदेवताप्रधानमेवदर्शपूर्णमासादियज्ञंनांत्यप
केयोगिनःकर्मयोगिनःपर्युपासते अपरेतुब्रह्मैवसत्यज्ञानानंतं
दात्मकमविडैकरसंवस्तुतदेवज्ञातंसतसर्वकर्मदग्धत्वादग्निरिवा
ग्निर्ब्रह्माग्निस्तत्र यज्ञंजीवंयज्ञशब्दस्यात्मनामसुपाठात् सोपाधि
यज्ञेनैवआत्मनैवनिरुपाधिकेनरूपेणजुह्वतिघटाकाशमिवमहा
काशेउपाधिप्रहाणेनप्रविलापयंतिसोऽयंज्ञानयज्ञोऽग्रयः २५

आनंदीटीका

अथनानाविधभावभेदेनउक्तांयज्ञभेदान्ब्रह्मार्पणप्रकारस्कानेः
वोपदिशति दैवंहिरण्यगर्भादित्यादिदेवोपासनंयज्ञमपरेयोगिन :
कर्मयुक्तिज्ञावास्यइष्यैराज्यतिलादिभिःपर्युपासतेतत्तेषांफलंनिः
स्थहाणांतदुपासनयेकात्मताप्राप्तानांपर्यंतेहिरण्यगर्भादीनाम
धिकारलयेतैःसहब्रह्मप्राप्तिरितिसिद्धमेव अपरेवासड्वाणाम
संपत्तिदर्शिनःयज्ञेनैववास्ययज्ञोपकरणक्रमेणैवयज्ञंविसृब्रह्मा
ग्नौज्ञानाग्नौमानसिकयागविधिनाजुह्वतिसमुपासते स्फुटोहि
मनोयागस्तत्रतत्रतंत्रेषु २५ ॥ इदानींवर्णाश्रमविभक्ताधिकार्यवस्थादिविभेदाद्येषुयेषु
नाविधातव्याऽनुष्ठानत्वेनतान्प्रतिपादयं
यज्ञप्रभेदेषुभावनायोगि
रामकंठीटीका
प्राधान्येनप्रकारद्वयंतस्यैवज्ञानयज्ञकारणभूतप्रकार
लेशानावद्दाशाभ्यंतरसाधन
त्रयसहितंश्लोकत्रयेण
ह ॥
अपरेकेचिद्योगिनःसंप्रत्यनुत्तमत्रयथोक्ततत्त्वज्ञानत्वात्क्रियामात्रस
हितादैवमेवयज्ञंसमुपासते देवानामग्नीषोमप्रजापतीन्द्रादिनांदी
नांप्राधान्येनेज्यमानत्वाद्दैवमस्वधिनेयागमनुष्ठानेनभजंतेनान्यम्
यत्रऋत्विगाज्यपयःसोमादिचेतनाचेतनेवासंद्रव्यमुपकरणं अप

गी॰ परेतेभ्योऽन्ये तत्त्वविदस्ते नैव यज्ञेन तत्तदुपकरणाभावावस्थिता-
टी॰ त्ममयेन यज्ञमात्मानमेव उपजुह्वतिप्रीणयंति कुब्रह्माग्नौ ब्रह्म न
ब॰ त्वज्ञानं सप्रपंच परप्रकाशात्मकत्वात्सकलशुभाशुभकर्मफलदा-
हहेतुत्वं चाग्निस्तस्मिन् एतदुक्तं भवति ब्रह्मार्पणविधानविदो दैव
मेव यज्ञं ज्ञानयज्ञत्वमापादयन्ति अथान्ये केचन योगिनश्चित्तवृत्ति
128 निरोधलक्षणसमाधिनिष्ठा अबहिस्साधनसाध्यं यज्ञमनुतिष्ठंतः २५
[illegible]
[illegible]
[illegible]र्दः २५

लासिकी [illegible]टीका

इत्येवं स्रोतमधिकारिभेदेन ज्ञानोपायभूतान्बहून्यज्ञान्प्रतिपादय
ति दैवमिति अपरे केचिद्योगिनो नुत्पन्नब्रह्मात्मैक्यज्ञानत्वात्क्रियमा-
णेषि कर्मणि आत्मसमाहिता दैवं देवानामिंद्रादीनां प्राधान्येनेज्यमा
नत्वाद्दैवं संबंधिनं यागं पर्युपासते बाह्योपकरणेन श्रद्धयान्वतिष्ठंति
अन्ये तत्त्वविदो नेति नेति निरस्तसमस्तविशेषं सच्चिदानंदरूपं तत्पदा
र्थभूतं ब्रह्म तदेव परप्रकाशात्मकत्वात्सर्वकर्मफलवासनादिदा
हकत्वाच्च अग्निस्तस्मिन्ब्रह्माग्नौ यज्ञेनैव ब्रह्मार्पणमित्युक्तप्रकारेण
तत्तदुपकरणाभावावस्थितात्मभावनामयेन यज्ञं त्वंपदार्थं प्रत्यगा
त्मानमुपजुह्वति ब्रह्माभेदमापादयंति एतदुक्तं भवति ब्रह्मार्पण
विधानविदो दैवमेव यज्ञं ज्ञानयज्ञत्वमापादयंतीति यज्ञशाहद्गात्म
नामसुयास्केनपठितः २५

पंचोलीटीका

अधुना सम्यग्दर्शनस्य यज्ञत्वं संपाद्य तत्स्तुत्यर्थं अन्येपि यज्ञा अधि
कारिभेदेन यज्ञोपाया उच्यंते दैवमेवेत्यादिषड्भिः अपरे योगिनः
कर्मिणः दैवमेव यज्ञं देवा इज्यंते येनासौ दैवो यज्ञस्तमेव पर्युपा-
सते कुर्वंति अपरे ब्रह्मविदः परब्रह्मरूपेऽग्नौ यज्ञं प्रत्यगात्मानं यज्ञे
नैव परमात्मैकादर्शनेनैव जुह्वति २५

नन्वीशोक्तलक्षणेन पुरुषयत्नेनैव यदि ब्रह्मप्राप्तिस्तदा तत्क्रियादी
न्यतिचोदिता अश्वमेधादयो यत्नबहुलायाससाध्यत्वेनाल्पफल
तयाच परिहार्याः स्युरिति विधिलोपः प्रवर्त्तेत किंचाष्टांगयोगा
देरपि ब्रह्मप्राप्तिफलकस्याननुष्ठेयतापो दुःसाध्यत्वेन प्रस
क्तायां तदनुशासनस्यापि व्यर्थता प्रसज्येतेत्यर्जुनाभिप्रायमा
शंक्य देशकालानुरूपेण पुरुषयत्नेनाराधनमनीयाषादिर
रकदृष्टप्रतिहंहितक्रियादिवीरानेव पूर्वं बहुत्वानंतरमश्वमेधा
दिसिद्धावर्णाश्रमविभागेनाष्टांगयोगादावधिकारित्वेन च
न सर्वेषां सर्वदा पुरुषयत्नेनैव ब्रह्मप्राप्तिरिति कि[illegible]त्क्रिया
णामेव दृष्टप्रतिहंहिसत्वएव पुरुषयत्नो ब्रह्मसायुज्यप्राप्तिल
क्षणमुख्यफलो राज्यस्वर्गादिभोगलक्षणावांतरफलश्चाव
श्यानुष्ठेयत्वेन चोदितोन्यथाश्वमेधादयः परेषांच श्रवणादी
नां वर्णाश्रमाणां यथास्वमष्टांगयोगयत्नादयश्चोदिता इत्य
भिप्रायेण पृथक्पृथगधिकारिभेदेन तांस्तान्यत्नां दैवमेवेत्या
दिभिरष्टभिः श्लोकैर्ब्रह्मप्राप्तिफलकानेव निरूपयन्प्रथमं क्ष
त्रियं प्रति पुरुषयत्नाश्वमेधादियत्नान् ब्राह्मणं प्रत्यग्निहोत्रादी
श्चानुषक्तिदैवेनेति श्लिष्टेन अत्र सर्वेषां श्लोकानां लिङर्थे लट्
न परे परे स्मदीयमतानुवर्तिन इति यावत् योगिनः कर्मकुश
लाः सन्तः प्राणादिसंधानयुक्तिस्तामेव दैवमेव यत्नं देवास्तत
दस्याधिष्ठात्र्यो देवता इंद्रादयस्तेषामयं दैवो यत्नः प्राणादिभूत
गतकरणात्मकस्तमेव पर्युपासते परितः सम्यक्तया उपासीरन्न
भ्यसेयुः अत्र देवतामंत्राद्याराध्य प्राणादीन्संधायापरान्निरुन्ध्युरि
ति पुरुषयत्नः प्रतिपादितः तथा योगिनः अनलब्धलाभो योगः स
विद्यते येषां ते योगं जितात्मव्यराज्यस्थितय इति यावत् अपरे इति

सर्वोत्तमसमानं दैवंयज्ञंदेवाइन्द्रवरुणादयइज्यंतेस्मिन्नितिदैवोय
ज्ञस्तमश्वमेधादिकंपर्युपासते एवमाहुर्योगिनइत्ययेयतेनपु
ष्टानंतरंत्रिविधस्यानुष्ठेयंद्रव्यमेधादियज्ञांतरंप्रतिपादितं
तथाअपरेन्येयोगिनःकर्मयोगिनोथवास्थाश्रमिणोब्राह्मणा
129 दैवमेवयज्ञमग्निहोत्रादिकंनित्यंपर्युपासतेइतिअथवास्थाश्रा
मिणान्यतिनित्ययज्ञःप्रतिपादितःब्रह्माग्नाविति एवंविधंच
यज्ञमपरेसूरयोविद्वन्मशकेब्रह्माग्नौब्रह्मपरमेश्वराख्यंतत्त्वंतदे
वाग्निःसकलपापेंधनदहनशक्तिमत्वात् तस्मिन्विषयेयज्ञे
नैव यज्ञोवैविष्णुरितिश्रुतेर्यज्ञशब्देनात्रविष्णुमभिधायकेनौवि
त्यातस्तुविशिष्टंकर्मलक्ष्यते तथाच यज्ञेन यथावर्णाश्रमस्वधर्मानु
विशिष्टेनकर्मणावप्रणवधेयमेतदित्येवबुद्ध्यानपुनःफलापेक्ष
याउपजुह्वति अर्पयेयुः अनेनपरमेश्वरोमेप्रीयतामिति ब्रह्मार्पे
सुइस्वताःसर्वदायावज्जीवंस्वकर्मानुष्ठानेनैवप्रीत्युत्पादादिमि
कदाकर्मानुष्ठायपरमेश्वरोमेप्रीतइतिनपुनःकर्मणामवपा
वरणीयतेतिनसंभावनीयं किंतयावज्जीवंकर्मपरएवस्यादि
ति तथापरेन्येयोगिनस्त्वनुकर्षः योगिनोध्याननिष्ठाध्याना
धिकारिणःसंन्यस्तसर्वपरिग्रहाब्राह्मणानपुनःत्रिविधापेक्षां
तज्ञानधिकारात् तथाच

तेचब्रह्माग्नौब्रह्मसर्वतत्त्वोपरिवर्तमानंपरमेश्वराख्यंतत्त्वंतदेवा
ग्निःसर्ववासनेन्धनदाहसाधर्म्यात् तस्मिन्विषयेयज्ञंप्राकृतेना
नायज्ञफलंयज्ञेनैव यज्ञोवैविष्णुरितिश्रुतेर्यज्ञशब्दोत्रविष्णुवाचकः
तेनैवस्वप्रीणनंलक्ष्यते तथाचपरमेश्वरप्रीणनहेतवेवोपजुह्व
ति अर्पयेयुरिति इत्यमेकेनैवपद्येनानेकेषांप्रतिपादिताः तदे
वत्रिविधस्यानुष्ठेयतयाद्रव्ययज्ञोभिहितः २५॥

मधुभाष्य

दैवमित्यादिना दैवं भगवंतं स एव तेषां यज्ञः भगवदुपा
सनं यज्ञमिति क्रियाविशेषणं नान्यत्तेषामस्ति यतीना
केषांचित् यज्ञं भगवंतं यज्ञेन यज्ञं यज्ञो विष्णुर्दैवतेत्या
दिश्रुतिः यज्ञेन शक्तिर्द्धैनैव यज्ञं प्रतिजुह्वतीति सर्वं ब्रह्मसम
तंयज्ञमित्यादौ उक्तंच विष्णुरुद्रेण पशुना ब्रह्मा स्वेष्टेन क्र
तुना अयजन्स्वान सेयत्तेपितरं प्रपितामहं इति आत्मसंय
माख्योपायाग्नौ इंद्रियं जुह्वतीति इंद्रिययज्ञाः ततः परमेश्वरा
र्पणबुध्यातस्मे जुह्वतीति तपोयज्ञाइत्यादि इदं तपो हविः प
रहस्माग्नौ जुहोमि न ह्यपीथमिति होमः तदर्पणं एव व
होमबुद्धिः अपरेप्राणायामपरायणाः प्राणमपाने जुह्व
ति अपानं च प्राणे कुंभकस्यापवभवंतीत्यर्थः नियताहा
रत्वेनैव प्राणापोषणात् प्राणान्प्राणेषु जुह्वति यक्ते ह्यश्
नसीशास्त्र इत्यादि श्रुत्युक्तप्रकारेण वा अन्यदपि अस्यांत
रेसिद्धं यदस्यात्मामानं तेन प्राणाः प्राणेष्वेव हुता इति ब्रह्म
णः परमात्मनो ह्येव अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव
चेति च वक्ष्यति मानसवाचिककायिककर्मणा एव हि ते
सर्वे एवं ज्ञात्वा तानि कर्माणि कृत्वा विमोक्ष्यसे शुद्धे परित्य
ज्य यत्मोक्षार्थं करिष्यसि तदपि कर्म अतो विदितं नत्याज्य
मिति भावः अपि चेत्पापसंनाथं गच्छुक्तं ज्ञानफलमेवेत्य
र्थः इदानीमपि ज्ञानेन एव तथा यथाभिभवान्मोहः मा तु का
ये न ज्ञानेन मय्यात्मभूते सर्वभूतान्यशेषतः सो देवमोहना
शात्यश्यति कारणभूतं ज्ञानं स्तौति पुनः श्लोकत्रयेण
तत्साधनं विरोधिफलं च तदुक्तेः कर्मोपसंहरति ॥ २५॥

130

भाषा अनुवाद

पूर्वोक्त प्रकार यज्ञ रूप से सर्वत्र संपादित करके प्रसिद्ध कर के कहा जो ब्रह्म दर्शन रूप ज्ञान सो सकल यज्ञों का हेतु करके इसीके वास्ते सब यज्ञो की जाती है अत एव श्रेष्ठ है इसी से अब इस ज्ञान की प्रशंसा करके अधिकारी के भेदसे ज्ञानके उत्पत्ति की उपाय रूप सब यज्ञों को ८ श्लोक से कहते है कि बहुतेरे कर्मयोगी लोग ब्रह्मबुद्धि रहितहो इंद्र वरुण आदि देवतों को यज्ञ करि के बडी श्रद्धासे पूजते हैं और कितने ज्ञान योगी ब्रह्मरूप अग्निमे ब्रह्मयज्ञ रूप उपाय से यज्ञ आदि सकल कर्म रूप ब्रह्ममे ब्रह्मार्पण विधिसे अर्पण करके सब कर्म लीन करते हैं सोई ब्रह्मयज्ञहै २५

दोहा

देवयज्ञ को सेवहिं और योगीजन कोय ब्रह्माग्निमे यज्ञको
उ यज्ञ हवि करें सोय २५

श्रोत्रादीनींद्रियाण्यन्ये संयमाग्निषु जुह्वति श-
ब्दादीन्विषयानन्य इंद्रियाग्निषु जुह्वति २६

शांकरभाष्य

सोयं सम्यग्दर्शनलक्षणो यज्ञो दैवयज्ञादिषु यज्ञेषु प्रक्षिप्यते ब्र-
ह्मार्पणमित्यादिश्लोकैः श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परंत-
प इत्यादिना स्तूयतेथ श्रोत्रादीनीति श्रोत्रादीनींद्रियाण्यन्ये योगि-
नः संयमाग्निषु प्रतींद्रियं संयमो भिद्यत इति बहुवचनं संयमा एवा-
ग्नयस्तेषु जुह्वति इंद्रियसंयममेव कुर्वंतीत्यर्थः शब्दादीन्विषयान-
न्ये इंद्रियाग्निषु जुह्वति इंद्रियाण्येवाग्नयस्तेष्विंद्रियाग्निषु जुह्वति
श्रोत्रादिभिरविरुद्धविषयग्रहणं होमं मन्यंते २६

आनंदगिरिकृतटीका

उक्तस्य ज्ञानयज्ञस्य दैवयज्ञादिषु यज्ञेषु ब्रह्मार्पणमित्यादिश्लोकै-
रुपक्षिप्यमाणत्वं दर्शयति सोयमिति उपक्षेपप्रयोजनमाह श्रेया-
निति सम्प्रति यज्ञद्वयमुपन्यस्यति श्रोत्रादीनीति बाह्यानां कर-
णानां नास्ति संयमस्यैकत्वात् कथं संयमाग्निष्विति बहुवचनमि-
त्याशंक्याह प्रतींद्रियमिति संयमानां प्रत्याहाराधिकरणत्वेनाव-
स्थितानां मनोरूपाणां होमाधारत्वादग्नित्वव्यपदेशः इति संयमा इ-
ति विषयेभ्योंतर्बाह्याणींद्रियाणि प्रत्याहरंतीति संयमयज्ञं संक्षि-
प्य दर्शयति इंद्रियेति श्रोत्रादींद्रियाग्निषु शब्दादिविषयहोमस्य
तत्तदिंद्रियैस्तत्तद्विषयोपभोगलक्षणस्य सर्वसाधारणत्वमाशं-
क्य प्रतिषिद्धान् वर्जयित्वा रागद्वेषरहितो भूत्वा प्राप्तान् विषयान्
भुंक्ते तैस्तैरिंद्रियैरिति विवक्षितं होमं विशदयति श्रोत्रादिभिरि-
ति २६

स्वामिकृतटीका

श्रोत्रादीनीति अन्ये नैष्ठिकब्रह्मचारिणस्तत्तदिंद्रियसंयमरूपेषु

गीं
टीं
वं

अग्निषुश्रोत्रादीनिजुह्वतिप्रविलापयंति इंद्रियाणिनिरुध्यसंयमप्र
प्रधानास्तिष्ठंतीत्यर्थः इंद्रियाण्येवाग्नयः तेषुशब्दादीनन्येगृहस्थाजु
ह्वति विषयभोगसमयेप्यनासक्ताःसंतोग्नित्वेनभावितेष्विंद्रियेषुह
विष्ट्वेनभावितान् शब्दादीन्प्रक्षिपंतीत्यर्थः २६

पिशाचभाष्य

श्रोत्रादीनीति श्रोत्रमादिर्येषांतानिश्रोत्रादीनींद्रियाणिअन्येब्रह्म
विदःसंयमाग्निषुचित्तनिरोधाग्निषुजुह्वतिध्यानेनसंपादयंति अन्ये
योगिनःशब्दादीन्शब्दस्पर्शरूपरसगंधादीन्विषयानिंद्रियाग्निषु
श्रोत्राग्निषुजुह्वति २६

रामानुजभाष्य

श्रोत्रादीनीतिअन्येश्रोत्रादीनामिंद्रियाणांसंयमनेवर्त्तंते अन्येयोगि
नःइंद्रियाणांशब्दादिप्रवणतानिवारणेप्रयतंते अन्येज्ञानदीपेसंय
मयोगाग्नौसर्वाणींद्रियकर्माणिप्राणकर्माणिजुह्वति मन
सइंद्रियप्राणानांकर्मप्रवणतानिवारणेप्रयतंतेइत्यर्थः २६

अभिनवगुप्तकृतटीका [illegible] २६ नास्ति

परमार्थप्रपाटीकाउपक्रमं २६

वनमालीटीका

अन्येनैष्ठिकब्रह्मचारिणःतत्रादिंद्रियसंयमाख्येष्वग्निषुविषयेभ्यःप्र
त्याहृत्यजुह्वति इंद्रियसंयममेवयजंतइत्यर्थःअन्येगृहस्थाःइंद्रि
याग्निषुविषयान्जुह्वति देहादावहंममेतिधीशून्याविषयेषुविग
तस्पृहाःदैवादुपलब्धानिषिद्धविषयभोगअतोभार्यामुपेयादित्या
दिवेदाज्ञयाश्रीहरिप्रीतयेकुर्वंतीत्यर्थःविहितादनिषिद्धाद्वाभिमा
नरहितभोगाद्वामनाद्यंतःकरणशुद्धिज्ञानभक्तिप्रसादद्वारामो
क्षोभवतीतिभावः २६

क्रमसमेवैजयंतीटीका

किंच श्रोत्रादीनीति अन्ये ब्रह्मचारिणः श्रोत्रादीनि श्रोत्रत्वक्चक्षु-
र्घ्राणरसनेंद्रियाणि संयमाग्निषु संयमरूपेष्वग्निषु जुह्वतींद्रियसंय-
मनेनैव यज्ञं कुर्वंति अन्ये गृहस्थाः शब्दादीन् शब्दस्पर्शरूपरसगंध-
रूपान्विषयानिंद्रियाग्निष्वग्निरूपत्वेन भावितेष्विंद्रियेषु जुह्वति
इंद्रियैस्तत्तद्विषयान्भुंजानोपि तत्रतत्रासक्तिं न कुर्वंतीत्यर्थः २६

+ जीवब्रह्माभेददर्शनेन यज्ञत्वेन सं पाद्य तत्साधनयज्ञमध्ये पठति श्रे त्यादिनासोयं नरेनेन खेगोणेन ह्ययज्ञो दर्शितो यावद्धि किंचिदैहिकं श्रेयः साधनं तत्सर्वं यज्ञत्वेन संपाद्य तेनतत्र +
यान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः

मधुसूदनीटीका

+ श्रोत्रादीनि ज्ञानेंद्रियाणि नानिषिद्धादि विषयेभ्यः प्रत्याहृत्य अन्ये प्रत्या-
नं॰ हारपराः संयमाग्निषु धारणाध्यानसमाधिरिति त्रयमेकविषयं संयम-
शब्देनोच्यते तथा चाह भगवान्पतंजलिः त्रयमेकत्र संयम इति तत्र
ल॰ हृत्पुंडरीकादौ मनसः चिरकालस्थापनं धारणा एवमेकत्र धृतस्य चित्त-
स्य भगवदाकारवृत्तिप्रवाहो अंतरांतरा अन्याकारप्रत्ययव्यवहितो ध्यानं
सर्वथा विजातीयप्रत्ययानंतरितः सजातीयप्रत्ययप्रवाहः समाधिः
स तु चित्तभूमिभेदेन द्विविधः संप्रज्ञातोऽसंप्रज्ञातश्च चित्तस्य हि पंच
भूमयो भवंति क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति तत्र रागद्वेषा-
दिवशाद्विषयेष्वभिनिविष्टं क्षिप्तं तंद्रादिग्रस्तं मूढं सर्वदा विषयास-
क्तमपि कदाचित् ध्याननिष्ठं क्षिप्ताद्विशिष्टतया विक्षिप्तं तत्र क्षिप्त-
मूढयोः समाधिशंकैव नास्ति विक्षिप्ते तु चेतसि कादाचित्कः स-
माधिर्विक्षेपप्राधान्याद्योगपक्षे न वर्तते किंतु तीव्रपवनविक्षिप्त-
प्रदीपवत्स्वयमेव नश्यति एकाग्रं त्वेकविषयकधारावाहिकवृत्ति-
समर्थं सत्त्वोद्रेकेण तमोगुणकृतनिद्रादिरूपलयाभावात्समाका-
रावृत्तिः सा च रजोगुणकृतचांचल्यरूपविक्षेपाभावादेकविषये वृ-
त्तिः शुद्धसत्त्वे भवति चित्तमेकाग्रं अस्यां भूमौ संप्रज्ञातः समाधिः तत्र
ध्येयाकारा वृत्तिरपि भासते तस्या अपि निरोधे निरुद्धं चित्तमसंप्रज्ञातस-
सि:॰ माधिभूः तदुक्तं तस्यापि निरोधे सर्ववृत्तिनिरोधान्निर्बीजः समाधिरिति
अयमेव सर्वतो विरक्तस्य समाधिफलमप्यसावमनपेक्षमाणस्य यो-
गिनो धर्ममेघ इत्युच्यते तदुक्तं प्रसंख्यानेप्यकुसीद-
स्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः ततः क्लेशकर्मनिवृत्तिः

गी॰
टी॰
चं॰

133

अनेकरूपेण संयमानां भेदादग्निष्विति बहुवचनं तेषु इंद्रियाणि जुह्व
ति धारणाध्यानसमाधिसिद्ध्यर्थं सर्वाणींद्रियाणि स्वस्वविषयेभ्यः
प्रत्याहरंतीत्यर्थः तदुक्तं स्वस्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवें
द्रियाणां प्रत्याहार इति विषयेभ्यो निगृहीतानींद्रियाणि चित्तरूपा
ण्येव भवंति ततश्च विक्षेपाभावाच्चित्तं धारणादिकं निर्वहतीत्यर्थः
तदनेन प्रत्याहारधारणाध्यानसमाधिरूपयोगांगचतुष्टयमुक्तं तदे
वं समाध्यवस्थायां सर्वेंद्रियवृत्तिनिरोधो यज्ञत्वेनोक्तः इदानीं व्युत्थाना
वस्थायां रागद्वेषराहित्येन विषयभोगो यः सोऽप्यपरो यज्ञ इत्याह शब्दा
दीन्विषयानन्य इंद्रियाग्निषु जुह्वति अन्ये व्युत्थितावस्थाः श्रोत्रादिभि
रविरुद्धविषयग्रहणं स्पृहाशून्यत्वेनानन्यसाधारणं कुर्वंति स एव ते
षां होमः [illegible]
[illegible]
[illegible] २६

सदानंदीटीका

श्रेयसः साधनेष्वावश्यकं किंचिदस्तीह वैदिके यत्नेनैव तत्सर्वमनुसं
पादयतेऽधुना २ प्रत्याहारपराः केचिच्छ्रोत्रादीनींद्रियाणि ते विषये
भ्यः समाकृष्य संयमाग्निषु जुह्वति २ धारणाध्यानसिद्ध्यर्थं सम
स्तानींद्रियाण्यपि धीराः समस्तभोगेभ्यः प्रत्याहृत्यात्मनिष्ठिताः
अपरे व्युत्थितावस्थाः श्रोत्रादिभिरपींद्रियैः अविरुद्धार्थस्वीकारं
होममन्ये तन्वते ४ २६

नीलकंठीटीका

यज्ञांतरमाह श्रोत्रादीनीति तत्र केचित्तु बाह्यमाभ्यंतरं वा विशेषम
पादाय तत्र चेतसो नियमनं क्रियते ते एव संयमाः अनेकविषयत्वादने
केशपाकफलाश्च तथा च योगसूत्रकृता प्रोक्तं भुवनज्ञानं सूर्ये संय
मात् चंद्रे ताराव्यूहज्ञानं कंठकूपे क्षुत्पिपासानिवृत्तिरित्यादि त एवा
ग्नयः इंद्रियेषु संहारहेतुत्वात् तेषु संयमाग्निषु श्रोत्रादीनि जुह्वति

प्रतिपद्यंति तत्र श्रोत्रं अनाहतेध्वनौ संनियम्य हंसोपनिषदुक्तरी-
त्या घंटानादादीन् दशनादाननुभवंति नहि तत्र संनियते चेतसि
शब्दांतरग्रहणं कदाभवति सोयं श्रोत्रस्य संयमाग्नौ होमो बोध्यः ए-
वमन्यत्रापि तद्द्वारा च निष्कलं तत्त्वं प्रतिपद्यंते तथान्ये विषयेभ्यः प्र-
त्याहृतकरणाः धारणाध्यानसमाध्यात्मकं मनसः संयममपकृत्य मू-
लाधाराद्यन्यतमचक्रैककर्मशक्ताः समनस्केंद्रियेषु विषयवियो-
गाद्दग्धेंधनानलवत्स्वयं विलीनेषु येषां समाधिवृत्तिस्तैरिंद्रियेषु वि-
षयाद्युपसंहृतानि इंद्रियादीनि मनआदिषु पूर्वोक्तरीत्या उपसंहृ-
तानि तानेतानिंद्रियचिंतकान् प्रकृत्योक्तं वायवीये दशमन्वंत-
राणीह तिष्ठंतींद्रियचिंतका इति २६

आनंदीटीका

अन्ये ब्रह्मचारिणः श्रोत्रादीनींद्रियाणि संयमा विषयनिवृत्तय एवा-
ग्नयस्तेषु जुह्वति तथा च स्मृतौ ब्रह्मचारिधर्माः शरीरं चैव वाचं च बु-
द्धींद्रियमनांसि च नियम्य प्रांजलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखमित्या-
दि अन्ये गृहस्थाः शब्दादीन् विषयानिंद्रियाग्निषु जुह्वति शास्त्रोक्तक्र-
मेण रागद्वेषविनाकृतान् विषयैरिंद्रियाणि तर्पयंति गृहस्थानां स्त्रीसेवा-
दिपूर्वविषयोपभोगः स्मृत एव वक्ष्यमाणेषु २६

+ श्रोत्रादीन्यन्ये ज्ञानेंद्रियाणि तत्तद्विषयार्थसमाधिरूपेषु संतेषु तेषु समाधिष्वालीनानींद्रियाणि

रामकंठीटीका

संयमेषु वा अग्निषु जुह्वति विषयेभ्यः प्रत्याहृत्यैवं तेषु यत्नं संपत्तिमभिमन्यंत इत्यर्थः +

+ अन्ये पुनः योगिनः शब्दादीन् विषयान् परिहारेण श्रोत्रादिष्विंद्रियेषु
जुह्वति निषद्धवहिष्कृत इवेंद्रियवृत्तिष्वेवलब्धसंयमे चेतसि श-
ब्दादीनामग्रहणमेवेंद्रियाग्निकल्पेषु हवनं मन्यमानास्तथाविधं
यज्ञमनुतिष्ठंतीत्यर्थः २६

लासि कश्मीटीका

श्रोत्रादीनीति अन्ये योगिनः श्रोत्रादिकं ज्ञानेंद्रियग्रामं संयमाग्नि-
षु संयमो युगपत्क्रमेण वक्ष्यमाणप्रवेशवत् त्रासमसमये हृत्स्वे-
शवच्च विषयेभ्यः प्रत्याहृत्य आकुंचनमंतर्मुखीकरणं सपवाग्नि

गीं टीं चं

स्तस्मिन्जुह्वति आत्मनैभियात्मार्थं निवर्तयंतीत्यर्थः यथोक्तं तद
पोऽङ्गतेनित्यास्थितिरिति अत्रार्थः तेभ्यः स्वेंद्रियविषयेभ्यो मनसि निरु
द्धे सति निजस्वरूपे स्थितिर्भवति तथान्ये योगिन इंद्रियाण्येवाग्न
यः तेषु शब्दादिकं विषयौघमक्रमं झगित्येव सकलकरणचक्रवि
स्फारणयुक्त्या जुह्वति उद्यन्तं तद्रूपस्वस्वभावभासनाय निमज्जयंती
134 त्यर्थः यदुक्तं कक्ष्यास्तोत्रे सर्वाः शक्तीश्चेतसा दर्शनाद्याः स्वे स्वे वेद्ये
यौगपद्येन विष्वक् क्षिप्त्वा मध्ये हाटकस्तंभभूतस्तिष्ठन्विश्वाकाररूप
कोवभासीति तथा च शिवसूत्रेषु उद्यमो भैरव इति यद्वान्ये प्रत्याहार
पराः श्रोत्रादीनि ज्ञानेंद्रियाणि संयमाग्निषु आभ्यंतरे हृत्पुंडरीकादौ
संयमः समाक्षिप्तस्य निर्बंधने संयमा एवाग्नयस्तेषु जुह्वति विक्षेप
परिहारेण धारणाध्यानसमाधिसिध्यर्थं स्वस्वविषयेभ्यः प्रत्याहरंती
त्यर्थः स्वस्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवेंद्रियाणां प्रत्याहार
इति विषयेभ्यो निगृहीतानींद्रियाणि चित्तस्वरूपाणीव भवंति ततश्च
विक्षेपाभावाच्चित्तं धारणादिकं निर्वहतीत्यर्थः हृत्पुंडरीकादौ संय
मस्याभिधीयमानत्वात् हृद्वचनं तदुक्तं तस्य निषेधार्थमेकतत्त्वाभ्यास
इति विशोका वा ज्योतिष्मतीति च तदिति विक्षेपपरामर्शः तथा
शिवोपनिषदि हृद्याकाशे निलीनाक्षः पद्मसंपुटमध्यगः अनन्य
चेताः सुभगे परं सौभाग्यमाप्नुयादिति अन्ये हठयोगैकदेशसेवि
नः शब्दादीन्विषयान्स्वरदंगशब्दप्रदीपादीन्बाह्यानध्येयत्वेनावलंबि
तांश्चित्तैकाग्र्यार्थमिंद्रियाग्निषु जुह्वति श्रोत्रादिभिः यथोक्तविषय
ग्रहणं स्वस्वभावप्रकाशनाङ्गमेव तत इत्यर्थः तदुक्तं तत्रैव गीता
दिविषयास्वादासमसौख्यैकतात्मनः योगिनस्तन्मयत्वेन मनोरू
ढेस्तदात्मतेति २६

पबोलीटीका

अन्ये योगिनः श्रोत्रादीनि इंद्रियाणि संयमाग्निषु इंद्रियसंयम एवा
ग्निः तस्मिन्जुह्वति अन्ये योगिनः शब्दादीन्विषयानिंद्रियाण्येवाग्नि
स्तेषु जुह्वति श्रोत्रादिभिरनिषिद्धविषयग्रहणं होमः २६ ॥

तपोयज्ञमाह श्रोत्रादीनीत्यर्धेन केचिद्योगिनः कर्मकुशलाः
स्त्रियप्रवीणाः श्रोत्रादीनींद्रियाणि संयमाग्निषु संयम्यंते नि
गृह्यंते येते संयमा अंतःकरणानि तेषु जुह्वति संलीनानि कु
र्युः निश्चयविषयांतःकरणानुवर्तीनि विदधीरन् नितियावत्
न पुनरंतःकरणमिंद्रियानुविधायिकार्ये निश्चयच्युतेरनर्थो
पातादितिभावः इतितपोयज्ञः प्रतिपादितः अथयोगयज्ञं
प्रतिपादयति शब्दादीनित्यादिसार्धेन केचित्तु नैयोगिनः कर्म
योगिनः शब्दादीन्विषयानिंद्रियाग्निषु जुह्वति समर्पयेयुः न
पुनर्मनसा संचेतयेयुरिति अविभिकृष्टान्विहितांस्तेजोवधादिनि
मित्तान् मद्भागविषयीभूतस्त्वं नमविष्यसीत्यादिकांशब्दा
दीन्विषयाननुभूयापि निश्चयात्मनो न निवर्तयेयुरितिभावः
२६॥

मधुभाष्य

भाषा अनुवाद

ऐसेहीकितनेब्रह्मचारी लोगइंद्रियोंका संयम जो विषयों से रोकना सोई अग्निरूप है तिसमे श्रोत्र घ्राण जिह्वा त्वक चक्षु इन ज्ञानइंद्रियों को होम करते अर्थात् इंद्रियों को अंतर्मुख करके संयमसे रहते है और कितने गृहस्थ जन इंद्रियरूप अग्निमे हविरूप जो विषय कहे रूप रस गंध स्पर्श शब्द सो होम करतेहै विषय भोग समयमे भी अनाशक्त होके अग्निरूप इंद्रियों मे रूप आदि विषयरूप हुत होम करते है कहे दग्ध करते निरहंकार होकर फल रहित होतेहैं २६ ॥

दोहा

श्रवणादिक इंद्रिय कोउ संयमाग्नि आहुत शब्दादि विषय
न कोउ इंद्रिय अग्नि मे हुत २६॥

१

136

सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते २७

शांकरभाष्यं

किंच सर्वाणीति सर्वाणींद्रियकर्माणि इंद्रियाणां कर्माणींद्रियकर्माणि तथा प्राणकर्माणि प्राणो वायुराध्यात्मिकस्तत्कर्माण्याकुंचनप्रसारणादीनि तानि चापरे आत्मसंयमयोगाग्नौ आत्मनि संयम आत्मसंयमः स एव योगाग्निस्तस्मिन्नात्मसंयमयोगाग्नौ जुह्वति प्रक्षिपंति ज्ञानाग्निदीपिते स्नेहेनेव प्रदीपिते विवेकविज्ञानेनोज्ज्वलभावमापादिते जुह्वति प्रविलापयंतीत्यर्थः २७

आनंदगिरिकृतटीका

यज्ञांतरं कथयति किंचेति इंद्रियाणां कर्माणि श्रवणवदनादीनि आत्मनि संयमो धारणाध्यानसमाधिलक्षणः सर्वमपि व्यापारं निरुध्य आत्मनि चित्तसमाधानं कुर्वंतीत्याह विवेकेति २७

स्वामिकृतटीका

किंच सर्वाणीति अपरे ध्याननिष्ठा बुद्धींद्रियाणां श्रोत्रादीनां कर्माणि श्रवणदर्शनादीनि कर्मेंद्रियाणां वाक्पाण्यादीनां कर्माणि वचनोपादानादीनि प्राणानां दशानां कर्माणि प्राणस्य बहिर्गमनं अपानस्याधोगमनं व्यानस्य व्यानयनमाकुंचनप्रसारणादि समानस्याशितपीतानां समुन्नयनं उदानस्योर्ध्वनयनं उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः कृकरः क्षुतकृज्ज्ञेयो देवदत्तो विजृंभने न जहाति मृतं चापि सर्वव्यापी धनंजयः इत्येवंरूपाणि जुह्वति क्वात्मनि संयमो ध्यानैकाग्र्यं स एव योगः स एवाग्निस्तस्मिन् ज्ञानेन ध्येयविषयेण दीपिते प्रज्वालिते ध्येयसम्यग्ज्ञानात्तस्मिन्मनःसंयम्य तानि सर्वाणि कर्माण्युपरमयंतीत्यर्थः २७ ॥

पिशाचभाष्यं

सर्वाणीति इंद्रियाणां कर्माणि श्रवणादीनि तथा प्राणकर्माणि उ
च्छ्वासादीनि अपरे योगिनः आत्मनोंतःकरणस्य संयमः स एव योगः स
एवाग्निः आत्मसंयमयोगाग्निस्तस्मिन् ज्ञानदीपिते विवेकज्ञानेन प्रज्व
लिते जुह्वति एवं होमं संपादयंतीत्यर्थः २७

रामानुजभाष्यं उपक्रमे ४० २७

अभिनवगुप्तकृतटीका स्पष्टार्थं २७

परमार्थप्रपाटीका ॥

सर्वाणीति अपरे ध्याननिष्ठाः श्रोत्रादिज्ञानेंद्रियाणां वागादीनां कर्माणि
वचनादीनि तथा मुख्यप्राणानां पंचानां कर्माणि वहिर्निर्गमनादी
नि तथोपप्राणानां नागादीनां पंचानां उद्गारादीनि इत्येवं रूपाणि कर्मा
णि आत्मनो मनसः संयमरूपो योगो ध्यानैकाग्र्यं स एवाग्निस्तस्मिन् ज्ञानेन
स्वानुभवरूपेण दीपिते प्रज्वालिते ध्येयं सम्यक् ज्ञात्वा तत्र सर्वाणि कर्मा
ण्युपरमयंतीत्यर्थः २७

वनमाली [illegible]टीका

अपरे पातंजलाः श्रोत्रादिज्ञानेंद्रियकर्माणि श्रवणादीनि वागादिकर्में
द्रियकर्माणि व्यवहारादीनि प्राणानां दशानां कर्माणि प्राणस्य वहिर्गम
नं अपानस्याधोगमनं व्यानस्याकुंचनप्रसारणादिकं समानस्य पीताशि
तस्य समे नयनं उदानस्योर्ध्वगमनं उद्गारे नाग आख्यातः कूर्म उन्मीलने
स्मृतः कृकरः क्षुधि ज्ञेयः देवदत्तो विजृंभणे न जहाति मृतं वापि स
र्वव्यापी धनंजयः इत्येवं रूपाणि प्राणकर्माणि आत्मसंयमयोगाग्नौ
आत्मनो मनसः संयम एकाग्रता स एव योगः उपायः स एवाग्निस्तस्मिन्
ध्येयविषयके ज्ञानेन दीपिते प्रज्वालिते परमानंदरूपं ज्ञानं मनसो नि
ग्रहः इंद्रियांतरव्यापारोपरतिः प्राणायामो भवतीति भावः २७

कृष्णमवैजयंतीटीका

किंच सर्वाणीति अपरे योगिनः सर्वाणि समस्तानींद्रियकर्माणि इं
द्रियाणां श्रोत्रत्वक्चक्षुर्घ्राणरसनारूपाणां पंचानां ज्ञानेंद्रियाणां क

ध्येयज्ञानदीपिते आत्मसंयम
योगाग्नौ सर्वाणीन्द्रियकर्माणि
प्राणकर्माणि च जुह्वति मनसेन्द्रि
यप्राणानां कर्मप्रवणतावारणे
यत्नं कुर्वन्ति ॥ ४०

र्माणि श्रवणस्पर्शनदर्शनास्वादनाघ्राणानि वाक्पाणिपादपायू
पस्थरूपाणां पंचानां कर्मेंद्रियाणां कर्माणि वचनादानगमनोत्स
र्गानंदरूपाणि च पुनः प्राणकर्माणि प्राणापानसमानोदानव्या
ननागकूर्मकृकरदेवदत्तधनंजयरूपाणां दशानां प्राणानां बहि
र्गमनाधोगमनाशितपीतादिसमीकरणोर्द्धनयनमथोनयनाकुंच
नप्रसरणाद्युद्गारोन्मीलनक्षुज्जृंभनव्यापनरूपाणि कर्माणि आ
त्मसंयमयोगाग्नौ आत्मनो मनसः संयम एव योगः स एवाग्निस्तस्मि
न् ज्ञानदीपिते आत्मयाथात्म्यज्ञानेन दीपिते उज्वलिते जुह्वति हवनं
कुर्वंति मनसा दशानामिंद्रियाणां दशानां प्राणानां स्वस्वकर्माणि
निवर्तितं यत्नं कुर्वंतीत्यर्थः २७

+ तदेवं पातंजलिमतानुसारेण
चयज्ञद्वयं उक्त्वा ब्रह्मवादिम

मधुसूदनीटीका

लयपूर्वकसमाधिं ततो व्युत्थाने
नानुसारेण बाधपूर्वकं समाधिं कारणेण द्वेदेन व्युत्थान
स्य सर्वफलहेतुयज्ञांतरमाह +

+ द्विविधो हि समाधिर्भवति लयपूर्वको बाधपूर्वकश्च तत्र तदनन्यत्व
मारंभणशब्दादिभ्य इति न्यायेन कारणव्यतिरेकेण कार्यस्यासत्वात्
पंचीकृतपंचमहाभूतात्मककार्यव्यष्टिरूपं समष्टिरूपविराट्कार्य
६ त्वात्तद्व्यतिरेकेण नास्ति तथा समष्टिरूपमपि पंचीकृतपंचमहाभू
तात्मकं कार्यमपंचीकृतपंचमहाभूतकार्यत्वात्तद्व्यतिरेकेण नास्ति
तत्रापि पृथिवी शब्दस्पर्शरूपरसगंधाख्यपंचगुणा गंधेतरचतुर्गुणा अप
प्कार्यत्वात्तद्व्यतिरेकेण नास्ति ताश्च चतुर्गुणा आपो गंधरसेतरत्रिगु
णात्मकतेजःकार्यत्वात्तद्व्यतिरेकेन संति तदपि त्रिगुणात्मकं तेजो
गंधरसरूपेतरद्विगुणवायुकार्यत्वात्तद्व्यतिरेकेण नास्ति सोपि द्विगु
णात्मको वायुः शब्दमात्रगुणाकाशकार्यत्वात्तद्व्यतिरेकेण नास्ति
स च शब्दगुण आकाशो बहु स्यामिति परमेश्वरसंकल्पात्मकाहंकार
कार्यत्वात्तद्व्यतिरेकेण नास्ति सोपि संकल्पात्मकोहंकारो मायेक्ष
णरूपमहत्तत्वकार्यत्वात्तद्व्यतिरेकेण नास्ति तदपीक्षणरूपमहत्त
त्वं मायापरिणामत्वात्तद्व्यतिरेकेण नास्ति तदपि मायाख्यं कारणं
जडत्वेन चैतन्याध्यस्तत्वात्तद्व्यतिरेकेण नास्तीत्यनुसंधानेन विलयमा
नेपि कार्यकारणात्मके प्रपंचे चैतन्यमात्रगोचरो यः समाधिः

गी॰
टी॰
यं॰

सलयपूर्वकउच्यते तत्रतत्त्वमस्यादिवेदांतमहावाक्यार्थज्ञाना-
भावेनाविद्यातत्कार्ययोरक्षीणत्वात् एवंचित्तेनेपिकारणस्यत्वे-
नपुनःकृत्स्नप्रपंचोत्थानादयंसुषुप्तिवत्सबीजःसमाधिर्नतुमु-
ख्यःमुख्यस्तुतत्त्वमस्यादिमहावाक्यार्थसाक्षात्कारेणाविद्याया-
निवृत्तौसर्गक्रमेणतत्कार्यनिवृत्तेरनाद्यायाश्चपुनरुत्थानाभावेनत- यथि॰
त्कार्यस्यापिपुनरुत्थानाभावान्निर्बीजोबाधपूर्वकःसमाधिःसएवा-
नेनश्लोकेनप्रदर्श्यते तथाहिसर्वाणिनिखिलानिस्थूलरूपाणिसं-
स्काररूपाणिचेंद्रियकर्माणींद्रियाणांश्रोत्रत्वक्चक्षूरसनघ्राणा-
ख्यानांपंचानांवाक्पाणिपादपायूपस्थानांचपंचानांवायूनांचांतर-
योःचमनोबुद्ध्योःकर्माणिशब्दश्रवणस्पर्शग्रहरूपदर्शनरसग्रहणा- रा॰
नि वचनादानविहरणोत्सर्गानंदाख्यानिसंकल्पाध्यवसायौच प्र-
वेशाणकर्माणिचप्राणानांप्राणापानव्यानोदानसमानाख्यानांपं-
चानांकर्माणिबहिर्नयनमधोनयनमाकुंचनप्रसारणादि अशित-
पीतसमनयनमूर्ध्वनयनमित्यादीनि अनेनपंचज्ञानेंद्रियाणिपंच
कर्मेंद्रियाणिपंचप्राणामनोबुद्धिश्चेतिसप्तदशात्मकलिंगशरीरं
चोक्तंसूक्ष्मसमष्टिरूपंहिरण्यगर्भाख्यमिहविवक्षितमितिवक्तुं
सर्वाणीतिविशेषणं आत्मसंयमयोगाग्नावात्मविषयकःसंयमोधा-
रणाध्यानसंप्रज्ञातसमाधिरूपःतत्परिपाकेसतियोगोनिरोधसमा-
धिःयंपतंजलिःसूत्रयामासव्युत्थाननिरोधसंस्कारयोरभिभवप्रा-
दुर्भावौनिरोधक्षणचित्तान्वयोनिरोधपरिणामइति व्युत्थानंक्षिप्त-
मूढविक्षिप्ताख्यंभूमित्रयंतत्संस्काराःसमाधिविरोधिनःतेयोगिप्र-
यत्नेनप्रतिदिनंप्रतिक्षणंवाभिभूयंतेतद्विरोधिनश्चनिरोधसंस्का-
राःप्रादुर्भवंति ततश्चनिरोधमात्रक्षणेनचित्तान्वयोनिरोधपरिणा-
मइति तस्यफलमाहततःसंस्कारादितिप्रशांतवाहितातमोरजसोः
क्षयात्हायविक्षेपशून्यत्वेनशुद्धसत्त्वरूपंचित्तंप्रशांतमित्युच्यते पू-
र्वपूर्वप्रशमसंस्कारपाटवेनतदाधिक्यंप्रशांतवाहितेति तत्कारणं
सूत्रयामासविरामप्रत्ययाभ्यासपूर्वःसंस्कारशेषोन्यइति विरामो
वृत्तिपरमस्तस्यप्रत्ययःकारणंवृत्तिपरमार्थःपुरुषप्रयत्नस्तस्याभ्या-

सःयोनः प्रयत्नेन संपादनं तत्पूर्वकस्तज्जन्योन्यः संप्रज्ञातनाद्विलक्षणोऽ
संप्रज्ञात इत्यर्थः एतादृशो यः आत्मसंयमयोगः स एवाग्निस्तस्मिन्
ज्ञानदीपिते ज्ञानं वेदांतवाक्यजन्यो ब्रह्मात्मैक्यसाक्षात्कारः तेना-
विद्यातत्कार्यनाशद्वारा दीपिते अत्यंतोज्वलिते बाधपूर्वके समाधौ
सह महलिंगशरीरमपरे जुह्वति प्रविलापयंतीत्यर्थः अत्र च सर्वा-
णीति आत्मेति ज्ञानदीपित इति विशेषणैः रथ्याविध्येकवचनेन पूर्ववैल-
क्षण्यं सूचितमिति न पौनरुक्त्यं [illegible]
[illegible] २७

सदानंदीटीका

पातंजलमतेनैव मुक्त्वा यज्ञद्वयं हरिः ब्रह्मवादिमतेनाह यज्ञांतरम
कामिनां १ सर्वाणि स्थूलरूपाणि सूक्ष्मरूपाणि सर्वशः शब्दादा
नरूपाणींद्रियकर्माणि योगिनः २ तथैव प्राणकर्माणि आकुंचनप्रसृ
तीनि च अर्थात्सृष्टिसमष्ट्यात्मलिंगं सप्तदशात्मकं ३ आत्मसंयम-
योगाग्नौ समाधौ निर्विकल्पके मलिपंत्वात्मविज्ञानदीपिते त्यंततेज-
सि ४ बाधित्वा ज्ञानमाविलं सम्यग्ज्ञानेन योगिनः विलापयंतिते-
लिंगं समाधौ सर्वतोऽध्रुवे ५ २७

नीलकंठीटीका

इतो विशिष्टं योगांतरमाह सर्वाणीति इंद्रियाणां कर्माणि शब्दा-
दिग्रहणानि प्राणकर्माणि आकुंचनप्रसारणश्वासप्रश्वासादीनि
अपरे योगिनः आत्मनि बुद्धौ संयमः स एव योगोऽग्निश्च तस्मिन् ज्ञाने-
न देहेंद्रियप्राणमनोव्यतिरिक्तात्मज्ञानेन दीपिते प्रकाशिते जुह्वति
प्रविलापयंति इंद्रिययोगिनां हि समाधिं प्राणो नुपसंहृत एवास्ते
तत्सहचरस्य मनसो नुपसंहारात् बुद्धियोगिनां तु मनसोप्युपसंहा-
रात्तदायतनस्य प्राणस्याप्युपसंहारो भवतीति विशेषः एतेषामपि बु-
द्धौ वाऽव्याभावात् पूर्ववल्लीनायां समाधिबुद्धिरात्मनि त्वैते बुद्धेरन्यत्व
न आत्मा ज्ञातो नाप्तितस्मिन् बुद्धिरुपसंहृता अत एवैतान् प्रकृत्या-

गी॰
टी॰
च॰

139

~~139~~

क्तेवाय्वीये वोद्धा दशसहस्राणि तिष्ठंति विगतज्वरा इति वोद्धा ब्र-
ह्मलीनाः दशसहस्राणि मन्वंतराणीत्यनुषंगात् ॥२१॥

आनंदीटीका

अपरे वा तु प्रख्याः सर्वाणींद्रियकर्माणि श्रोत्रादींद्रियाणां रूपादिग्रह-
णानि कर्मेंद्रियाणां वचनादीनि प्राणानामाभ्यंतराणां पंचानां वायू-
नां कर्माणि भुक्तस्याहारस्य रसादीनां सर्वतः संचरणादीनि आत्मसं-
यमेन ध्यानधारणासमाधिरूपेण संयमेन योगाग्निः तद्वृत्तिनिरोध
पतंजलिप्रोक्तः स एवाग्निस्तस्मिन् ज्ञानदीपिते ब्रह्मकर्मसमाधिस-
मिद्धे जुह्वति ॥२१॥

रामकंठीटीका

अपरे केचनैवंविधस्य योगयज्ञस्य ज्ञानयज्ञत्वसंपत्तये सर्वाणि श्रोत्रा-
णि वाह्यानि माभ्यंतराणां चेंद्रियाणां कर्माणि प्राणस्य च सामान्यरूप-
स्यैकस्य प्राणापानसमानोदानव्यानादिभेदप्रभृतानि समस्तानि क-
र्माण्यात्मसंयमयोगाग्नौ जुह्वत्यात्मनि प्रतिपादितलक्षणे परस्मिन् का-
रणे यः संयमस्सम्यक्छिन्नस्यानिबंधनं तदात्मको यो योगः समाधिस्स
एवाग्निस्तत्र तानि विलीनानि कुर्वते कीदृशे ज्ञानदीपिते आत्माद्व-
यलक्षणेन ज्ञानेन वोधेन दीपिते द्योतिते किमुक्तं भवति तेषु तेषु ना-
नाविधेषु योगेषु मनःप्राणयोर्व्यापारान् हित्वा विवेकात्मनिष्ठसमाधिष्वो
निक्षिपंतस्तादृशस्य योगयज्ञस्य ज्ञानयज्ञत्वमापादयंतीत्यर्थः
[illegible]
[illegible] ॥२१॥

लासिकी [illegible]टीका

सर्वाणीति श्रेयध्याननिष्ठा वुद्धींद्रियाणां श्रोत्रादीनां कर्माणि श्र-
वणादीनि कर्मेंद्रियाणां वाक्पाण्यादीनां कर्माणि वचनोपादाना-
दीनि प्राणानां दशानां कर्माणि प्राणस्य वहिर्गमनमपानस्याधो-
गमनं समानस्याशितपीतानां सम्यङ्नयनमुदानस्योर्ध्वनयनं

व्यानस्यव्यानयनमाकुंचनप्रसारणादीनिच उद्गारेनागआख्यात :
कूर्मउन्मीलनेस्मृतःकृकरःक्षुतकृज्ज्ञेयोदेवदत्तोविजृंभते नज
हातिमृतंचापिसर्वव्यापीधनंजय इत्येवंरूपाणिध्येयविषयेण
सम्यग्विवेकज्ञानेनदीपितेप्रज्वालिते आत्मसंयमयोगाग्नौ आ
त्मनिसंयमोधारणाध्यानंसमाधिरिति त्रयमात्मविषयं तदुक्तं
त्रयमेकत्रसंयमइति सएवयोगःसमाहितत्वंसएवाग्निस्तस्मिंज्जु
ह्वति ध्येयमात्मानंदेहात्सम्यग्विविच्यतस्मिन्मनःसंयम्यतानिस
र्वाणिकर्माणि उपरमयंतीत्यर्थः तत्रैवमनसश्चिरकालंस्थापनं
धारणा तत्रैवधृतस्यचित्तस्य तदेकाकारप्रत्ययप्रवाहोध्यानं स
एवविजातीयप्रत्ययानंतरितःसमाधिरिति एषैवावस्थापूर्वगु
रुभिरनुभूयमानास्तुतिव्याजेनाविष्कृता यथा यत्रसोस्तमयमे
ति विवस्वानस्तंइमःप्रभृतिभिःसहसर्वैःकापिसाविजयतेशिवा
रात्रिःस्वप्रभा प्रसरभास्वररूपेति २७

पंचोलीटीका

सर्वाणीतिअपरेयोगिनःसर्वाणींद्रियकर्माणि इंद्रियव्यापारान्
चअन्यत्प्राणकर्माणिचप्राणादिपंचवायुव्यापारान् आत्मसं
यमयोगाग्नौआत्मनिसंयमःसएवयोगाग्निस्तस्मिन् विवेकज्ञा
नदीपितेजुह्वति २७

रणवीरसमिद्धोधिनी॥

तेचसर्वाणींद्रियकर्माणिश्रवणादर्शनादीनिप्राणकर्माणिच
प्राणोवैमनवैमनइतिश्रुतेः प्राणस्यमनसःकर्माणिसंकल्प
विकल्पादिव्यापारांश्चज्ञानदीपितेज्ञानेननिश्चयेनप्रज्वालिते
अपरेउपसृष्टेआत्माबुद्धिःसंयम्यतइतिसंयमोमनसस्तयोर्योगः
प्रस्तुतकार्यैकविषयीकरणंसएवाग्निस्तत्रजुह्वतिजुहुयुःश्रो
त्रादीनिश्रवणादिव्यापारान्मनश्चपरमेनंपरमोपकारकंहन्या
मित्यादिसंकल्पान्निवर्त्यबुद्धिंचस्वकर्मविषयककर्तव्यतानिश्च
यात्मिकामालंब्यसवर्णाश्रमोचितेयुद्धादिव्यापारामनुतिष्ठति

तिभावः इतियोगयत्नोनिरूपितः २७॥

मधुभाष्य

२७॥

भाषाअनुवाद

ओर बहुतेक ध्यानी पुरुष श्रोत्रादि ज्ञानइंद्रियों के श्रवण आदि कर्म तथा वाक् आदि कर्मइंद्रियों के कार्य्य वचनआदि ओर प्राण अपान उदान व्यान समान नागकूर्म कृकल देवदत्त धनंजय येशरीर कीदश वायुवों के कर्म जो वहिर्गमनादि है सो सव आत्मसंयम योगअग्निमे होम करते है अर्थात् ध्यान के द्वारा चित्त की एका ग्रता रूप ज्ञानसे दीपित योग अग्निमे होमते लीन करते है अर्थात् धेय कहे ध्यानके विषय को ध्यानके द्वारा प्रज्वलित ज्ञानदीप की प्रकाश से वही धेय कहे ध्यानयोग्य ब्रह्म को अछी तरह जानकर ओर उसीमे मन को संयम कहे युक्त करिके सकल कर्मको हरकर देते हैं २७

दोहा

सम हि इंद्रिय कर्म कों प्राण कर्मको कोप आत्म संयम यो
गाग्नि जो ज्ञानदीप्त हवें सोप २७॥

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे स्वा-
ध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः २८

शांकरभाष्यं

द्रव्येति द्रव्ययज्ञास्तीर्थेषु द्रव्यविनियोगं यज्ञबुद्ध्या कुर्वंति ये ते द्रव्य-
यज्ञास्तपोयज्ञास्तपो यज्ञो येषां तपस्विनां ते तपोयज्ञा योगयज्ञाः
प्राणायामप्रत्याहारादिलक्षणो योगो यज्ञो येषां ते योगयज्ञास्त-
थापरे स्वाध्यायज्ञानयज्ञाश्च स्वाध्यायो यथाविधि ऋगाद्यभ्यासो य-
ज्ञो येषां ते स्वाध्याययज्ञाः ज्ञानयज्ञाः शास्त्रार्थपरिज्ञानं यज्ञो येषां ते
ज्ञानयज्ञाः स्वाध्याययज्ञा ज्ञानयज्ञाश्च यतयो यतनशीलाः संशित-
व्रताः सम्यक् शितानि तनूकृतानि तीक्ष्णीकृतानि व्रतानि येषां ते
संशितव्रताः २८

आनंदगिरिकृतटीका

यज्ञषट्कमवतारयति द्रव्येतीति तत्र द्रव्ययज्ञान् प्रकृष्टानुपादाय
विभजते तीर्थेष्विति तपस्विनां यज्ञबुद्ध्या तपोऽनुतिष्ठतां नियमवतां
इत्यर्थः प्रत्याहारादीत्यादिशब्देन यमनियमासनध्यानधारणास-
माधयो गृह्यंते यथाविधि प्राङ्मुखत्वपवित्रपाणित्वादियोगविधि-
मनतिक्रम्येति यावत् व्रतानां तीक्ष्णीकरणमतिदृढत्वं २८

स्वामिकृतटीका

किंच द्रव्ययज्ञा इति द्रव्यदानमेव यज्ञो येषां ते द्रव्ययज्ञाः कृच्छ्रचांद्रा-
यणादि तप एव यज्ञो येषां ते तपोयज्ञाः योगश्चित्तवृत्तिनिरोधलक्षण-
समाधिः स एव यज्ञो येषां ते योगयज्ञाः स्वाध्यायेन वेदेन श्रवणमन-
नादिना यत्तदर्थज्ञानं स एव यज्ञो येषां ते अथवा वेदपाठयज्ञास्तदर्थ-
ज्ञानयज्ञाश्चेति द्विविधा यतयः प्रयत्नशीलाः सम्यक् शितं निशितं ती-
क्ष्णीकृतं व्रतं येषां ते २८

पिशाचभाष्यं

गी॰
टी॰
च॰

द्रव्ययज्ञा इति द्रव्यादीनां हिरण्यगवादीनां दानमेव यज्ञो येषां ते द्र
व्ययज्ञाः दानमेव यज्ञमुपासत इत्यर्थः अपरे तु तपोयज्ञाः तपः कृच्छ्रा
दिचान्द्रायणादिकं तदेव यज्ञबुद्ध्या कुर्वंति योगयज्ञाः योगश्चित्तवृत्ति
निरोधः स एव यज्ञो येषां ते योगयज्ञाः यज्ञबुद्ध्या चित्तवृत्तिनिरोधमे
व कुर्वंतीत्यर्थः स्वाध्यायज्ञानयज्ञाः यज्ञशब्दः प्रत्येकमभिसंबध्यते
स्वाध्यायो वेदपाठः स एव यज्ञो येषां ते तथा तेषां शास्त्रपरिज्ञानं तदेव य
ज्ञो येषां ते ज्ञानयज्ञाः यज्ञबुद्ध्या ज्ञानं कुर्वंतीत्यर्थः सर्वे एव यतयः य
तनशीलाः संशितानि तीक्ष्णीकृतानि व्रतानि येषां ते संशितव्रताः २८

रामानुजभाष्यं

द्रव्ययज्ञा इति केचित्कर्मयोगिनो द्रव्ययज्ञाः न्यायतो द्रव्याण्युपादाय
देवार्चने प्रयतंते केचिद्दानेषु केचिद्यागेषु केचिद्धोमेषु एते सर्वे
द्रव्ययज्ञाः केचित्तपोयज्ञाः कृच्छ्रचान्द्रायणोपवासादिषु निष्ठां कुर्वंति
योगयज्ञाश्चापरे पुण्यतीर्थेषु पुण्यस्थानप्राप्तिषु इह योगशब्दः कर्मनिष्ठा
भेदप्रकरणात्तद्विषयः केचित्स्वाध्यायपराः स्वाध्यायाभ्यासपराः केचित्त ध्या॰५
दर्थज्ञानाभ्यासपरा यतयो यतनशीलाः संशितव्रता दृढसंकल्पाः
२८

अभिनवगुप्तकृतटीका

अपरे देवानि क्रीडाशीलानि इन्द्रियाण्याश्रित्य यः स्थितो यज्ञो निजनि
जविषयग्रहणलक्षणः तमेव परित उपासते आमूलाद्धि स्पृशतः स्वा
त्मलाभं लभंते अत एव ते योगिनः सर्वावस्थासु सततमेव योगयु
क्तत्वात् नित्ययोगी सन्नायं मतत्वीयः एनमेव च विषयग्रहणात्म
कं यज्ञं यज्ञेनैव तेनैव लक्षणेन अपरे परायत्तमशाक्ब्रह्माग्नौ जुह्व
तीति केचिद्व्याख्यानं मुनेस्तु पूर्वापर्यविरुद्धत्वाद्योगो यद्यपि हृदि स्थि
तः तत्प्रकाशयामः केचिद्योगयुक्ताः सतो देवनानारूपेन्द्रादिदेवतो
द्देशेनैव वासुद्रव्यमयं यज्ञमुपाचरंति तेच क्रियमाणमेव यज्ञं कर्त
व्यमिदमित्येव बुद्ध्या फलानपेक्षतया तु परं ब्रह्माग्नावर्पयंतीति इति
द्रव्ययज्ञा अपि परं ब्रह्म यांति यतो वक्ष्यते सर्वेऽप्येते यज्ञविद इति अ

तिरपि यज्ञेनयज्ञमयजंतदेवाइति अन्येतसंयमाग्निष्विंद्रिया
णीति संयमोमनःतस्ययेऽन्ययःप्रतिपन्नभावभावनारूपास्त्रभि
लाषलेषकाविस्फुलिंगास्तेष्विंद्रियाणिपर्यंनिग्रहतपवतेतेपोय
ज्ञाः इतरेज्ञानदीपितेषुफलदाहकेष्विंद्रियाग्निषुविषयानर्पयंति
भेदवासनानिरासायैवभोगानुभिलषंतीत्युपनिषत् तथाचमैयैव
लक्ष्यापक्रियायाशंक्य नभोगंव्यतिरिक्तंहिभोक्तस्ततोविभाव्यते
एषएवहिभोगोयत्तादात्म्यभोक्तृभोग्ययोरितिसंदेऽपि भोक्तैव
भोग्यभावनेसदासर्वत्रसंस्थितइति तेचसर्वाणिंद्रियव्यापारान्मा
नसान्मुखनासिकानिर्गमनमूत्रायणोनयनादीन्वायवीयांश्चात्म
नोमनसश्चसंयमहेतौयोगनाम्न्यैकाग्र्यवृद्धौसम्यग्ज्ञानपरिदीपि
तेप्रत्ययितव्यनिवेशयंति गृह्यमानेविषयेसंकल्प्यमानेवातदेकाग्र
तयैवतत्परित्यक्तासर्वव्यापारतयाऽऽत्माऽऽगृह्णीतितात्पर्यं तदुक्तंशि
वोपनिषदि भावत्यक्तेनिरूढाचित्तेनैवभावांतरंव्रजेत् तदानन्यभा
वेनविकसत्यतिभावनेति योगयज्ञाव्याख्याताः एवंद्रव्ययज्ञस्तपो
यज्ञोयोगयज्ञश्चोक्तलक्षणः स्वाध्यायज्ञानयज्ञश्च येतेसंशितल
ह्यते २८

परमार्थप्रपाटीका

अथान्यान्पंचयज्ञानाह द्रव्ययज्ञा इति द्रव्यदानमेवयज्ञोयेषांतेद्र
व्ययज्ञाअपरेतपःकृच्छ्रचांद्रायणादीनियज्ञोयेषांतेतपोयज्ञाः^ (योगश्चित्तवृत्तिनिरोधोयज्ञोयेषां तेयोगयज्ञाः ५^)
ढ^ तथाऽपरेस्वाध्यायोवेदपाठलक्षणोयज्ञोयेषांतेतथाज्ञानंशास्त्रार्थ
शास्त्रश्रवणमेवयज्ञोयेषांतेएवंपंचयाज्ञिकाः किंभूताःयतंतेय
तंतेयतयःप्रयत्नशीलाः तथासम्यक्प्रकारेणशितानितीक्ष्णीकृ
तानिव्रतानिपूरितानियेषांतेसंशितव्रताः एवंनवयज्ञाः २८

वनमालीटीका

द्रव्यत्यागएवयथाशास्त्रंयज्ञोयेषांतेश्रौतज्योतिष्टोमादिकर्मपरा
पूर्तदत्ताख्यस्मार्तकर्मपराःतथाचस्मृतिःवापीकूपतडागादिदेवता
यतनानिच अन्नप्रदानमारामःपूर्तमित्यभिधीयते शरणागतसंत्रा

गी॰ टी॰ च॰ णांभूतानांवाप्यहिंसनं बहिर्वेदिचयद्दानंदत्तमित्यभिधीयत इति
तथाकृच्छ्रचांद्रायणादितपएवयज्ञोयेषांतेतपोयज्ञास्तपस्विनः
योगश्चित्तवृत्तिनिरोधोयज्ञोयेषांतेयोगयज्ञाःयमनियमासनाद्य
याः नुष्ठानपराःयमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध
योहियोगस्याष्टांगानितल्लक्षणान्यन्यत्रज्ञेयानि स्वाध्यायोवेदपा
ठस्तदर्थश्रवणादिश्चज्ञानंब्रह्मादिपरापरतत्त्वविषयकंपरोक्षंरूपं नदेवयज्ञोयेषांते
यतयोयत्नशीलाःसम्यक्शितंतीक्ष्णीकृतंव्रतंयेषांतेसंशितव्र
ताःशोभनत्वकरणसंशितव्रताइतिपाठेसंशकथनेइतिधातो विहि
तकथितव्रताइत्यर्थः २८

ऊसमैवेजयंतीटीका

किंचद्रव्ययज्ञाइतिकेचियोगिनोद्रव्ययज्ञान्यायेनद्रव्यसंपादनंकृ
त्वाकेचिद्देवार्चनादिकंकुर्वंतिकेचिद्दानंकुर्वंतिकेचिद्यागंकुर्वंति
केचिद्धोमंकुर्वंति द्रव्ययज्ञाएवैतेसर्वेभवंतितत्रतत्रदेवार्चनादि
ष्वेवनिष्ठांकुर्वंतीत्यर्थःकेचित्तपोयज्ञाःकृच्छ्रचांद्रायणव्रतोपवासप
रास्तेतेतत्रतत्रैवनिष्ठांकुर्वंति केचियोगयज्ञाश्चात्रयोगशब्दःकर्म
निष्ठाभेदप्रकरणत्वात्पुण्यक्षेत्रतीर्थस्थानप्राप्तिरुच्यते पुण्यदेशा
दिप्राप्तिर्योगःसएवयज्ञोयेषांतेतथातेष्वेवनिष्ठांकुर्वंतीत्यर्थःतथा
अपरेयोगिनःस्वाध्यायज्ञानयज्ञाश्चकेचित्स्वाध्यायशीलाःवेदादि
पठनमात्राभ्यासशीलाःकेचित्तुनतदर्थज्ञानाभ्यासशीलाःयद्वास्वा
ध्यायेनवेदनश्रवणमननादिरूपाभ्यासेनयत्तत्तदर्थज्ञानंसएवय
ज्ञोयेषांतेतथा यतयस्तत्रतत्रयत्नपराःसंशितव्रताःसम्यक्शिता
नितीक्ष्णीकृतानिव्रतानियैस्तेतथादृढव्रताइत्यर्थः २८

एवंत्रिभिःश्लोकैःपंचयज्ञा मधुसूदनीटीका उक्त्वाधुनैकेनश्लोकेनषड्यज्ञानाह॥
द्रव्यत्यागएवयथाशास्त्रंयज्ञोयेषांतेद्रव्ययज्ञाःपूर्तदत्ताख्यस्मार्तक
र्मपराःतथाचस्मृतिर्वापीकूपतडागादिदेवतायतनानिच अन्नप्रदा
नमारामःपूर्तमित्यभिधीयते शरणागतसंत्राणंभूतानांचाप्यहिंस
नं बहिर्वेदिचयद्दानंदत्तमित्यभिधीयते इष्टाख्यश्रौतकर्मत्वेदैवमे

वापरेयज्ञमित्यत्रोक्तं श्रौतंवैदिदानमपितत्रैवांतर्भूतं तथाकृच्छ्र
चांद्रायणादितपएवयज्ञोयेषांतेतपोयज्ञाः तपस्विनः तथायोगः
चित्तवृत्तिनिरोधोऽष्टांगोयज्ञोयेषांतेयोगयज्ञाः यमनियमासना
नियमा२ दियोगांगानुष्ठानपराः यमसनप्राणायामप्रत्याहारधारणाध्या
नसमाधयोहियोगस्याष्टावंगानि तत्रप्रत्याहारःश्रोत्रादीनींद्रिया
णांत्वगोक्तः धारणाध्यानसमाधयस्त्वात्मसंयमयोगाख्याविवृताः
प्राणायामोऽपानेजुह्वतिप्राणमित्यनेनश्लोकेवक्ष्यते यमनिय
मासनान्यत्रोच्यंते अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहायमाःपंच
शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानिनियमाःपंचस्थिरसुख
मासनंपद्मकस्वस्तिकाद्यनेकविधं अशास्त्रीयःप्राणिवधोहिंसा
साचकृतकारितानुमोदितभेदेनत्रिविधाएवमयथार्थभाषणमवा
ध्यहिंसानुबंधियथार्थभाषणंवानृतंस्तेयमशास्त्रीयमार्गेणपरद्र
व्यस्वीकरणंअशास्त्रीयःस्त्रीपुंसव्यतिकरोमैथुनंशास्त्रनिषिद्धमार्गे
णदेहयात्रानिर्वाहकाधिकभोगसाधनस्वीकारःपरिग्रहःएतन्नि
वृत्तिलक्षणाउपरमायमाः यमउपरमइतिस्मरणात् तथाशौचंद्वि
विधंबाह्यमाभ्यंतरंच मृज्जलादिभिःकायादिक्षालनंहितमितमे
ध्याशनादिचबाह्यंमैत्रीमुदितादिभिर्मदमानादिचित्तमलक्षालनमा
तरं संतोषोविद्यमानसंभोगोपकरणादधिकस्यानुपादित्सारूपाचित्त दि२
वृत्तिःतपःक्षुत्पिपासाशीतोष्णादिद्वंद्वसहनं काष्ठमौनाकारमौनाव दि
तानिच इंगितेनापिस्वाभिप्रायाप्रकाशनंकाष्ठमौनं अवचनमात्रमा
कारमौनमितिभेदःस्वाध्यायोमोक्षशास्त्राणामध्ययनंप्रणवजपो
वा ईश्वरप्रणिधानंसर्वकर्मणांतस्मिन्परमगुरौफलनिरपेक्षत
यार्पणं एतेविधिरूपानियमाःपुराणेष्वेयेऽधिकाउक्तास्तेष्वेवय
मनियमेष्वंतर्भाव्याःएतादृशयमाद्यभ्यासपरायोगयज्ञाःस्वाध्याय
ज्ञानयज्ञाश्चयथाविधिवेदाभ्यासपराःस्वाध्याययज्ञाःन्यायेनवेदार्थ
निश्चयपराज्ञानयज्ञाःयज्ञांतरमाह यतयोयत्नशीलाःसंशितव्र
ताःसम्यक्शितानितीक्ष्णीकृतान्यतिदृढानिव्रतानियेषांतेसंशि
तव्रताःव्रतयज्ञाइत्यर्थःतथाचभगवान्पतंजलिः जातिदेशका

लसमयानवच्छिन्नाः सार्वभौमा महाव्रतमिति येऽपूर्वमहिंसाद्याः
पंचयमा उक्तास्त एव जात्याद्यनवच्छेदेन दृढभूमयो महाव्रतशब्दवा
च्याः तत्राहिंसा जात्यवच्छिन्ना यथा मृगयोर्मृगातिरिक्तान्न हनिष्या
मीति देशावच्छिन्ना तीर्थे न हनिष्यामीति सैव कालावच्छिन्ना यथा न च
तुर्दश्यां न पुण्येऽहनीति सैव प्रयोजनविशेषरूपसमयावच्छिन्ना य
था क्षत्रियस्य देवब्राह्मणप्रयोजनव्यतिरेकेण न हनिष्यामीति युद्धं
विना न हनिष्यामीति च एवं विवाहादिप्रयोजनव्यतिरेकेणानृतं न व
दिष्यामीति एवमापत्कालव्यतिरेकेणान्यद्रव्याद्यतिरिक्तं स्तेयं न क
रिष्यामीति एवमृतुव्यतिरिक्तकाले पत्नीं न गमिष्यामीति एवं गु
र्वादिप्रयोजनमंतरेण न परिग्रहीष्यामीति यथायोग्यावच्छेदो द्रष्टव्यः
एतादृगवच्छेदपरिहारेण यदा सर्वजातिसर्वदेशसर्वकालसर्वप्रयो
जनेषु भवाः सार्वभौमा अहिंसादयो भवंति महता प्रयत्नेन परिपाल्य
मानत्वात् तदा ते महाव्रतशब्देनोच्यंते एवं काष्ठमौनादिव्रतमपि द्रष्ट
व्यं एतादृशव्रतदार्ढ्ये च कामक्रोधलोभमोहानां चतुर्णामपि नर
कद्वारभूतानां निवृत्तिः तत्राहिंसया क्षमया च क्रोधस्य ब्रह्मचर्येण वा
स्तवविचारेण च कामस्य अस्तेयापरिग्रहरूपेण संतोषेण लोभस्य सत्ये
न यथार्थज्ञानरूपेण विवेकेन मोहस्य तन्मूलानां च सर्वेषां निवृत्ति
रिति द्रष्टव्यं इतराणि च फलानि सकामानां योगशास्त्रे कथितानि
[illegible] २८

सदानंदीटीका

एवं यज्ञांस्त्रिभिः श्लोकैरेकैकेन षडाह च द्रव्ययागो यथाशास्त्रं य
ज्ञो येषां स एव ते १ तप एवातिकृच्छ्रादि यज्ञो येषां तपस्विनां वित्तवृ
त्तिनिरोधाख्यो यज्ञो येषां स योगिनां २ वेदाभ्यासो यथाशास्त्रं येषां
स्वाध्यायिनामपरः शास्त्रार्थनिश्चयो येषां न्यायेन ज्ञानयाजिनां ३ व्र
तान्यतिदृढान्येव येषां ते व्रतिनां वराः ४ २८

नीलकंठीटीका

एवंयज्ञपंचकंश्लोकत्रयेणोक्तं अथैकेनैवश्लोकेनपंचयज्ञाना ह द्रव्येति द्रव्यसाध्याःवापीकूपारामाःतीर्थबहिर्वेदिकादानश्रौ तयज्ञानांप्रागेवग्रहणात् तएवयज्ञायेषांतेद्रव्ययज्ञाः तथातप कृच्छ्रचांद्रायणमासोपवासादितदेवयज्ञस्थानीयंयेषांतेतपो॰ यज्ञाः तथायोगयज्ञाःसंगफलत्यागपूर्वकंसंध्योपासनादिनि॰ र्विकल्पसमाध्यंतानांकर्मणामनुष्ठानंतृतीयाध्यायोक्तंयोगः स एवयज्ञोयेषांतेयोगयज्ञाःयद्वायमनियमासनप्राणायामप्रत्या हारधारणाध्यानसमाधिरूपोष्टांगोपेतोयोगश्चित्तवृत्तिनिरोध इतिसूत्रितोयोगएवयज्ञोयेषांतइति तथास्वाध्याययज्ञाःनित्यवे दाध्ययनरतास्तेस्वाध्याययज्ञाः ज्ञानंस्वाध्यायार्थस्यपूर्वोत्तरमी मांसाविचारःसएवयज्ञोयेषां स्वाध्याययज्ञाज्ञानयज्ञाश्चेतिस्वा॰ ध्याययज्ञानयज्ञाइतिसमासः यतयःयतनशीलाःसंशितव्रताःस म्यक्शितंतीक्ष्णंव्रतंअहिंसादिकंयेषांतेइतिसर्वेषांविशेषणं २

आनंदी टीका

अपरेवानप्रस्थाःवैतानिकंवर्जुउयादग्निहोत्रंयथाविधीत्यादिस्मृ त्यनुगमात्सपत्नीकावनेवसंतोद्रव्ययज्ञाःपुरोडाशादिभिरग्निंतर्प॰ यंतःतपोयज्ञाश्चांद्रायणेनैवेत्कालमित्यादिस्मृतेस्तपःसाध्योय॰ ज्ञोयेषांते तथायोगोष्टांगश्चित्तवृत्तिनिरोधोपायस्तेनसाध्योय॰ ज्ञोयेषांते आत्मसंयमयोगाग्नौजुह्वतीतिपूर्वेणान्वयः अनेनवाक्य द्वयेनस्वतविमस्तपत्नीकस्तयावानुगतोवनमितिद्वयोरेववान प्रस्थयोर्ज्ञानकर्मसमुच्चयोलक्षितः २४ एवंयतीनुक्त्वाह स्वाध्यायेति आत्म॰

✝ एवंयज्ञानांव्यापारभेदेनचतुर्विध

रामकंठीटीका

त्वंप्रतिपाद्येदानींआश्रमभेद प्रतिपादनद्वारेणयज्ञभेदान्प्रतिपादयितुंश्लोकद्वयंसार्धमाह ✝

✝ द्रव्येणहविरादिनायज्ञःपाकयज्ञादिर्यागविधिर्येषांतेद्रव्ययज्ञाः त त्रदेवतायजनप्रधानकर्तृक्रियानुष्ठायिनःसंभवंतीतिशेषः तेचगा र्हस्थ्याश्रमवर्तिनःप्राधान्येनात्राभिप्रेताः यतोगृहस्थानामेवद्र॰ व्यसाध्यनेदेवयज्ञेमुख्यतयाधिकारः तत्रपाकयज्ञस्सर्ववर्णसाधा

८ संयमयोगाग्नौजुह्वतीत्यादि पूर्वेणान्वयः अपरेचतुर्थाश्रमिणः संशितंतीक्ष्णं कृच्छ्रसाध्यं व्रतमेषांते स्वाध्यायः प्रणवजपः ज्ञानं परमात्मज्ञानंच एतत् आवश्यकं कर्म येषां ते आत्मसंयमे योगाग्नौ ज्ञानदीपिते जुह्वतीति तेषामपि ज्ञानं कर्म समुच्चयो दर्शितः स्मृतिश्चात्र एकाक्षरं परं ब्रह्म प्राणायामः परन्तपः उपवासात्परं भैक्ष्यं दया दानाद्विशिष्यते इत्यस्यार्थः एतएकं प्रणवाख्यमक्षरं ब्रह्मणः सर्वस्माद्वेदराशेः परमुत्कृष्टं एतस्य प्राणायामः तपसः कृच्छ्रचान्द्रायणादेः परं एतस्य भैक्ष्यमुपवासादनशनात्परं यस्माद्दयादानात्सर्वेभ्यो दानेभ्यः परं विशिष्यते तस्माद्यतीनां [illegible] प्रणवजपं प्राणायामं भिक्षाचर्यंच सततमावश्यकं कर्मानुतिष्ठेदितिशेषः

रणः यतः शूद्रस्यापि पाकयज्ञैः स्वयं यजेतेत्येको विहितोस्य नमस्
कारो मंत्र इत्यादिना तेष्वधिकारो विहितः तथान्ये तपोयज्ञाः तपसा
तेन तेन वर्णविशेषविभक्तेन नियमेन यज्ञो यागविधिर्येषां ते प्राधा
न्येन वानप्रस्थाश्रमिणोत्र गृह्यंते तेषामेव मुख्यतया तपोनिष्ठत्वा
त् आश्रमा विहिताः सर्वे वर्जयित्वा निराशिषमित्यादिना शूद्रस्या
प्यत्राधिकारात् तपोयज्ञेष्वधिकारः तथान्ये योगयज्ञाः योगेन यम
नियमोगनिर्वर्त्येन सबीजनिर्बीजरूपेण चित्तवृत्तिनिरोधे कलन
णेन समाधिना यज्ञो येषां ते योगयज्ञाः प्राधान्येन चतुर्थाश्रमिणः
तेषामेव प्राधान्येन योगपरत्वात् अत्रापि शूद्रस्याधिकारो विहितः
यतो भगवता व्यासमुनिनेव वचनं वर्णसाधारणो धर्मो निर्दिशता
तन्मध्ये आत्मज्ञानमुक्तं तथा च जनकपराशरसंवादे विशेषध
र्मान्वर्णानां प्रब्रूहि भगवन्मम तथा सामान्यधर्मांश्च सर्वत्र कुश
लो ह्यसीति प्रश्ने विशेषधर्माननुक्त्वा भगवान्पराशरः अनृशंस्यम
हिंसा चाप्रमादः संविभागिता श्राद्धकर्मातिथेयं च सत्यमक्रोधए
व च स्वेषु दारेषु संतोषः शौचं नित्यानसूयता आत्मज्ञानं तितिक्षा
च धर्मः साधारणो नृप अत्रैवान्यत्र न चापि शूद्रः पततीति निश्चयो
न चापि संस्कारमिहार्हतीति श्रुतिप्रवृत्तं न च धर्ममस्कृतेनर्वस्य
धर्मप्रतिषेधनं कृतं अत्रैवान्यत्रापि सर्ववर्णानां धर्मकार्याणि सम्य
क्कृत्वा राजन्सत्यवाक्यानि चोक्त्वा त्यक्त्वा धर्मं दारुणं जीवलोके यां
ति स्वर्गं नात्र कार्यो विचार इति स्वाध्याययज्ञा ज्ञानयज्ञाश्चापरे स्वाध्या
यो वेदवेदांगस्मृतीतिहासपुराणतर्कदंडनीतिवार्तादेर्यथास्वं स्व
स्वशास्त्रस्याध्ययनं तत्र प्राधान्येन ब्रह्मचार्याश्रमिणोधिकृताः
यतो मुख्यतया तेषां स्वाध्यायनिष्ठत्वं व्यवस्थितं तत्र च कस्मिंश्चिद्दे
शे कथंचिच्छूद्रस्याप्यधिकारो यतः स्वयं यजेतेति पाकयज्ञेषु त
स्याधिकाराभ्युपगमात् तदितिकर्तव्यताविज्ञानहेतोः कस्य चित्स्वा
ध्यायावयवस्य केनचित्प्रकारेणाध्ययनमवश्यमेव प्रसक्तं तथा ज्ञा
नयज्ञाः ज्ञानेन प्रबंधप्रतिपादितात्माद्वैतबोधात्मना यज्ञो यागवि
धिर्येषां तत्र सर्ववर्णाः सर्वाश्रमिणो गृह्यंते ततः शूद्रस्याप्यधिकारः

तथाचोक्तमिहैव परं ब्रह्मस्वरूपमात्मानं व्यपदिशता भगवता
मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः स्त्रियो वैश्यास्तथा शू-
द्रास्तेऽपि यान्ति परां गतिं इति न चातिशयोक्तिमात्रमेतत् यतो श्रु-
तिषैवोक्तो मोक्षधर्मे पिंगलासुलभाद्याः स्त्रियः तुलाधाराद्याश्च वै-
श्याः धर्मव्याधादयः शूद्रा आविर्भूततत्त्वज्ञानास्तत्र तत्रोदाहृताः
तदेवं ज्ञानयज्ञेन पूर्वोक्ता यज्ञभेदा ज्ञानयज्ञतामाप्नुवन्तीत्युक्तं भ-
वति स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः इति विशेषणं स्वा-
ध्याययज्ञानामप्येतन्नियमपरत्वाज्ज्ञानयज्ञानां च परमार्थनिष्ठत्वा-
त्स्वाध्याययतिलक्षणयोगाद्वेदितव्यं २८

लासिकी व[illegible]टीका

अथाश्रमभेदेन यज्ञविशेषान्प्रतिपादयति द्रव्ययज्ञा इति द्रव्येण ह-
विरादिना यज्ञो यागविधिर्येषां ते तत्र देवतायागक्रियानुष्ठायिनः
संभवन्तीति शेषः अत्र प्रायेण गृहस्थाश्रमिणोऽधिकृताः तपः कृच्छ्र-
चान्द्रायणादि यज्ञो येषां ते प्रायेण वानप्रस्थाश्रमिणस्तेषामेव तपो-
निष्ठत्वात् योगो यमनियमाद्यंग निर्वर्त्यश्चित्तवृत्तिनिरोधलक्षणः
स एव यज्ञो येषां ते प्राधान्येन चतुर्थाश्रमिणः स्वाध्यायो वेदवेदांग
स्मृतीतिहासपुराणतर्कोपनिषदादेर्यथास्वस्वशास्त्रस्याध्य-
यनमावर्तनं तथा ज्ञानं शास्त्रार्थस्य सम्यक्परिज्ञानं च स एव यज्ञ-
ो येषां ते तत्र प्रायेण ब्रह्मचर्याश्रमिणोऽधिकृताः यतयः प्रयत्न-
शीलाः संशितव्रताः सम्यक्शितानि तीक्ष्णीकृतानि व्रतानि सकल-
लक्षणानि येषां ते २८

पंचोलीटीका

द्रव्येति द्रव्यादीनां तीर्थेषु सत्पात्रेषु यत्तद्द्रव्यार्पणं द्रव्या
कुर्वंति ये ते द्रव्ययज्ञाः तप एव यज्ञो येषां ते तपोयज्ञाः अष्टांगयोग
एव यज्ञो येषां ते योगयज्ञाः वेदाध्ययनमेव यज्ञो येषां ते स्वाध्याय-
यज्ञाः वेदार्थदर्शनमेव यज्ञो येषां ते ज्ञानयज्ञाः सम्यक् शितं तन्-
कृतं कर्म यैः ते संशितव्रताः २८

द्रव्ययज्ञा इति केचिद्द्रव्ययज्ञाः द्रव्याणि दानादीनि यज्ञसाध
नानि येषां ते द्रव्ययज्ञा दैवमेवेत्यादिना प्रतिपादिताः केचित्तु
नस्तपोयज्ञाः तपः इंद्रियनियमनरूपं येषां ते तपोयज्ञाः श्रो
त्रादीनीत्यादिना व्याख्याताः अपरे तु नैयोगयज्ञा योगः इंद्रियम
नोवृत्तीनां विषयांतरान्निरोधपूर्वकं प्रस्तुतकार्यैकविषयक
निश्चयात्मिकया बुद्ध्या सह संयोजनं यज्ञसाधनं येषां ते योगयज्ञाः
प्राणादीनीत्यादिना लक्षिताः एते सर्वे स्वाध्याययज्ञाः स्वाध्यायो
यजुर्वेदाध्ययनं तदुक्तार्थदेवतामंत्रोच्चारणमिति यावत् यज्ञो
गुरुयज्ञसाधनं येषां ते तादृशाः ज्ञानं स्वोचितार्थोपपन्नदे
वताविषयकनिश्चयात्मकं यज्ञो गुरुयज्ञसाधनं येषां ते तादृ
शाश्च यतयः प्रयत्नशीलाः संशितव्रताः सम्यक्छितं तीक्ष्णी
कृतं व्रतं नियमो यैस्ते मयैतावत्स्ववर्णोचितं कर्म कर्तव्यमिति दृढ
निश्चयाः ब्रह्मव्रजेयुरिति शेषः २८॥

मधुभाष्य

२८॥

भाषाअनुवाद

और लोकमे कितने पुरुष द्रव्यदान ही को परम यज्ञ जानि द्रव्यदान रूप यज्ञ करते और बहुतेक मनुष्य कृछ्रचांद्रायण त था द्वादश वार्षिक व्रत आदिकमे चित्त लगाय तपरूप यज्ञ क रतेहे फेरि कितने जनयोग शास्त्रोक्त नेती धोती औ प्राणायाम आदि योग करके चित्तवृत्ति के रोधरूप योगयज्ञमे तत्पर हैं और बहुतेरे वेद शास्त्रके अध्ययन मनन को स्वकर्म जानि तद र्थ ज्ञान ही को सर्वस्व मानि स्वाध्याय ज्ञान रूपयज्ञ करतेहैं परंतु जो इंद्रिजित औव्रत मे तत्पर हे तेई ये सब यज्ञों कर स कतेहैं २८ ॥

दोहा

द्रव्य यज्ञ तपयज्ञ जो योगयज्ञ तिमिकोय स्वाध्याय यज्ञ॰
ज्ञान यज्ञ कर्त जितीद्रियसोय २८

117

अपानेजुह्वतिप्राणंप्राणोपानंतथापरे प्राणा
पानगतीरुद्ध्वाप्राणायामपरायणाः २९

शांकरभाष्यं

किंच अपानइति अपानेअपानवृत्तौजुह्वतिप्रक्षिपंति प्राणंप्राण
वृत्तिंपूरकाख्यंप्राणायामंकुर्वंतीत्यर्थः प्राणेपानंतथापरेजुह्वति
रेचकाख्यंचप्राणायामंकुर्वंतीत्येतत् प्राणापानगतीरुद्ध्वा मु
खनासिकाभ्यांवायोर्निर्गमनंप्राणस्यगतिस्तद्विपर्ययेणाधोगम
नमपानस्यतेप्राणापानगती एतेरुद्ध्वानिरुध्यप्राणायामपराय
णाः प्राणायामतत्पराःकुंभकाख्यंप्राणायामंकुर्वंतीत्यर्थः २९

आनंदगिरिकृतटीका

प्राणायामाख्यंयज्ञमुदाहरति किंचेति प्राणायामपरायणाः सं
तोरेचकंपूरकंच कृत्वाकुंभकंकुर्वंतीत्याह प्राणेति प्राणापानयो
र्गती श्वासप्रश्वासौनिरुध्यकिंकुर्वंतीत्यपेक्षायामाह किंचेति
प्राणापानगतिनिरोधरूपंकुंभकंकृत्वापुनःपुनर्वायुजयंकुर्वंती
त्यर्थः २९

स्वामिकृतटीका

किंचअपानइति अपानेयोवृत्तोप्राणमूर्ध्ववृत्तिंपूरकेनजुह्वतिपूर
ककालेप्राणमपानेनैकीकुर्वंति तथाकुंभकेनप्राणापानयोरू
र्ध्वाधोगतीरुद्ध्वाधोगतीरुद्ध्वारेचककालेपानेप्राणेजुह्वति एवंपू
रकरेचककुंभकैःप्राणायामपरायणाइत्यर्थः २९ अपर

पिशाचभाष्यं

अपानेअपानवायौप्राणं जुह्वतिउपासनयाप्राणहोमंसंपादयं
तीत्यर्थः प्राणाख्येवायौअपानंजुह्वतियथाग्नौहुतादिकंतथाहो
मंप्यानेनसंपादयंतिकथंभूताःसंतःप्राणस्यापानस्यतयोर्गतीप्रा

णापानगतीरुद्ध्वा निरुध्यप्राणायामपरायणाः प्राणायामः परमयनं
स्थितिर्येषांतेप्राणायामपरायणाः २९

रामानुजभाष्यं

अपान इति अपरेकर्मयोगिनः प्राणापानेषुनेजुर्वंति एतेचत्रिविधायज्ञाः
पूरकरेचककुंभक भेदेन अपानेजुह्वति प्राणामिति पूरकं प्राणेपा
नमितिरेचकं प्राणापानगतीरुद्ध्वाप्राणान्प्राणेषुजुह्वतीतिकुंभकं प्रा
णायामस्तेष्वपिषष्ठमनुषज्यतेनियताहारा इति २९

अभिनवगुप्तकृतटीकाउपलब्धं २९

परमार्थप्रपाटीका

अथान्ययज्ञात्रिनवमाह अपान इति अपानेअधोवृत्तौप्राणमूर्ध्ववृत्तिं
पूरकेणजुह्वति पूरककालेप्राणमपानेनैकीकुर्वंति तथाकुंभकेन
प्राणापानयोर्युगपद्गतीरुद्ध्वा रेचककालेअपानेप्राणंजुह्वति एवं
रेचकपूरककुंभकैः प्राणवायुवशीकुर्वंतः प्राणायामपरायणाः प्रा
णायामएवपरमयनंगतिर्येषांते तदुक्तं यथायथासदाभ्यासान्मनस
स्थिरताभवेत् वायुर्वाक्कायदृष्टीनांस्थिरताचतथातथेति श्रुतिरप्य
थर्ववल्लां आत्मादेवानांभुवनस्यगर्भोयथावशंचरतिएषदेवः घोषा
इदंयस्यशृण्वीतनरूपंतस्मैवाताय हविषाविधेमेति भाष्यंतस्मैवाताय
प्राणमुख्याय वायुर्वैगौतमसूत्रंतयावायुर्वैदेवपिष्टादेवतातथावा
योत्वमेवप्रत्यक्षंब्रह्मासीत्यादिश्रुतेर्वाताय हिरण्यगर्भायहविषाहवि
र्द्रव्येणयथोचिताहाररूपेणकृत्वाविधेमपरिचरेमविदध्यतिः परिच
रणकर्मातस्मैकस्मै यस्यइदमनुभूतायमानंरूपंघोषाः अनाहतध्वन
यः तथाशृण्वीतश्रवणविषयाकुर्वीत यथाएषप्राणलक्षणोदेवः वशो
वशतिवशवर्तीभवतिकिंभूतोदेवः देवानामात्मान्तर्यामीनकेवलंदेवा
नांभुवनस्यगर्भोबीजरूपः २९

वनमालीटीका

प्राणायामयज्ञमाह अपानेइति अपानेप्राणवृत्तौप्राणंप्राणवृत्तिं

जुह्वतिप्रक्षिपंति बाह्यवायोःदेहाभ्यंतरप्रवेशेनपूरकाख्यंप्राणायामं
कुर्वंतीत्यर्थः प्राणेपानंतथापरेजुह्वतिदेहवायोर्वहिर्निर्गमनेनरेच
काख्यंप्राणायामंकुर्वंतीत्यर्थः पूरकरेचककथनेनतदविनाभू॰
तोद्विविधःकुंभकोप्युक्तएव यथाशक्तिवायुमापूर्यानंतरंश्वासप्र
श्वासनिरोधेक्रियमाणेंतःकुंभकःयथाशक्तिसर्ववायुविरिच्यानंत
रंक्रियमाणेवहिःकुंभकःएतत्प्राणायामत्रयानुवादेनचतुर्थंकुंभक
माह प्राणापानगतीइति मुखनासिकाभ्यामांतरस्यवायोर्वहिर्निर्ग
मःश्वासःप्राणस्यगतिःवहिर्निर्गतस्यांतःप्रवेशःप्रश्वासःप्रश्वासोपा
नस्यगतिः तत्रपूरकेप्राणगतिनिरोधःरेचकेपानगतिनिरोधः कुं
भकेतूभयगतिनिरोधइतिक्रमेणयुगपच्छ्वासाख्यप्राणापानगती
रुद्ध्वाप्राणायामपरायणाःसंतोपरेपानेप्राणेजुह्वतीत्यर्थः २९

कुसुमवैजयंतीटीका

किंचअपानेइतिप्राणायामपरायणाःयमएवयामःस्वार्थेण आसमं
ताद्यामःआयामःप्राणायामाःप्राणायामएवपरमुत्कृष्टमयनमा॰
श्रयोयेषांतथातेप्राणसंयमनाश्रया अपरेयोगिनोऽपानेऽधोवृत्तौप्रा
णमूर्ध्ववृत्तिंजुह्वतिपूरकरीत्याऽपानेनसहप्राणस्यसंमेलनंकुर्वंतित
थाऽपानमधोवृत्तिंप्राणेऊर्ध्ववृत्तौजुह्वतिरेचकरीत्याऽपानस्यप्राणेन
सहसंमेल्यवहिर्निर्गमयंति तथाकुंभकरीत्याप्राणापानयोरूर्ध्वाधो
वृत्त्योर्गतीश्वासप्रश्वासौरुद्ध्वासंनिरुध्यवर्त्ततेइति आभ्यंतरस्यस्यवायो
र्मुखनासिकद्वारेणवहिर्निर्गमःश्वासःप्राणवायोर्गतिःतस्यवहिर्गत
स्यवायोरंतःप्रवेशःप्रश्वासोपानवायोर्गतिस्तयोर्योनिरोधरूपःसकुंभ
कइत्युच्यतेसकुंभकोद्विप्रकारकःवायुंपूरयित्वाश्वासप्रश्वासयोरंत
र्निरोधपूरकः वायुंविरिच्यश्वासप्रश्वासयोर्वहिर्निरोधरूपोद्वितीय इत्ये
वंप्राणायामरूपंयज्ञंकुर्वंतीत्यर्थः २९

मधुसूदनीटीका

प्राणायामयज्ञमाहसार्धेन॥
अपरेनियताहाराःप्राणान्प्राणेषुजुह्वति अपानेअपानवृत्तौजुह्वति॰

प्रक्षिपंति प्राणवृत्तिं बाह्यवायोः शरीराभ्यंतरप्रवेशेन पूरकाख्यं
प्राणायामं कुर्वंतीत्यर्थः प्राणेऽपानं तथापरे जुह्वति शरीरवायो
र्वहिर्निर्गमनेन रेचकाख्यं प्राणायामं कुर्वंतीत्यर्थः पूरकरेचककथ
नेनच तदविनाभूतो द्विविधः कुंभकोपि कथित एव यथाशक्ति वायु
मापूर्य्यानंतरं श्वासप्रश्वासनिरोधः क्रियमाणोंतःकुंभकः यथाशक्ति
सर्ववायुं विरेच्यानंतरं क्रियमाणो वहिःकुंभकः एतत्प्राणायामत्रया
नुवादपूर्वकं चतुर्थं कुंभकमाह प्राणापानगती मुखनासिकाभ्या॰
मांतरस्य वायोर्वहिर्निर्गमः श्वासः प्राणस्य गतिः वहिर्निर्गतस्यांतःप्र
वेशः प्रश्वासोऽपानस्य गतिः तत्र पूरके प्राणगतिनिरोधः रेचकेऽपान॰
गतिनिरोधः कुंभके तूभयगतिनिरोध इति क्रमेण युगपच्च श्वासाख्ये^ सप्रश्वा^
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः अपरेऽपरे पूर्वविलक्षणाः
नियताहारनियमादियोगसाधनविशिष्टाः प्राणेषु वाह्याभ्यंतरकुं
भकाभ्यासनिगृहीतेषु प्राणान् ज्ञानेंद्रियकर्मेंद्रियरूपान् जुह्वति
चतुर्थकुंभकाभ्यासेन विलापयंतीत्यर्थः तदेतत्सर्वं भगवता पतंज
लिना संक्षेपविस्तराभ्यां सूत्रितं तत्र संक्षेपसूत्रं तस्मिन्सति श्वासप्र॰
श्वासयोर्गतिविच्छेदलक्षणः प्राणायाम इति तस्मिन्नासने स्थिरे सति
प्राणायामोऽनुष्ठेयः कीदृशः श्वासप्रश्वासयोर्गतिविच्छेदलक्षणः श्वा
सप्रश्वासयोः प्राणापानधर्मयोर्या गतिः पुरुषप्रयत्नमंतरेण स्वाभावि
कप्रवहणं क्रमेण युगपच्च पुरुषप्रयत्नविशेषेण तस्य विच्छेदो निरो
ध एवलक्षणं स्वरूपं यस्य स तथेति एतदेव विवृणोति वाह्याभ्यंतरस्तं
भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्म इति वाह्यगतिनिरोध
रूपत्वाद्वाह्यवृत्तिः पूरकः आंतरगतिनिरोधरूपत्वादांतरवृत्ती रेचकः
केचित्तु वाह्यशब्देन रेचकः आंतरशब्देन च पूरको व्याख्यातः युगपदुभ
सकृद्^ यगतिनिरोधः स्तंभवृत्तिः कुंभकः तदुक्तं यत्रोभयोः श्वासप्रश्वासयोः
सकृदेव विधारकात्प्रयत्नादभावो भवति न पुनः पूर्ववदापूरणप्रय
त्नौघविधारणं नापि रेचनप्रयत्नौघविधारणं किंतु यथा तप्तउपले॰
निहितं जलं परिशुष्यत्सर्वतः संकोचमापद्यते एवमयमपि मारुतो वह
नशीलो वलवद्विधारकप्रयत्नावरुद्धक्रियः शरीर एव सूक्ष्मीभूतो वतिष्ठ

ते तत्र पूरयति येन स पूरकः तत्र रेचयति येन स रेचकः इति त्रिविधो यं प्रा
णायामो देशेन कालेन संख्यया च परीक्षितो दीर्घसूक्ष्मसंज्ञो भवति
यथा घनीभूतस्तूलपिंडः प्रसार्यमाणो विरलतया दीर्घः सूक्ष्मश्च
भवति तथा सोपि देशकालसंख्याधिक्येनाभ्यस्यमानो दीर्घो विरलत्वेन
तया सूक्ष्मोपि संपद्यते तथाहि हृदयान्निर्गत्य नासाग्रसंमुखे द्वादशा
ङ्गुलपर्यंते देशे श्वासः समाप्यते तत एव च परावृत्य हृदयपर्यंतं प्रवि।
शतीति स्वाभाविकी प्राणापानयोर्गतिः अभ्यासेन तु क्रमेण नाभेरा
धाराद्वा निर्गच्छति नासातः चतुर्विंशत्यंगुलपर्यंते षट्त्रिंशदंगुलप
र्यंते वा देशे समाप्यते एवं प्रवेशोपि तावानवगंतव्यः तत्र बाह्यदेशा।
व्याप्ति निर्वाते देशे इषीकादितूलक्रिययानुमातव्या अंतरापि पि
दि॰ पीलिकास्पर्शसदृशेन स्पर्शेनानुमातव्या सेयं देशपरीक्षा तथा नि
मेषक्रियावच्छिन्नस्य कालस्य चतुर्थो भागः क्षणः तेषामियत्तावधार।
णीयं स्वजानुमंडलं पाणिना त्रिः परामृश्य च्छोटिकावच्छिन्नः कालो।
मात्रा ताभिः षट्त्रिंशन्मात्राभिः प्रथम उद्घातो मंदः स एव द्विगुणीकृ
तो द्वितीयो मध्यः स एव त्रिगुणीकृतः तृतीयस्तीव्र इति नाभिमूला
त्प्रेरितस्य वायोर्विरिच्यमानस्य शिरस्यभिहननमुद्घात इत्युच्यते स
यं कालपरीक्षा संख्यापरीक्षा च प्रणवजपावृत्तिभेदेन वा संख्याप।
रीक्षा श्वासप्रवेशगणनया वा कालसंख्ययोः कथंचिद्भेदविवक्षया।
पृथगुपन्यासः यद्यपि कुंभके देशव्याप्तिर्नावगम्यते तथापि कालसं
ख्याव्याप्तिरवगम्यत एव स खल्वयं प्रत्यहमभ्यस्तो दिवसपक्षमासा
दिक्रमेण देशकालप्रचयव्यापितया दीर्घः परमनैपुण्यसमधिगम
नीयतया च सूक्ष्म इति निरूपितास्त्रिविधः प्राणायामः चतुर्थफलभू
तं सूत्रयति स्म बाह्याभ्यंतरविषयाक्षेपी चतुर्थ इति बाह्यविषयः
श्वासो रेचकः आभ्यंतरविषयः प्रश्वासः पूरकः वैपरीत्यं वा तदु।
लवद्रू॰ भावपेक्ष्य सकृद्विधारकप्रयत्नवशाद्भवति बाह्यांतरभेदेन द्विवि भ्यं॰
धस्तृतीयः कुंभकः तदुभावनपेक्ष्यैव केवलकुंभकाभ्यासपाटवे
नासकृत्तत्प्रयत्नवशाद्भवति चतुर्थः कुंभकः तथा च बाह्याभ्यंत
रविषयावेतावनपेक्ष्य इत्यर्थः अन्याख्यातं वा देशो विषयो।

१५०

द्वादशांतादिराभ्यंतरो विषयो हृदयनाभिचक्रादिः तौ द्वौ विषयावा त्रिप्यपर्यालोच्यः स्तंभवृत्तियोगतिविच्छेदः सचतुर्थः प्राणायाम इति तृतीयस्तु वाह्याभ्यंतरौ विषयावपर्यालोच्यैव सहसा भवतीति विशेषः एतादृशः चतुर्विधः प्राणायामोऽपाने जुह्वति प्राणमित्यादिसार्धश्लोकेन दर्शितः [illegible] २९ ॥

सदानंदीटीका

इदानीमाह सार्द्धेन प्राणायामं चतुर्विधं जुह्वत्यपानहृतौ च प्राणहृतिं तथापरे १ पूरकाख्यं प्रकुर्वंति प्राणायामं सदैव ते रेचकाख्यं प्रकुर्वंति प्राणेऽपानमितीतरे २ मुखेन नासया वायोर्निर्गमः प्राणिकी गतिः विपरीतमतोऽपानगमनं ते गती उभे ३ निरुद्ध्य कुंभकं प्राणायामं कुर्वंति योगिनः ४ २९ या॰

नीलकंठीटीका

एकादशं यज्ञमाह अपाने इति अपरे अपाने अपानवृत्तौ जुह्वति प्रक्षिपंति प्राणं प्राणवृत्तिं पूरकाख्यं प्राणायामं कुर्वंतीत्यर्थः तथा प्राणे च अपानं प्रक्षिपंति रेचकाख्यं प्राणायामं कुर्वंतीत्यर्थः प्राणापानगती रुद्ध्वा मुखनासिकाभ्यां वायोर्निर्गमनं प्राणस्य गतिः तद्विपर्ययेणाधोगमनं अपानस्य गतिः ते प्राणापानगती एते निरुध्य प्राणायामपरायणाः प्राणायामतत्पराः कुंभकाख्यं प्राणायामं कुर्वंतीत्यर्थः २९

आनंदीटीका

एवं चतुर्विधमाह आत्मसंयमयोगाग्नौ जुह्वतीत्यादिपूर्वेणान्वयः [illegible] द्रव्ययज्ञ [illegible] आत्मसंयमयोगाग्नौ ज्ञानदीपिते जुह्वतीत्येवमपि ज्ञानकर्मसमुच्चयोपदर्शितः [illegible] प्राणायामपरायणाः [illegible]

तदेवं चतुर्णामप्याश्रमिणां बाह्येन शरीरेण यज्ञादिकर्मणा ज्ञानसमुच्चयमुपदिश्य क्रमागतेन मानसिकेन कर्मणोपदिशन् प्राणायाममुपक्रमते अपाने इति प्राणापानगती रुद्ध्वा कोष्ठस्य वायोर्हृदयादूर्ध्वं संचारः प्रश्वासः प्राणगतिः अन्तर्नयनं श्वासोऽपानगतिः ते प्राणापानयोर्गती रुद्ध्वा श्वासविश्वासयोर्गतिर्विच्छेदः प्राणायाम इति योगपूरकबलदानानुसारं प्राणायामपरायणा योगाभ्यासिनः अपाने श्वासे प्राणं प्रश्वासं जुह्वति तथा प्राणे प्रश्वासेऽपानं श्वासं जुह्वति ॥ २९ ॥

सर्वेस्मात्

तुर्वंदसा णांवेलायाशेः प्र[illegible]यत्नश्च प्राणायामपरायणाः हृत्क
वेंद्रायणादेः परंयत्नश्च भेदत्तमुपवासादत्नप्रानाल्परं यस्माद्द्यावाना
त्सर्वेभ्यो दानेभ्यः परं विशिष्टं तेनस्मात्प्रतिः प्राणवत्नापः प्राणायाम
भेदाश्चर्यं च सततमभ्यासकं कर्म प्रतिलेविनि २९

रामकंठीटीका

अथ प्राणायामयज्ञस्य साधारणात्स्वरूपं प्रतिपादयन्नाह
अपरे केचिद्योगिनोऽपाने पूरकवृत्तौ अवस्थिते शारीरे मरुति प्राणं
रेचकवृत्तिमवस्थितं वायुं जुह्वति प्राणाख्ये वायौ हविर्भावेन क
ल्पयित्वाऽपाने चाग्नित्वेन यागविधिमनुतिष्ठंतीत्यर्थः रेचितः प्राणो
यदापानवृत्त्यात्मना परावर्तमानः स्वरूपं जहाति तदापाने सो हुतो
भवतीति कृत्वापाने जुह्वति प्राणमित्युक्तं अनेनैव क्रमेण प्राणोऽग्नि
भावेन परिकल्पितेऽपाने हविर्भूतमपानं जुह्वति इति रेचकवृत्तिपूर्व
कत्वेन पूरकवृत्तिविश्रांतिरूपतया पूरकवृत्तिपूर्वकत्वेन रेचकवृ
त्तिविश्रांतिरूपं प्राणायामक्रमद्वयं प्रतिपाद्य कुंभकवृत्तिरूपं क्र
मं प्रतिपादयितुमाह अपरेत्यप्राणापानयोरुद्धयोरपि गतीव्यापारौ रुद्धा स्तंभयित्वाः

लासिकी [illegible]टीका

अथ प्राणायामयज्ञस्य सर्वसाधारणात्स्वरूपं प्रतिपादयति
अपाने इत्यर्धेन अपरे प्राणसमाधानपराः अपाने पूरकवृत्तौ प्राणं
रेचकवृत्तिं जुह्वति हृदयएवापानावसानसमयएव सहसास्तंभ
नप्रयोगेन उदयोन्मुखमूर्ध्ववृत्तिं प्राणमस्तंगमयंतीत्यर्थः तदुक्तं
योगवासिष्ठे प्राणे रेचकमूलस्य मपानापूरकोटिगं स्वस्थं कुंभकम
भ्यस्यन् भूयः परितप्यते इति तथा प्राणे रेचकवृत्तावपाने पूरकवृ
त्तिं जुह्वति द्वादशांते प्राणवृत्त्युपरमसमयएवाजसेव स्तंभनाश्रय
णेनोदयोन्मुखमधोवृत्तिमपानमुपरमयंतीत्यर्थः तदुक्तं तत्रैव
अस्तंगतवति प्राणे त्वपाने भ्युदयोन्मुखे बहिः कुंभकमालंब्यचिरं
भूयो न शोच्यते इति एतदुक्तं भवति द्वादशांते हृदये वा प्राणापान
योरवसानवेलायां चिदात्मनोऽभिव्यंजनाय समाहिता भवंतीत्यर्थः

यावद्वृत्तिप्राणायामपरायणस्तथा विधानां रुद्धानां प्राणाना
मायाममुच्चिरकालावस्थानादीर्घीकरणं परायणं निष्पाद्यते यीते
तादृशः प्राणायामपरायणाः अनेन रेचकपूरककृत्योरपि प्रा
णानामायामएवोक्तो वेदितव्यः ॥२९

तदुक्तं शिवोपनिषदि मरुतोन्तर्वहिर्वापि वियत्पदगमनिवर्तनात्
भैरवं भैरवस्येत्थं भैरवि व्यज्यते वपुरिति तथा महार्थमंजर्यां यदि
निजहृदयोल्लासं निरोतं नित्यनिष्कलमिच्छा मध्यन्तदिक्कुटित
व्यास्त्रस्तंगतयोः सोमसूर्ययोस्तहीति मोक्षोपायेषु च प्राणद्वय
पदान्तमपानद्वयकोटिगं अपानप्राणयोर्मध्ये चिदात्मानमुपास्महे
इति तथा योगशास्त्रे वाह्याभ्यन्तरस्तंभवृत्तिर्देशकालसंख्याभिः प
रिदृष्टो दीर्घसूक्ष्म इति एवं प्राणापाने [illegible] दयात्मयसन्धिसमा
हितत्वेन परमात्मसमापत्तिहेतुं यत्नं प्रतिपाद्य कुंभकवृत्तिरूपं
यत्नमाह [illegible] अपरे रेचकपूरकांगत्व
कुंभकाभ्यसनशीला नियताहारा मात्राकालावच्छिन्नं हितं प
विचाप्रानःसंतः प्राणायामपरायणाः प्राणानामायामं रेचकपूर
कहृत्यादेयत्नविपरायणा रताः ॥ प्राणापानगती रुद्ध्वा कुम्भयित्वेत्यर्थः २९

पंचोलीटीका

अपान इति अपरे योगिनः अपाने अधोवृत्तौ प्राणमूर्ध्ववृत्तिं पूर
केण जुह्वति तथा अपरे रेचककाले प्राणे ऊर्ध्ववृत्तौ अपाने अधो
वृत्तिं जुह्वति कुंभककाले प्राणापानयोर्गती निरुद्ध्वा प्राणायाम
परायणा भवंति २९

रमावीरसमिद्बोधिनी

यत्नांतरमाह अपाने इति सार्धेन अपरे अन्ये प्राणस्य बलस्यायामे दै
र्घ्यमायाम आनाद इति कोषात् हि स्तावरणे परायणाः तत्पराः स्वपौ
रुषं व्यापयितुं प्रवृत्ता इति यावत् यद्वा प्राणस्य बलस्य पौरुषस्या
यामः समवेदीर्घीकरणमेव परमयनं येषां ते पौरुषमेव सर्वसाध
नेमन्वाना इति यावत् ते प्राणापानगती प्राणंतीति प्राणा हृत्स्य
स्था वायवः आनयति प्राणयतीत्यानः अन प्राणने इत्यस्य णिजंतस्य
रूपं आनः शरीरांतःसंचारी वायुः सोपगतो येभ्यस्ते अपानाः स्पं
दनादयस्तेषामुभयेषामपि गती संचरणागमनरूपे रुद्ध्वा पूरह

ष्याघुत्सर्जनेन प्रतिषिध्य तान्द्वयानपि विमुखान्संपाद्येतियावत्
प्राणं जीवंतं हस्त्यश्वादिकं प्राणादिप्रोतं विधायापाने स्पंदनादौ
जुहुति क्षिपेयुरिति तथा प्राणे हस्त्यश्वादावपानं स्पंदनादिकं क्षि
पेयुरितिसाधुयत्वे व्याख्यानं निराधुर्येत्ववीरे सति उभयानपि
प्राणापानान् प्रचंडक्रियमाणव्यातप्रकारेण विमुखान्संपाद्य
प्रमृणं हस्त्यश्वादिकं जंघादौ गृहीत्वा पाने रथादौ क्षिपेत् रथादि
कं च हलुवरवकादौ संपृष्ट हस्त्यश्वादौ क्षिपेत् अपानं विगतप्राणं
मृते हस्त्यश्वादिकं वा प्राणे जीवति हस्त्यादौ क्षिपेदिति २९॥

मधुभाष्य

२९

152

भाषा अनुवाद

और कितने हठ योगाभ्यासी मनुष्य अपान वायुमे प्राण वायु को पूरक प्राणायाम केद्वारा खैंचिकर होम करते है अर्थात् पूरक से मैंमे प्राण अपान एक करदेतेहै और कोइ कुंभक प्राणायाम से प्राण अपान वायुको ऊर्द्ध अधोगमन रोककर रेचक कालमे अपानवायु को प्राण वायमें औ विलेकर होम करहै लीन करदेते है औसे ही पूरक कुंभक रेचक के द्वारा प्राणायाम मेतत्पर रहते हैं और कोई कोई लोग आहार घटाय इंद्री शिथिल करके सोई सोई इंद्रियवृत्ति का लय रूप होम करते है अथवा पूरक रेचक दोनो स्वासा बंद.कर हंस औ सोहं इसको अनुलोम विलोम कहे उलट पुलट रूप अजपा मंत्रके द्वारा तत्वमसि महावाक्य मेकथित जो तत्पद औ त्वं पद तिनके अर्थके अनुसार ब्रह्म जीव की एकता अर्थात् सो ब्रह्म हम हैं और हम सो ब्रह्म है ऐसी भावना करते हैं और कोई प्राणायाम ही को यज्ञ कहते अर्थात् उदर के दो भाग अन्न से पूर्ण करि औ एक भाग पानीसे पूर्ण करि और वायुके संचारार्थ चतुर्थभाग खाली राखि विधिके अनुसार परिमित अहारीजन कुंभक के द्वारा प्राण अपान कीगति रोध करि प्राण दमन शील हो सब इंद्रियो को प्राणवायु मे होम करते हैं अर्थात् कुंभक से सब प्राण एक हो जाते और इंद्रीयगण लय को प्राप्त होता है २९

दोहा

अपान मांहि हवें प्राणको अपान प्राणमे कोय प्राण अपा
नगतिरोकके प्राणायाम करें सोय २९

अपरेनियताहाराःप्राणान्प्राणेषुजुह्वति सर्वे
प्येतेयज्ञविदोयज्ञक्षपितकल्मषाः ३०

शांकरभाष्यं

किंचअपरइति अपरेनियताहारानियतःपरिमितःआहारोयेषां
तेनियताहाराः संतःप्राणान् वायुभेदान्प्राणभेदेष्वेवजुह्वति
यस्ययस्यवायोर्जयः क्रियतेइतरान्वायुभेदांस्तस्मिन्जुह्वति
तेतत्रप्रविष्टाइवभवंति सर्वइति सर्वेप्येतेयज्ञविदोयज्ञक्षपित-
कल्मषाः यज्ञैर्यथोक्तैःक्षयितोनाशितोकल्मषोयेषांते यज्ञक्षपि
तकल्मषाः ३०

आनंदगिरिकृतटीका

आहारस्यपरिमितत्वेहितत्वमेष्टव्योपलक्षणार्थं प्राणानांप्रा
णेषुहोममेवविभजते यस्येति जितेषुवायुभेदेष्वजितानांतेषां
होमप्रकारंप्रकटयति तेतत्रेति प्रकृतान्यज्ञानुपसंहरति सर्वे
पीति यथोक्तयज्ञनिर्वर्तनानंतरं क्षीणकल्मषेकिंस्यादित्याशं
क्याह ३०

स्वामिकृतटीका

किंचअपरेइति अपरेत्वाहारसंकोचमभ्यस्यंतः स्वयमेवजीर्यमा
णेष्विंद्रियेषुतत्तदिंद्रियवृत्तिलयंहोमंभावयंतीत्यर्थः यद्वाअपाने
जुह्वतिप्राणंप्राणोपानेनतथापरेइत्यनेनपूरकरेचकयोरावर्त्यमा
नयोःहंसःसोहमित्यनुलोमतःप्रतिलोमतश्चाभिव्यज्यमानेनअ
जपामंत्रेणतत्त्वंपदार्थैक्यंव्यतीहारेणभावयंतीत्यर्थः तदुक्तंयो
गशास्त्रेहकारेणबहिर्यातिसकारेणविशेत्पुनःप्राणस्तत्रसए
वाहंहंसइत्यनुचिंतयेदितिप्राणापानगतीरुद्ध्वेत्यनेनश्लोकेनप्रा
णायामयज्ञाअपरेकथ्यंतेतत्रायमर्थःद्वौभागौपूरयेदन्नैस्तोयेनै
कंप्रपूरयेत् मारुतस्यप्रचारार्थंचतुर्थमवशेषयेदित्येवमादिवच
नोक्तोनियतआहारोयेषांतेकुंभकेनप्राणापानगतीरुद्ध्वाप्राणा

गीं
टीं
चं

यामपरायणाः संतः प्राणानिंद्रियाणि प्राणेषु जुह्वति कुंभके हि स
र्वे प्राणा एकीभवंति तत्र वलीयमानेष्विंद्रियेषु होमं भावयंतीत्यर्थः
तदुक्तं योगशास्त्रे यथा यथा सदाभ्यासान्मनसः स्थिरता भवेत् वायु
वाक्कायदृष्टीनां स्थिरता च तथा तथेति तदेवमुक्तानां द्वादशानां यज्ञ
विदां फलमाह सर्वे इति यज्ञान् विदंति लभंत इति यज्ञविदः यज्ञज्ञा इ
ति यज्ञैः क्षपितं नाशितं कल्मषं यैस्ते ३०

154

पिशाचभाष्यं

अपरे योगिनः नियतं संकुचितं येषां भोजनं ते नियमाहाराः अनशन
लक्षणे तपसि व्यवस्थिता इत्यर्थः प्राणान् प्राणेषु जुह्वति प्राणहोमं
ध्यानेन संपादयंतीत्यर्थः सर्वेप्येते यज्ञविदः यज्ञोपासकाः ३०

प्राणायामपरा इति त्रिष्टुप्
नुषज्यते नियताहारा इति च

रामानुजभाष्यं

सर्वे इति द्रव्ययज्ञप्रभृति प्राणायामपर्यंतेषु कर्मयोगभेदेषु प्रवृत्ता
एते सहायज्ञैः प्रजाः सृष्ट्वेत्यभिहितमहायज्ञपूर्वकं नित्यनैमित्तिक क
र्मरूपयज्ञविदस्तन्निष्ठास्तत एव क्षपितकल्मषा यज्ञशिष्टामृतेन शरी
रधारणं कुर्वंत एव कर्मयोगव्यापृता सनातनं ब्रह्म यांति ३०

अभिनवगुप्तकृतटीका स्पष्टार्थं ३०

परमार्थप्रपाटीका

अपर इति अन्ये आहारसंकोचमभ्यसंतः स्वयमेव जीर्यमाणेषु प्राणेष्विं
द्रियेषु प्राणांस्तत्तदिंद्रियरूपान् जुह्वति अशेषोपसंहरंति सर्वे इति सर्वे
प्येते निरूपितप्रकाराः यज्ञविदो याज्ञिका एव भवंति किंभूताः यज्ञक्ष
पितकल्मषाः यज्ञैः क्षपितं नाशितं कल्मषं मनोविगलक्षणं पापं येषां ते
३० ॥

वनमालीटीका

नियताहारा नियमादियोगसाधनविशिष्टाः प्राणेषु वाह्याभ्यंतरकुं
भकाभ्यां निगृहीतेषु प्राणान् ज्ञानेंद्रियकर्मेंद्रियरूपान् जुह्वति कुंभका

भ्यासेन विलापयंतीत्यर्थः यद्वा नियताहाराआहारसंकोचमभ्यसंतः
आहारनियमेन शुष्कान्प्राणानिंद्रियव्यापारान्प्राणेंद्रियेषु जुह्वति
निराहारेण शुष्यमाणेंद्रियवृत्तीनां इंद्रियाग्निषु होमं श्रीहरिसत्ता
त्वेन भावयंतीत्यर्थः उक्तानां यज्ञविदां फलमाह सर्वइति एतेपू
र्वोक्ताः सर्वेयज्ञविदो यज्ञकर्तारः यज्ञैः क्षपितं नाशितं कल्मषं येषां
ते ३० ॥

ऊत्तमवैजयंती टीका ॥

किंच अपरे इति अपरे योगिनो नियताहाराः संतः नियता नियमिताः
संकुचिता वाऽऽहारा भक्ष्यभोज्यलेह्यचोष्यपानादिरूपाणि भोजना
नि येषां ते तथा भोजनसंकोचमभ्यसंतः संतः प्राणांश्चेंद्रियेषु प्राणा
नींद्रियाणि ज्ञानकर्मात्मकानि दश जुह्वति स्वल्पाहारेण जीर्ण
प्रायेष्विंद्रियेषु सत्सु तत्तदिंद्रियवृत्तयस्तेष्वेव लीयंत इत्यर्थः
नियताहारा अपि प्राणायामपरेष्वपि विधेया न तु हैताः यतो नियताहा
राइत्यनेन ग्रंथेनोक्तास्त एते सर्वेपि सनातनं ब्रह्म यांतीत्युत्तरेणा
न्वयः उक्तः सनातनं ब्रह्म यांतीत्येतत् यो हेतुगर्भितेविशेषण
माह यज्ञविदः यज्ञान्सहयज्ञैः प्रजाः सृष्ट्वेति पूर्वोक्तान्महायज्ञप्र
वेक नित्यनैमित्तिककर्मरूपान्विंदंति जानंति ते तथा न परं उक्ता
एवैतो यज्ञक्षपितकल्मषास्तेतत्प्रकारकैर्यज्ञैरेव क्षपितकल्म
षत्वाद्ब्रह्म यांतीत्यर्थः ३० ॥

मधुसूदनी टी.

तदेवमुक्तानां द्वादशधा यज्ञविदां फलमाह यज्ञानुविंदंति जाने
नि विंदंति लभंते वेति यज्ञविदो यज्ञानां ज्ञातारः कर्तारश्च यज्ञैः पू
र्वोक्तैः क्षपितं नाशितं कल्मषं येषां ते यज्ञक्षपितकल्मषाः यज्ञान्
कृत्वावशिष्टे कालेऽन्नममृतशब्दवाच्यं भुंजत इति यज्ञशिष्टामृत
भुजः ते सर्वेपि सत्वशुद्धिज्ञानप्राप्तिद्वारेण यांति ब्रह्म सनातनं नि
त्यं संसारान्मुच्यंत इत्यर्थः ३० ॥

सदानंदी टी.

अन्येपरिमिताहारा निगृहीतेषु वायुषु विलापयंति ते प्राणवृत्ती
नकर्मेंद्रियाणि च १ तदेवं सम्यगुक्तानां फलमाहाधराधुना सर्वे
प्येते हि यज्ञानां ज्ञातारः साधकास्तथा २ नाशितं कल्मषं येषां यज्ञैः

गी॰ टी॰ ४॰

पूर्वोदितैः क्रतैः २९ ॥

नीलकंठी टी॰

द्वादशंयज्ञमाह अपरेइति नियतोनिरुद्धोनआहारोविषयभोगोयै
स्तेनियताहाराः वैराग्यादिमंतः प्राणान्मुख्यसमनस्कानींद्रियाणि
155 प्राणशब्देनउच्यंते द्वितीयांतप्राणशब्देनश्रोत्रादीनिवागादीनिच
उच्यंते तान्प्राणेषुमनश्चित्ताहंकारेष्वंतःकरणवृत्तिभेदेषु बुद्धेः
प्रागद्दीनत्वादग्रहणं जुह्वतिप्रविलापयंति इंद्रियाणिसंकल्पा
त्मकेमनसिसंहृत्यमनोपिस्मरणात्मकेचित्तेसंहृत्यतदपिअहंका
रेसंहरति सचाभिमानरूपोहंकारोभिमंतव्याभावात्स्वयमेवदग्धें
धनानलवद्विलीयते तत्रयेषांसमाधिवृद्धिरस्तितेआभिमानिक
बुद्धियोगभ्यः पूर्वोक्तेभ्योनिकृष्टाः अतएवएतान्प्रकल्प्योक्तंवाय
वीर्ये महत्त्वंत्वाभिमानिकाइति महत्त्वमन्वंतराणि इत्युक्तंषंगः
भौतिकैस्तुयोगात्रनोक्ताः यदत्रुक्तानन्हप्रकल्पतश्चैवोक्तं भौति
कास्तुशतंपूर्णमिति अप्यापिशतेमन्वंतराणीत्युक्तंपंजनीयं सर्वे
ष्येतेयज्ञविदोयज्ञलब्धारोयज्ञेनक्षपितकल्मषायेषांतेतथाविधा
भवंति सर्वेयज्ञाःकल्मषक्षयायैवभवंति नपुनःसाक्षान्मोक्षायेत्य
र्थः २९ ॥ — आनंदीटीका

अपरेएतेभ्यउत्कृष्टा अभ्यासेन नियताजिताहाराः आहरंति रसादी
निइतिवृत्त्याश्वासप्रश्वासाधैर्येलेह्यपेयाः प्राणान्देहान्तश्चारिणः
पंचापि वायून्रसमलधातूनामधोनयनसमनयनोर्ध्वनयनतिर्यङ्
यनैःशरीरधारणादिहेतून प्राणेषु हृदयादनवरतमुत्क्रामति परता
दस्वरूपवायौजुह्वतिस्तंभयंति तदुक्तं योगानुशासने श्वासप्रश्वास
योर्गतिविच्छेदः प्राणायामः सच बाह्याभ्यंतरस्तंभवृत्ति देशकाल
संख्याभिःपरिदृष्टोदीर्घसूक्ष्मइति प्रश्वासपूर्वोगत्यभावः सबाह्यः य
त्रश्वासपूर्वः सआभ्यंतरः तयोरभाववस्तृतीयः स्तंभवृत्तिरित्यादि तथा
ष्येतेहृदयाद्वादशांतं यावल्लब्धश्मिनयप्रकारेणदेशेनाभ्यस्तात्पृष्टा
तथाकालेनांतर प्राणादित्यसंचारापेतमासमसरवयनादिरूपेणप
विदृष्टः तथासंख्याभिः प्रथमोद्वादशमात्राभिः द्वितीयस्तुतद्विशुद्धि
तृतीयःषट्त्रिंशद्भिःस्तंभरतीव्राख्याभिःपरिदृष्टः इत्येवमभ्यस्तात
प्राणायामप्रकाशावरणंक्षीयते परमात्मकाष्ठाइतीति तदेवमपि
ताध्यायेषुविलक्षणानियमसंयमयोगस्यज्ञानसप्तयेसामान्यतःउद्देशंकृत्वा यज्ञानांफल
मेवाह सर्वेपीति सर्वेप्येते चत्वारोप्याश्रमिणः ब्रह्मार्पणादुक्तायज्ञंब्रह्मात्मकंजानंतः यज्ञेनयजनप्रकारे
ण क्षीणपापाः

नाहयोः प्राणायामप्रकारयोर्गतिः [illegible]
[illegible]णानामायामप्रकोलोवेदितव्यः ते चैवंविधा नियताहारा मात्रा
कालावच्छिन्नहितपवित्राशिनः संतः प्राणान्नानानाडीवाहिनो
वायून्नाज्यभूतान्मध्यमेषु प्राणेष्वग्निभूतेषु जुह्वति तत्र लीनान्
कुर्वंति मध्यमप्राणाहुत्यवलंबिनस्तिष्ठंति अयं प्राणयज्ञक्रमः प्र
तिपादितः एषोपि पूर्वोक्तज्ञाननिष्ठतयानुष्ठीयमानो ज्ञानयज्ञत्व
मापद्यते यतः पूर्वयोर्द्वयोः प्रकारयोः प्राणोदयास्तमयसंधिस
माहितत्वेन परमात्मसमापत्तिहेतुतामापद्यमानयोर्विज्ञानय
ज्ञता जायते तृतीयेपि क्रमे मध्यमप्राणपरिणतचित्ततया सोज्ञा
यते अस्य च प्राणायामक्रमस्य योगांगत्वेन व्यवस्थितस्यापि पुन
र्वचनं केवलस्यैव यज्ञविशेषप्रतिपादनार्थं वेदितव्यं एवमनुष्ठातृ
भेदेन यज्ञभेदान्प्रतिपाद्य सर्वेषामपवर्गफलत्वं यथा भवति तथा
प्रतिपादयितुमाह एते यथोक्तविविधयज्ञानुष्ठातारस्सर्वेपिस [illegible]
मस्तापव [illegible]
[illegible]
[illegible]
[illegible] ते तत्तत्प्रभूतेन यज्ञा [illegible]
[illegible] निर्विकल्प [illegible]
[illegible]

[illegible]

लासिकी [illegible]टीका

प्राणायामगतीरुद्धा कुंभयित्वेत्यर्थः प्राणान्नानानाडीवाहिनो वा
यून्मध्यमेषु प्राणेषु जुह्वति तत्र लीनान्कुर्वते एतत्कुंभं भवति रेच
कपूरककुंभकाभ्यासतारतम्येन भूमिजयाद्धारणास्थैर्याय मध्य
मप्राणाहुत्यवलंबिनास्तिष्ठंतीति यदुक्तं स्कंदे अपसव्येन पूर्येत
सकृन्नैव तु रेचयेत् नाडीनां शोधनं प्रोक्तं मार्गप्रथमस्य चेति रेच
णान्स्मरणाद्दोषात्प्राणायामास्त्रियामतः सामान्याद्बहिरेतेन पुनः
प्राभ्यंतरे त्रयः आभ्यंतरेणारेचितपूर्येताभ्यंतरेणाल निःस्पंदे कुंभ

गी
टी
व

केकृत्वाकार्याभ्याभ्यंतरेस्त्रयइति तदुक्तंयोगशास्त्रे वाह्याभ्यंत
रविषयाक्षेपीचतुर्थइति एवंकेषांचिद्यज्ञानोयोगांगत्वेनअव
स्थापितानांअपिदृष्टफलवचनंकेवलानामेवयज्ञविशेषत्वप्रतिपा
दनार्थंवेदितव्यं एवमनुष्ठातृभेदेन यज्ञभेदानुक्त्वासर्वेषामपव
र्गफलत्वमाह सर्वेपीत्यादि एतेयथोक्तविविधयज्ञानुष्ठातारः
सर्वेपियज्ञक्षपितकल्मषाः उक्तविधैर्यज्ञैःक्षपितंनाशितंकल्म
156
षंयैस्तेतथायज्ञान्कृत्वावशिष्टेकालेऽमृतरूपमानंदंभुंजाना उप
भोक्तारः अथवामृतरूपमन्नंभुंजानाः यज्ञविदः प्रत्यगात्मवेदि
नः संतोयथायथंसत्वविशुद्धिज्ञानोत्पत्तिद्वारेण सनातनंनित्यं
ब्रह्मयांतिसंसारान्मुच्यंतेइत्यर्थः ३०

पंचोलीटीका

अपरइति अपरेनियताहाराः नियतमितभोजनाः संतः प्रा
णान्वायुभेदान्प्राणेषुजुह्वति योगीयैर्येवायुंजयंतितास्मि
न्नितरेप्रविष्टाएवभवंतीत्यर्थः एतेसर्वेयज्ञविदोयज्ञक्षपिता
कल्मषाःस्वस्वानुष्ठितयज्ञनिर्हृतपातकाभवंति ३०

रणवीरसमिद्धायिनी ॥

अपरेइति अपरेपुनःकर्मयोगिनः मोक्षप्रणालिनोनियताहा
राः आहरति भक्षयति योधातूनिति श्रुत्याहारशब्देनपुष्टमभि
धीयते नियतोनियमविषयीकृत आहारोयैस्तेपुष्टव्रतयादि
राइतियावत् प्रमाणांजीवतोहस्त्यादीच्छराद्विषोनोजंवादिभ
ष्टदीनावाप्राणेषुजीवनहस्त्यादिषुदिपेषुरीतिसापुयवेवि
तापुष्टत्वेवपुष्टहरनिहृतिः प्रतिपादिता अत्रचभगवताकदाचि
तोयमर्थः नपरेअपरेस्वकीयाभीमादयः नियताहाराः नियता
नियमविषयीकृतः प्रतिज्ञातइतियावत् आहारोऽः प्रासनवद्ध
दयस्तुतरांयथायथानेयेते भीमसेनेनहि पूतसमायांकृत्वा

वमुक्ता कथितात् दुःखासनं प्रति प्रतिज्ञातं भवद्भिः स्वनर्वैक
स्यात्वसुतां रक्तधारामंजलिना पीत्वा कोयथ्यांति मेष्यामीति
तेवभीमादयः प्राणान् कार्यैकारणोपचाराद्धलाधायकान्
संजीवनोपायभूतान्वान्वेन प्राणाः इति श्रुतेः हचिकरान्न
भूतान्दुःखासनरक्तग्रासान्प्राणेषु पंचस्वर्पयेयुः पिवेयुरि
तियावत् अन्यथा प्रतिज्ञाभंगेन नरकादिप्राप्तेरिति सर्वथा
पुहुं विधेयमिति भावः तदेवमुक्तानां यज्ञविदां फलमाह
सर्वेपीत्यर्थीभ्यां एते सर्वेपि यज्ञविदः यज्ञान्देवादीन्स्वैवपर
क्षितान्विंदंति लभंते विंदंति जानंते वा ये ते यज्ञानां ज्ञातारः
कनारस्वयज्ञैकमलत्तरोः क्षपितं नाशितं कल्मषं रुव
यादिजन्यं पापं येषां ते तादृशाः ३०॥

मधुभाष्य

३०॥

157

भाषा अनुवाद

यही पूर्वोक्त बारह प्रकार के यज्ञकारीयों का प्राप्यफल कहते हैं कि ऐसी यज्ञ रूप क्रिया जिनकी जानी है और इन यज्ञोंसे जिनके पाप क्षय होगये हैं और यज्ञ समाप्त कर पीछे शास्त्र विहित अमृत रूप अन्न भोजन करते हैं फेर तत्वज्ञान के द्वारा नित्य सत्य ब्रह्म को प्राप्त होतेहैं सो कहा कि सब ये यज्ञवित् यज्ञसे नष्ट कल्मष कहे निष्पाप होय यज्ञशिष्ट अमृत भोगी सनातन ब्रह्म को जाते कहे प्राप्त होते हैं ३०

दोहा

औरे युक्त आहार जो हवित प्राण प्राण मे जोय यह सम यज्ञ
वेते यज्ञकर पापदीप जिनथोय ३० ॥

यज्ञशिष्टामृतभुजो यांति ब्रह्म सनातनं नायं
लोकोस्त्ययज्ञस्य कुतोन्यः कुरुसत्तम ३१

शांकरभाष्यं

एवं यथोक्तान् यज्ञान् निर्वर्त्य यज्ञशिष्टामृतभुजो यज्ञानां शिष्टं
यज्ञशिष्टं यज्ञशिष्टं च तदमृतं च यज्ञशिष्टामृतं तत् भुंजत इति य
ज्ञशिष्टामृतभुजो यथोक्तान् यज्ञान् कृत्वा तच्छिष्टेन कालेन यथा
विधिचोदितम् अन्नम् अमृताख्यं भुंजत इति यज्ञशिष्टामृतभुजो यां
ति गच्छंति ब्रह्म सनातनं चिरंतनं मुमुक्षवश्चेत् कालातिक्रमाप
क्षयेति शब्दसामर्थ्यात् गम्यते नायमिति नायं लोकः सर्वप्राणिसा
धारणोऽप्यस्ति यथोक्तानां यज्ञानाम् एकोपि यज्ञो यस्य नास्ति सोऽय
ज्ञस्तस्य कुतोऽन्यो विशिष्टसाधनसाध्यः कुरुसत्तम ३१

आनंदगिरिकृतटीका

एवमिति यथोक्तानां यज्ञानां मध्ये केनचिदपि यज्ञेनाविशेषित
स्य पुरुषस्य प्रत्यवायं दर्शयति नायमिति पादांतरेण कथं यथो
क्तयज्ञानुष्ठायिनाम् अवशिष्टेन कालेन विहितान्नभुजां ब्रह्मप्राप्तिरि
त्याशंक्य मुमुक्षुत्वे सति चित्तशुद्धिद्वारेत्याह मुमुक्षवश्चेदिति तत्
किमिदानीं साक्षादेव मोक्षो विवक्षितः तथा च गतिश्रुतिविरोधः
स्यादित्याशंक्य गतिनिर्देशसामर्थ्यात् क्रममुक्तिरत्राभिप्रेतेत्या
ह कालातीति ३१

स्वामिकृतटीका

यज्ञशिष्टेति यज्ञान् कृत्वावशिष्टे काले निषिद्धमन्नम् अमृतरूपं भुंजत इति
ते यांति सनातनं नित्यं ब्रह्म ज्ञानद्वारेण प्राप्नुवंति तदकरणे दोषमाह ना
यं लोक इति अयम् अल्पसुखोऽपि मनुष्यलोको अयज्ञस्य यज्ञानुष्ठानशून्य
स्य नास्ति कुतोऽन्यः परलोकः अतो यज्ञाः सर्वथा कर्तव्या इत्यर्थः स्पष्टम
न्यत् ३१

पैशाचभाष्यं

गी॰ टी॰ च॰

159

यज्ञस्य शिष्टं यज्ञशिष्टं यज्ञशिष्टमेवामृतं यज्ञशिष्टं तथामृतमिति
श्रुतेः अतो यज्ञविदो यज्ञपरिशीलिताः संतः शरीरयात्रार्थं यद्भुंजते ते
यज्ञशिष्टामृतभुंजाना इत्यर्थः यान्ति गच्छन्ति ब्रह्म सनातनं नित्यं अय
ज्ञस्य पुंसः अयमपि लोको नास्ति विशिष्टैरयज्ञमानत्वात् कुतोऽन्यः प
रलोको न साधनसाध्ययज्ञादिसाध्यस्तस्माद्यज्ञः प्रयत्नतः कार्य इत्य
र्थः ३१ ॥

यज्ञशिष्टामृतेन शरीरधारणं कुर्वन्तः स्वकर्मयोगे प्रवृत्ता सनातनं ब्रह्म यान्ति

रामानुजभाष्यं

नायमिति अयज्ञस्य [illegible] महायज्ञादिपूर्वक
नित्यनैमित्तिककर्मरहितस्य नायं लोकः न प्राकृतलोकसंबंधः प्रा
मा॰ कृते ह्यस्ति योऽयं धर्मार्थकामाख्यपुरुषार्थः स न विद्यते कुत इतोऽन्यो
मोक्षाख्यपुरुषार्थः परमपुरुषार्थतया ह्यस्य प्रस्तुतत्वादितरपुरुषा
र्थोऽयं लोक इति निर्दिश्यते स हि प्राकृतः ३१ ॥

अभिनवगुप्तकृतटीका [illegible] ३१

परमार्थप्रपाटीका

अथ द्वादशानां यज्ञानां फलमाह यज्ञेति यज्ञानंतरं शिष्टं विशिष्टं
सर्वफलापेक्षया न मयदमृतं सोमचक्रोज्ज्वलितमात्मसत्त्वं वा तद्भुं
जंते तथाविधाः संतः सनातनं नित्यं ब्रह्म यान्ति तदतिरिक्तं सर्वफलं
नश्वरमित्यर्थः अथोक्तयज्ञाऽकरणे दोषमाह नायमिति अयज्ञस्य उ
क्तयज्ञैकमप्यकुर्वाणस्य अयं मनुष्यलोकोऽपि नास्ति कुतोऽन्यः किंपु
नरुत्तमलोकः अयमयोनिष्पन्नतीत्यर्थः ३१

वनमालीटीका

यज्ञं कृत्वावशिष्टे कालेऽमृतपदवाच्यं भुंजते यज्ञशिष्टामृतभुजः
ते सर्वेऽपि सत्त्वशुद्धिद्वारा ज्ञानभक्तिप्रसादेन वाप्यसनातनं ब्रह्म श्रुति
वेद्यमस्मादादाविर्भूतहृद्गुणकं स्वस्वरूपं चाम[illegible]नीत्यर्थः परंज्यो
नि॰ तिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रुतेः यज्ञाकरणे दोष वं॰
माह उक्तयज्ञानां यस्यान्यतमोऽपि यज्ञो नास्ति सोऽयज्ञस्तस्यायमल्प

स्वल्पोमनुष्यलोकोनास्तिसर्वनिंद्यत्वात् अतोन्योविशिष्टसाधन-
साध्यःपरलोकः ३१॥

अत्तमवैजयंतीटीका

किंचयज्ञशिष्टेति यज्ञस्यविशेषःशिष्टमुच्छिष्टंतदेवामृतंमोक्षरूपं
मिष्टत्वात्भुंजंतिभक्षंतितेतथामोक्षभागिनोनत्वेवंभोगिनस्तेस
नातनंनित्यंब्रह्मव्यापकंयांतिप्राप्नुवंति नन्वयेयज्ञंनकुर्वंतितेब्रह्म
प्राप्नुवंतिनेवेत्याशंकायामाह नायमिति हेकुरुसत्तमकुरुश्रेष्ठ
तम अयज्ञस्यनास्तियज्ञोयस्यसतस्यपंचमहायज्ञादिरहितस्ययद्वा
यज्ञोविष्णुर्नयज्ञोयस्यसोऽयज्ञस्तस्ययदन्यत्वेनत्रविष्णुभिन्नस्येत्य
र्थः यद्वाविरोधेनत्रविष्णुविरुद्धस्येत्यर्थः पुरुषस्यायंलोकोधर्मार्थ
कामविशिष्टःप्राकृतलोकोपिनास्तिनभवति अन्योन्यप्राकृतलो
कःअतोनअतास्त्रिदपीत्यर्थः येनकुरूणांदेवयजनमेवकुरुक्षेत्रं
निर्मितंकुरुक्षेत्रंवैदेवयजनमितिशतपथश्रुतेः तस्यराजर्षेःकुरोर्वं
शेजातोसिकुलपरंपरयाप्राप्तत्वाद्यज्ञस्याकरणेतवमहान्दोषः
स्यादतस्त्वंयज्ञंकुर्विति सबोधनाशयः ३१

मधुसूदनीटीका

एवमन्वयेगुणमुक्त्वाव्यतिरेकेदोषमाहाऽयज्ञेन उक्तानांयज्ञानांम
ध्येऽन्यतमोपियज्ञोयस्यनास्तिसोऽयज्ञस्तस्यअयमल्पसुखोपिमनु
ष्यलोकोनास्तिसर्वनिंद्यत्वात् अतोन्योविशिष्टसाधनसाध्यःपर
लोकःहेकुरुसत्तम [illegible]
[illegible] ३१

सदानंदीटीका

यज्ञाकृत्वावशिष्टेयेकालेन्नंभुंजतेमृतं विनष्ट्यात्मसद्बोधप्रा
प्तिद्वारेणतेखिलाः १ ब्रह्मीभूताविमुच्यंतेसंसाराद्दुःखसागरात ३५
यस्यनैकोपियज्ञानामुक्तानांमध्यएषरः २ नायमल्पसुखस्तस्य
नृलोकोप्ययमस्यास्तुः सर्वनिंद्यतयादुःखभागिनोतिदरिद्रिणः ३
अतोन्यःस्वर्गमोक्षादिःसाध्योयःसाधनैर्वरैः ४ ३१

गी॰
टी॰
चं॰

२

नीलकंठीटीका

सर्वेषामेतेषांमध्येऽन्यतममप्यनुष्ठातुमशक्तंप्रत्याह यज्ञेति
यज्ञाःपंचमहायज्ञाःतेभ्यःशिष्टमवशिष्टमन्नममृतंतद्येभुंजते
तेपिवित्तशुद्धिद्वारासनातनंब्रह्मयांतिप्राप्नुवंति अयज्ञस्यपूर्वोक्तेभ्यो
द्वादशभ्योऽन्यतमोवा नित्याःपंचवायस्ययज्ञानसंतिसअयज्ञस्तस्य
अयमपिलोकोनास्ति अन्यःपरलोकआत्मलोकोवाकुतोभवेन्न
कुतोपीत्यर्थः ३१ ॥

16°

आनंदीटीका

को

प्राणापानगतीरुद्ध्वाश्लोकमवतारयति विवक्षितप्राणायामइति
योगशास्त्रलक्षणानुसारंप्राणायामपरायणायोगाभ्यासिनोपाने
ष्वासेप्राणंप्रश्वासंजुह्वति तथाप्राणेप्रश्वासेपानंश्वासंजुह्वति अ॰
परेपरेभ्यस्तकष्टाअभ्यासेननियताजिताहाराआहरंतीमादीनी॰
तिव्युत्पत्त्याश्वासप्रश्वासौयेत्तिहृदयेगाःप्राणान्देहांतश्चारिणः
पंचापिवायून्समस्तान्धार्थोनामयोनयनसमनयनतिर्यङ्नयनैः
हृतीरथगणादिहेतवप्रातोहृदयादनवरतंउच्छ्वाति परमानंद
रूपेवायोमंत्तभयोति तदुक्तंयोगानुशासनेश्वासप्रश्वासयोर्गतिविच्छे
दःप्राणायामःसतुबाह्याभ्यंतरस्तंभवृत्त्यादेशकालसंख्याभिःप॰
रिदृष्टोदीर्घसूक्ष्मइतियत्रप्रश्वासपूर्वोगत्यभावःसबाह्यःयत्रश्वासपू
र्वःसआभ्यंतरःतयोःस्तंभवृत्तितृतीयःस्तंभवृत्तिरित्यादि तयोप्येतेहृद
याद्द्वादशांतेयावल्लब्धभूमिजयप्रकारेणदेशेनाभ्यस्ताहृष्टाःतथा
कालेनांतरप्राणादित्यसंचारापेक्षमात्रमवयनादिरूपेणपरिदृष्टः
तथासंख्याभिःप्रथमोद्वादशमात्राभिर्द्वितीयश्चतुर्विंशतिभिस्तृती॰
यश्चषट्त्रिंशद्भिरिदंमंदतीव्रसंख्याभिःपरिदृष्टइत्येवमभ्यस्तात्प्राणा
यामात्प्रकाशावरणंक्षीयतेपरमःप्रकाशउदेतीति तदेवमर्थमा॰
यापेक्षुविनश्यतोलक्षणीयमयमयोगस्यसाधनकर्मसमर्थयेमा॰
मान्यतउद्देशक्रमयज्ञानामेवफलमाह सर्वेप्येतेचत्वारोप्याभिः
सेवसत्तांसंगुणामकमत्कामनेतोज्ञानेनोपयज्ञेनयजनप्रकारेणद्वी

आनंदी टीका

[illegible] यज्ञाय विनियुक्ताद्द्रव्याद्यदवशिष्टं तदेवामृतं भुंजानाः स
नातनं ब्रह्म यांति द्रव्ययज्ञेवाशिष्टमन्नमेवामृतममृतं परमानं
दः एवं च त्रयाणामप्याश्रमिणां ज्ञानकर्मसमुच्चयेनैव निःश्रेयससमि
तिसिद्धे यस्त्वालस्यप्रमादादिना कर्मसंन्यस्यति तं निन्दति स्पष्टम्
[illegible] ३१ नायं लोक इति

रामकंठीटीका

[illegible] निर्विशेषतया
मनानंतेनित्यमलयं ब्रह्मपरमात्मतत्त्वं यांति गच्छंति तदेव संपद्यन्ते
इत्यर्थः कीदृशाः यज्ञविदः संतः यदियथाप्रतिपादितब्रह्मार्पणवि
धानक्रमेणयज्ञं यथोक्तेनानारूपं यागं जानंति नित्यनिर्विकल्प
तयाप्रतिपद्यंते तेतत्तस्तथाभूतेन यज्ञविधिना क्षपितकल्मषा विना
शिताज्ञानलक्षणसुमहापातकाः संतस्तथानुष्ठिता यज्ञाविशिष्टं
तादृग्यागविधानंतरमाह यागीयं तदेवामृतं ब्रह्मार्पणविधान
दृष्ट्या ब्रह्ममयत्वादमृतमनंतानंदास्वादसंदोहरूपं यारसं भुंजते प
रमं विन्मयस्वात्मपरितोषाय चर्वयंतियेतथाविधाः संतः यथोक्तं
ब्रह्मलक्षणं पदं प्राप्नुवंतीत्यर्थः ब्रह्मार्पणज्ञानव्यतिरेकेनैतान्याग
विशेषाननुतिष्ठंतस्तेभ्यस्तत्तन्नानारूपपरिमितफलं प्राप्नुवंतीत्य
र्थात्प्रतिपादितं भवति यस्तु केवलेन क्रियामात्रेण ज्ञानक्रियासमु
च्चयेन वा द्वयोरेकतमेनापि विधिना यज्ञं न किंचिदनुतिष्ठति तस्य
अयज्ञस्योभयरूपतयापि यज्ञरहितस्यायमेव लोको दृष्टमेव नास्ति
अयं लोकः सर्वजनहेयस्य सतो नास्ति यदुक्तं सत्पथमेवकतात्तेमः कुत्रा
कत्वात्सर्वजनहेयस्य सतो नास्ति किं पुनरपरः स्वर्गापवर्गात्मक
व४ दर्शीर्विषादिं नास्तिकोपि सृहृजितेजनः किं पुनरास्तिक इति तस्ये
वं विधस्य पापशीलस्य कुतोन्यः तस्माल्लोकादपरः स्वर्गापवर्गात्मक
[illegible] भवति [illegible]
फलभोगास्पदमदृष्टसंज्ञो भवति [illegible] ३१
[illegible]

लासिकी [illegible]टीका

तथा यज्ञान्कृत्वावशिष्टेकालेमृतरूपमानंदंभुंजाना उपभोक्तारः अथवामृतरूप
मन्नंभुंजानाः यज्ञविदः प्रत्यगात्मवेदिनः संतो यथायथं सत्वशुद्धिज्ञानोत्कर्ष
द्वारेण सनातनंनित्यंब्रह्मयांति संसारान्मुच्यंते इत्यर्थः

गी॰ एवमन्वयेगुणमुक्त्वाव्यतिरेकेदोषमाह नायमिति उक्तानांयज्ञा
टी॰ नांमध्येन्यतमोपियज्ञोयस्य नास्तिसोऽयज्ञः तस्यायमल्पसुखो
व॰ पिमनुष्यलोकोनास्ति सर्वनिंद्यत्वात् कुतोन्योविशिष्टसाधन
साध्यः परलोकः अतः स्वाधिकारानुसारेणान्यतमोयज्ञः सर्वथा
नुष्ठेयइति ३१

16

पंचोलीटीका

एवंयथोक्तान्यज्ञान्निर्वर्त्यनिष्पाद्यतच्छेषभोजिनः फलंतद
करणेचदोषमाह यज्ञशिष्टेति यज्ञशिष्टामृतभुजः यज्ञवि
शिष्टामृतमेवभुंजतेयज्ञंकृत्वाशिष्टेकालेविधिवद्भुंजतेतेस
नातनंब्रह्मयांतिप्राप्नुवंतिहेकुरुसत्तम अयज्ञस्ययथोक्तय
ज्ञरहितस्यअयंसाधारणोलोकोनास्तिअन्योविशिष्टसाधन
साध्यःकुतः ३१

रणवीरसमिद्धाधिनी॥

यज्ञेनविष्णुनाशिष्टमात्तमंयदन्नंहेयाविताचावितयोर्यथा
संख्यंस्ताम्रतेऽत्यनुष्ठानसनादयाचितंस्वार्जितमन्नादिकंभुं
जतेयेतेयज्ञशिष्टामृतभुजः यद्वायज्ञादनुष्ठिताउक्तलक्षणात्दे
वादिप्रकारैर्नानाविधाद्वहुयज्ञाच्छिष्टमवशिष्टंयदमृतमया
चितरांस्यादिकंभुंजतेतिपालयंतीतिवा सनातनंनित्यंब्रह्मसर्वत
त्रोपरिवर्तमानंपरमेश्वराख्यंतत्वंयांति तत्साधुज्यंतीगच्छंति
भावार्थः एवमन्वयेगुणमुक्त्वाव्यतिरेकेदोषमाह नायमित्यर्थे
नश्लोकेनोक्तलक्षणानांयज्ञानांमध्येन्यतमेनापिविहीनोयःसोयज्ञ
स्तस्यायंस्वल्पसुखोपिलोकोमनुष्यलोकोनास्ति अन्यःस्वर्गा
पवर्गलक्षणःपरलोकःकुतःस्यात् तस्मात्सर्वेणायज्ञोविधेय
इतितात्पर्यं तथाचश्रुतिः यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणि
प्रथमान्यासन् तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंति
देवाइति अस्यार्थः देवाराजानःक्षत्रियजातयः यज्ञंपुरुषयज्ञं

यज्ञेन यज्ञो वै विष्णुरिति श्रुतेर्यज्ञो विष्णुः स चात्र स्वप्रासनय
नः स्वप्रीणनपरश्रुतेश्चाव विष्ण्वाज्ञया विष्णुप्रीणनहेतुना
व अयजंत कृतवंतः ओदनपाकं पचतीत्यादिवत्तस्यैव धा
तोः क्रियासामान्यवाचिनः प्रयोगः तानि च प्रथमानि प्रधाना
नि धर्माणि अनुष्ठेयानि आसन् अर्थात् तत्क्रियाणामिति भावः
बहुवचनं च यज्ञस्य देवादिप्रकारापेक्षया प्राधान्यातिशय
द्योतनार्थं च ते इति प्रसिद्धौ ते च क्रियामहिमाना माहात्म्यवि
शिष्टाः अकं दुःखं तन्न डःखप्राप्येन रकाद्देन सचेतनसंल
ग्नाः छोटसोऽभावः अथवा नाके सममर्थे द्वितीया स्वर्गादे
असचेत समवेताः अथवा न विद्यते कमविद्यास्मितारागद्वेषा
भिनिवेशाख्यं क्लेशपंचकं यत्र तस्मिन्परमेश्वराख्ये तत्त्वे सम
वेताः तत्सायुज्यं प्रापुरिति भोगमोक्षोभयलक्षणं फलं यज्ञस्य
दर्शितं यत्र यस्मिन्नाके पूर्वे समनंतरकल्पे जाता देवा राजानः
साध्याः साध्यनामानो भूताः संति राजान एव हि स्वधर्माचरणे
न स्वर्गे देवरूपतामासाद्य कल्पादनंतरं पूर्वाधिकारं परित्य
ज्योत्तरमासादयंति तस्मात्तेषां प्राक्तनमधिकारमन्ये राजान
स्त्येवाधितिष्ठंति उत्तराधिकारवर्तिनश्चात उत्तरमधिरोहं
तीति क्रमेण मुक्तिरपि तेषां भवतीति गुणगणेषु प्रसिद्धमिति
नोदाह्रियते इति ३१॥

मधुभाष्य

३२॥

162

भाषा अनुवाद

अब यज्ञ न करने मे दोष कहते हैं कि देखो यज्ञ न करनेवालों को यह अल्प सुख जो मनुष्य लोक सोई नहीं मिलता है तो परलोक सुख फेरि कहां प्राप्त होना है इससे यज्ञको निश्चय करना चाहिये कुरुसत्तम यहकै मुनिक न्याय से देखायाहै ३१

दोहा

यज्ञ शिष्ट अमृत भषहिं ब्रह्म सनातन होय नायहलोक
अयज्ञकों कुरुवर और का सोय ३१॥

163

एवंबहुविधायज्ञाविततात्रह्मणोमुखे कर्म
जान्विद्धितान्सर्वानेवंज्ञात्वाविमोक्ष्यसे ३२

शांकरभाष्यं

एवमितिएवंयथोक्ताबहुविधाबहुप्रकारायज्ञाविततातिस्ती
र्णाब्रह्मणोवेदस्यमुखेद्वारे वेदद्वारेणावगम्यमानाःब्रह्मणोमु
खेवितताउच्यते तद्यथावाचिहिप्राणंजुहुम इत्यादयःकर्मजा
न् कायिकवाचिकमानसकर्मोद्भवान् विद्धितान्सर्वाननात्मजा
न् निर्व्यापारोह्यात्माअतएवंज्ञात्वाविमोक्ष्यसेऽशुभात् नमद्व्यापारा
इमे निर्व्यापारोहमुदासीनइत्येवं ज्ञात्वास्मात्सम्यग्दर्शनात् मो
क्ष्यसेसंसारबंधनादित्यर्थः ३२

आनंदगिरिकृतटीका

उक्तानांयज्ञानांवेदमूलत्वेनोपेक्षानिबंधनत्वंनिरस्यति एवमि
ति आत्मव्यापारसाध्यत्वमुक्तकर्मणामाशंक्य दूषयति कर्मजा
निति आत्मनोनिर्व्यापारत्वज्ञानेफलमाह एवमितिकथंयथोक्ता
नां यज्ञानांवेदस्यमुखेविस्तीर्णत्वमित्याशंक्याह वेदद्वारेणेति
आत्मनोऽवगम्यमानत्वमेवोदाहरति तद्यथेति एतद्ब्रह्मैवेतत् ए
वंविद्वांसआहुरित्युपक्रमाध्ययनाद्यादित्य हेत्वाकांक्षायामुक्तं
वाचिहीति ज्ञानशक्तिमद्विषयेक्रियाशक्तिमदुपसंहारोत्र विव
क्षितःप्राणोवाबांचयोस्सेवप्रभवःसएवाप्ययइति वाक्यमादिश
ब्दार्थःज्ञानशक्तिमतोक्रियाशक्तिमतोत्वान्योन्योत्पत्तिप्रलयत्वा
द्यार्थःकर्मणामात्मव्यापारजन्यत्वा
त्तदभावेनाध्ययनादिसिद्धिरित्यर्थः कर्मणामात्मव्यापारजन्यत्वा
भावेहेतुमाह निर्व्यापारोहीति तस्यचनिर्व्यापारत्वफलवत्वात्
ज्ञानव्यमित्याह अतइति एवंज्ञानमेवज्ञापयन्उक्तंव्यनक्ति ने
त्यादिना ३२ स्वामिकृतटीका

गी॰ टी॰ च॰

ज्ञानयज्ञं स्तोतुमुक्तान्यज्ञानुपसंहरति एवं बहुविधा इति ब्रह्मणो वेदस्य मुखे वितता वेदेन साक्षाद्विहिता इत्यर्थः तथापि तान्सर्वान् वाङ्मनःकायकर्मजनितान् आत्मस्वरूपसंस्पर्शरहितान्विद्धि जानीहि आत्मनः कर्मागोचरत्वात् एवं ज्ञात्वा ज्ञाननिष्ठः सन् संसाराद्विमुक्तो भविष्यसि ३२ ॥

164

पिशाचभाष्यं

एवमुक्तप्रकारेण बहुविधा बहुप्रकारा यज्ञा वितता विस्तीर्णा ब्रह्मणः परमात्मनः मुखे आसे पते यज्ञाः परमात्मनः प्रत्यासन्ना राधनवर्त इत्यर्थः तांश्च यज्ञान्कर्मजान् वाङ्मनःकायकर्मात्मनः स्वरूपभूतात्मनः शुद्धकूटस्थरूपत्वात् ३२

रामानुजभाष्यं

एवं बहुप्रकाराः कर्मयोगाः ब्रह्मणो मुखे वितताः आत्मयाथात्म्यावा
न॰ प्तिसाधयिताः उक्तलक्षणानुक्तभेदान्कर्मयोगान्सर्वान्कर्मजान्विद्धि अहरहरनुष्ठीयमाननित्यनैमित्तिककर्मसक्तान्विद्धि एवं ज्ञात्वा यथोक्तप्रकारेणानुष्ठाय मोक्ष्यसे ३२

अभिनवगुप्तकृतटीका

प्राणमुदयमानं नादं प्रणवादिमात्रालयान्ते अपाने स्तंभयाति स्वानंदान्तः प्रवेशात्मनिरुद्धनीति पिंडस्थैर्यात्मा स्वाध्यायः शिष्यात्मनाचनयानयग्रहणाय केचित् अस्तंयान्तमुदीयमाने संवेशपतदेकीकारेणापवर्गदानात्मनि शिष्यात्मनि च शोधनबोधनप्रवेशनयोजनरूपे स्वाध्यायज्ञाने स्वपरानंदमये प्रतिष्ठितमनसः अतएव पूरकः प्रथममुक्तः चरमे रेचकः प्रथमेन च पादेन विषयभोगान्तर्भावीकरणं द्वितीयेन महाविदेहधारणाक्रमाद्विषयग्रहणाय निस्सरणं ध्यते अतश्च स्वाध्याययज्ञेभ्यो न्ये ज्ञानयज्ञाः एतएवोक्तव्यापारपरिशीलनावशपरिपूरितस्वात्मशिष्यात्ममनोरथाः द्वे अप्येते गतीनिरुद्ध्याहारं विषयभोगात्मकं नियम्य प्राणान्सकलचित्तहृदयान्प्राणे

शुपरनिरानंदोल्लासेष्वपर्यवतिज्ञंभकप्रशांत्या सर्वेवैतेद्रव्ययज्ञाद्या-
वृतिज्ञानयज्ञांतेयज्ञस्यतत्त्वज्ञाः तेनैवयज्ञक्षपितकल्मषाः समूलोन्मू-
लितभेदवासनामयमहामोहा यज्ञेनशिष्टमाहृतंयज्ञाश्चनिजक-
रणतर्पणरूपादवशिष्टस्वात्मविश्रांतिरूपंपरानंदनिरानंदात्मक-
ममृतमुपभुंजानाअपियथेच्छंसंस्तंभंतेब्रह्मतयाइतितदुपरम्यते
रहस्यस्फुटप्रकटनवाचालतया अत्रचबहुतरोरहस्यार्थो
नःसंलीनीकृतोपिनिविडतरभक्तिसेवासप्रसादितगुरुचरणप्राप्तसं-
प्रदायमहौषधसमीकृतयाहृणोचवर्णाविषयतांभूतार्थास्वादहेतु-
त्वाचप्रतिपद्यते अत्रचव्याख्यांतराणिटीकाकारैःप्रदर्शितानितान्य-
स्मद्गुरुपादनिरुक्तानिचस्वयमेवसचेतसःसंप्रधार्यंतामिति किम-
न्येनहंतव्याख्यातृवचनदूषणविनोदेन तदुपक्रांतमेवोपक्रम्यते ॥
सर्वएतेयज्ञाब्रह्मणोमुखेद्वारेउपायत्वेकथिताः तेचकर्मणामनगा-
मोक्षि एवंज्ञात्वात्वमपिबंधनान्मोक्षमेष्यसि ३२

परमार्थप्रपाटीका

अथज्ञानयोगंस्तोतुंअन्यान्यज्ञानुपसंहरति एवमिति एवममुनाप्र-
कारेणब्रह्मणोमुखेब्रह्मप्राप्त्यर्थं एतेवेदबहुविधाःवितताःविस्त-
ताविस्तारेणकथिताः सेतितान्सर्वान्कर्मजान्विद्धि कर्मणाकृतानि
च्यमान्जानीहि तस्मात्कर्मकर्तव्यमेवएवंकर्मणाकृतेसतिचित्तशु-
द्धिद्वाराज्ञात्वाज्ञानमुत्पाद्यविमोक्षसेमोक्षंप्राप्स्यसि ३२

वनमालीटीका

एवंविधायज्ञाब्रह्मणोमुखेविततामत्प्राप्त्युपायइत्यर्थः ओंकारं
यज्ञतपसामितिवक्ष्यमाणत्वात् कर्मजान्कायिकवाचिकमानस
कर्मजान्विद्धिजानीहि एवंयज्ञानांकर्मजत्वंज्ञात्वाविमोक्ष्यसे स-
र्वेयज्ञाः ईश्वरप्रेरितदेहेंद्रियादिकर्मजानतुकेवलंमत्कर्तृकाइत्येवं
ज्ञात्वालोकयज्ञाश्रद्धादिस्वधर्मंचानुष्ठायकर्मफललेपरहितःसन्सं-
साराद्विमोक्ष्यतेइतिभावः ३२

ऊहमेवेजंयतीटीका

165

किंचएवंबहुविधाइति एवमुक्तप्रकारेणबहुविधाःअनेकप्रकारायज्ञाःकर्मयोगाःब्रह्मणश्चतुर्मुखस्यमत्स्यस्यमत्स्यरूपस्यवेदस्यवामुखेविततताःआत्मप्राप्त्युपायत्वेनस्थिताःनतुमुखेविततताइत्येवंभगवताकथमुच्यते यतोयज्ञस्यकर्मणःपंचकर्मेंद्रियविषयत्वात् चत्वारिप्राणायादीनिविहायैकस्यमुखस्यग्रहणेनसंभवतीतिचेन्नसर्वेषामिंद्रियाणांपरस्परंसापेक्षत्वेपिस्वस्वविषयेस्वतंत्रत्वेपिवचनाधीनविषयत्वेनमुखप्राधानिकत्वान्मुखइत्युक्तमतःसंभवत्येवतानुक्तलक्षणान् सर्वानुक्तभेदान्कर्मजान्कर्मजनितान् त्वंविद्धिजानीहिएवमुक्तप्रकारेणज्ञात्वातान्सर्वान्विज्ञायानुष्ठायचविमोक्षसेसंसारान्मुक्तोभविष्यसि ३२ ॥

मधुसूदनीटीका

किंत्वयास्वाध्यायाध्ययनेनैवतज्ज्ञायते नहिवेदएवात्रप्रमाणमित्याह ॥

एवंयथोक्ताबहुविधाबहुप्रकारायज्ञाःसर्ववैदिकश्रेयःसाधनरूपाविततताविस्तृताब्रह्मणोवेदस्यमुखेद्वारेवेद्वारेणैवेतेवगताइत्यर्थः दः
वेदवाक्यानितुप्रत्येकंविस्तरभयान्नोदाह्रियंते कर्मजान्कायिकवाचिकमानसिककर्मोद्भवान्विद्धिजानीहितान्सर्वान्यज्ञान्आत्मजान्नि ननाः
र्व्यापारोह्यात्मानमद्व्यापारापतेकिंतुनिर्व्यापारोहमुदासीनइत्येवंज्ञात्वाविमोक्ष्यसेऽस्मात्संसारबंधनादितिशेषः [illegible] ३२ ॥

सदानंदीटीका

एवंबहुप्रकारास्तेवेदद्वारेणविस्तृताः यज्ञाअवगतास्तांस्त्वंयज्ञाञ्जानीहिसर्वकान् १ कायवाङ्मनसामेवकर्मभ्योहिसमुद्भवान् नत्वात्मजान्यतश्चात्मानिर्व्यापरश्चिदद्वयः २ मद्व्यापारानवैवैतेनिर्व्यापारोहमक्षरः देहेंद्रियादयःसर्वेक्रियाधाराजडाश्चलाः ३ मय्यक्रियेविदानंदेकल्पिताःखेयथामला नयथास्तस्यदोषेणगुणेनास्तिमनागपिलेपाधिष्ठानविद्वानोर्ममाद्वैतस्यसर्वथा एवंज्ञात्वैवसंसारबंधनात्वंविमोक्षसे ५ ३२

नीलकंठीटीका

एवमिति ब्रह्मणो वेदस्य मुखे द्वारे वेदद्वारेणैव वितता विस्तारिताः
गृहभिरुपदिष्टा इत्यर्थः कर्मजान् कायिकवाचिकमानसिककर्म
जान् न त्वनेककर्मस्वरूपान् एवं ज्ञात्वा अस्मादशुभात् मोक्ष्यसे न त्वज्ञा
नोत्पत्तिद्वारेणेत्यर्थः ३२

आनंदी टीका

सिद्धान्तमाह

बहुविधा नित्यनैमित्तिकप्रकारैरनेकैः कार्यः अनेके च ब्रह्मणो वे
दस्यैव मुखे वितता नत्वकेनचित्कल्पिताः [illegible] कर्मजा
[illegible] ३२

रामकंठी टीका

अथैतेषां सर्वयज्ञानां कर्मतत्व प्रतिपादनेन ज्ञानयज्ञत्वापत्तिं प्रतिपादयि
तुमाह एवं यथोक्तेन क्रमेण भूरिप्रकारा यज्ञा ब्रह्मणो वेदादेः शास्त्रस्य मुखे
तद्द्वारेणेत्यर्थः तान्सर्वान्कर्मजान्वाङ्मनःकायव्यापारनिर्वर्त्यत्वा
त्क्रियासमुद्भवान्विद्धि नात्मैषामात्मलाभोपपत्तिरिति निश्चिनु ये
पि हि बुद्धिमात्रसाधना यज्ञास्तेषु तावत्क्रमस्त्वं बुद्धिव्यापाराव्यभिचार
स्थित एव ततः स्फुटत्वादशक्यपरिहाराणां कर्मात्मकानां यज्ञानां
यथोक्तज्ञाननिष्ठत्वादनुष्ठानमपवर्गसिद्धिहेतुरित्येवं ज्ञात्वा सम्यक्प्र
तिपाद्य विमोक्ष्यसे स्वयमेव केवली भविष्यसि न निमित्तान्तरमपेक्षि
ष्यस इति समुच्चय ज्ञानस्य मोक्षं प्रतिसौकार्य प्रतिपादनाय विमोक्ष्यसे
इति कर्मकर्तरि प्रयोगः (...)

लासिकी [illegible]टीका

एवमेतेषां यज्ञानामनुष्ठानक्रमेणैव फलसिद्धिर्न तु केवलेनावगम
मात्रेणेत्याह एवमिति एवं यथोक्तप्रकारेण भूरिप्रकारा यज्ञा ब्रह्म
णो मुखे परिज्ञानहेतोः मुखभूताया शक्तेः प्रत्यभिज्ञानिमित्तं तदु
क्तं शिवोपनिषदि शक्त्यवस्थाप्रविष्टस्य निर्विभागेन भावना तदा सौ
शिवरूपी स्यात् शैवी मुखमिहोच्यते इति यथा हि मुखेन सोयमिति प्र
त्यभिज्ञायते तथा शक्त्या ब्रह्म ज्ञायते तदुक्तं तत्रैव यथालोकेन दी
पस्य किरणैर्भास्करस्य वा ज्ञायते दिग्विभागादि तद्वच्छक्त्या शिवस्य
चेति अथवा वेदादेः शास्त्रस्य मुखे तद्द्वारेणेत्यर्थः वितता ब्रह्मणो मु

गीं
टीं
वं

166

त्वेभूतायाःपरामर्शरूपायाःशक्तेरूपलंभार्थमुपायत्वेनविस्ता
रिताः नडकेः केवलज्ञानसत्तायाःप्रारंभोयंप्रवेशेनइति तान्सर्वा
न्कर्मजान्कर्मणाऽनुष्ठानेनाभ्यासानुरोधिनाजातान्मोहलक्षण
फलसिद्धजन्मावान्विद्धि जानीहि नत्वनुष्ठानाद्यायमात्रात् नडुः
के अपिविज्ञाततत्वेनत्वयाभ्यस्यमिदंसदा नतामममात्रात्कृतक
फलमेवप्रसादकंइति अन्यत्रापि आगोपवालवनितंभगवत्स्व
मित्थं ज्ञातोप्यपायविरहान्नकस्मात्किदोसि नान्तःस्थितंभवति
येत्वपिवहन्तत्वीरतदेवपुनरभ्यवहारतःस्यादिति तथायदिवा
चनिकाज्ञानान्मुक्तिःस्याद्भावनाविनाशारीरमानसैर्दुःखैर्छेरन्स
र्वजन्तवइति नन्वेतेषुयज्ञेषुकतमस्मिन्यज्ञेहमधिकृतइत्यतआह
एवंज्ञात्वाविमोक्ष्यसेइति एवमुक्तविधयावक्ष्यविधेषुयज्ञेष्वन्यतम
यज्ञानुष्ठानद्वारेणज्ञात्वाहेतलक्षणज्ञानयज्ञनिष्ठःसन्संसाराद्वि
मुक्तोभविष्यसि तेचवक्ष्यविधायज्ञाःशिवोपनिषदिवितानिताः
तथाहि कपालान्तर्मनोन्यस्यतिष्ठन्मीलितलोचनः क्रमेणमनसो
दार्ढ्याल्लक्षयेल्लक्ष्यमुत्तमं १ अनाहतेपात्रकर्णोभग्नशब्देसरिद्द्रुते
शब्दब्रह्मणिनिष्णातःपरब्रह्माधिगच्छति २ निजदेहंसर्वदिक्कंयु
गपद्भावयेद्वियत् निर्विकल्पमनास्तस्यवियत्सर्वंप्रवर्तते ३ सर्वं
देहगतंद्रव्यंवियद्व्याप्तंमृगेक्षणे विभावयेत्ततस्तस्यभावनासा
स्थिराभवेत् ४ कालाग्निनाकालपदादुत्थितेनस्वकंपुरं प्लुष्टं
विचिंतयेदंतेशांताभासःप्रजायते ५ एवमेवजगत्सर्वंदग्धंध्यात्वा
विकल्पतः अनन्यचेतसःपुंसःपुंभावःपरमोभवेत् ६ देहांतरेत्वग्वि
भागंभित्तिभूतंविचिंतयेत् नकिंचिदंतरेतस्यध्यायन्नध्येयभागभ
वेत् ७ घटादिभाजनेदृष्टिंभित्तीस्त्यक्त्वाविनिक्षिपेत् तल्लयंतत्क्ष
णाद्गत्वातल्लयात्तन्मयोभवेत् निर्वृक्षगिरिभित्त्यादिदेशेदृष्टिंवि
निक्षिपेत् विलीनेमानसेभावेवृत्तिक्षीणःप्रजायते ८ उभयोर्भाव
योर्ज्ञानेज्ञात्वामध्यंसमाश्रयेत् युगपच्चद्वयंत्यक्त्वामध्येतत्वंप्रका
शते १० शक्तिसंग्रहसंरुद्धव्यशक्त्यावेशावसानिके यत्स्वरूपस्थान
त्वस्यतत्त्वंवस्वाकाममुच्यते ११ लेहनामंथनाकुटैःस्त्रीसुखस्यभ
रात्स्मृतेः शक्त्यभावेपिदेवेशिभवेदानंदसंप्लवः १२ आनंदेमहति

प्राप्ते दृष्टे वा बांधवे चिरात् आनंदमुद्गतं ध्यात्वा तन्मनास्तल्लयो भ
वेत् १३ यत्रयत्र मनस्तुष्टिर्मनस्तत्रैव धारयेत् तत्रतत्र परानंदस्व
रूपं संप्रकाशते १४ अनागतायां निद्रायां प्रणष्टे बाह्यगोचरे सा
वस्था मनसा गम्या परा देवी प्रकाशते १५ मृद्वासने जैकेन हस्त स्फि
पादौ निराश्रयं विधाय तत्प्रसंगेन परा पूर्णमतिर्भवेत् १६ उपवि-
श्यासने सम्यग्बाहू कृत्वार्धकुंचितौ कक्षव्योम्नि मनः कुर्वन् शम-
मायाति तल्लयात् १७ आसने शयने स्थित्वा निराधारं विभावयेत्
स्वदेहं मनसि क्षीणे क्षणात्क्षीणाशयो भवेत् १८ चलासने स्थित-
स्याथ शनैर्वा देहचालनात् प्रशान्ते मानसे भावे देवि दिव्यौघमा
प्नुयात् १९ एवमेव दुर्निशायां कृष्णपक्षागमे चिरं तैमिरं भावयेद्रू
पं भैरवं रूपमेष्यति २० ओमाकारं स्वमात्मानं ध्यायेद्दिग्भिरनावृतं
निराश्रया चितिः शक्तिः स्वरूपं दर्शयेत्तदेत्यादि मध्ये ब्रह्म प्रसर्पतीत्य
न्ते किंचिदंगविभिद्यादौ तीक्ष्णसूच्यादिना ततः तत्रैव चेतनां युक्त्वा
भैरवी निर्मला गतिः २२ इंद्रजालमयं विश्वं व्यस्तं वा चित्रकर्मवत् भ्रम
द्वा ध्यायतः सर्वं पश्यतश्च सुखोद्गमः २३ विहाय निजदेहास्थां सर्व-
त्रास्मीति भावयेत् दृढेन मनसा दृष्ट्या नान्येक्षिण्या सुखी भवेत् २४ ४
स्ववदन्यशरीरेपि संवित्तिमनुभावयेत् अपेक्षां स्वशरीरस्य त्यक्त्वा व्या
पी दिनैर्भवेत् २५ भ्रांत्वा भ्रांत्वा शरीरेण त्वरितं भुवि पातनात् क्षो
भशक्तिविरामेण परा संजायते दशा २६ कूपादिके महागर्ते स्थितो
परि निरीक्षणात् अविकल्पमतेः सम्यक् सद्यश्चित्तलयः स्फुटं २७ ल
ब्धायां ते भये शोके गह्वरे वा रणे द्रुते कुतूहले क्षुधाद्यंते ब्रह्मसत्ता स
मीपगाः २८ भक्त्युद्रेकाद्विरक्तस्य यादृशी जायते मतिः सा शक्तिः
शांकरी नित्यं भावयेत्तां ततः शिवः २९ न द्वेषं भावयेत्क्वापि न रागं भा
वयेत्क्वचित् रागद्वेषविनिर्मुक्तो मध्ये ब्रह्म प्रसर्पतीत्यादिना ३० ए
तज्ज्ञानयज्ञस्तोत्राणि ३२ ॥

पंचोलीटीका

ज्ञानयज्ञस्तोत्रमुक्तान्यज्ञान् उपसंहरति एवमिति एवंव

गी॰ टी॰ ४ हुविधा बहुप्रकाराः यज्ञा ब्रह्मणो वेदस्य मुखे वि॰ तताः वे
दद्वारेणावगम्यमाना इत्यर्थः तान्सर्वान्कर्मजान् कायिकवा
चिकमानसव्यापारतो जातान् विद्धि जानीहि नात्मविषयमा
त्मा तु निर्व्यापारः एवं यज्ञानां कायिकादिव्यापारजन्यत्वं ज्ञा
त्वा आत्मनो निर्व्यापारत्वं ज्ञात्वा मोक्षसे ३२
वं॰

रणवीरसमिद्धोधिनी॥

उक्तेर्थे वेदं प्रमाणयति एवमिति एवमुक्तप्रकारेण बहुविधा
दैवादिप्रकारैरनेके यज्ञाश्च इयत्ता ब्रह्मणो यजुर्वेदस्य मुखे द्वारे
वितता विस्तृताः यजुर्वेदद्वारेणैव ते सर्वेवगता स्तेनैव विहिता इ
ति यावत् अथवा ब्रह्मणः परमेश्वरसायुज्यप्राप्तेर्मुखे द्वारे उपायत्वे
वितता वितत्य कथिता वेदेनेति शेषः दैवादिबहुप्रकारकयुष्ट
यज्ञेनैव तत्प्रियस्य मोक्ष इति भावः तांश्च सर्वान्यज्ञान्कर्मजान्
कर्मणि शरसंधानादीनि कायिकानि तेजोवधादिनिमित्तक
ठोरतीक्ष्णनिर्घाहोच्चारणादीनि सिंहनादादीनि च वाचिका
नि अस्त्रदेवतास्मरणादीनि मानसिकानीति त्रिविधानि तेभ्यो
जातान्विद्धि जानीहि अतएव ब्रह्मप्राप्तिसाधनभूता यज्ञाः सा
ध्यानपुनर्निर्हरन्ति एवं ज्ञात्वा निश्चित्य विमोक्ष्यसे सर्वस्माच्छोक
मोहादिनिमित्तादधर्मेधर्मत्वभ्रांतेरिति शेषः ३२॥

मधुभाष्य

३२॥

भाषा अनुवाद

ज्ञान यज्ञ की प्रशंसा करने के अर्थ अब सब यज्ञों की चर्चा करि न्यून अधिक तार तम्य देखावते हुये कहते हैं कि नानाप्रकार की यज्ञी वेदरूप मुखसे प्रत्यक्ष विहितहै परंतोंभी मन वचन शरीर के कर्म से उत्पन्न जो यज्ञहैं सकल आत्म स्वरूप स्पर्श सेरहित जानो अर्थात् उनसे आत्मज्ञान नहीं होता क्यों कि आत्मा कर्मों का अगोचर कहे कर्म प्राप्य नहीं है इस से तम ज्ञाननिष्ट होय संसार से मुक्त होउगे यहजानो ३२

दोहा

या विधबहुते यज्ञहुं विधिमुखमय विस्तार कर्मज जा
नो तिन सभी यों जाने मोक्षलहो सार ३२॥

16d

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप सर्वं
कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ३३

शांकरभाष्यं

ब्रह्मार्पणमित्यादिश्लोकेन सम्यग्दर्शनस्य यज्ञत्वं संपादितं यज्ञाश्च
अनेकविधा उपदिष्टास्तैः सिद्धपुरुषार्थप्रयोजनैर्ज्ञानं स्तूयते क
थं श्रेयानिति श्रेयान्द्रव्यमयात् द्रव्यसाधनसाध्यात् यज्ञात् ज्ञा
नयज्ञः हे परंतप द्रव्यमयो हि यज्ञः फलस्यारंभको न ज्ञानयज्ञः फ
लस्यारंभकोऽतः श्रेयान्प्रशस्यतरः कथं यतः सर्वं कर्म समस्तम
खिलं अप्रतिबद्धं पार्थ ज्ञाने मोक्षसाधने सर्वतः संप्लुतोदकस्थानी
ये परिसमाप्यतेऽन्तर्भवतीत्यर्थः यथा कृताय विजितायाधरेयाः
संयंत्येवमेनं सर्वं तदभिसमेति यत्किंचित्प्रजाः साधु कुर्वंति
यस्तद्वेद यत्स वेदेति श्रुतेः ३३

आनंदगिरिकृतटीका

कर्मयोगेऽनेकधाभिहिते सर्वस्य श्रेयःसाधनस्य कर्मात्मकत्वप्रतिपाद्या
केवलं ज्ञानमनादृियमाणमर्जुनमालक्ष्य ज्ञानानुवादपूर्वकमुत्तरश्लोक
स्य तात्पर्यमाह ब्रह्मेत्यादिना सिद्धेति सिद्धपुरुषार्थभूतं पुरुषापेक्षितलक्ष
णं प्रयोजनं येषां यज्ञानां तैरनंतरोपदिष्टैरिति यावत् प्रश्नपूर्वकं स्तुतिप्र
कारं प्रकटयति कथमित्यादिना ज्ञानयज्ञस्य द्रव्ययज्ञात् प्रशस्यतरत्वे हे
तुमाह श्रेयानिति द्रव्यसाधनसाध्यादित्युपलक्षणं स्वाध्यायादेरपि ततो
ऽपि ज्ञानयज्ञस्य श्रेयस्त्वाविशेषात् द्रव्यमयादियज्ञेभ्यो ज्ञानयज्ञस्य प्र
शस्यतरत्वं प्रपंचयति द्रव्यमयो हीति फलस्याभ्युदयस्येत्यर्थः न फला
रंभको न कस्यचित् फलस्योत्पादकः किंतु नित्यसिद्धस्य मोक्षस्याभिव्यं
जक इत्यर्थः तस्य प्रशस्यतरत्वे हेत्वंतरमाह यत इति समस्तं कर्मेत्यग्निहो
त्रादिकमुच्यते अखिलमविद्यमानं खिलं शेषो यस्येत्यनल्पं महत्तरमिति या
वत् सर्वमखिलमिति पदद्वयोपादानमसंकोचार्थं सर्वं कर्म ज्ञानेऽन्तर्भ-

169

वतीत्यत्र छांदोग्यश्रुतिं प्रमाणयति यथेति चत्वारोऽया यस्मिन् द्यूते कश्चि
दायः चतुरंकः सन् कृतशब्देनोच्यते तस्मै विजिताय कृताय तादर्थ्ये
नाधरेयास्तस्मादधस्ताद्ये त्रिद्व्येकांकास्त्रेताद्वापरकलिनामानः
संयंत्यायाः संगच्छंति चतुरंके खल्वाये त्रिद्व्येकांकायानामंतर्भावो भव
ति महासंख्यायामवांतरसंख्यांतर्भावावश्यंभावादेवमेनं विद्यावंतं पु
रुषं सर्वं तदाभिमुख्येन समेति संगच्छति किं तत्सर्वं यद्धि इष्टिपुरुषेत
भवति तदाह यत्किंचिदिति प्रजाः सर्वा यत्किमपि साधुकर्म कुर्वं
ति तत्सर्वमित्यर्थः एनमभिसमेतीत्युक्तां तमेव विद्यावंतं पुरुषं विशि
नष्टि यस्तदिति किं तदित्युक्तं तदेव विशदयति यत्स इति स रैक्वो यत्तत्त्वं
वेद तत्तत्त्वं योन्योपि जानाति तमेनं सर्वं साधुकर्माभिसमेतीति योज
ना ३३ ॥

स्वामिकृतटीका

कर्मयज्ञाज्ज्ञानयज्ञः श्रेष्ठ इत्याह श्रेयानिति द्रव्यमयादनात्मव्या
पारजन्यात् दैवादियज्ञात् ज्ञानयज्ञः श्रेयान् श्रेष्ठः यद्यपि ज्ञानस्यापि
मनोव्यापाराधीनत्वमस्त्येव तथाप्यात्मस्वरूपस्य ज्ञानस्य मनःपरि
णामेऽभिव्यक्तिमात्रं न तु तज्जन्यत्वमिति भावः श्रेष्ठत्वे हेतुः सर्वं कर्म
अखिलं फलसहितं ज्ञाने परिसमाप्यते अंतर्भवतीत्यर्थः सर्वं तदभि
समेति यत्किंचित्प्रजाः साधु कुर्वंतीति श्रुतेः ३३

पिशाचभाष्य

श्रेयानिति ज्ञाननिर्वर्तो यज्ञो ज्ञानयज्ञो मनोनियमरूपत्वेन परमा
३: त्मसंबोधस्वरूपत्वात्सर्वं क्रियत्वात् क्रियारूपमुपासनारूपं च ज्ञाने
परमात्मसंबोधे परिसमाप्यते विलीयते विलयं गच्छतीत्यर्थः ३३

रामानुजभाष्य

अन्तर्गतज्ञानतया कर्मणो ज्ञानाकारत्वमुक्तम् अन्तर्गतज्ञाने कर्मणि ज्ञा
नांशस्यैव प्राधान्यमाह श्रेयानिति उभयाकारे कर्मणि द्रव्य
मयादंशाज्ज्ञानमयोंशः श्रेयान्सर्वकर्मणस्तदितरस्य चाखिलस्योपा मा:

देयस्य ज्ञाने परिसमाप्तेः तदेवं सर्वैः साधनैः प्राप्यं भूतं ज्ञानं कर्मा[illegible]
न्तर्गतभेदेनाभ्यस्तेनेतदेवाभ्यस्यमाणं क्रमेण प्राप्यं देशं प्रतिपद्यते ३३

अभिनवगुप्तकृतटीका ३३

परमार्थप्रपाटीका

ज्ञानयोगं स्तौति श्रेयानिति द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः श्रेयान् द्रव्यं स्व
र्गादिविषयभोगलक्षणं तन्मयस्त[...]त्साधको यो यज्ञस्तस्मात् ज्ञा
नयज्ञः श्रेयान् अतिशयेन श्रेयःसाधकः परमस्तत्वप्रापकः अर्थं
तदेवाविपर्ययं कथयति सर्वमिति कर्म द्विधा खिलमखिलं चेति तत्र खि
लं इष्टफलजनकं अखिलं ज्ञानजनकं एवं सर्वमखिलं कर्म ज्ञाने
परिसमाप्यते ज्ञाने पर्यवसितं भवति खिलं तु तद्विपरीतं अज्ञानपर्य
वसायीत्यर्थः एवंभूतात्मज्ञाने साधनमाह ३३ ॥

वनमालीटीका

उक्तयज्ञेषु ज्ञानयज्ञस्य श्रेष्ठत्वमाह श्रेयानिति साक्षात् मोक्षसाधन
त्वात् द्रव्यमयाद्द्रव्यसाध्याद्यज्ञात् ज्ञानयज्ञः श्रेयान् कुतो यतोऽखिलं नि
रवशेषं सर्वं ज्योतिष्टोमादिकं श्रौतं स्मार्तं उपासनादिकं उक्तयज्ञादि
रूपं यत् कर्म तत् ज्ञाने समाप्यते अंतःकरणशुद्धिज्ञानोत्पत्तिद्वारा ज्ञाने पर्यवसा
नं भवतीत्यर्थः तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन त
पसानाशकेनेति श्रुतेः ३३ ॥

ऊष्ममैवेजयंतीटीका

एवं ज्ञानांतर्भूतस्य कर्मयोगस्य ज्ञानाकारत्वमुक्तं इदानीं तत्र कस्य प्रा
धान्यं स्यात् ज्ञानस्य वा कर्मणो वोभयोर्वा तत्र यागाभिश्रेणयद्युक्तं तन्मया
न ज्ञायते इत्याशंक्य नतत्वविदेत्याशंकां तयोर्ज्ञानी न प्राशंस्त्यं प्राधान्यं भवती
त्याह श्रेयानिति हे परंतप शत्रुतापन द्रव्यप्रचुराद्विकाराद्वा यज्ञात्
ईज्यतेऽनेनेति यज्ञः पूजादानादिरूपकर्म तस्मात् कर्मणः सकाशात् ज्ञा
नयज्ञः ज्ञानमययज्ञ एव श्रेयान् प्रशस्ततरः कुत एवमित्यत आह सर्व
मिति हे पार्थ सर्वं समग्रमखिलं सत् कर्म ज्ञाने ज्ञानयज्ञे परिसमाप्यते

गी०
टी०
च०

समाप्तिमेति ३३

सर्वेषां तुल्यवन्निर्देशात् **मधुसूदनीटीका** कर्मज्ञानयोः साम्यप्राप्तावाह ॥
श्रेयान् प्रशस्यतरः साक्षान्मोक्षफलत्वात् द्रव्यमयात् द्रव्योपलक्षिताज्ज्ञा
नशून्यात् सर्वस्मादपि यज्ञात् संसारफलात् ज्ञानयज्ञ एकः परंतप हे परंत
प कस्मादेवं यस्मात् सर्वं कर्म ज्योतिष्टोमचयनरूपं श्रौतं अखिलं
१७० निरवशेषं स्मार्तमुपासनादिरूपं च यत्कर्म तत् ज्ञाने ब्रह्मात्मैक्यसाक्षा
त्कारे परिसमाप्यते प्रतिबंधक्षयद्वारेण पर्यवस्यति तमेतं वेदानुवच
नेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेति धर्मेण पाप
प मपनुदतीति च श्रुतेः सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति न्यायाच्चेत्यर्थः विद्या
[illegible] ३३

सदानंदीटीका

उक्तैर्वक्ष्यविधैर्यज्ञैर्ज्ञानाख्यः स्तूयतेध्वरः द्रव्यसाधनसाध्याच्च सर्वस्मा
ज्ज्ञानवर्जितात् १ संसारफलकाद्यज्ञाज्ज्ञानयज्ञोधिकोत्तमः समस्तं वै
दिकं कर्माखिलं स्मार्तमुपासनं २ ब्रह्मात्मैक्यावबोधं तत्पर्यवस्यति स
र्वथा प्रतिबंधक्षयद्वाराज्ज्ञानयज्ञस्ततोवरः ३ ३३

नीलकंठीटीका

यदर्थमेते यज्ञा उपन्यस्तास्तं ज्ञानयज्ञं स्तौति श्रेयानिति द्रव्यं बाह्य
माभ्यंतरं च देहेंद्रियादि तत्साध्यात् द्रव्यमयात् यज्ञात् ज्ञानयज्ञः नि:
शेषवाङ्मनःकायप्रवृत्त्युपरमात्मकः श्रेयान् प्रशस्ततरः ईयस्प्र
त्ययेन तेषामपि प्रशस्तत्वं द्योत्यते तत्र हेतुः सर्वमिति कर्म कर्मफलं
सर्वं अखिलं सर्वांगोपसंहारयुक्तं ज्ञाने परिसमाप्यते अंतर्भवति यथा
कृताय विजितायाधरेयाः संयंत्येवमेवैनं सर्वं तदभिसमेति यत्किंच
प्रजाः साधु कुर्वंति यस्तद्वेद यत्स वेदेति ३३ ॥

कर्मजान्केवलकर्मजानित्याशंका
मपहरति श्रेयानिति

आनंदी टीका

द्रव्यमयाद्द्रव्यैकप्रचुरात् ज्ञानं विना केवलेन कर्मणा साध्याद्यज्ञा

ज्ञानयज्ञोज्ञानसमुच्चितोयज्ञोतिप्रशस्तः सर्वेषांवर्णानामाश्रमि-
णांचकर्मज्ञानेफलानपेक्षाविचारेखिलंनिःशेषेणपरिसमाप्यते
निष्ठांप्राप्नोतिज्ञानयज्ञोहिसर्वान्यज्ञान्मोक्षफलान्करोतीत्यर्थः २३

रामकंठीटीका

अथैतस्यज्ञानस्यप्रशंसार्थमाह ॥

द्रव्यमयाद्यज्ञादिति यथोक्तप्रतिपादितप्रभेदयज्ञोपलक्षणार्थंवे
दितव्यं तेनसर्वेभ्योज्ञानयज्ञःश्रेयान्प्रशस्यतरःज्ञानमयोहि यज्ञः
सर्वान्द्रव्ययज्ञादीन्मोक्षफलान्संपादयंतितेनज्ञानेसतिसर्वयज्ञः
ज्ञानयज्ञएवभवतीत्युक्तंभवति सर्वयज्ञनिष्ठत्वेनहिज्ञानस्य ज्ञानय
ज्ञत्वंमोक्षफलेज्ञानेनतुपृथक् यस्माद्यथोक्तेज्ञानेद्रव्ययज्ञादिविभा
गेनसर्वंसमस्तंकर्माखिलंस्वगतविशेषासे तयासमग्रंज्ञानेपरिस-
माप्यतेप्रविलयंगच्छति कृतमपिदग्धवीजवत्स्वफलप्रसवसामर्थ्यं
नभजते [illegible]

लासिकी[illegible]टीका

अथज्ञानयज्ञंस्तौति

द्रव्ययज्ञग्रहणंसर्वयज्ञोपलक्षणार्थंतेनसर्वेभ्योयज्ञेभ्योभ्यासक्रमे-
णमोक्षसाधनेभ्योज्ञानयज्ञःसर्वत्रब्रह्मदर्शनलक्षणः श्रेयान्प्रश-
स्यतरः साक्षान्निर्विलंबमोक्षप्रदत्वात् कस्मादेवमुच्यते यतःसर्वंश्रौ
तंस्मार्तंस्वाभाविकंचकर्माखिलंसवासनंज्ञानेहतलक्षणेपरिसमा
प्यते समाप्तिंभजते कृतमपिदग्धवीजवत्प्रविलयंगच्छतीत्यर्थः
नान्येषुयज्ञेषुतत्ववासनारूपेणकर्मणांसंभवात् २३

पंचोलीटीका

ब्रह्मार्पणमित्यादिश्लोकेनसम्यग्दर्शनस्ययज्ञत्वंसंपादितंय-
ज्ञाश्चानेकाउपदिष्टास्तेभ्यःसिद्धपुरुषार्थप्रयोजनेभ्योज्ञानंस्तौति
श्रेयानिति हेपरंतपद्रव्यमयाद्यज्ञात्द्रव्यसाधनसाध्यात्फलारं
भकाद्यज्ञाज्ज्ञानयज्ञःफलानारंभकःश्रेयान्प्रशस्यतरंकथंयस्मा
त् हेपार्थसर्वमखिलंसर्वंकर्मज्ञानेमोक्षसाधनेपरिसमाप्यतेअंतर्भ
वतीत्यर्थः २३

श्रेयानिति द्रव्यमयात्केवलाद्द्रव्यसाध्याद्यज्ञात् ज्ञानयज्ञो
ज्ञानेन स्वोचितकर्मार्पणपकर्तव्यता तदाचरणे चोभयलो
कप्राप्तिस्तदनाचरणे च नरकादिगतिरित्येतत्त्रितयविषयकनि
श्चयरूपेणोक्तलक्षणेन वक्ष्यमाणलक्षणेन वृमर्मसत्त्वदनादिवि
षयकेण च दीपितो यज्ञो ब्रह्मार्पणमित्यादिग्रंथेन प्रतिपादितो
गुह्ययज्ञः श्रेयान्प्रशस्यतरो ब्रह्मसाऽन्यप्राप्तिफलकत्वात् केव
लता च भयदप्रत्ययेन सूचिता उक्तलक्षणज्ञानदीनो हि युद्धे
प्रवृत्तोपि भवान्निवृत्तिशोकमोहाविष्टतया मध्य एव ततो विरमती
ति भावः परंतपेत्यनेन संबोधनेन यातुतापकं भवादृशां ज्ञा
य प्रवीरमेव प्रत्येषा यास्तीति ध्वन्यते अत्र हेतुमाह सर्वमिति
यस्मात् ज्ञाने सति सर्वं यत्किंचित्कायिकं वाचिकं मानसं वा कर्म
अखिलमखंडं संपूर्णं यथा स्यात्तथा परिसमाप्यते परितः सर्वा
प्रकारेण समाप्तिमानीयते इति ३३॥

मधुभाष्य

३३॥

भाषा अनुवाद

अबज्ञान यज्ञ की श्रेष्ठता कहते हैं कि जिस लिये आत्म व्या पार रहित जो द्रव्यमय देवता के अर्थ यज्ञ है तिससे ज्ञान य ज्ञ ही श्रेष्ठ जानो और यद्यपि ज्ञानयज्ञ मान सिक व्यापार के अधीन है तथापि आत्माका स्वरूप जो ज्ञान सो केवल मनका परिणाम अर्थात ब्रह्मरूप होनामात्र है औ ज्ञान कुछ मानस व्यापार से प्रगट नहीं है और ज्ञान की श्रेष्ठतामे हेतु यह किफलके सहित सर्व कर्म तत्वज्ञान के अंतर्भूत हैं क्योंकि लोगोंके किये हुये सत्कर्म ज्ञानके अनुगामी कहे साथ होते है यह वेदमे कहाहै सोई इस श्लोकसे कहा कि श्रेष्ठ है द्रव्य यज्ञसे ज्ञानयज्ञ हे परंतप और सब कर्महे पार्थ अर्जुन ज्ञानमे परि समाप्त कहे लीन होते हैं इसी से ज्ञानयज्ञ श्रेष्ठहै ३३

दोहा

द्रव मय यज्ञसें श्रेष्ठहे ज्ञान यज्ञ परताप सर्वकर्म यह ज्ञा न म हिं पार्थ होत समाप ३३॥

179

तद्विद्धिप्रणिपातेनपरिप्रश्नेनसेवया उपदेक्ष्य
न्तितेज्ञानंज्ञानिनस्तत्त्वदर्शिनः ३४

शांकरभाष्यं

तदेतद्विशिष्टंज्ञानंतर्हिकेनप्राप्यतइत्युच्यते तद्विद्धीति तद्विद्धिवि॰
जानीहियेनविधिनाप्राप्यतइत्याचार्य्यानभिगम्यप्रणिपातेनप्रकर्षे॰
णनीचैःपतनंप्रणिपातोदीर्घनमस्कारःतेनकथंबंधःकथंमोक्षः
काविद्याकाचाविद्येति परिप्रश्नेनसेवयागुरुशुश्रूषयेवमादिना प्र
श्रयेणावर्जिताआचार्य्याउपदेक्ष्यंतिकथयिष्यंतितेज्ञानं यथोक्तवि
शेषणंज्ञानिनोज्ञानवंतोपि केचिद्यथावत्तत्त्वदर्शनशीलाश्चनभवंति
अपरेत्तुभवंत्यतोविशिनष्टितत्त्वदर्शिनइति येसम्यग्दर्शिनस्तैरुपदि
ष्टंज्ञानंकार्य्यक्षमंभवति नेतरदितिभगवतोमतं ३४

आनंदगिरिकृतटीका

यद्येवंप्रशस्यतरमिदंज्ञानंतर्हिकेनोपायेनतत्प्राप्तिरितिशंकते तदेत
दिति ज्ञानप्राप्तौप्रत्यासन्नमुपायमुपदिशति उच्यतइति तद्विज्ञानंगु
रुभ्योविद्धिगुरवश्चप्रणिपातादिभिरुपायैरावर्जितचेतसोवदिष्यंतीत्या
ह तद्विद्धीति उपदेष्टृत्वमुपदेशकर्तृत्वं परोक्षज्ञानमात्रेणनभवती
त्याह उपदेक्ष्यंतीति तदितिप्रकृतंज्ञानसाधनंगृह्यतेयेनविधिनेति
विशेषदर्शनात्यद्वायेनाचार्य्यावर्जनप्रकारेण तदुपदेशवशादयं॰
प्रकृतंज्ञानंलभ्यतेतथातज्ज्ञानमाचार्येभ्योलभस्वेत्यर्थः तदेवस्फुटयति
आचार्य्यानिति एवमादिनेत्यादिशब्देनशमादयोगृह्यंतेएवमादिना
विद्धीतिपूर्वेणसंबंधः उत्तरार्द्धंव्याचष्टेप्रश्रयेणेति प्रश्रयोभक्तिश्रद्धापू
र्वको निरतिशयोऽवनतिविशेषःयथोक्तविशेषणंपूर्वोक्तेनप्रकारेण
प्रशस्यतममित्यर्थः विशेषणस्यापौनरुक्त्यपरिहारार्थमर्थभेदंकथ
यतिज्ञानवंतोपीति ज्ञानिनइत्युक्त्वापुनस्तत्त्वदर्शिनइतिब्रुवतो भग
वतोभिप्रायमाहयेसम्यगिति बहुवचनंचैतदाचार्य्यविषयंबहुभ्यः

श्रोतव्यंवक्तव्यंचेति सामान्याभ्यामध्यात्मज्ञानार्थंनत्वात्मज्ञानमधि
कृत्यआचार्यवक्तव्यंविवक्षितंतस्यतत्त्वसाक्षात्कारवदाचार्यमात्रोप
देशादेवोदयसंभवात् ३४

173

स्वामिकृतटीका

एवंभूतात्मज्ञानेसाधनमाह तद्विद्धीति तज्ज्ञानंविद्धिप्रभृतिज्ञा
निनांप्रणिपातेनदंडवन्नमस्कारेणततःपरिप्रश्नेनकुतोयंममसं
सारःकथंवानिवर्ततइतिप्रश्नेनसेवयागुरुशुश्रूषयाचज्ञानिनः शा
स्त्रज्ञास्तत्त्वदर्शिनोपरोक्षानुभवसंपन्नास्तेतुभ्यंज्ञानमुपदेशेनसं
पादयिष्यंतिज्ञानफलमाह ३४

पिशाचभाष्यं

एवंभूतेपरमात्मानेकथंमहंजानीयामित्याह तद्विद्धीति तज्ज्ञान
रूपंब्रह्मविद्धिजानीहि प्रणिपातेनप्रकर्षेणनीचैर्दंडवत्पतनंप्रणि
पातःनमस्कारविशेषस्तेन परिप्रश्नेनपरितःसर्वतोऽवलोकयगुरो
श्चित्तेप्रसादावगत्याप्रश्नस्तेनचसेवयाइच्छानुवर्तनेन एवंसतिउ
पदेक्ष्यंतितेतवज्ञानंपरमार्थसंबोधनस्वरूपंब्रह्म ज्ञानिनःज्ञानवंत
स्तत्त्वदर्शिनःसाक्षात्कृतपरमार्थाः ३४

रामानुजभाष्यं

तद्विद्धीतितत्तदात्मविषयंज्ञानमविनाशित्वतद्धिज्ञात्वारभ्यएषाने
त्यन्ते॰ भिहितंनमयोपदिष्टमंडुक्तकर्मणिवर्तमानस्त्वविपाकानुगुण॰
कालेप्रणिपातपरिप्रश्नसेवाभिर्विशदाकारंज्ञानिभ्योविद्धि साक्षात्
कृतात्मस्वरूपास्तज्ज्ञानिनःप्रणिपातादिभिःसेविताज्ञानबुभुत्सयाप
वितःएकुतस्तवाशयमालक्ष्यज्ञानमुपदेक्ष्यंति ३४

अभिनवगुप्तकृतटीका

अत्रत्वयंविशेषः इव्ययमात्केवलाज्ञानदीपितोयत्नःश्रेष्ठः केवल

नाचमयदाम्नविना यतः सर्वकर्मज्ञाने निष्ठामेति तच्च ज्ञानं प्रणि
पातेन भक्त्या परिप्रश्नेन ऊहापोहतर्कवितर्कादिभिः सेवयाभ्यासेन
जानीहि यत एवंभूतस्य तव ज्ञानिनो निजाएव संवित्तिविषयानुगृही
ताइंद्रियविशेषास्त्वं उपसमीपे देक्ष्यंति प्रापयिष्यंति तथाहि तेत
त्त्वमेवदर्शयंतीति तत्त्वदर्शिनः उक्तं हि योगएव योगस्योपायः ऋते
भगात्तत्रप्रवृत्तेति अन्येज्ञानिनः पुरुषा इति व्याख्यायमाने भगवान्स्वयमु
पदिष्टवांस्तदसत्यमित्युक्तं स्यादेवमभिधाने च प्रयोजनमन्येपि लोकाः
प्रणिपातादिना ज्ञानिभ्यो ज्ञानं गृह्णीयुर्नयथाकथंचिदिति समयप्र
तिपादनं ३४ ॥

परमार्थप्रपाटीका

तद्विद्धीति द्वाभ्यां तत्त्वदर्शिनो ज्ञानिनः अपरोक्षसाक्षात्कारवंतः तेतु
भ्यं ज्ञानमुपदेक्ष्यंति केनप्रकारेण प्रणिपातेन दंडवन्नमस्कारेण यथो
चितप्रश्नेन सेवया निरंतरं निधानेन कृत्वा य उपदेक्ष्यंति तद्विद्धि तादृशं
जानीहि ३५ ॥

वनमालीटीका

तत्त्वज्ञाने कोऽसाधारण उपायस्तत्राह तद्विद्धीति तत्सर्वफलभूतं ज्ञानं विद्धि ल
भस्व आचार्यानभिगम्य तेषां प्रणिपातेन प्रकर्षेण नीचैः पतनं प्रणि
पातो दीर्घनमस्कारस्तेन कोहं कथं बद्धः कथं मुच्येयमित्यादिपरिप्र
श्नेन सेवया सर्वभावेन तदनुकूलकारितया उपदेक्ष्यंति ते तुभ्यमुप
देशेन ज्ञानं परमात्मविषयकं साक्षात्मोक्षहेतुं दास्यंति ज्ञानिनः प
दवाक्यमायादिमाननिपुणाः तत्त्वदर्शिनः कृतेश्वरतत्त्वसाक्षात्
काराः साक्षात्कारवद्भिरुपदिष्टं ज्ञानं फलपर्यवसायि न तु तद्रहिते
पदवाक्यमाननिपुणैरिति सगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रि
यं ब्रह्मनिष्ठमिति श्रुतेः यद्यपि सर्वेषां ज्ञानदेवज्ञानिह्वेदेक्ष्यंतित
पदारविंदेन भगवतो दिष्टोऽर्जुनो नारायणांशस्य नरावतारत्वेन प्रागे
व ज्ञातात्मतत्त्वश्चेत्युपदेक्ष्यतीति नोपपन्नं तथाप्यर्जुनोपदेशव्याजे
न परमकारुणिकेन सर्वजीवानुद्दिधीर्षुणा विद्या प्रकटिता तद्विद्धी
त्यनेन गुरुशिष्यादिपरंपरयोक्तप्रकारेणैव विद्याप्राप्तव्येति भावः ३४

गीं
टीं
चं

174

ऊत्तमवैजयंतीटीका

एवमात्मस्वरूपज्ञानं सांकं समाधनमुपदिश्येदानीं तस्य सत्संगप्रा
प्यत्वमाह तद्विद्धीति यत्वाम्यर्थं अविनाशितु तद्विद्धीत्यारभ्यैषातेऽ
भिहितासांख्ये इत्यंतेनात्मस्वरूपं मयोपदिष्टं तदात्मस्वरूपज्ञानं ता
त्वदर्शिभ्यो विद्धि प्राप्नुहि तत्ते मे कथमुपदेक्ष्यंतीत्यपेक्षायामाह प्रणि
पातेन साष्टांगप्रणत्या परिप्रश्नेन तत्स्वरूपगुणशक्त्यादिज्ञानेनाना
विधप्रश्नेन सेवया किंकरवदमायया कायवचनमनोव्यापारेन त्परता
सेवात्तया तत्त्वदर्शिनः यथात्म्यस्वरूपसाक्षाद्दर्शनस्वभावः ज्ञानिनः
यथार्थकस्वपरस्वरूपगुणादिज्ञानवंतस्ते विनयादिगुणसम्पन्नाय
तभ्यं ते ज्ञानं प्रकृतिवियुक्तात्मतत्त्वज्ञानमुपदेक्ष्यंति उपदेशं करिष्य
ति ज्ञानिनस्तत्त्वदर्शिनस्ते तेज्ञानं प्रणिपातादिनोपदेक्ष्यंतीति त्ववि
द्विजानीहीत्येवंवान्वयः ३४

मधुसूदनीटीका

एतादृशाज्ञानप्राप्तौ कोऽतिप्रत्यासन्न उपाय इत्युच्यते ॥
तत्सर्वकर्मफलभूतं ज्ञानं विद्धि लभस्व आचार्यानभिगम्य तेषां प्रणि
पातेन प्रकर्षेण नीचैः पतनं प्रणिपातो दीर्घनमस्कारस्तेन कोऽहं कथंब
द्धोऽस्मि केनोपायेन मुच्येयमित्यादिपरिप्रश्नेन बहुविषयेन प्रश्नेन सेव
या सर्वभावेन तदनुकूलकारितया एवं भक्तिश्रद्धातिशयपूर्वकेणाऽव
नतिविशेषेणाभिमुखाः सन्तः उपदेक्ष्यन्ति उपदेशेन संपादयिष्यंति
ते तुभ्यं ज्ञानं परमात्मविषयं साक्षान्मोक्षफलं ज्ञानिनः पदवाक्यन्या
यादिमाननिपुणाः तत्त्वदर्शिनः कृतसाक्षात्काराः साक्षात्कारवद्भि
रूपदिष्टमेव ज्ञानं फलपर्यवसायि न तु तद्रहितैः पदवाक्यमाननिपु
ति णैरपीति भगवतो मतं नहि ज्ञानार्थं सद्गुरुमेवाभिगच्छेत्समित्पाणि
श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतिसंवादित्तत्रापि श्रोत्रियमधीतवेदं ब्रह्मनिष्ठं
कृतब्रह्मसाक्षात्कारमिति व्याख्यानात् बहुवचनं चेदमाचार्यविषा
यकमेकस्मिन्नपि गौरवातिशयार्थं न तु बहुत्वविवक्षया एकस्मादेव
तत्त्वसाक्षात्कारवत आचार्यात्तत्त्वज्ञानोदये सत्याचार्यान्तरगमनस्य
तदर्शमयोगादिति द्रष्टव्यं [illegible]

[illegible] ३४ ॥

सदानंदीटीका

तादृशज्ञानसंप्राप्तावुपायःप्रोच्यतेधुना अभिगम्यत्वमाचार्यास्त
ज्ज्ञानंमोक्षसाधनं १ लभस्वयेनविधिनाप्राप्यतेतत्त्वमाश्रय नम
स्कारेणदीर्घेणदेशिकानांमहात्मनां २ कोहंकथमहंबद्धोमुच्येयं
कथमंजसा काविद्याकास्त्यविद्यावेत्यादिप्रश्नैरनेकधा ३ सेव
यासर्वभावेनगुरूणांहितरूपया एवंतेभिमुखाःसंतोभक्तिश्रद्धा
दिभिर्गुणैः ४ त्वय्यसंपादयिष्यंतिज्ञानंब्रह्मैकगोचरं उपदेशेन
साक्षात्यन्मोक्षसाधनमुत्तमं ५ पदवाक्यप्रमाणज्ञाब्रह्मयाथा
त्म्यदर्शिनः सम्यग्दर्शिभिरेवेदमुपदिष्टंयथाविधि ६ फलेपर्य
वसायिस्याज्ज्ञानंतत्त्वज्ञपंडितैः एकस्मिन्नपिचाचार्येगौरवातिशया
यतत् ७ बहुत्वंज्ञानिनइत्युक्तिनबहुत्वविवक्षया ८ ३४

नीलकंठीटीका

तद्विद्धीति ज्ञानिनःग्रंथज्ञाः तत्त्वदर्शिनःअनुभववंतः ज्ञानंब्रह्म
स्पष्टार्थःश्लोकः ३४ ॥

आनंदीटीका

तज्ज्ञानंज्ञानिष्ठात्वामहंकीभावेनपरिप्रश्नेनगुरूपसत्त्याजिज्ञासयासेव
यागुरूपदेशानुशीलनेनेतिकारणत्रयेणप्राप्यंविद्धिइत्युद्देशमात्रेण
जिज्ञासुरर्थार्थीत्यर्थलक्षयति मयैतदुक्तंयदिनअनुज्ञास्तर्हिपरेभ्योज्ञानि
भ्योयत्नएवंश्रूयतामितिस्वापेक्षामहत्वनेऽश्रद्धाशैथिल्याय अथवाहमे
वेदृशयत्नलभ्यमपिभक्तोसिमेसखाचेतिप्रेम्णाग्रेग्रेउपदेक्ष्यामीति
भावः ३४

रामकंठीटीका

एवंविधेच – तज्ज्ञानंतुभ्यंज्ञानिनःपरमात्मसमापत्तिलक्षणनिरुत्तरफलप्रा
प्त्युपायभूतबोधयुक्ताःगुरवः उपदेक्ष्यंतिप्रतिपादयिष्यंति किंशास्त्र
मात्रज्ञानेनेत्याह तत्त्वदर्शिनः यथाप्रतिपादितस्यपरमार्थस्यस्वसं
वेदनेनद्रष्टारःकेनहेतुनोपदेक्ष्यंतिप्रणिपातेनपादप्रणामपूर्वेण

175

सर्वात्मनाप्रह्वत्वेन तथापरिप्रश्नेन परितः समंतात्सर्वसंशयच्छेदा
र्थेयः प्रश्नः पुनः पुनः प्रार्थनापूर्वमनुयोगः तेनतथासेवयाआसर्व
स्वसमर्पणात् सर्वत्रनिर्विकल्पयाशुश्रूषयानिर्व्याजभक्तिश्रद्धारा
धितागुरवएवंविधंमहोदयमर्थमुपदिशंतीतिविद्धिनिश्चयेन
जानीहि [illegible] २४

लातिकी वस्तुगोमीटीका

ननुकेवलमहंलब्धात्मबोधः कथम द्वैतलक्षणं ज्ञानयत्नेधिकृत इत्यत आह ॥

तदद्वैतलक्षणं ज्ञानं तत्त्वदर्शिनः परमार्थस्य संवेदनेन द्रष्टारो गु
रवो न केवलोकपरिविद्भि केवलतत्त्वदर्शिन एव यावत् ज्ञानिनो द्वैतल
क्षणं ज्ञानं गुरुकास्तेत्वभ्यमुपदेक्ष्यंति उपदेशं संपादयिष्यंति केन ने
हेतुनेत्यत आह प्रणिपातेन सर्वात्मनाप्रह्वत्वेन परिप्रश्नेन प्रार्थ
नापूर्वं संशयच्छेदार्थमनुयोगेन सेवया सत्रस्वसमर्पणाच्छुश्रूष
यानिर्व्याजभक्तिश्रद्धाराधितागुरवएवंविधमहोदयंउपदिशंतीति
विद्धिजानीहि स्वयंभगवत्युपदेष्टरि सत्यप्यन्येज्ञानिन उपदिशंती
त्युक्तिरन्येपि लोकाः प्रणिपातादिना ज्ञानिभ्यो ज्ञानं गृह्णीयुरेवं यथा
कथंचिदिति समयप्रतिपादनार्था तदुक्तं शिवसूत्रेषु गुरुरुपा
य इति तथा च श्रुतिः तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः
श्रोत्रियं ब्रह्मनिष्ठमिति तदुक्तं कुलार्णवे अद्वैतं हि शिवे प्रोक्तं क्रि
यायासविवर्जितं गुरुवक्त्रेण लभ्येत नाधीतागमकोटिभिः गुर
वो बहवः संति शिष्यवित्तापहारकाः स्वगुरुर्दुर्लभो देवि शिष्यसं
तापहारक इति २४

पंचोलीटीका

एवंभूतात्मज्ञानप्राप्तेः साधनमाह तद्विद्धीति तत् ज्ञानं गुरू
णां प्रणिपातेन परिप्रश्नेण सेवया विद्धि जानीहि ते तुभ्यं तत्त्वद
र्शिनः ज्ञानिनः ज्ञानमुपदेक्ष्यंति २४

एतादृशज्ञानेसाधनमाह तदिति तच्चज्ञानं प्रणिपातेनभक्त्या
गुरूनभिगम्यनमस्कारेणपरिप्रश्नेनवारंवारमूहापोहवितर्का
दिभिरनुयोगेनसेवयागुरुशुश्रूषयाभ्यासेनचविद्धिजानीहि
एवंभूतायचतेतुभ्यं तत्त्वंदर्शयंतीति तत्त्वदर्शिनः शिष्येषुज्ञान
तत्त्वोपदेशशीलाअन्येज्ञानिनः पुरुषास्तज्ज्ञानमुपदेक्ष्यंति अ
त्रचभगवान्स्वयमुपदिशन्नप्यन्यानुद्दिष्टुनभिगंतव्यानभिदध
नू अन्येपिलोकाज्ञानेभ्योज्ञानंगृह्णीयुर्नयथाकथंचिदितिम
मर्थंप्रतिपादयति ३४ ॥

मधुभाष्य

३४ ॥

176

भाषा अनुवाद

जो कहो कि भला जिस ज्ञानकी ऐसी प्रशंसा करते होसो किस प्रकार से प्राप्त होयतो ज्ञानके साधन कहे उपाय कहतेहै कि ज्ञानी पुरुषों के निकट जाय नम्रतासे प्रणाम कर प्रश्नकरै कि किस कारण से हमको यह संसार भया और कैसे निवृत्त होगा और गुरु की सेवा शुश्रूषा करने से तुम को सो तत्वज्ञान मिलैगा औरज्ञानी जोशास्त्रतथा तत्वदर्शी जोहै वे तुमको उपदेश देकरतत्वज्ञान संपन्न कर देयंगे सोई कहते कि दंडवत तथा प्रश्न औ सेवा करने से तत्वदर्शी ज्ञानी लोग तुमको ज्ञान उपदेश करैंगे और जैसे बंध औ मोक्ष तथा ज्ञान औ अज्ञान क्या है कहैं गे ३४

दोहा

भक्ति प्रश्नसेवाहुतें ज्ञानहु पावत सोय ज्ञानी यो तत्वदर्शी तोहिज्ञान उपदेशै सोय ३४

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पांडव येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ३५ ॥

शांकरभाष्यं

तथा च सतीदमपि समर्थं वचनं यदिति यज्ज्ञात्वा यज्ज्ञानं तैरुपदिष्टमधिगम्य प्राप्य पुनर्भूयो मोहमेवं यथेदानीं मोहं गतोसि पुनरेवं न यास्यसि हे पांडव किंच येन ज्ञानेन भूतान्यशेषेण ब्रह्मादीनि स्तंबपर्यंतानि द्रक्ष्यसि साक्षादात्मनि प्रत्यगात्मनि मत्संस्थानीमानि भूतानीति अथो अपि मयि वासुदेवे परमेश्वरे चेमानीति क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिषत्प्रसिद्धं द्रक्ष्यसीत्यर्थः ३५ ॥

आनंदगिरिकृतटीका

विशिष्टैराचार्यैरुपदिष्टे ज्ञाने कार्यवत्त्वमेवमशेषे सति समनंतरवचनमपि योग्यविषयमर्थवद्भवतीत्याह तथा चेति अतस्तस्मिन्विशिष्टे ज्ञाने त्वदीयमोहापोहहेतौ निष्ठावता भवता भवितव्यमिति शेषः तन्निष्ठाप्रतिष्ठायै तदेव ज्ञानं पुनर्विशिनष्टि येनेति यज्ज्ञात्वेत्ययुक्तं ज्ञानायोगादित्याशंक्य शास्त्रार्थत्वमधिपूर्वस्य गमेरंगीकृत्य व्याकरोति अधिगम्येति इतश्चाचार्योपदेशलभ्ये ज्ञाने फलवति प्रतिष्ठावता भवितव्यमित्याह किं चेति जीवेश्वरे चोभयत्र भूतानां प्रतिष्ठितत्वप्रतिनिर्देशो भेदवादानुमतिः स्यादित्याशंक्याह क्षेत्रज्ञेति मूलप्रमाणाभावे कथं तदेकत्वदर्शनं स्यादित्याशंक्याह सर्वेति ३५

स्वामिकृतटीका

यज्ज्ञात्वेति सार्धैस्त्रिभिः यज्ज्ञानं ज्ञात्वा प्राप्य पुनर्बंधुवधादिनिमित्तं मोहं न प्राप्स्यसि तत्र हेतुः येन ज्ञानेन भूतानि पितृपुत्रादीनि स्वाविद्यारचितानि स्वात्मन्येवाभेदेन द्रक्ष्यसि अथो अनंतरमात्मानं मयि परमात्मनि अभेदेन द्रक्ष्यसीत्यर्थः ३५ ॥

गीं॰ टीं॰ चं॰

178

पिशाचभाष्यं

तज्ज्ञानंविशिनष्टियज्ज्ञात्वेति यज्ज्ञानरूपंब्रह्मज्ञात्वापुनःपश्चादे
वंमोहंव्यामोहंनयास्यसिनगंतासितज्ज्ञानमुपदीक्ष्यंतीत्यर्थःपु
नरपिविशिनष्टि येनज्ञानेनभूतानिकार्यकरणसंघातानिभूता
न्यशेषेणद्रक्ष्यसिउपलप्स्यसेआत्मनिप्रत्यगात्मनिमयिईश्व
रेवासुदेवात्मनि ३५

रामानुजभाष्यं

आत्मयाथात्म्यविषयस्यज्ञानस्यसाक्षात्काररूपंलक्षणमा
ह यज्ज्ञात्वेति यज्ज्ञानंज्ञात्वापुनरेवंदेहाद्यात्माभिमानरूपंमम
मत्वास्पदंचमोहंनयास्यसियेनदेवमनुष्याद्याकारेणानुसंहिता
निभूतानिस्वात्मन्येवद्रक्ष्यसियतस्तवान्येषांचभूतानांप्रकृतिवि
युक्तानांज्ञानैकाकारतयासाम्यंप्रकृतिसंसर्गदोषवियुक्तमात्म
स्वरूपंसर्वंसममितिचवक्ष्यतेनिर्दोषंहिसमंब्रह्मेति अथोमयि
सर्वाणिभूतान्यशेषेणद्रक्ष्यसिमत्स्वरूपसाम्याच्चपरिशुद्धस्यआ
त्मवस्तुनइदंज्ञानमुपाश्रित्यममसाधर्म्यमागताइतिवक्ष्यते।
तदाविद्वान्पुण्यपापेविधूयनिरंजनःपरमंसाम्यमुपैतीत्येवमादि
षुनामरूपविनिर्मुक्तस्यात्मनःपरमंसाम्यमवगम्यतेअतःप्रकृ
तिविनिर्मुक्तंसर्वमात्मवस्तुपरस्परंसर्वेश्वरेणचसमं ३५

अभिनवगुप्तकृतटीका

आत्मनिमयिमत्स्वरूपतांप्राप्तेआत्मनीतिसामानाधिकरण्यं
अथोशब्दःपादपूरणेआत्मनईश्वरस्यहिसाम्येकोपिविशेषउक्तः
असाम्येविकल्पानुपपत्तिः सर्वंकर्माखिलमितियदुक्तंतत्स्फुटी
कृतंप्रथमश्लोकेनाधर्मोपिनश्यतीतिवदन्सर्वं ति द्वितीये कर्मेति
नमस्कारलेशोपिनावतिष्ठतीतिसूचयन्नखिलमितिव्याचष्टेअपि
चे त्यादिंसपापात्मनदर्शयंत ३५ ॥

परमार्थप्रपाटीका

कोहमस्मीत्याह यदिति एवमुक्तप्रकारेण यत्ज्ञात्वा ज्ञात्वा पुनर्बंधा-
बंधादिविषादरूपं मोहं न प्राप्स्यसीति अथ तस्य ज्ञानस्य मोहनिवा-
र्तकत्वमाह येनेति येन अशेषेण सर्वात्मकस्वरूपेण ज्ञानेन कृत्वा
भूतानि पितृपुत्रस्वहृन्नबंध्वादीनि मयि आत्मनि व्यापके समष्टिव्य-
ष्टिरूपेण पश्यसि ३५ ॥

वनमालीटीका

गुरूपदेशप्राप्तज्ञानफलमाह यदिति नवज्ञानित्वेपिदानीं प्रारंभ-
कर्मवशादीषत्तिरोभावाद्बंधुस्नेहादिनिमित्तकमोहसद्भावेपि
मदुपदेशानंतरमेवंप्रकारं मोहं न यास्यसि किंच येन ज्ञानेनाथ
मोहनाशानंतरं आत्मनि सर्वव्यापके मयि भूतानि अशेषेण सा-
कल्येन द्रक्ष्यसि भूतानामुत्पत्तिस्थितिनाशा मदधीना जानन् स्व-
स्य नाशायकर्तृत्वमनुसंदधदेवं मोहं न यास्यसीति भावः ३५

कुसुमवैजयंतीटीका

साक्षात्काररूपस्य याथात्म्यात्मस्वरूपविषयभूतस्य ज्ञानस्य फल-
माह यज्ज्ञात्वेति यज्ज्ञानं ज्ञात्वा प्राप्य पुनरेवमेतं मम बांधवा मरि-
ष्यंति चेदहं कथं जीविष्यामीत्येवंरूपं मोहं न यास्यसि न प्राप्स्यसि य-
द्वा अहंकारास्पदे स्वदेहे ममकारास्पदेषु दुर्योधनादिषु एवं यथे-
दानीं मोहं करोषि तथा यज्ज्ञानं ज्ञात्वा पुनर्ज्ञानं प्राप्यानंतरं मोहं न- मोहो न भवती
यास्यसि नन्वेतेषु ममकृतो मोहो न भवति कृतो त्याशंकायामाह
येनेति येन ज्ञानेन भूतानि स्थावरजंगमाकाररहितानि प्रकृतिसंबं-
धवियुक्तानि निजनिजस्वरूपेण स्थितानि शुद्धज्ञानस्वरूपाणि ज्ञा-
नाद्यनेकधर्माश्रयाणि अणुपरिमाणकानि मदधीनस्थितिप्रवृत्तिका-
नि अशेषेण साकल्येन सर्वाणीत्यर्थः त्वमात्मनि स्वस्वरूपे द्रक्ष्यसि
सर्वेषां भूतानां स्वरूपादिसाम्यत्वेन सर्वं भूतसमं भवतीत्येवमात्मस्व-
रूपे द्रक्ष्यसीत्यर्थः निर्दोषं हि समं ब्रह्मेति वक्ष्यते च यद्वा येन भूतानि
देहेंद्रियादियुक्तानि जीवस्वरूपाणि आत्मनि तद्रहिते शुद्धजीवस्व-
रूपे द्रक्ष्यसि प्राकृतदेहद्वयरहितं एव जीवस्वरूपमिति द्रक्ष्यसीत्यर्थः

गी॰
टी॰
४॰

अथो मयि अथो शुद्धात्मस्वरूपदर्शनानंतरमपि सर्वेश्वरे पुरुषोत्तमे
जगदभिन्ननिमित्तोपादानकारणे नियंतरि अशेषसर्वाणि भूतानि
द्रक्ष्यसि सर्वेषां भूतानां प्रकृतिसंसर्गरहितानां मत्स्वरूपपर्यवसा
यित्वेन मत्स्वमत्वं द्रक्ष्यसीत्यर्थः तदा विद्वान् पुण्यपापे विधूय निरंज
नः परमं साम्यमुपैतीत्यादिश्रुतेः इदं ज्ञानमुपाश्रित्य मम साधर्म्य
मागताः सर्गेपि नोपजायंते प्रलये न व्यथंति चेति वक्ष्यते ऽतः सर्वमा
त्मवस्तुस्वरूपगुणादिना समं तथा परमेश्वरेण मया च सर्वं ते ज्ञानवा
स्तु जातं स्वरूपादिना समं स्यादिति भावः पांडवेति संबोधनेन महत्कुल
प्रसूतत्वात्तवेदं ज्ञानं नातिदुर्लभमिति सूचितं ३५

मधुसूदनीटीका

एवमतिनिर्बंधेन ज्ञानोत्पादने किं स्यादित्यत आह ॥
यत्पूर्वोक्तं ज्ञानमाचार्यैरुपदिष्टं ज्ञात्वा प्राप्य ओदनपाकं पचतीति
वत्तेनैव धातोः सामान्यविवक्षया प्रयोगः न पुनर्मोहमेवं बंधुवधादि
निमित्तं भ्रमं यास्यसि हे पांडव कस्मादेवं यस्मात् येन ज्ञानेन भूतानि
पितृपुत्रादीन्यशेषेण ब्रह्मादिस्तंभपर्यंतानि स्वाविद्याविजृंभिता
नि आत्मनि त्वयि त्वंपदार्थे अथो अपि मयि भगवति वासुदेवे तत्प
दार्थे परमार्थतो भेदरहितेऽधिष्ठानभूते द्रक्ष्यसि भेदेनैवाधिष्ठानाति
रेकेण कल्पितस्याभावात् मां भगवंतं वासुदेवमात्मत्वेन साक्षात्
कृत्य सर्वाज्ञाननाशे तत्कार्याणि भूतानि न स्थास्यंतीति भावः [illegible]
[illegible] ३५

सदानंदीटीका

एवमन्याग्रहेणात्मज्ञानस्योत्पादने सति फलमाह कृपासिंधुर्वा
सुदेवो जगद्गुरुः १ उपदिष्टं परात्मैक्यज्ञानं ब्रह्मात्मदर्शिभिः प्राप्य
त्वं बंधुविच्छेदनिमित्तमोहमाधिं २ पांडुपुत्र कदाचिन्न भूयो यास्य
सि पूर्ववत् येन ज्ञानेन भूतानि ब्रह्मादीन्यप्यशेषतः ३ स्वाविद्याका
र्यभूतानि त्वंपदार्थे त्वमात्मनि मयीशे तत्पदार्थेपि वस्तुतो भेदव
र्जिते ४ अधिष्ठाने अभेदेन द्रक्ष्यस्यात्ममयानि च अधिष्ठानातिरेके
ण कल्पितस्याप्यभावतः ५ साक्षात्कृत्यात्मरूपेण वासुदेवं हि मां ह

रि ध्यसि ज्ञानेन तत्कार्येण नश्यास्यति जगद्भ्रमः ॥ ३५

नीलकंठीटीका

यज्ज्ञात्वेति यत् चिन्मात्रस्वरूपं ब्रह्म ज्ञात्वा एवं इदानीमिव पुनर्मोहं न यास्यसि अथो अपि च येन ज्ञानेन भूतानि ब्रह्मादिस्तम्बपर्यन्तानि आत्मनि मयि त्वंपदलक्ष्यार्थात् अनन्यभूते परमेश्वरे द्रक्ष्यसि नात्मातोऽस्तीष्टेति प्रतीचोऽन्यस्य वस्तुनिषेधात् आत्मन्येव साक्षादात्मनि मत्स्थानीमानीति द्रक्ष्यसि अथो अपि मयि वासुदेवे परमेश्वरे च इमानीति तेन ज्ञेयस्यैकत्वं सर्वोपनिषत्प्रसिद्धं द्रक्ष्यसीत्यर्थः इति ३५

आनंदटीका

स्पष्टं

[illegible] ३५

रामकंठटीका

कीदृशं तज्ज्ञानमित्याह ॥

यज्ज्ञात्वा सम्यक्प्रतिपाद्य गुरुनस्तत्प्रतिपत्तेस्तत्कालमेव मवश्यपाण्डवेयैर्वैरिविधलक्षणो स्वयमेव आत्मप्रतिपत्तिरूपेण प्रकारेण मोहं विपर्ययलक्षणं न प्राप्स्यसि येन ज्ञानेन करणभूतेन सर्वभूतानि चराचरप्राणिभूतानि मयि परमकारणे तथात्मनि स्थितानि द्रक्ष्यसि ज्ञास्यसि किमुक्तं भवति परमकारणाभिन्नात्स्वात्मनः सर्वभूतानां वास्तवमभेदमनेन ज्ञानेन साक्षात्करिष्यसि [illegible] ३५

^कीदृशं तज्ज्ञानमिति ज्ञानस्वरूपमाह

गीं टीं वं

लासिकी ~~वल्लभोली~~टीका

^यज्ज्ञानं ज्ञात्वा सम्यक्प्रतिपाद्य पुनस्त्वमुत्तरकालमेवं मोहं वंधुव-
(निमित्त) यादिशोकलक्षणं न प्राप्स्यसि येन ज्ञानेन कारणभूतेन सर्वाणि
भूतानि चराचरात्मकानि मयि परमकारणे आत्मनि स्वात्माभिन्ने
द्रक्ष्यसि स्वात्माभेदेन साक्षात्करिष्यसि मय्यात्मनीति सामाना
धिकरण्यमथो शब्दः पादपूरणे यतोस्य ज्ञानस्यायं प्रभावः ३५

१८०

पंचोलीटीका

ज्ञानप्राप्तेः फलमाह यज्ज्ञात्वेति हे पांडव यज्ज्ञानं ज्ञात्वा पुनः प
वं प्रमुनाप्रकारेण मोहं न यास्यसि येन भूतान्यशेषेण त्वमात्म-
नि अथो मयि स्थितानि ईक्षसे ३५

रत्नावीरसमिद्बोधिनी॥

ज्ञानप्राप्तेः फलमाह यदिति सार्धैस्त्रिभिः यत्सर्वोत्कृष्टं ज्ञानं नि-
श्चयात्मकमाचार्यैरुपदिष्टं ज्ञात्वा प्राप्य ओदनपाकं पचतीति
वन्नस्यैव धातोः सामान्यविवक्षया प्रयोगः पुनर्मोहं बंधुवधा
दिनिमित्तं बुद्धिभ्रमं एवं यथेदानीं भ्रांतोसि तथा न यास्यसि
येन ज्ञानेन प्राप्तेन सता अशेषेण ब्रह्मस्तंबपर्यंतानि भूतानि
पितृपुत्रादीनि आत्मनि सर्वात्मभूते मयि परमेश्वरे भवत्समक्ष
स्थिते द्रक्ष्यसि साक्षात्करिष्यसीति अयमत्राभिप्रायः अहमेवा-
कालरूपः सर्वसंहारकरणाग्रहज्ञः सर्वानेताननुभयपक्षस्थिता
न्भीष्मादीन्नत्स्यामीति मया वक्ष्यमाणानां त्वमपि मदनुग्रहात्सा
क्षात्करिष्यसीति हे त्वमात्तत्त्वमा स्वधर्मभूतात्युद्धादयमेव भ्रांत्या
विरमकिंतद्दृष्टनिश्चयएवमभवेति अथो शब्दः पादपूरणे ३५॥

मधुभाष्य

३५॥

भाषा अनुवाद

अब साढे ३ श्लोक से तत्वज्ञान का फल कहते हैं कि तत्व ज्ञान होने से फेरि और बंधु वध निमित्त ऐसे मोह कौन प्राप्त होउगे कारण यह कि ज्ञान संपत्ति होने से अपने अज्ञान वा प्राते प्रगट जो पिता पुत्र भाई बंधु तिन को अपने आत्मासे भिन्न नदेखोगे और साक्षात् परमात्मा रूप हमसे और अपने आत्मासे अभेद देखोगे सोई कहते किजिस ज्ञानको जानि केहे पांडवफेरि ऐसे मोहको नपावोगे और जिसमे संपूर्ण प्राणीयोंको अपने और मेरेमे देखोगे सोतत्व ज्ञान महात्मो से मिलेगा ३५

दोहा

पांडव जिह जाने नोहि मोह न फिर उमहोय जाकर भू

त ऐशाषको देषहु मो आत्म में सोय ३५॥

181

अपिचेदसिपापेभ्यःसर्वेभ्यःपापकृत्तमः स
र्वंज्ञानप्लवेनैववृजिनंसंतरिष्यसि ३६

शांकरभाष्यं

किंचैतस्यज्ञानस्यमाहात्म्यंअपीति अपिचेदसिपापेभ्यःपापकृ
द्भ्यःसर्वेभ्यःसकाशादतिशयेन पापकृत्पापकृत्तमःयद्यसिभ
वसि सर्वंज्ञानप्लवेनैवज्ञानमेवप्लवंज्ञानप्लवंकृत्वावृजिनं वृ
जिनार्णवंपापंसंतरिष्यसि धर्मोपीहमुमुक्षोःपापमुच्यते ३६

आनंदगिरिकृतटीका

ज्ञानस्यप्रकारांतरेणप्रशंसांप्रस्तौति किंचेतिपापकारिभ्यःसर्वे
भ्यःसकाशादतिशयेन पापकारित्वमेकस्मिन्नसंभावितमपि ज्ञा
नमाहात्म्यप्रसिद्ध्यर्थमंगीकृत्य ब्रवीतिअपिचेदिति ब्रह्मात्मैक्य
ज्ञानस्यसर्वपापनिवर्तकत्वेनमाहात्म्यमिदानींप्रकटयतिसर्वमि
ति अधर्मनिवृत्तेपिधर्मरूपप्रतिबंधात्अज्ञानवतोपिमोक्षःसंभव
तीत्याशंक्याह धर्मोपीति इहेत्यध्यात्मशास्त्रंगृह्यते ३६

स्वामिकृतटीका

किंचअपिचेदिति सर्वेभ्यःपापकारिभ्योयद्यप्यतिशयेनपापका
रीत्वमसितथापित्वंसर्वंपापसमुद्रंज्ञानपोतेनैवसम्यगनायासे
नतरिष्यसि ३६

पिशाचभाष्यं

आत्मनिचज्ञानफलमाह अपिचेदसिभवसिसर्वेभ्यःपापकृद्भ्यःअ
तिशयेनपापकृत्पापकृत्तमःसर्वंज्ञानप्लवेनैव प्लवतेनेतिप्लवः नेः
जलतरणंज्ञानमेवप्लवोज्ञानप्लवस्तेनैववृजिनंपापंतरिष्यसि ३६

रामानुजभाष्यं

गी॰ टी॰ व॰

अपि चेदिति [illegible] यद्यपि सर्वेभ्यः पापकृत्तमोसि सर्वैरा॰
र्जितं वृजिनं रूपं समुद्रमात्मविषयज्ञानप्लवेनैव संतरिष्यसि
३६ ॥

अभिनवगुप्तकृतटीका [illegible] ३६

परमार्थप्रपाटीका

182

ननूपदेशात् ज्ञानप्राप्तौ सत्यां मोहनिवृत्तिर्भवति न तु सर्वमोहप-
यामा॰ वास्तीत्याशंक्याह अपीति त्वं चेत्पापेभ्यो हि सर्वेभ्यो पापकृत्त-
मोसि अतिशयेन पापकर्त्तासि तथापि सर्ववृजिनं पापसमुद्रं ज्ञा-
नप्लवेन ज्ञाननौकया सम्यक्प्रकारेण तरिष्यसि अयमर्थः सत्यं
ज्ञानमनन्तं ब्रह्मेति श्रुतेर्ज्ञानं हि परमात्मस्वरूपं तत्सत्यं तदितरि-
कं सर्वमसत्यं एवं पितृपुत्रसुहृदित्यादिसकलप्रपंचस्य मिथ्या-
त्वात् ज्ञानैकनाश्यत्वं यथा स्वप्नब्रह्महत्यायां जागरे प्रायश्चित्ता-
दर्शनात् ३६

वनमालीटीका

ज्ञानं स्तौति अपि चेदिति अपि चेदित्यभाविताभ्युपगमप्रदर्शना-
र्थो निपातो यद्यपि ज्ञानिनः पापकर्तृत्वं न संभवत्येव तथापि ज्ञान-
प्रभावकथनायाभ्युपेत्योच्यते यद्यपि त्वं पापकारिभ्यः सर्वेभ्यो-
ऽप्यतिशयेन पापकारी पापकृत्तमः स्यास्तथापि सर्वं वृजिनं पापम-
पि दुस्तरत्वेनार्णवसदृशं ज्ञानप्लवेनैव संतरिष्यसि वृजिनपदेना-
त्र पापपुण्यफलजन्ममरणादिसंसारोऽभिप्रेतः ३६

कुसुमवैजयंतीटीका

ननु यज्ज्ञात्वा न पुनर्मोहमित्युक्तं तत्कथमुपपद्यते यतो मोह-
स्य कारणं पापं तस्मिन्विद्यमाने सति मोहनिवृत्तिरेव कथं स्यान्मो-
हनिवृत्त्यभावे चात्मदर्शनस्याभावस्तदभावे सुतरां मोक्षाभाव इ-
त्याशंक्याह ज्ञानेनैवातिशयपापकृदपि संसारान्तरतीदं ज्ञान-
मेव सर्वपापं नाशयतीति वदन् ज्ञानस्य सर्वोत्कृष्टसामर्थ्यमाह द्वा-
भ्यां अपि चेदिति सर्वेभ्योऽप्यसंख्यातानंतगतेभ्यः पापेभ्यः पापकृत्तमोपि

वेद्यदिपापकृत्तमो निशयपापकर्त्तात्वमसिभवसितर्ह्यपिज्ञा
नसवेनैवज्ञानरूपयानावेवसर्वंवृजिनंसंतरिष्यसिगर्भजन्म
शिशुबालकुमारपोगंडकिशोरतरुणाहृद्धमरणाद्यवस्थाज्ञ
वंप्रेतपिशाचादियोन्युद्भवंत्वेहिकंयमदूतादिदर्शनतत्कृततना
डनतर्जननिरयपातायद्भवमामुत्रिकंचदुःखरूपसमुद्रंज्ञानरूप
नावमाश्रित्यसम्यगनायासेनतरिष्यसीत्यर्थः ३६

मधुसूदनीटीका

किंच शृणुज्ञानस्यमाहात्म्यं ॥
अपिचेदित्यसंभावितास्फपगमप्रदर्शनार्थौनिपातो यद्यप्यय
मर्थोनसंभवत्येवतथापिज्ञानफलकथनायाभ्युपेत्योच्यते य
द्यपित्वंपापकारिभ्यः सर्वेभ्योतिशयेनपापकारीपापकृत्तमः स्या
तथापिसर्वंवृजिनंपापंअतिदुस्तरत्वेनार्णवसदृशंज्ञानस्यवेनैव
नान्येनज्ञानमेवप्लवंपोतंकृत्वासंतरिष्यसि सम्यगनायासेनपु
नरावृत्तिवर्जितत्वेनचतरिष्यसि अतिक्रमिष्यसिवृजिनशब्देना
त्रधर्माधर्मरूपंकर्मसंसारफलमभिप्रेतंमुमुक्षोःपापावत्पुण्य
स्याप्यनिष्टत्वात [illegible]
[illegible] ३६

सदानंदीटीका

शृणुज्ञानस्यमाहात्म्यंपावनानांसुपावनं सर्वेभ्यःपापकारि
भ्यस्त्वमाधिक्येनयद्यपि १ पापकारीतथाप्येवंदुस्तरत्वेनसं
कटे पापार्णवमिदंसर्वंज्ञानपोतेनयास्यसि २ पुनरावृत्तिशू
न्यत्वात्स्वखेनातिक्रमिष्यसि धर्माधर्मात्मकंकर्मसर्ववृजि
नशब्दतः ३ अभिप्रेतंमुमुक्षोर्हिवंधहेतुतयायतः हेयंपुण्य
मपीत्येवंभगवन्मतमुत्तमं ४

नीलकंठीटीका

अपिचेदिति वृजिनंवृजिनार्णवं धर्मोपीहमुमुक्षोःपापमि
त्युच्यते ३६ ॥

गी॰
टी॰
वं॰

153

एतदुपदिशन् पूर्वोक्तं स्मारयति अपीति

आनंदीटीका

अपि संभावनायां यदि त्वं परमार्थविचारं त्यक्त्वा निजसंभावनयैव सर्वेभ्योन्येभ्यः पापेभ्योतिशयेन त्वं धुवधादिना शंकितेन महत्वा पापकर्त्तृप्रवर्तितोस्मीति मनसि मिथ्या संभावयसि तस्त्वं पापसमूहेन वल्गमानेन वचनेनैव ज्ञानेन संतरिष्यसि

[illegible] एवं सर्वपापस्यापि ज्ञानेन नाशः [illegible] ज्ञानेनैव [illegible] कर्म [illegible] ॥३६॥

ज्ञानमेव [illegible] बीजत्वं [illegible] तत्र साधनत्वात् देहंतीति भगवान् यदाह तत्र साधनात्वा

+ अत्र स्वयं ज्ञानस्य उपदिश्य पूर्वं ज्ञानिनस्ते ज्ञानस्य उ
तु भवलक्षणे विशेषतु ज्ञानेन तु न स्वाभिकालोत्प
ज्ञानजिज्ञासानिश्चयं भगवान् लक्षमनुभावयति यातैव
यतोस्या ज्ञानस्यायं प्रभावः

रामकंठीटीका

इतः प्रयोजनं यतः क्रमेणोत्पन्न विशेषः ज्ञानस्य पवतएव उपसंबंधः यद्धलक्षणेस्य धर्मे तु स्तीयमाने ऊतपवतएव उपसंबधः

अपि चेदसि यद्यपि त्वं सर्वेभ्यः पापेभ्यः समस्तेभ्यः पातकिभ्यो ज्ञातेभ्यो दपेक्षयातिशये तिर्यगादिवधादिदुष्कृतकारित्वात्पापकृत्तमः तदपेक्षयातिशये न दुष्टकर्मकारी तथाप्यस्य ज्ञानादिवधलक्षणस्य कर्मणः स्वय मेत्वमसि वृजिनं तज्जं पापं समस्तसागरमिव दुर्लंघ्यं यथोक ज्ञानलक्षणेन प्लवेन यानपात्रेणालंघयिष्यसि यतः ॥३६॥

[illegible] लासिकी [illegible]टीका

अपि चेदित्यसंभावनाभ्युपगमे निपातो यद्यपि त्वं सर्वेभ्यः पातकिभ्यो ज्ञात्यादिवधकारित्वात्पापकृत्तमः अथापि सर्वं पापस मुद्रं ज्ञानलक्षणेन पोतेनैव सम्यग्गतया संतरिष्यसि वृजिनश ब्देनात्र धर्माधर्मरूपं कर्माभिप्रेतं मुमुक्षोः पापवत्पुण्यस्यापि नि गडत्वात् नन्त्रु समुद्रवत्स्थितस्यैव पापस्यातिलंघनमात्रं नतु ना

यति
शः इति दृष्टांतेन तत्रायमाह ॥३६॥

पंचोलीटीका

किंच अपि चेदिति चेत् यद्यपि सर्वपापेभ्यः पापकर्तृभ्यः पाप कृत्तमः असि तथापि ज्ञानप्लवेनैव सर्वं वृजिनं पापार्णवं संतरिष्य सि ॥३६॥

रसगीवीरससिद्धोधिनी॥

अपि चेदिति एतत्तु तावन्न संभाव्यत एव त्वं पापकारीति परं यद्यपि त्वं सर्वेभ्यः पापकारिभ्यः सकाशादतिशयेन पापकारी त्वं नैव तथाभिमानादसि तथापि सर्वं वृजिनं बंधुवधादिनिमित्तकपापमतिदुस्तरत्वेनार्णववत्स्थितं ज्ञानप्लवेनैव ज्ञानं पूर्वोक्तलक्षणं निश्चयात्मकं तदेव प्लवः पोतः संतरणोपायस्तेनैव नान्येन संतरिष्यसि सम्यगनायासेनातिक्रमिष्यसीति माडः स्थितो भूरिति भावः ३६॥

मधुभाष्य

३६॥

184

और जो सब पापी मनुष्यों से भी तुम अधिक पापी होउ तो भी पापरूप समुद्र को ज्ञानरूप नौका के द्वारा अनायास उतरि जावगे तात्पर्य यह कि जो तुमने कहा था कि पापमेवाश्रयेदस्मान् अर्थात् कुटुंबकेमारनेसे हमें बड़ाही पाप होगा और बंधुवध रूप वृजिन कहे दुःख सागरके पारकैसे जायंगे सो यह अज्ञान सेतुमारी स्थल सहजउपाय आत्मज्ञानसे छूट जायगी ऐसे कहिकर श्रीभगवान ने ज्ञान का महात्म्य कहा ३६

दोहा

निश्चय जो सम पापीसें बहु पाप कृत होय ज्ञान उडुसें पापसमीतं तर जायगा सोय ३६ ॥

15

यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेऽर्जुन
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ३७

शांकरभाष्यं

ज्ञानं कथं नाशयति पापमिति सदृष्टांतमुच्यते यथेति यथाए
धांसि काष्ठानि समिद्धः सम्यक् इद्धो दीप्तोग्निर्भस्मसात् भस्मीभा
वं कुरुते ऽर्जुन एवं ज्ञानमेव अग्निर्ज्ञानाग्निः सर्वकर्माणि भस्मसा
त्कुरुते तथा निर्बीजं करोतीत्यर्थः न हि साक्षादेव ज्ञानाग्निः का
नि कर्माणीन्धनवद्भस्मीकर्तुं शक्नोति तस्मात् सम्यग्दर्शनं स
र्वकर्मणां निर्बीजत्वे कारणमित्यभिप्रायः सामर्थ्यात् येन कर्म
णा शरीरमारब्धं तत् प्रवृत्तफलत्वादुपभोगेनैव क्षीयते अतो यान्य
प्रवृत्तफलानि ज्ञानोत्पत्तेः प्राक् कृतानि ज्ञानसहभावीनि चाती
तानेकजन्मकृतानि च तान्येव सर्वाणि भस्मसात्कुरुते ३७

आनंदगिरिकृतटीका

ज्ञाने सत्यपि धर्माधर्मयोरुपलंभात् कुतस्तयोस्ततो निवृत्तिरि
त्याशंक्य ज्ञानस्य धर्माधर्मनिवर्तकत्वे दृष्टांतं दर्शयितुमनंतर
श्लोकमवतारयति ज्ञानमिति योग्यायोग्यविभागेन निवर्तक
त्वानिवर्तकत्वविभागमुदाहरति यथेति दृष्टांतरूपं दार्ष्टांतिकमाचष्टे
ज्ञानाग्निरिति योग्यविषये विदाहकत्वमग्नेरप्रतिबंधापेक्षयेति विवक्षि
त्वा विशिनष्टि सम्यगिति दार्ष्टांतिकं व्याचष्टे ज्ञानमेवेति ननु ज्ञानं साक्षादे
व कर्मदाहकं किमिति नोच्यते निर्बीजं करोति कर्मेति किमिति व्याख्यान
मित्याशंक्याह नहीति ज्ञानस्य स्वप्रमेयावरणाज्ञानापाकरणे सामर्थ्य
स्य लोके दृष्टत्वादविक्रियब्रह्मात्मज्ञानमपि तदज्ञानं निवर्तयत् तज्जन्यं
कर्तृत्वभ्रमं कर्मबीजभूतं निवर्तयति तन्निवृत्तौ च कर्माणि नस्यात्तु पारयं
ति न तु साक्षात्कर्मणां निवर्तकं ज्ञानं अज्ञानस्यैव निवर्तकमिति व्या
ख्येयं तदनिवृत्तौ तु पुनरपि कर्मोद्भवसंभवादित्यर्थः ज्ञानस्य साक्षात्

कर्मनिवर्तकत्वाभावे फलितमाह तस्मादिति सम्यग्ज्ञानं मूला-
भूतात्ज्ञाननिवर्त्ततेन कर्मनिवर्तकमिष्टं चेदारब्धफलस्यापि कर्मणो नि-
वृत्तिप्रसंगात् ज्ञानोदयसमकालमेव शरीरपातः स्यादित्याशंक्याह
सामर्थ्यादिति ज्ञानोदयसमसमयमेव देहापोहे तत्त्वदर्शिभिरुपदिष्टं
ज्ञानं फलवदिति भगवदभिप्रायस्य बाधितत्वप्रसंगादाचार्यलाभान्य-
थानुपपत्त्या प्रवृत्तफलकर्मसंपादकमज्ञानलेशं न नाशयति ज्ञान-
मित्यर्थः कथं तर्हि प्रारब्धफलं कर्म न नश्यतीत्याशंक्याह येनेति तर्हि
कथं ज्ञानाग्निः सर्वकर्माणि भस्मसात्करोतीत्युक्तं तत्राह अत इति
ज्ञानादारब्धफलानां कर्मणां निवृत्त्यनुपपत्तेरनारब्धफलानि या-
नि कर्माणि पूर्वं ज्ञानोदयादस्मिन्नेव जन्मनि कृतानि ज्ञानेन च सह
वर्तमानानि प्राचीनेषु चानेकेषु जन्मसु अर्जितानि तानि सर्वाणि ज्ञानं
कारणनिवर्तनेन निवर्तयतीत्यर्थः ३७ ॥

स्वामिकृतटीका

पापस्य

समुद्रवत्स्थितस्य पापस्यातितरणमात्रेण न तु नाशयति भ्रांतिं दृष्टांते-
न वारयन्नाह यथैधांसीति एधांसि काष्ठानि प्रदीप्तोऽग्निर्यथा भस्म-
सात्कुरुते भस्मीभावं नयति तथात्मज्ञानरूपोऽग्निः प्रारब्धकर्मव्य-
तिरिक्तानि सर्वाणि कर्माणि भस्मीकरोतीत्यर्थः ३७

पिशाचभाष्यं

अस्य ज्ञानस्य सकलवृजिनतरणत्वमाह यथैधांसीति यथा-
यं दृष्टांतः एधांसि काष्ठानि समिद्धः ज्वलितः अग्निर्भस्मसात्सर्वं कु-
रुतेऽर्जुन तथा ज्ञानमेवाग्निः सर्वकर्माणि नित्यनैमित्तिककाम्यप्र-
तिषिद्धरूपाणि भस्मसात्कुरुते तथा ३७

रामानुजभाष्यं

यथेति सम्यक्प्रवृद्धोऽग्निः एधसमुच्चयमिवात्मयाथात्म्यज्ञानरूपोऽग्नि-
जीवात्मगतानादिकालप्रवृत्तानेककर्मसंचयान्भस्मीकरोति ३७

॥ अभिनवगुप्तकृतटीका स्पष्टार्थं

परमार्थप्रपाटीका

अथोक्तप्रमेयंलौकिकदृष्टांतेनद्रढयति यथेति यथासमिद्धःप्रदी-
प्तोग्निःएधांसिकाष्ठानिभस्मसात्कुरुतेतथाज्ञानाग्निःप्रारब्धव्यति-
रिक्तानिसर्वकर्माणिभस्मसात्कुरुतेसमिद्धइतिपदेनज्ञानाग्निःप्रा-
तिपदेदृढिंप्रापितःसन्भस्मसात्कुरुते ३७

वनमालीटीका

विद्यमानसमुद्रस्येवपापतरणेनविवक्षितंकिंतन्नाशएवेत्याह यथे-
ति यथैधांसिकाष्ठानिसमिद्धःप्रज्वलितोग्निर्भस्मसात्कुरुतेहेअर्जु-
न मदपरोक्षज्ञानरूपोग्निःसर्वकर्माणिसंसारप्रदानिसवासनानि
प्रारंभकभिन्नानिभस्मसात्कुरुतेतथा भिद्यतेहृदयग्रंथिश्छिद्यंते-
सर्वसंशयाःक्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरेइतिश्रुतेः तदधि-
गमउत्तरपूर्वाघयोरश्लेषविनाशौतद्व्यपदेशादितिसूत्राच्च इतराधि-
गमेउत्तरस्यक्रियमाणस्याश्लेषोनिर्लेपःपूर्वस्यपापराशेर्विनाशइत्यर्थः
प्रारंभकर्मणांतुभोगादेवक्षयःनाभुक्तंक्षीयतेकर्मकल्पकोटिश-
तैरपीतिश्रुतेःभोगेनत्वितरेक्षपयित्वासंपद्यतइतिसूत्राच्च अधि-
कारिणांतुयान्येवज्ञानोत्पादकदेहारंभकाणितान्येवदेहांतरारंभ-
काण्यपियथावसिष्ठादीनां यावदधिकारमवस्थितिराधिकारिका-
णामितिसूत्रात् अनेकदेहारंभकंबलवत्प्रारब्धफलंकर्मतच्चभग-
वदुपासकानामेवनान्येषां अनारब्धफलानिनश्यंति आरब्धफला-
नितुयावद्भोगसमाप्तितिष्ठंतिभोगश्चैकेनदेहेनानेकेनवेतिनविशे-
षः निःकामकर्मणाहरेराराधनेनततःश्रवणमनननिदिध्यासनैर्नैरंतर्याविच्छिन्न
प्रेमसंततिपूर्वकसर्वात्मत्वेनतदपरोक्षेततस्तत्महाप्रसाद-
स्ततोहृदयपदवाच्यानाद्यविद्यायादेहादावहंममेत्यभिमानहेतोर्नि-
वृत्तिरतःसर्वकर्मालेपः प्रारब्धकर्मवशाद्देहावस्थानेदंडव्यापारेनि-
वृत्तेकुलालचक्रेकंचित्कालंभ्रमणवस्थानवत्सएवजीवन्मुक्तइतिभाव :३७

ऊस्तमेवेजयंतीटीका

किंच यथैधांसीतिहे अर्जुन यथा समिद्धः काष्ठादिना सम्यगिद्धः
प्रज्वलितोग्निर्वायुसखोनलः एधांसि काष्ठादीनि भस्मसात्समग्रं
भस्मेति समग्रं भस्मसात्कुरुते निः शेषेण समग्रोन्येधांसि भस्मसा
न्मेव करोति न तु किंचित्त्यजतीत्यर्थः तथा ज्ञानाग्निर्ज्ञानरूपो योग्निः
स सर्वकर्माणि पापपुण्यमिश्राणि रूपाणि संचितक्रियमाणानि क
र्माणि भस्मसात्कुरुते निःशेषेण सर्वकर्म भस्मी करोत्यर्थः ३७

मधुसूदनीटीका

ननु सम्यग्ज्ञानेन कर्मणां नाशो न स्यादित्याशंक्य दृष्टांतेनाह ॥

यथैधांसि काष्ठानि समिद्धः प्रज्वलितोग्निर्भस्मसात्कुरुते भस्म
भावं नयति हे अर्जुन ज्ञानाग्निः सर्वकर्माणि पापानि पुण्यानि चा
विशेषेण प्रारब्धफलभिन्नानि भस्मसात्कुरुते तथा तत्कारणा
ज्ञानविनाशेन विनाशयतीत्यर्थः तथा च श्रुतिः भिद्यते हृदयग्रं
थिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे पराव
रे इति तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् इ
तरस्याप्येवमसंश्लेषः पाते तु इति च सूत्रे अनारब्धे पुण्यपापे नश्य
त एवेत्यत्र सूत्रे अनारब्धकार्ये एव तु पूर्वे तदवधेरिति ज्ञानोत्पाद
कदेहारंभकाणां तु देहांत एव विनाशः तस्य तावदेव चिरं यावन्न
विमोक्ष्येथ संपत्स्य इति श्रुतेः भोगेन त्वितरे क्षपयित्वा संपद्यत इति
सूत्राच्च अधिकारिकाणां तु यान्येव ज्ञानोत्पादकदेहारंभकाणि
तान्येव देहांतरारंभकाण्यपि यथा वसिष्ठापांतरतमःप्रभृतीनां त
था च सूत्रं यावदधिकारमवस्थितिराधिकारिकाणामिति अधिका
रिणामनेकदेहारंभकं केवलं प्रारब्धफलं कर्म तत्त्वज्ञानोपासकानामेव नान्ये
षां अनारब्धफलानि नश्यंति प्रारब्धफलानि तु यावद्भोगसमा
प्ति तिष्ठंति भोगश्चैकेन देहेनानेकेन वेति न विशेषः विस्तरस्त्वाक
रे द्रष्टव्यः [illegible] ३७

सदानंदीटीका

निःशेषत्वेन सर्वेषां कर्मणां ज्ञानवह्निना दाहः प्रदर्शितस्तेनैषाम् लोकेऽदेन सम्प्रति १ यथा प्रज्वलितो वह्निः काष्ठं नयति भस्मतां ज्ञानाग्निः सर्वकर्माणि पुण्यपापात्मकानि च प्रारब्धफलभिन्नानि संचितादीन्यशेषतः नहेत्वज्ञाननाशेन नाशयत्येवमेव हि ३७

नीलकंठीटीका

यथेति यथांसि काष्ठानि कर्माणि प्रारब्धादन्यानि ३७ ॥

ज्ञानेश्वरी टीका

अत्र दृष्टान्तमाह यथेति सर्वाणि यस्यां यस्यामवस्थायां यत्करोति शुभाशुभम् तस्यां तस्यां मवस्थायां तत्तत्फलमवाप्नुयात् शारीरेण च शारीरं वाचा चैव हि वाङ्मयम् मनसा मानसं चैव स्वकर्मफलमश्नुते इति यानि अनारब्धफलानि प्राग्जन्मकृतानि यानि चास्मिञ्जन्मनि कृतानि क्रियमाणानि च तानि कर्माणि फलदानशक्तिहेतुना ज्ञानमेव भस्मप्रायाणि भस्मसात् दग्धबीजतुल्यानि करोतीत्यर्थः ॥ ३७ ॥ ४ ॥

देवैर्वसायचारामीयन्नयायविवेकसायप्रादुर्दायं योगेनज्ञान वार्नसज्ञद्ययुक्तायज्ञयवालोन्नंत्यारेणाहोनचोगेनयुक्तस्तिवः सन्नयायासिदिंश्नानःजालेनयामानसियावेलपवेत्तावेसानन नानिसद्वयोवेयाविदीतिसदाशकोरोति ३७

रामकंठीटीका

यथा काष्ठानि दीप्तमतरोऽनलो भस्मतिमात्रशेषाणि करोति तथा सर्वाणि निःशेषाणि कर्माणि पुनः फलदानसामर्थ्यत्यपणां ज्ञानेन निर्दहति अनेन स्वधर्मत्वेनावाश्रितानां परमज्ञोराणामपि सर्वेषां कर्मणां नैष्कर्म्यापादनसमर्थं ज्ञानमेतदित्युक्तं न तु शास्त्रविहितानां यथोक्तं प्राक् श्रेयान् स्वधर्मो विगुणः इत्यादिना किंच अघोरस्यापि कर्मणो मोक्षलक्षणोत्तमफलप्राप्तिपर्यवसायिता नेन ३७

लासिकी दत्तगोमीटीका

दृष्टान्तेन वारयन्नाह

यथेधांसि काष्ठानि प्रदीप्तोऽग्निर्भस्मसात्कुरुते भस्मभावं नयति तथा ज्ञानाग्निः सर्वाणि संचितक्रियमाणात्मकानि कर्माणि धर्माधर्मरूपानि प्रारब्धफलभिन्नानि भस्मीकरोतीत्यर्थः तथा च श्रुतिः भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे इति तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति इतरस्याप्येवमसंश्लेषः पाते त्विति सूत्रेण विस्तरेण प्रतिपादितं

रं कार्य

अनारब्धैवपुण्यपापेनश्यतः तथाचसूत्रं अनारब्धकार्येएवतुपू
र्वेतदवधेरिति ज्ञानोत्पादकदेहारंभकानांतदेहांतरेवोपभोगेन
विनाशः तथाचश्रुतिः तस्यतावदेवचिरंयावन्नविमोक्ष्येअथसंपत्स्य
इति तथाचसूत्रं भोगेनत्वितरेक्षपयित्वासंपद्यतेइति ३७
तेनेमाह

पंचोलीटीका

ज्ञानेकथंपापंनाशयतितत्रदृष्टांतमाह यथैधांसीति हेअ
र्जुनयथाप्रसिद्धोग्निःएधांसिकाष्ठानिभस्मसात्कुरुतेतथा
ज्ञानाग्निःसर्वकर्माणिभस्मसान्निर्बीजानिकुरुते ३७

रमावीरमतिबोधिनी॥

यथेति येनप्रकारेणप्रज्वलितोग्निःकाष्ठानिभस्मभावंनयति
तेनैवप्रकारेणप्रोक्तलक्षणनिश्चयात्मकज्ञानरूपोग्निःसर्वे
षांप्रतिपन्नानांकर्मणांप्रायमोक्षणादीनिभस्मसात्कुरुतेनि
वर्तयतीतियावत् दृढनिश्चयंहिदृष्ट्वाभीताइवपवः प्रधिधि
त्वांगसंचितंयत्वाकृत्स्नप्रयोगादिकंनकुर्वंति किंतुप्रारब्धाणि
विद्रायपलायंतइतिभावः यद्वाकर्माणिस्वकीयान्येवकथंभीष
मदंसंख्यइत्यादिग्रंथनिरूपितानि अन्यथाप्रतिपत्तिरूपाणि
मानसानिनिश्चयाग्निरधुनःप्ररोहयोग्यानिकरोति समूलंना
प्रायतीतिभावः ३०॥

मधुभाष्य

३०॥

भाषा अनुवाद

जो पूर्व श्लोक मे कहा कि ज्ञान नौकासे पाप समुद्र को उतरि जाऊगे सो टीक है पर पाप तो बना रहा इस संदेह पर दृष्टांत देकर कहते है कि हे अर्जुन जैसे प्रज्वलित अग्नि काष्ट समूह को भस्म कर देतीहै तैसेही ज्ञान अग्नि भी प्रारब्ध कर्म को छोड़ और संपूर्ण संचित कर्मो को नाश करतीहै इसमे कुछ संदेह न करो ३७

दोहा

ज्यौं प्रज्वलित द्रोप अर्जुन काष्ट भस्म करै आग ज्यौं ज्ञा^
नाग्नि सब कर्म कहुं भस्म करत अदि लाग ३७॥

189

नहिज्ञानेनसदृशंपवित्रमिहविद्यते तत्स्व
यंयोगसंसिद्धः कालेनात्मनिविंदति ३८

शांकरभाष्ये

यतएवमतः नहीतिनहिज्ञानेनसदृशंतुल्यंपवित्रंपावनंशुद्धिकरमि
हविद्यतेहियस्मात् तज्ज्ञानंस्वयमेवयोगसंसिद्धोयोगेनकर्मयोगेन
समाधियोगेनचसंसिद्धः संस्कृतोयोग्यतामापन्नोमुमुक्षुः कालेनम
हताआत्मनिविंदतिलभतइत्यर्थः ३८ ॥

आनंदगिरिकृतटीका

नन्वन्येनैवपरमपरिशुद्धिकरेणकेनचिदश्वमेधादिना परमपुरुषार्थ
सिद्धेरलमात्मज्ञानेनेत्याशंक्याह यतइतिपूर्वोक्तेनप्रकारेणज्ञानमा
हात्म्यंयतः सिद्धमतस्तेनज्ञानेनतुल्यं परिशुद्धिकरंपरमपुरुषार्थोप
यिकमिहव्यवहारभूमौनास्तीत्यर्थः तत्तुनरात्माविषयंज्ञानंसर्वेषा
किमितिझटितिनोत्पद्यतेतत्राह तज्ज्ञानंस्वयमिति महताकालेन
यथोक्तेनसाधनेनयोग्यतामापन्नः तदधिकृतः स्वयंतदात्मनिज्ञानं
विंदतीतियोजनासर्वेषांझटितिज्ञानानुदयोयोग्यतावैधुर्यादितिभा
वः ३८

स्वामिकृतटीका

तत्रहेतुमाह नहीति पवित्रंशुद्धिकरंइहतपोयोगादिषुमध्येज्ञा
नतुल्यंनास्त्येव तर्हिसर्वेप्यात्मज्ञानमेवकिंनाभ्यस्यंतीत्यतआह
तत्स्वयमितिसार्धेनतत्आत्मनिविषयेज्ञानंकालेनमहताकर्मयो
गेनसंसिद्धोयोग्यतांप्राप्तः सन्स्वयमेवानायासेननतुकर्मयोगवि
नेतिभावः ३८

पिशाचभाष्ये

यतएवमतः नहीतिज्ञानेनेति ३८ ॥

रामानुजभाष्यं

यस्मादात्मज्ञानेनसदृशंपवित्रंशुद्धिकरमिहजगतिसत्तंरेनवि-
द्यतेतस्मादात्मज्ञानेनसर्वपापान्नाशयतीत्यर्थः तत्तथाविधंज्ञानंयथो-
पदेशमहरहरुपचर्यमाणंज्ञानाकारकर्मयोगेनसंसिद्धःकालेनस्वा-
त्मनिस्वयमेवलभेत ३८

अभिनवगुप्तकृतटीका ३८

परमार्थप्रपाटीका

अतएवज्ञानेनतुःसाम्यंकिमपिनास्तीत्याह नहीति इहतपोयो-
गादिशुमध्येज्ञानतुल्यंपवित्रंशोधकमन्यन्नविद्यते तत्राह तत्स्व-
यमितिसार्द्धेन तत्ज्ञानंयोगसंसिद्धःयोगेकर्मयोगेनयोग्यतांप्राप्त
कालेनपरिपक्वावस्थायांस्वयमेवअनायासेनआत्मन्येवमशुद्धे
मनस्येवविंदतिप्राप्नोतिपरंतुनान्यतःकुतश्चिदानीयतेश्रुतिरपि
मनसैवानुद्रष्टव्यमेतदप्रमेयंध्रुवमिति तथामनसैवाप्तव्यंनेहनाना-
स्तिकिंचनेतिभाष्य एतदात्मात्वेवस्तुअप्रमयमप्रमेयअतर्क्यमपि
मनसैवध्रुवंस्थिरंयथाभवतितथा अनुवेलद्रष्टव्यंनान्येन तदुक्तं
यंवाशीतांशुरुद्रपापिसदाशांविवस्यःप्रकाशतेजगतितंहिवि-
शुद्धचित्तेप्रकाशमेति स्वयंह्यात्मेति ३८

वनमालीटीका

नहिज्ञानेनसदृशंपवित्रंशुद्धिकरमिहलोकेविद्यते प्रायश्चित्तादे-
पापनिवर्तकत्वेपिपापमूलाविद्योच्छेदकत्वाभावात् भगवत्ज्ञा-
नेनसर्वपापमूलमविद्याछिद्यतेतेनतुसर्वेकुतोनाभुवंतितज्ज्ञानंत-
त्राह तदिति महताकालेनयोगसंसिद्धःयोगेनपूर्वोक्तेनसंसि-
द्धो योपितामापन्नःस्वयमेवात्मनिभगवतितत्ज्ञानंतद्विषयकंज्ञा-
नंविंदति आत्मनिभगवतिप्रसन्नेसतिवा आत्मनिमनसिवातत्
ज्ञानंअस्यापरोक्षंविंदतीत्यर्थः ३८ ॥

कुसुमवैजयंतीटीका

नन्वेवंभूतःप्रतापोऽस्यकुतोयतःसर्वकर्माणिभस्मीकरोतीत्यपेक्षायां

माह नहीतिहियस्मादिहास्मिन्लोकेज्ञानेनात्मयथात्म्यज्ञानेन
सदृशंसमानंदानतपस्तीर्थादिकंपवित्रंपरमशुद्धिकरंनविद्यते
नास्त्येवातःसर्वकर्माणिभस्मसात्कुरुतेइत्यर्थःतस्यउलेभत्व
माह तदितियोगसंसिद्धःकर्मयोगेनसम्यकसिद्धःप्रबुद्धांतःकरण
त्वेनमुमुक्षुत्वमापन्नःपुरुषस्तत्आपिकालेनवकुकालेननतुसद्यः
५२ आत्मनिस्वास्मिन्स्वयंस्वतःलब्धंतज्ज्ञानंविंदतिलभते ३८

मधुसूदनीटीका

यस्मादेवंतस्मात् ॥
नहिज्ञानेनसदृशंपवित्रंपावनंशुद्धिकरमन्यादिहवेदेलोकव्यवहा
रेवाविद्यते ज्ञानभिन्नस्याज्ञानानिवर्तकत्वेनसमूलपापनिवर्तक
त्वाभावात्कारणसद्भावेनपुनःपापोदयाच्च ज्ञानेनत्वज्ञाननिहत्या
समूलपापनिहृतिरित्यतत्समन्यत्रविद्यते तदात्मविषयंज्ञानं
सर्वेषांकिमितिझटितिनोत्पद्यतेतत्राह तज्ज्ञानंकालेनमहतायोग
संसिद्धःयोगेनपूर्वोक्तकर्मयोगेनसंसिद्धःसंस्कृतोयोग्यतामापन्नः
स्वयमात्मन्यंतःकरणेविंदतिलभते नत्वयोग्यतामनापन्नोन्यदत्तं
स्वनिष्ठतयानवापरनिष्ठस्थायतयाविंदतीत्यर्थः [illegible]
[illegible]
३८

सदानंदीटीका

ज्ञानेनतुल्यंलोकेस्मिन्वेदेवान्यन्नपावनं विद्यतेशुद्धिजनकमज्ञा
नमलनाशकं १ ज्ञानाग्निस्यसामर्थ्यंनाम्यज्ञानमलक्षये ता
दात्म्यज्ञानंसर्वेषांकुतोनोत्पद्यतेऽचिरात् २ इत्याशंक्याहकालेनम
हतानतुतत्क्षणे पूर्वोक्तकर्मयोगेनसंस्कृतोयोग्यतांगतः ३ मु
मुक्षुर्लभतेशुद्धोस्वयंतज्ज्ञानमुत्तमं नयोग्यतामनापन्नोज्ञानमा
त्मैकगोचरं ४ लभतेयोग्यतासिद्ध्येयत्नंकुर्यादतःपुमान् ५ ३८

नीलकंठीटीका

नहीति योगेननिष्कामकर्मानुष्ठानेनसमाधियोगेनवासंसिद्ध

गीं
टीं
चं

संस्कृतो योग्यतामापन्नः कालेनेति चिरप्रयत्नसाध्यत्वं ज्ञानस्योच्यते ३८

आनंदीटीका

पदेर्वैज्ञानाप्नुयते इति श्रुत्यन्त्या पवित्रं संसरणभयाद्रक्षकं योगेन ज्ञानकर्मसमुच्चययुक्त्या

एवंभूतदेहवानात्मनोऽग्निपानादिकं ज्ञानेनावासेनिनिनमुक्तात्मकं

स्वमात्म स्वं ३८

रामकंठीटीका

यस्माज्ज्ञानेन तत्समं पावकमन्यद्धस्तज्जगतिनसंभवति तस्मात्स्यैव तत्त्वयोगसंसिद्धो ज्ञानसंस्कृतेन यथोक्तकर्म[illegible]समाधिना सम्यक्संसिद्धः प्राप्तपरमात्मसमापत्तिलक्षणप्रकृष्टफलः सन्योगीकालेनाभ्यासतीव्रतानुसारिणा शीघ्रेण चिरेण वा स्वयमेवात्मनेवलभते स्वीकुरुते [illegible] ३८

तत्र हेतुमाह

लासिकी [illegible]गोमीटीका

हि यस्मात् ज्ञानेन तुल्यमिह तपोयोगादिषु मध्ये न्यत्पवित्रं शोधकं वासनारूपाणां कलंकानां समूलोन्मूलकं न संभवति तत्पवित्रत्वयोगसंसिद्धः योगेन यथोक्तेन कर्मसमाधिना संसिद्धः सम्यग्ज्ञानोत्कर्षप्राप्तो योगी कालेनाभ्यासक्रमानुसारिणा शीघ्रेण चिरेण वा आत्मनि स्वस्वरूपे एव स्वयमनायासेन विंदति लभते स एव तदुक्तं तपस्तीर्थजपोदानं पवित्राणीतराणि च नार्हंति तेतां सिद्धिं या ज्ञानकलया कृतेति ३८

पंचोलीटीका

तज्ज्ञानेकस्यचिदेवाधिकारिणो भवति न सर्वस्येति तत्राह नहीति हि यस्मादिह अस्मिन् लोके ज्ञानेन सदृशं पवित्रं न विद्यते तज्ज्ञानयोगसंसिद्धः योगेन कर्मयोगेन समाधियोगेन संस्कृतः योग्यतामापन्नः बहुकालेन स्वयं आत्मनि विषये लभते ३८

श्रीवीरसमिहोधिनी ॥

नहीति हि यस्मात् निश्चये इह लोके ज्ञानेन मोक्षलक्षणेन स्व

वह्मागतानामनेरोगणहुंगयोगेन वसिद्धः समत्वगासिद्धिमाप्नः का ज्ञैतकंमाणिप्रापकैनतस्मान्भ्रं नमात्मसिद्धिर्नवैतावि तः

धर्माचरणविषयकनिश्चयेन सदृशं तुल्यमन्यत्पवित्रं अथर्मा-
न्नभिज्ञाचर्यादेर्निवर्तनात्स्वधर्मे प्रवृत्तिदानाच्च पवित्रतापा
दकं नास्ति ननु कथं न तत्प्राप्तिः सर्वेषां फटिति भवतीत्यत आह
तदिति तच्च ज्ञानं कालेन महता नेह सा योगसंसिद्धः योगेन गु
रुसंगेन सम्यक्सिद्धः संस्कृतांतःकरण आत्मनि अंतःकरणे स्व
यमकस्माद्विंदति लभते चिरकालेकृतगुरुजनाराधनस्य तदनु
ग्रहात्स्वयमेवांतःकरणे प्रोक्तलक्षणनिश्चयोत्पत्तिर्भवतीतिभा
वः अत्रेयमपरा व्याख्या तीव्रप्रकांता यथानुगुणा न ह्युत्तेवध्यते उ
रस्मादावितिन हि वर्मांगुलित्राणादिकं सर्वथा तदभ्युदयस्याणादि
कइप्रत्ययः न हि वर्मांगुलित्राणादेर्ज्ञानं यथा स्थानामोचनप्र-
कारविषयकं न हि ज्ञानेन तस्मिन्सति इहास्मिन्युद्धेन्यत्पवित्रं पवे
वंत्राणायाग्रुथाज्ञायते इति पवित्रं वक्तुं सदृशं युक्ततमं न विद्यते वर्म
बंधनज्ञानं यथा वस्त्रादेरत्तातिन तथान्यदिति भावः यः पुमान्का
लेकवचधारणकालेयुद्धावसरे गसंसिद्धः पर्वतस्वभावो नभ-
वेदितिशेषः संसिद्धिप्रकृतीत्विमे स्वरूपं च स्वभावश्चेत्यमरः य
थासर्वं पर्वं पर्वतामूढत्वेन वज्रप्रभावान भित्ता वस्त्राज्ञाणोपाय
मप्रयुंजानाः इंद्रेणाच्छिन्नपक्षाः कृताः एवं कवचमधारयन्नुमा
नपि शत्रुभिर्बाणघातयुधैर्निहन्यत इति अतश्च पर्वतप्रायो योन
भवेत् किंतु कवचधारणादिकमस्त्रत्राणोपायं प्रयुंजान एवस्या
त् स आत्मनि यत्नेकृते सति तत्प्राप्तिं तं राज्यादिकं स्वयं परानपेक्ष
यैव विंदति लभत इति तच्छ्रीमद्बुद्धिस्य परमर्षीकः न चात्रगर्भि
तत्वदोषः लोकप्रवृत्तवर्ष्यायानियमितत्वात् अस्य च ग्रंथस्य
भगवदुक्तत्वेन वेदत्वात् यद्वा यस्मात्कवचधारणमेव वस्त्रादेरपि
त्रायकं न तस्मात्कारणात् योगेन वर्मसन्नद्धतेन संसिद्धो योग्य
तामापन्नो नाम मनुष्यः काले युद्धावसरे आत्मनि निश्चयात्मिका

192

यांतुष्टौ धृतायांसत्यांधैर्येचजातेसतियत्नेचकर्मेंद्रियव्यापारेकृ
तेसति स्वयंपरानपेक्षयैवविन्दतेलभतेलब्धव्यंराज्यादिक
मितिशेषः ३८॥

मधुभाष्य

३८॥

भाषा अनुवाद

तिसका कारण यह है कि संसारमे तप दान व्रत यज्ञ आदि के बीच ज्ञानके समान कोई भी चितशुद्ध नही करते है तोफेरि सब मनुष्य क्यों नही ज्ञानही का अभ्यास करते ईसपर डेढ श्लोकसे कहतेहैं कि बहुत काल कर्म योग करने से शुद्ध चित होय सहज मे लोग आत्माका तत्वज्ञान लाभ करतेहैं परंतु निष्काम कर्मयोग रूप जोभक्ति तिसके विनातत्वज्ञान नही होताहै सोई कहा नहि ज्ञानेन सदृशं इत्यादि

दोहा

नहि पवित्र है ज्ञान सम निश्चय सें इह लोय योगसिद्ध
कि हकालसो आपहि मे फुर होय ३८॥

193

श्रद्धावान्लभतेज्ञानंतत्परःसंयतेंद्रियः ज्ञा
नंलब्ध्वापरांशांतिमचिरेणाधिगच्छति ३९

शांकरभाष्यं

येनैकांतेनज्ञानप्राप्तिर्भवतिसउपायउपदिश्यते श्रद्धावानितिश्र
द्धावान्श्रद्धालुर्लभतेज्ञानं श्रद्धालुत्वेपिभवतिकश्चिन्मंदप्रस्थानो
ऽतआह तत्परोगुरूपासनादावभियुक्तोज्ञानलब्ध्युपाये श्रद्धावां
स्तत्परोऽप्यजितेंद्रियःस्यादित्यतआह संयतेंद्रियःसंयतानिविषये
भ्योनिवर्तितानि यस्येंद्रियाणिससंयतेंद्रियोयोगीयएवंभूतः श्रद्धा
वांस्तत्परःसंयतेंद्रियश्चसोऽवश्यंज्ञानंलभते प्रणिपातादिस्तु बा
ह्योनैकांतिकोपिभवति मायावित्वादिसंभवात् नतुतथा तच्छ्रद्धा
वत्वादावित्यैकांततोज्ञानलब्ध्युपायः किंपुनर्ज्ञानलाभात्स्यादित्युच्य
ते ज्ञानंलब्ध्वापरांमोक्षाख्यांशांतिमुपरतिमचिरेणक्षिप्रमेवाधिग
च्छति सम्यग्दर्शनात् क्षिप्रमेवमोक्षोभवतीतिसर्वशास्त्रन्यायप्रसि
द्धःसुनिश्चितोऽर्थः ३९

आनंदगिरिकृतटीका

कर्मयोगेनसमाधियोगेनचसमभ्यस्तस्यज्ञानोत्पत्तावंतरंगसाधनमुप
दिशति येनेतिज्ञानलाभेप्रयोजनमाह ज्ञानमिति नकेवलंश्रद्धालु
त्वमेवसहायंज्ञानलाभहेतुरपितुतात्पर्यमपीत्याह श्रद्धालुत्वेपीति
मंदप्रस्थानत्वंतात्पर्यविधुरत्वेनचतस्योपदिष्टमपिज्ञानमुत्पत्तुमीष्टे
तेनतात्पर्यमपितत्रकारणंभवतीत्याह अतआहेति अभियुक्तोनिष्ठा
वानुपासनादावित्यादिशब्देनश्रवणादिगृह्यते नकेवलंश्रद्धातात्प
र्यंचेत्युभयमेवज्ञानकारणंकिंतुसंयतेंद्रियत्वमपितदभावे श्रद्धादे
रकिंचित्करत्वादित्याशयेनाह श्रद्धावानिति उक्तसाधनवांज्ञानेन
सहैकांतिकत्वमाह यएवंभूतइति तद्विद्धिप्रणिपातेनेत्यादौप्रागेव
प्रणिपातादेर्ज्ञानहेतोरुक्तत्वात् किमिदानींहेतुत्वंतस्योच्यतेतत्राह
प्रणिपातादिस्त्विति तद्धिबहिरंगमिदंपुनरंतरंगंनचतत्रज्ञानेन प्र

गी॰
टी॰
च॰

१९४

तिनियमोमनसप्यन्यथाकृत्वा बहिरन्यथा प्रदर्शनात्मनो मायावि
त्वस्य संभवाद्विप्रलंभकत्वादेरपि संभावनोपनीतत्वादित्यर्थः मा
यावित्वादेः श्रद्धावत्त्वतात्पर्यादावपि संभवादनैकांतिकत्वमविशि
ष्टमित्याशंक्याह नत्विति नहि मायया विप्रलंभेन वा श्रद्धातात्पर्य
संयमाभियोगेनानिष्ठानमर्हतीत्यर्थः उत्तरार्द्धं प्रश्नपूर्वकमवतार्य
व्याकरोति किंपुनरित्यादिना सम्यग्ज्ञानादभ्यासादिसाधनानां
पेक्षान्मोक्षो भवतीत्यत्र प्रमाणमाह सम्यग्दर्शनादिति शास्त्रश
ब्देन तमेव विदित्वा ज्ञानादेवतु कैवल्यमित्यादि विवक्षितं न्यायस्तु
ज्ञानादज्ञाननिवृत्तेः रज्ज्वादौ प्रसिद्धत्वात् आत्मज्ञानादपि निरपेक्षा
दज्ञानतत्कार्यप्रत्ययलक्षणो मोक्षः स्यादित्येवं लक्षणः ३९

स्वामिकृतटीका

किंच श्रद्धावानिति श्रद्धावान् गुरूपदिष्टेर्थे आस्तिक्यबुद्धिमान्
तत्परस्तदेकनिष्ठः संयतेंद्रियश्च तज्ज्ञानं लभते नान्य इत्यर्थः अतः
श्रद्धादिसंपत्त्या ज्ञानलाभात्प्राक्कर्मयोगएवश्रुद्ध्यर्थमनुष्ठेयः ।
ज्ञानलाभानंतरं तु न तस्य किंचित्कृत्यमस्तीत्याह ज्ञानं लब्ध्वा त्वचिरे
णैव मोक्षं प्राप्नोति ३९

पिशाचभाष्ये स्पष्टार्थे ३९

रामानुजभाष्ये

तदेव स्पष्टमाह श्रद्धावानिति उपदिष्टज्ञानवृद्धौ श्रद्धावांस्तत्परस्त
५८ त्रैव नियमितमनास्तदितरविषयात्संयतेंद्रियोऽचिरेण कालेनोक्तल
क्षणं विपाकदशापन्नं ज्ञानं लभते तथाविधं ज्ञानं लब्ध्वा परां शांति
मधिगच्छति परं निर्वाणं प्राप्नोति ३९

अभिनवगुप्तकृतटीका स्पष्टार्थे ३९

परमार्थप्रपाटीका

किंच श्रद्धावानिति गुरूपदिष्टेर्थे आस्तिक्यं श्रद्धा तद्वान् तत्परस्तदे
कनिष्ठः अतएव संयतेंद्रियश्च ज्ञानं लभते नान्यः एवं ज्ञानं लब्ध्वा अ

चिरेणपरांशांतिंमोक्षमधिगच्छति अथज्ञानरहितंनिंदति ३९

वनमालीटीका

ज्ञानस्योत्कृष्टमावश्यकंचयत्साधनंतदाह श्रद्धेतिगुरुवेदांतवा
क्येइदमित्थमेवेति प्रमारूपास्तिक्यबुद्धिःश्रद्धातद्वान्पुरुषोज्ञानं॰
लभतेएतादृशःकश्चिदलसःस्यात्तत्राह तत्परःज्ञानोपायेगुरूपा
सनादावत्यंताभियुक्तःएतादृशःकश्चिदजितेंद्रियोपिस्यात्तत्राह
संयतेंद्रियःसंयतानिविषयेभ्योनिवर्तितानींद्रियाणियेनसः एवं
विशेषेणयत्रयुक्तोवश्यंज्ञानंप्राप्नोतिप्रागुक्तप्राणिपातादिस्तुवा
ह्योमायाविनोपिसंभवादनैकांतिकःश्रद्धावत्त्वादिस्त्वैकांतिकइ
त्यर्थः एतादृशोपायेनलब्ध्वाचिरेणैवज्ञानानाव्यवहितोत्तरकालेनै
वपराममविद्यानिवृत्तिपूर्वकस्वस्वरूपानंदाविर्भावरूपांमुक्तिमधिग
च्छति यथादीपोदयोत्तरकालएवांधकारनिवृत्तिर्नविलंबेनतथा॰
भगवदापरोक्षोदयकालएवजीवानंदायाच्छादकाविद्यानिवृत्ति॰
र्नतुविलंबेनेतिभावः ३९

ऊहमवैजयंतीटीका

एवंभूतेज्ञानेकिंविशिष्टःपुरुषःप्राप्नोतीत्यपेक्षायामाह श्रद्धा॰
वानितिशास्त्राचार्योक्तिषुविश्वासःपूर्वंश्रद्धाविद्यतेयस्यसतथात
त्परस्तत्रैवनियमितचित्तःयद्वापिपर्तिपालयतिपूरयतिवापरस्त
स्यपरोऽहरहोऽभ्यासादिनापालकःश्रद्धादिनातदंगपूरकोवासं॰
यतेंद्रियःतदितरप्राकृतेभ्योवस्तुभ्यःसम्यक्जितान्युपशमिता
नींद्रियाणियेनसथासंयमितेंद्रियइत्यर्थःईदृशःपुरुषोज्ञानमु॰
क्तप्रकारकंलभतेप्राप्नोतिलब्ध्वाज्ञानेसतिकिंस्यादतआह ज्ञान
मिति ज्ञानमुक्तलक्षणंलब्ध्वाप्राप्याचिरेणस्वल्पकालेनैवपरामु॰
त्कृष्टांशांतिंमुक्तिमधिगच्छतिप्राप्नोतिपुनर्जन्मादिलक्षणंसंसारं
नप्राप्नोतीत्यर्थः ३९

मधुसूदनीटीका

येनैकांतेनज्ञानप्राप्तिर्भवतिसउपायः पूर्वोक्तप्रणिपाताद्यपेक्षयाऽप्यत्रतरउच्या
ते गुरुवेदांतवाक्येष्विदमित्थमेवेतिप्रमारूपास्तिक्यबुद्धिःश्रद्धात॰

तत्परः गुरूपासनादौ ज्ञानोपाये त्यंताभियुक्तः
श्रद्धावांस्तत्परोपिकश्चिदजितेंद्रियःस्यादतआह

गी॰
टी॰
४॰

ज्ञानंगुरुषोलभतेज्ञानं एतादृशोपिकश्चिदलसःस्यात्तत्राह सं
यतानिविषयेभ्योविषयेभ्योनिवर्तितानींद्रियाणियेनससंयतेंद्रि
यःएवंविशेषणत्रययुक्तःयःसोवश्यंज्ञानंलभते प्रणिपातादि
स्तुवाह्योमायावित्वादिसंभवादनैकांतिकोपिश्रद्धावत्वादिस्त्वै
कांतिकउपायइत्यर्थः ईदृशेनोपायेनज्ञानंलब्ध्वापरांपरमांशां
तिमविद्यातत्कार्यनिवृत्तिरूपांमुक्तिमचिरेणतदव्यवधानेनैवा
धिगच्छतिलभते यथाहिदीपःस्वोत्पत्तिमात्रेणैवांधकारनिवृ
त्तिंकरोति नतुकिंचित्सहकारिणमपेक्षते तथाज्ञानमपिस्वोत्प
त्तिमात्रेणैवाज्ञाननिवृत्तिंकरोति नतुकिंचित्प्रसंख्यानादिकम
पेक्षतइतिभावः [illegible] ३९

सदानंदीटीका

ज्ञानप्राप्तिःसनंतयेनोपायेनैकांतभाविनी सप्रासमंतरःसाक्षादु
पायउपदिश्यते १ गुरुवेदांतवाक्येषुश्रद्धास्तिक्यमतिस्तया तद्यु
तोलभतेज्ञानंयदितत्रैवतत्परः २ गुरुसेवाद्युविज्ञानोपायेत्यंता
भियुक्तिमान् श्रद्धावांस्तत्परोयस्तुनस्यात्सयदिजितेंद्रियः ३ तस्या
पिदुर्लभंज्ञानंअतःस्यात्संयतेंद्रियः निवर्तितानींद्रियाणिविषये
भ्यश्चयेनसः ४ अवश्यंलभतेज्ञानंविशेषणत्रयान्वितः प्रणिपा
तादिकपायोहिदंभिनामपिदृश्यते ५ श्रद्धावत्वाद्युपायस्तुसुतामै
कांतिकोवरः उपयेनेदृशेनैवज्ञानंप्राप्यसपद्यसौ अविद्यादिनि
वृत्त्याख्यांशांतिंमुक्तिमुपैतिसः अव्यवधानेनैवाज्ञावशीभूतोम
वेन्नरः ७ यथास्वोत्पत्तिमात्रेणदीपोहंतितमोखिलं सनैवापेक्षते
तत्रकंचित्सहकारिणं ८ तथास्वोत्पत्तिमात्रेणज्ञानंचैकलोका
वरं निहंत्यविद्यांतत्कार्यंनसहायमपेक्षते ९ ३९

नीलकंठी टीका

श्रद्धावान्ज्ञानंलभते श्रद्धावानपिमंदप्रयत्नोमाभूदतआह तत्प
रइति तत्परोप्यजितेंद्रियोमाभूदत्याह संयतेंद्रियइतिपरांशांतिं

त

विदेहकैवल्यं अविरेणारब्धकर्मसमाप्तौ सत्यां ३९

आनंदीटीका

एवमुपदेशकानां प्रणिपातादिकं ज्ञाने बाह्यं निमित्तमुक्त्वाभ्यन्तरमाह श्रद्धावानिति स्पष्टम् ३९

श्रद्धावानित्यत्राह इहैवमहासत्त्वस्तानकर्मिसत्त्वस्यैवेहत्वंयं ३९

रामकंठीटीका

तस्यैवेवंप्रभावस्यज्ञानस्यलाभ क्रममाह ॥

याश्रद्धाश्रास्त्रोपदिष्टेर्थेनिर्विकल्पफलसंभवनायहृष्टात्सामफला ऽस्यैवचेतसः संप्रसादउत्पद्यते साचपरमेश्वरप्रसादस्वरूपादप्रथ मसंजयांभक्त्यासहैवोत्पद्यतेतद्वान् तयायुक्तः संशयात्मकघोर विघ्नविनाशानन्यरोनान्यचेतास्तथासंयतेंद्रियःप्राकप्रतिपादिते नक्रमेणवशीकृतसकलांद्रवर्गःपरमपावनंज्ञानमभियुक्तःऊ नश्चित्परमेश्वरेश्वरितात्मात्कृतपरमार्थादवाप्नोति तच्चप्राप्य नित्याभ्यासपरिशीलनात्स्फुटकप्रतिपत्यास्वीकृत्याचिरेणाल्पीयसै वकालेनपरांनिरुत्तरांशांतिंसकलविप्लवविनाशनिश्चलेशमस्वा त्मोपलब्धिजनितांनिर्वृतिंमधिगच्छतिप्राप्नोति [illegible] ३९

लासिकी [illegible]टीका

श्रद्धावानपि सोयंसिद्धिंनिर्वाणाख्यांनाभिवर्धयतीति तस्यैवेवंप्रभा वस्यलाभक्रममाह श्रद्धावानिति गुरूपदिष्टेर्थेश्रद्धावानास्तिकः गुरुवि षयभक्त्युद्रेकेणहेतुना तदुक्तेर्थेविश्वासयुक्तः तथाचश्रुतिः यस्यदेवे पराभक्तिर्यथा देवेतथागुरौ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मन इति तत्परोनान्यचेताः तथोपदिष्टेर्थेयत्नवान् संयतेंद्रियः श्रवोक्तयु क्त्यावशीकृतात्मवर्गएवंविधःपुरुषोयथोक्तज्ञानंलभते प्रणिपातादि स्तुवाह्योपायोमायावित्वादिसंभवादनेकांतिकोपि श्रद्धावत्वादिस्त्वे कांतिकउपायइति ईशैर्हेतोरुपायैनतज्ज्ञानंप्राप्याल्पीयसैवकालेन परांशांतिमविद्यातत्कार्यनिवृत्तिरूपांमोक्षाख्यांप्राप्नोति ३९ एतद्गुण विहीनस्तु ३९

पंचोलीटीका

गी॰
टी॰
चं॰

येनैकांतेन विज्ञानप्राप्तिर्भवति तमुपायमाह श्रद्धावानिति श्र
द्धावान् श्रद्धालुस्तत्परः तन्निष्ठः गुरोरुपासनादौ अभियुक्तः संयतें
द्रियः संयतानि विषयेभ्यः निवृत्तानींद्रियाणि यस्य सः ज्ञानं लभ
ते ज्ञानं लब्ध्वा अचिरेण क्षिप्रमेव परां शांतिं मोक्षाख्यां प्राप्नोति ३९

196

रणवीरसमिद्धोधिनी॥

ज्ञानप्राप्तौ ऐकांतिकोपायमाह श्रद्धावानिति गुरुशास्त्रवाक्येषु यथा
र्थबुद्धिः श्रद्धा तद्वान् मुमुक्षुर्ज्ञानं मोक्षलक्षणं लभते तत्परः प्रणि
पातादिना गुरूपासनादावत्यंतासक्तः संयतेंद्रियः संयतानि स्वा
धीनीकृतानि न पुनर्मनोनुविधीयमानानींद्रियाणि चक्षुरादीनि
युवादिरूपदर्शनेनारब्धात्स्मरकर्मणो निवर्तकानि येन स तादृशः
स च ज्ञानं मोक्षलक्षणं निश्चयं एव वेदार्थविषयं ज्ञानं च प्राप्य परा
मनिर्वाच्यां शांतिं सुखपरंपरां राज्यभोगादिलक्षणामैहिकीं स्व
र्गादिभोगलक्षणां पारत्रिकीं ब्रह्मसायुज्यलक्षणामापवर्गिकीं
वा अचिरेण शीघ्रमेवाधिगच्छति प्राप्नोति ३९॥

मधुभाष्य

३९॥

भाषाअनुवाद

और भी कहते हैं कि श्रद्धावान् कहे आचार्यतथा गुरु के उपदेशमे विस्वासकरि आस्तीक बुद्धि हो तत्पर कहे एक उसी उपदेशमे दत्त चित्त हो और इंद्रियों को वशराखि कर वह तत्वज्ञान लाभकरै हैं इसी से ज्ञान लाभ के पहिले श्रद्धापूर्वक चित्तशुद्धि केअर्थ निष्काम कर्म रूप भक्ति योग करना उचितहै और ज्ञान होने पर ज्ञानी को फेरि अन्य कोई कर्म करना नहीहै सोई कहते हैं कि तत्वज्ञानी ज्ञानलाभ के अनंतर अचिरात् कहे अल्पकालमेझटपट मोक्ष को पावते हैं इसमे संदेह नही ३९

दोहा

श्रद्धावानलहैं ज्ञानकहुं युक्त जितींद्रिय होय ज्ञान मिले
सें सांतिपरम सिघ्र पराप्त सोय ३९॥

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ना
यं लोकोस्ति न परो न सुखं संशयात्मनः ४०

शांकरभाष्यं

अत्र संशयो हि न कर्तव्यः पापिष्ठो हि संशयः कथमित्युच्यते अज्ञ-
श्चेति अज्ञश्चानात्मज्ञः अश्रद्दधानश्च संशयात्मा च विनश्यति अज्ञा
श्रद्दधानौ यद्यपि विनश्यतः न तथा यथा संशयात्मा संशयात्मा तु
पापिष्ठः सर्वेषां कथं नायं साधारणोपि लोकोऽस्ति तथा न परो लो
को न सुखं तत्रापि संशयोपपत्तेः संशयात्मनः संशयचित्तस्य तस्मा
त् संशयो न कर्तव्यः ४०

आनंदगिरिकृतटीका

उत्तरश्लोकस्य पातनिकां करोति अत्रेति यथोक्तसाधनवाननुपदे
शमपेक्ष्याचिरेण ब्रह्म साक्षात्करोति साक्षात्कृतब्रह्मत्वेऽचिरेणैव
मोक्षमाप्नोतीत्येषोऽर्थः सम्प्रत्यपरामृश्यते संशयस्याकर्तव्यत्वे
हेतुमाह पापिष्ठो हीति उक्तं हेतुं प्रश्नपूर्वकमुत्तरश्लोकेन साधय
ति कथमित्यादिना अज्ञादश्रद्दधानाच्च संशयचित्तस्य विशेष-
मादर्शयति नायमिति द्वितीयभागविभजनार्थं भूमिकां करो-
ति अज्ञेति अज्ञादीनां मध्ये संशयात्मनो यत्पापिष्ठत्वं तत्प्रश्नद्वा
रा प्रकटयति कथमिति लोकद्वयस्य तत्प्रयुक्तसुखस्य चाभावे हेतु
माह तत्रापीति संशयचित्तस्य सर्वत्र संशयप्रवृत्तेर्दुर्निवारत्वादि
त्यर्थः संशयस्यानर्थमूलत्वे स्थिते फलितमाह तस्मादिति ४०

स्वामिकृतटीका

ज्ञानाधिकारिणमुक्त्वा तद्विपरीतमनधिकारिणमाह अज्ञश्चेति
अज्ञो गुरूपदिष्टार्थानभिज्ञः कथंचिज्ज्ञाने जातेपि अश्रद्दधानश्च- तत्र
जातायामपि श्रद्धायां ममेदं सिध्येद्वा न वेति संशयाक्रान्तचित्तश्च न-
श्यति स्वार्थाद्भ्रश्यति एतेषु त्रिष्वपि संशयात्मा सर्वथा नश्यति य

नतस्यायंलोकोनास्तिधनार्जनव्यवहाराद्यसिद्धेः नचपरलोको
धर्मस्यानिष्पत्तेः नचसुखंसंशयेनैवभोगस्याप्यसंभवात् ४०

पिशाचभाष्यं उपक्रमे ४०

रामानुजभाष्यं

अज्ञश्चेति अज्ञएवमुपदेशलब्धज्ञानरहितः उपदिष्टज्ञाने अश्र
भ॰ द्धायेचाश्रद्दधानः अज्ञारंभात् उपादिष्टेचज्ञाने संशयात्मा संश
यितमनाविनश्यति नष्टोभवति अस्मिन्नुपदिष्टे आत्मयाथात्म्य
नि॰ विषयेज्ञाने संशयात्मनोऽयमपि प्राकृतलोकोनास्ति नचपरः
धर्मकामादिपुरुषार्थो अर्थनसिद्धेरिति कुतो मोक्ष इत्यर्थः शास्त्रीय
कर्मसिद्धिरूपत्वात्सर्वेषां पुरुषार्थानां शास्त्रीयकर्मजन्यसिद्धेश्च
देहातिरिक्तात्मनिश्चयपूर्वकत्वात् अतः सुखलवभागित्वं संशा
यात्मनोनभवति ४०

अभिनवगुप्तकृतटीका

सत्समिद्धोऽभ्यासजातप्रतिपत्तिदार्ढ्यं वर्धयेन ज्ञानाग्निर्भवति यथा
तथाश्रियतनीयमिति पवित्रंहिज्ञानसमंनास्त्य[illegible]न्यस्यसंहृष्टा
पवित्रत्वंनवस्तुतः इत्यतिप्रसंगभयात् प्रतायते पवित्रत्वंचास्य
स्वयंज्ञास्यसि सम्यग्वृत्तायां अत्रचश्रद्धागमस्तत्परत्वापारत्वं कु
गीत्येवास्तिकत्वादसंशयत्वं समभ्युपेयते तस्मादसंशयवताग
वीरमादृतेन भाव्यं संशयस्य सर्वनाशकत्वात् ससंशयोहिना
किंचिज्जानाति अश्रद्दधानत्वात् तस्मान्निःसंशयेनभाव्यमिति
वाक्यार्थः सकलाध्यायविस्फारितोऽर्थः श्लोकद्वयेन संक्षिप्य
प्रोच्यते ४०

परमार्थप्रपाटीका

अथज्ञानरहितंनिन्दति

अज्ञइति अज्ञो गुरूपदिष्टार्थानभिज्ञः कथंचिज्ज्ञानेजातेपि अश्रद्द
धानः अनास्तिक्यवान् कथंचिज्जातायामपि श्रद्धायां ममेदंसि
द्धंनवेति संशयात्मा एवंविधः पुरुषो नश्यति अपुनाशस्वरूप
माह नायमिति संशयात्मनः संशयरूपआत्मा मनो यस्य तथा

भूतस्यायंलोकोनास्तिअसत्वात्नपरःअश्रद्दधानत्वात् नसु-
खंनविश्रांतिःसंशयात्मत्वात् ४०

वनमालीटीका

अत्रसंतापोनकार्यइत्याह अज्ञइति अज्ञोनधीतशास्त्रत्वेनात्म
ज्ञानशून्यः गुरुवेदांतवाक्येइदमेवंनभवत्येवेतिविपर्ययरूपाना-
स्तिक्यधीस्त्वज्ञातज्ञानश्रद्दधानः इदमेवंभवतिनवेतिसंशयाक्रां
तचित्तःसंशयात्माविनश्यतिस्वार्थाद्भ्रष्टोभवति नायंमनुष्यलो
कोस्तिसर्वत्रसंशयेनवित्तार्जनाद्यसंभवात् नपरोलोकःस्वर्गमो
क्षादिःधर्मज्ञानाद्यभावात् नसुखंभोजनादिकृतंसंशयात्मनःस
देहाक्रांतचित्तस्य अज्ञस्याश्रद्दधानस्यचपरोलोकोनास्तिऐहिक
भोजनादिकृतसुखंत्वस्ति संशयात्मनस्तुनोभयमन्यंनपापीया
नयमित्यर्थः ४०

ऊस्नमवैजयंतीटीका

एवंफलसहितमात्मज्ञानाधिकारिणमुक्त्वेदानींतदनधिकारि-
णंतद्विपरीतफलंचाह अज्ञश्चेति अज्ञःकेनापिविद्याप्रयोगेनशास्त्र-
मपिज्ञानशास्त्रज्ञानरहितत्वेनतद्ग्रहणधारणासमर्थःनतुयदस्य
ज्ञस्यैवाज्ञानेज्ञानंननाशयतितर्हितदितरस्यविज्ञस्याज्ञानाभावात्क
स्याज्ञानंतन्नाशयतियज्ज्ञानमज्ञानंननाशयतितज्ज्ञानमेवनस्यादज्ञा
नविरोधित्वेज्ञानत्वमितिज्ञानस्यलक्षणत्वासिद्धेरितिचेदतआह
अश्रद्दधानश्चेति श्रद्धावांल्लभतेज्ञानमित्युक्तरीत्याश्रद्धावतएव
ज्ञानस्याधिगमनत्तस्यैवचाज्ञानमेतज्ज्ञानंनाशयत्ययंत्वश्रद्दधान
सदाचार्योपदिष्टज्ञानेविश्वासपूर्वकश्रद्धारहितःयत्किंचित्शास्त्रमश्रा
स्त्रज्ञानंतदपिकुतर्कवितंडादिरूपविवादेनविफलंकरोत्यतोऽस्या
ज्ञानंतन्ननाशयतिप्रत्युततदेवनश्यतिसचापिनश्यतिस्वार्थाद्धि
च्यवते अतएवसंशयात्मागुरुणोपदिष्टेनापिज्ञानेनममसंसार
निवृत्तिःस्यान्नवेत्येवमाद्यनेकविधसंदिग्धमनाःसतुविनश्यत्येव
कुतोयतःसंशयात्मनःसंदिग्धमनसोजनस्यायंलोकःप्राकृत-

लोकोपिविवाहवित्तोपार्जनादिरूपोनास्तिनपरःपरलोकोपिधर्मादि॰
साधनाभावान्नास्तिसुखमपिनास्तिविविधसंशयव्याकुलचित्तत्वेनभो
जनशयनादिरूपस्यभोगस्याभावात् एवमज्ञत्वादित्रिविधधर्मविशिष्ट॰
स्यात्मज्ञानाभावात्सततरामोक्षाभावइत्यर्थः ४॰

मधुसूदनीटीका

अत्रचसंशयोनकर्तव्यःकस्मात् ॥
अज्ञोऽनधीतशास्त्रत्वेनात्मज्ञानशून्यःगुरुवेदांतवाक्यार्थेइदमेवंनभव
त्येवेतिविपर्ययरूपानास्तिकबुद्धिरश्रद्दधानःइदमेवंभव
तिनवेतिसर्वत्रसंशयाक्रांतचित्तःसंशयात्माविनश्यतिस्वार्थाद्भ्रष्टोभ
वति अज्ञश्चाश्रद्दधानश्चनश्यतीतिसंशयात्मापेक्षयाऽन्यत्वकथ॰
नार्थंचकारस्तयोःप्रयोगःअतःसंशयात्माहिसर्वतःपापीयान्
यतोनायंमनुष्यलोकोस्तिवित्तार्जनाद्यभावात्नपरलोकःस्वर्गमो॰
क्षादिधर्मज्ञानाद्यभावात्नसुखंभोजनादिकृतंसंशयात्मनःसर्वत्रसंदेहा १४
क्रांतचित्तस्याज्ञस्याश्रद्दधानस्यचपरलोकोनास्तिमनुष्यलोकेभोज
नादिसुखंचवर्तते संशयात्मानत्रितयमपिहीनत्वेनसर्वतःपापीयानि
त्यर्थः [illegible]
[illegible]
[illegible]
[illegible] ४॰

सदानंदीटीका

संशयोनात्रकर्तव्यःकिमर्थमितिचेच्छृणु अज्ञोनधीतशास्त्रत्वादा
त्मज्ञानविवर्जितः १ गुरुवेदांतवाक्यार्थेविश्वासाभावरूपिणी ना॰
स्तिक्यबुद्धिरश्रद्धातद्वानश्रद्दधानकः इदमेवंनवेत्येवंसंशयाक्रांत॰
धीःपुमान् भवतिस्वार्थतोभ्रष्टस्त्रिष्वेषन्यतमोपियः ३ अज्ञश्चाश्र
द्दधानश्चविनश्यतितथापियः संशयात्मातिपापीयान्सर्वथासविन
श्यति ४ वित्तार्जनाद्यभावान्नलोकःसाधारणोप्ययं धर्मज्ञानाद्यभा
वान्नस्वर्गमोक्षादिकःपरः ५ संशयाक्रांतचित्तस्यनाशनादिकृतंसुखं
अज्ञस्याश्रद्दधानस्यपरलोकोनयद्यपि ६ वर्ततेतन्नलोकोयंभोज
नादिसुखंतथा संशयात्मात्रिभिर्हीनःपापीयान्सर्वतोयमः ७ ४॰

नीलकंठीटीका

अज्ञश्चेति अज्ञः स्वेन विचिकित्सितुमशक्तः अश्रद्दधानो यत्नेन संशयात्मा त्वसाध्य एव यतः मिश्रादिष्वपि संशयं कुर्वतोस्य अयं लोकोपि नास्ति नापि परः वेदवाक्येष्वपि संशयात् अत एव सर्वदा संशयाकुलत्वात् सुखमपि तस्य नास्ति तस्मात्संशयो न कर्तव्यः ४०

आनंदी टीका

अन्वयव्यतिरेकमाह अज्ञेति इदमुक्तासनं ज्ञानकर्मसमुच्चये प्रकृत्यर्थम् ॥ ४०

योगेन संन्यस्तानि योगेनेत परमात्मनि कर्माणि समुच्चयपदुत्पात्संन्यस्तानि विय मात्मनि वफलानि येन यापरमेश्वरे समर्पितानि कर्माणि येन तं तनयः ज्ञानेन मात्मनाने सावधान ४०

रामकंठीटीका

एतद्गुणविहीनस्तु ॥

अज्ञो ज्ञानरहितैनश्यति परापरफलप्राप्त्यभावात् संसार एव निमज्जति कीदृशः स विनश्यति अश्रद्दधानो यः परमेश्वरानुग्रहाद्विना न किंचित्सिद्ध्यतीति संभावयति यतः श्रद्धाविरहात्संशयात्मा सर्वत्र निश्चयप्रतिपत्त्यभावात्संदेहमयबुद्धिः अतश्च तथाविधस्य सर्वत्र संदिग्धबुद्धेर्नायं दृष्ट एव लोकोस्ति न च परः स्वर्गापवर्गलक्षणो दृष्टः ततश्च सुखमपि तस्य नास्ति संशयितस्य हि वैद्यादिनाप्यनेक आध्यादिप्रतीकारहेतौ भेषजादौ संदिह्यमानमतेश्चाध्याद्विनाशाभावादयमेव लोको नास्ति कुतः परः सुखं वा लोकद्वयोपभोग्यमिष्टफलं भविष्यति ४०

[illegible] ४०

लासिकी [illegible] टीका

एतद्गुणविहीनस्तु अज्ञो गुरूपदिष्टार्थानभिज्ञः कथंचिज्ज्ञातेपि ज्ञाने अश्रद्दधानश्च विश्वासहीनश्च ज्ञातायामपि श्रद्धायां ममेदं सिद्ध्येन्न वेति संशयाक्रांतचित्तश्च नश्यति स्वार्थाद्भ्रश्यति एतेषु त्रिष्वपि संशयात्मा सर्वथा नश्यति अतस्तस्यायं दृष्टलोको नास्ति धनार्जनविवाहादसिद्धेः न च परलोको धर्मस्यानिष्पत्तेः न च सुखं संशयेनैव भोगास्याप्यसंभवात् ४०

पंचोलीटीका

अत्रब्रह्मात्मैकत्वेनसंशयोनकर्तव्यः पापिष्ठोहिसंशयात्मेत्याह
अज्ञश्चेति अज्ञः अनात्मवित् अश्रद्दधानश्च ज्ञानसाधनेषुश्रद्धा
रहितः संशयात्मासंदेहवान् विनश्यति संशयात्मनः संदिग्ध
चित्तस्य अयंसर्वसाधारणोलोकोनास्तिनपरोलोकः नसुखंत
त्रापिसंशयोपपत्तेः ४०

रणवीरसमिद्धोयिनी॥

एवंनिश्चयेपरमपुरुषप्राप्तिमुक्त्वा संशयेनविनाशमाह अज्ञ
श्चेति अज्ञोनधीतधनुर्वेदत्वेनतदर्थविषयकज्ञानशून्यः गुरु
शास्त्रवाक्येष्वथवाबहिरश्रद्धा तद्दांश्च संशयात्मा इदमेवंभव
तिनवेति सर्वत्रनिश्चयप्रत्ययस्याभावात्सन्देहमयबुद्धिश्चविन
श्यति लोकद्वयभ्रष्टोभवति अतश्चसंशयात्मनः सर्वत्रविषये
संदेहाक्रांतांतःकरणस्यायंदृष्टएवलोकोनास्तिनचपरःस्वर्गा
पवर्गलक्षणोदृष्टः ततश्चसुखमपितस्यनास्तीतिसर्वथासं
दिग्धेनभाव्यमितिभावः ४०॥

मधुभाष्य

४०॥

तत्व ज्ञान के अधिकारी कोकहि करि अब अनधिकारी जो अज्ञानीतिसका लक्षण कहतेहैं कि एक तो शास्त्र औ गुरू तथा आचार्य्य का उपदेश कभी सुना नहीं औरजो देवात् सुना भी तो समझा नहीं औरजो कुछ किसीतरह समझाभी तो उसमे श्रद्धा अर्थात् विश्वास न भई औरजो कहने सुन ने से विश्वास भी आई तो यह अर्थ कहे प्रयोजन हमारा सिद्ध होइ कि न होय इस संशय मे पडगये ऐसे लक्षणोंसे भरे पूरे जो अलक्षणी अज्ञानी लोगहैं उनका मतलब कभीन‍हीं होना अर्थात् अपने मनो रथसे भ्रष्टहोतेहैं उन्ही को नष्ट प्राणी कहतेहैं परंतु ऊपरकहे जो अज्ञानी औश्रद्धाहीन तथा संशय ग्रस्तइन तीन के मध्यमे संशययुक्तचित्तमनुष्य अच्छी तरह अपने मनोरथ से भ्रष्ट होता है क्यों कि उस का हर॰ काम औ हरबात मे संदे ह लगी रहती है क्या धन उपार्जन क्या विवाह क्या दान धर्म क्या अपना सुख खाना पहिरना लेना देना आदि सब कामो मे संशय केमारे क्षणभर भी सुख नहीं फेरि औ रो को देखि हम कुछ नहीं करते यहचिंता जुदी शिर परचढी र हती है तोफेरि संशय के कारण धर्म नहोने से स्वर्गादि भी नहीं मिलता और संसार मे तो धन नाश की संदे ह कर संसारिक सु खसे हाथ धोये बैठेहैं तो उनके लोक परलोक के दोनो सुख चले गये केवल चिंता के चितामे बैठे धीरे धीरे जरि जरायके माटी मे मि ल गये मूर्खता सेवृथा जन्म चला गया सोई कहा अज्ञश्चाश्रद्दधान श्च संशयात्मा विनश्यति इति इसमे संशय छोडो ४०

दोहा ॥

श्रद्धाहीन संशयसहित यतहूं होत विनास ना यहलोक न पर सुख संशय ग्रस मन जास ४० ॥

901

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयं आत्मवंतं न कर्माणि निबध्नंति धनंजय ४१

शांकरभाष्यं

कस्मात् योगेति योगसंन्यस्तकर्माणं परमार्थदर्शनलक्षणेन योगेन संन्यस्तानि कर्माणि येन परमार्थदर्शिना धर्माधर्माख्यानि तं योगसंन्यस्तकर्माणं कथं योगसंन्यस्तकर्मेत्याह ज्ञानेनात्मेश्वरैकत्वदर्शनलक्षणेन संछिन्नः संशयो यस्य स ज्ञानसंछिन्नसंशयः य एवं योगसंन्यस्तकर्मा तमात्मवंतमप्रमत्तं गुणचेष्टारूपेण दृष्टानि न कर्माणि निबध्नंति अनिष्टादिरूपं फलं नारभंते हे धनंजय ४१ ॥

आनंदगिरिकृतटीका

यद्यपि संशयः सर्वानर्थहेतुत्वात्कर्तव्यो न भवति तथापि निवर्तकाभावे तदकरणमस्वाधीनमिति शंकते कस्मादिति श्रुतियुक्तिप्रयुक्तमैक्यज्ञानं तन्निवर्तकमित्युत्तरमाह ज्ञानेनेति संशयरहितस्यापि कर्माण्यनर्थहेतूनि भवंतीत्याशंक्याह योगेति विषयपरवशस्य पुंसो योगायोगात् कुतो योगसंन्यस्तकर्मत्वमित्याशंक्याह आत्मवंतमिति परमार्थदर्शनतः संशयोच्छित्तौ तदुच्छेदकज्ञानमाहात्म्यादेव कर्मणां च निहतावप्रमत्तस्य प्रातिभासिकानि कर्माणि बंधहेतवो न भवंतीत्याह न कर्माणीति कर्मयोगादेव कर्मसंन्यासस्यानुपपत्तिमाशंक्याद्यं पादं विभजते परमार्थेति तत्त्ववेद संन्यासपक्षे परोक्तं फलसंन्यासपक्षे त्वपरोक्षमिति विवेकः यथोक्तज्ञानेन संन्यस्तकर्मत्वमेव सति संशये न सिध्यति संशयवतस्तदयोगादिति शंकते कथमिति द्वितीयं पादं व्युत्क्रमेण परिहरति आहेत्यादिना पाठक्रमादर्थक्रमस्य बलीयस्त्वादादौ द्वितीयं पादं व्याख्याय पश्चादाद्यं पादं व्याचष्टेनेत्याह एवमिति सर्वमिदं प्रमादवतो विषयपरवशस्य न सिध्यतीत्यभिसंधाय आत्मवंतं व्याकरो

स्वामिकृतटीका ॥

+ अध्यायद्वयोक्तां पूर्वापरभेदेन कर्मज्ञानमयीं द्विविधां ब्रह्मनिष्ठामुपसंहरति योगेति द्वाभ्यां योगेन परमेश्वराराधनरूपेण तस्मिन्संन्यस्तानि समर्पितानि कर्माणि येन तं पुरुषं कर्माणि स्वफलैर्न निबध्नन्ति ततश्च ज्ञानेनाकर्त्रात्मबोधेन संछिन्नः संशयो देहाभिमानलक्षणो यस्य तमात्मवन्तमप्रमादिनं कर्माणि लोकसंग्रहार्थानि स्वाभाविकानि वा न निबध्नन्ति ४१

गी॰ टी॰ व॰ ति अप्रमत्तमिति न कर्माणीत्यादि फलाकिंक्षाचेष्टेगुणचेष्टेति अनिष्ठादीत्यादिशब्देन इष्टं मिश्रं च गृह्यते ४१

+ स्वामिकृतटीका

२०८ यस्मादेवं तस्मादिति आत्मनो ज्ञानेन संभूतं हृत्स्थं हृदि स्थितं संशयं शोकादिनिमित्तं देहात्माविवेकज्ञानखड्गेनाछित्वा कर्मयोगमाश्रय तत्र च प्रथमं प्रवृत्ता [illegible] हे भारतेति क्षत्रियत्वेन युद्धस्य धर्मत्वं दर्शितं ४२ ॥

पिशाचभाष्यं उपक्रमे ४१

रामानुजभाष्यं

योगेति यथोपदिष्टयोगेन संन्यस्तकर्माणं ज्ञानाकारतापन्नकर्माणं यथोपदिष्टेन चात्मज्ञानेनात्मनि संछिन्नसंशयं आत्मवंतं मननिवनमुपदिष्टार्थे दृढावस्थितमनसं बंधहेतुभूतप्राचीनानंतकर्माणि न निबध्नंति ४१ ॥

अभिनवगुप्तकृतटीका

[illegible] ४१

परमार्थप्रपाटीका

अथ प्रागुक्तां कर्मज्ञानमयीं द्विविधां ब्रह्मनिष्ठां उपसंहरन्नाह द्वाभ्यां योगसंन्यस्तकर्माणमिति योगेन परमेश्वराराधनरूपेण यस्मिन्संन्यस्तानि कर्माणि येन तं तथा ज्ञानेन अकर्त्रात्मबोधेन संछिन्नः संशयो देहाभिमानलक्षणो यस्य तमात्मवंतमप्रमादयुक्तं स्वाभावाभ्यांस्वभावकर्माणि लोकसंग्रहकृतानि न बध्नंति तदुक्तं यथापर्वतमादीप्तं नाश्रयंति मृगा द्विजाः तद्वद्ब्रह्मविदो दोषा नाश्रयंति कदाचनेति ४१

वनमालीटीका

ज्ञानसाधनमनुवदन् ज्ञानमाह योगेति [illegible] ४१

योगेन भगवदाराधनरूपसमत्वबुद्धिरूपेण संन्यस्तानि मयीश्वरे समर्पितानि कर्माणि येन तं तत्त्वज्ञानेनात्मतत्त्वनिश्चयेन छिन्नः संशयो येन तम् कृतपतदत आह आत्मवन्तं मयि भक्तिमन्तं अप्रमादिनं सदा सावधानं वा अप्रमादित्वेन ज्ञानवन्तं ज्ञानसंछिन्नसंशयत्वेन योगसंन्यस्तकर्माणं कर्माणि लोकसंग्रहार्थानि क्रियमाणान्यपि न निबध्नन्ति इष्टमनिष्टं वा देहं नारंभन्त इत्यर्थः ४१

कृष्णमवैजयंतीटीका

एवंभूतोयः कर्मकर्त्तासकर्मभिर्नबध्यतेइत्याहयोगसंन्यस्तक
र्माणमितियोगेनयथोपदिष्टकर्मयोगेनसम्यक् न्यस्तानिज्ञाना
कारस्तंप्राप्तानिकर्माणियस्य ज्ञानेज्ञानसंछिन्नसंशयं यथोपदिष्ट
नज्ञानेनसम्यक् छिन्नोभिन्नः संशयोयस्य तं आत्मवंतमात्मया
थात्म्यज्ञानेऽवस्थितमानसंकर्माणिबंधहेतुभूतान्यनेकजन्मार्जि
तानिपुण्यपापरूपाणिननिबध्नंतिज्ञानानलेनतेषांभस्मरूपत्वा
दितिभावः धनंजयेतिसंबोधनेनयथापरेषांधनानित्वमजयः
तथापरेषांप्राकृतानांगुणानांकर्माण्यपित्वंजयेतिसूचितं ४१

\+ एतादृशस्यसर्वानर्थमूलस्य द्वयोःकांडयोःपूर्वापरभूमिकाभेदेन

मधुसूदनीटीका

संशयस्यनिराकरणायात्मनिश्चयमुपायंवदन्नध्याय कर्मज्ञानमयीद्विविधांब्रह्मनिष्ठामुपसंहरति +

\+ योगेनभगवदाराधनलक्षणसमत्वबुद्धिरूपेणसंन्यस्तानिभग
वतिसमर्पितानिकर्माणियेन यद्वापरमार्थदर्शनलक्षणेनयोगे
नसंन्यस्तानित्यक्तानिकर्माणियेनतंयोगसंन्यस्तकर्माणं संश ये सति कथं
योगसंन्यस्तकर्मत्वमतआह ज्ञानसंछिन्नसंशयः ज्ञानेनात्मनि
श्चयलक्षणेनसंछिन्नःसंशयोयेनतं विषयपरवशत्वरूपप्रमादे
सतिकुतोज्ञानोत्पत्तिरित्यतआह आत्मवंतंअप्रमादिनंसर्वदासा
वधानं एतादृशमप्रमादित्वेनज्ञानवंतं ज्ञानसंछिन्नसंशयत्वेन
योगसंन्यस्तकर्माणंकर्माणिलोकसंग्रहार्थानिवृथाचेष्टारूपा
णिवाननिबध्नंति अनिष्टमिष्टंमिश्रंवाशरीरंनारभंतेहेधनंजय
[illegible] ४१

सदानंदीटीका

संशयस्याखिलानर्थमूलस्यापनुत्तये आत्मज्ञानमुपायंच
वदन्नारायणोहरिः १ पुराध्यायद्वयेनोक्तांसर्वज्ञानमयींद्विधा
उपसंहरतीदानींब्रह्मनिष्ठांविमोक्षदां २ समत्वबुद्धिरूपेणयोगेन
परमेश्वरे समर्पितानिकर्माणियेनतंमुमुक्षुमात्मवंतं ३ यद्वात्यक्तानि
कर्माणियेनब्रह्मैक्यदर्शिना योगसंन्यस्तकर्मत्वंकथंस्यात्संशये
सति ४ शृणुत्वमात्मबोधेनयेनछिन्नोस्तिसंशयः सर्वदासावधा

नंतंक्रियमाणान्यनेकधा ५ कर्माणिननिवध्नंत्यनिष्टेष्टादिकेलेव
रैः १ ४१

नीलकंठीटीका

किंचयोगेति योगेनकर्मण्यकर्मदर्शनात्मकेनसंन्यस्तानिफलत
स्वरूपतोवात्यक्तानिकर्माणियेनतंयोगसंन्यस्तकर्माणं ज्ञानेनसम्य
ग्दर्शनेनसम्यक्छिन्नाःसंशयाःआत्मादेहोऽन्योवाअन्योपिविभुरवि
भुर्वाविभुरपिकर्ताऽकर्तावाअकर्तापेकोनेकोवाएकोपिसगुणोनि
र्गुणोवेत्येवमादयःयस्यतज्ज्ञानसंछिन्नसंशयंतं आत्मवंतंशमदमा
दिपरं कर्माणिकृतानिननिवध्नंतिहेधनंजय ४१

आनंदीटीका

सम्यक्त्वयथुक्त्या संन्यस्ता क्रियमाणान्यैव फलान्यपेक्षया परमेश्वरे समर्पितानि येनतं योगेन संयम योगोपेतया ज्ञानकर्म
अथवाआर्थेणसंतरवाणि मत्वासंछावं ४१ मतएवात्मवन्तमात्मज्ञानेसा
वधानम् ४१

रामकंठीटीका

यःपुनरेवंसनिविकलत्व णत्वं ॥

योगेनयथोक्तेनज्ञानसंस्कृतकर्मसमाधिनासंन्यस्तानि अनित्य
स्यात्मफलाभिसंधिविरहात्यक्तानिक्रियमाणान्येवनिरस्तानि
कर्माणियेनतादृशंतथाज्ञानेनसदसत्पदार्थानिश्चयप्रतिपत्तिक्रा
मेणयथोक्तेनवोधेनसंछिन्नोनिकृत्तमूलःसंशयःसंदेहोयेनतंता
दृशमतएवसत्यात्मप्रतिपत्तिवशादात्मवंतंनकर्माणिशुभाशुभा
नितिवध्नंतिसुखदुःखलक्षणफलदानेननास्वतंत्रीकुर्वंति
४१

लासिकी टीका

अथसकलाध्यायविस्फारितोर्थःश्लोकद्वयेनसंक्षिप्योच्यते हेधनं
जय धर्माधर्मात्मकानिकर्माणिदृशंपुरुषंननिवध्नंति अनिष्टमि
ष्टंमिश्रंवाशरीरंनारभंते कीदृशंतमात्मवंतमात्मन्यवहितं सदा
प्रमत्तं ततोयोगेनउक्तरूपेणसंन्यस्तानीश्वरायसमर्पितानिकर्मा
णियेनतंतं ततश्चज्ञानेनात्मेश्वरैकत्वदर्शनलक्षणेनसंछिन्नःस
र्वसंस्कारस्यापिनाशेन छिन्नःसंशयोदेहाद्यहमितिप्रत्ययोयस्य
तं ४१

पंचोलीटीका

न्यस्तकर्मसंदेहं ज्ञानिनं स्तौति योगेति हे धनंजय योगसंन्यस्तक
र्माणं योगेन परमार्थदर्शनलक्षणेन संन्यस्तानि कर्माणि येन
स तं ज्ञानसंछिन्नसंशयं ज्ञानेन जीवपरमात्मनोरेकत्वज्ञानेन
संछिन्नः संशयो यस्य स तं आत्मवंतं प्रमादरहितं चित्तभ्रांतिम
निष्फलं न जनयंति ४१

रसावीरसमिद्धोधिनी॥

अध्यायप्रतिपादितमर्थमुपसंहरति योगेति योगेन शुद्धसा·
स्वोचितेषुकर्मसुप्रवृत्तिरूपेणकौशलेनवासंन्यस्तानिहरौ
कृतानिकर्माणिवर्णान्तरोचितानितपस्याकृषिवाणिज्यादी
नियेनतंयोगसंन्यस्तकर्माणं यद्वायोगेनवत्सत्रदनेनप्र
त्यक्षप्रयोगादिरूपेणोपायेनवासमर्थ्यंन्यस्तानिविफलीकृता
निकर्माणिशस्त्रप्रयुक्तास्त्रादिव्यापाराणियेनतं ज्ञानेनोक्तलक्ष
णानिश्चयरूपेणसम्यक्मूलच्छेदसर्वंछिन्नःसंशयोयस्य
तं अतएवात्मवंतंप्रशास्यतरबुद्धिधैर्ययत्नविशिष्टंत्वाक्षत्रिय
वीरंकर्माणिस्वेनाचरितानिशत्रुवधादिलक्षणानिननिबध्नं
तिपापासंगेनेतिशेषः यद्वाकर्माणिपरैःप्रयुक्तानिकूटादि
लक्षणानिशस्त्रप्रयोगादिलक्षणानिचननिबध्नंतिवधंनसं
पादयंतीति ४१॥

मधुभाष्य

४१

भाषा अनुवाद

दूसरे औ तीसरे अध्यायमे कहा जो कर्मनिष्ठा औ ज्ञाननिष्ठा सोई
दो श्लोकसे कहते हैं कि जिसने भगवत आराधन रूप सब कर्म
अंतर्यामी भगवान को अर्पित किया है ऐसा मनुष्य अपने कर्म
फल से कभी बद्ध नहीं होता और हम कोई कर्म नहीं करते ऐसे बो
धसे जिस के देह गेह मे आत्मबुद्धि रूप संशय नष्ट होगई है ऐसे
पुरुष के लोक शिक्षार्थ भिक्षापर्यटन आदि स्वभावसिद्ध कर्म क
भी भीज्ञान केप्रति बंधक नहीं होतेहै सोई कहा कि योग जो भ
गवदाराधन कर्म तिससे दिया है कर्मों कोसंन्यास जिसने और ज्ञा
नसे अच्छीतरह दूर किया है संदेह जिसने ऐसे आत्मस्वरूप पुरुषतो
हे धनंजय कर्म बंधन नहीं करसकते हैं ४१

दोहा

कर्म भए त्यययोगसें ज्ञानदिदीएसंशोय धीरमतिकों पु
रुषको बंधे न कर्म धनंजेय ४१॥

205

तस्मादज्ञानसंभूतंहृत्स्थंज्ञानासिनात्मनः छि
त्वैनंसंशयंयोगमातिष्ठोत्तिष्ठभारत ४२ इतिश्रीभ
गवद्गीताचतुर्थोध्यायः ४ ॥

शांकरभाष्ये

यस्मान्कर्मयोगानुष्ठानात् अशुद्धिक्षयहेतुकज्ञानसंछिन्नसंश
योननिबध्यते कर्मभिर्ज्ञानाग्निदग्धकर्मत्वादेव यस्माच्चज्ञानक
र्मानुष्ठानविषयेसंशयवान् विनश्यति तस्मादिति तस्मात्पापिष्ठ
मज्ञानसंभूतंअज्ञानादविवेकाज्जातंहृत्स्थंहृदिबुद्धौस्थितंज्ञाना
सिनाशोकमोहादिदोषहरंसम्यक्दर्शनंज्ञानंतदेवासिः खड्गस्ते
नज्ञानासिनात्मनःस्वस्यआत्मविषयत्वात् संशयस्यनहिपरस्य
संशयोऽपरेणछेत्तव्यतांप्राप्तोयेनस्वस्येति विशेष्यतेऽतआत्मवि
षयोऽपिस्वस्यैवभवतिज्ञानासिनाछित्वैनंसंशयंस्वविनाशहेतु
भूतंयोगंसम्यक्दर्शनोपायंकर्मानुष्ठानमातिष्ठकुर्वित्यर्थः उत्तिष्ठ
चेदानींयुद्धायभारतेति ४२ इतिश्रीभगवद्गीताभाष्येचतुर्थोध्यायः

आनंदगिरिकृतटीका

तस्मादित्यादिसमनंतरश्लोकगतं तत्पदापादितमर्थमाह यस्मा
दिति मतांकर्मणामस्मदादिषु फलारंभकत्वोपलंभात् विदुषोपि
तेषांतद्भावमनपवाद्यमित्याशंक्याह ज्ञानाग्नीति नत्वसंदिहानस्य
तस्यानिबंधात्कर्मयोगानुष्ठानेनापितद्धेतुकज्ञानेनतत्रापि संश
यावतारादित्याशंक्याह यस्माच्चेति श्लोकाक्षराणिव्याचष्टेतस्मा
दित्यादिना पापिष्ठमिति संशयस्यसर्वानर्थमूलत्वेनत्याज्यत्वंसूच्य
ते विवेकाग्रहप्रसूतत्वादपितस्यहेयत्वमविवेकस्यानर्थकरत्व
प्रसिद्धेरित्याह अविवेकादिति नचतस्यचैतन्यवदात्मनिष्ठत्वाद
त्याज्यत्वंशंकितव्यमित्याह हृदीति शोकमोहाभ्यामभिभूतस्यपुं
सोमनसिप्रादुर्भवतःसंशयस्यप्रबलप्रतिबंधकाभावेनैव प्रध्वं
सः सिध्येदित्याशंक्याहज्ञानासिनेति स्वाश्रयस्यसंशयस्यस्वाश्र

गीं० टीं० चं० ४

२०८

येनैव ज्ञानेन समुच्छेदसंभावात् किमिति सत्येति विशेषणमित्या
शंक्याह आत्मविषयत्वादिति स्थाण्वादिविषयः संशयः न हि सयेण
ज्ञानेन देवदत्तनिष्ठेन तन्निष्ठो याविततेत प्रकृते त्वात्मविषयस्तदाश्रय
श्च संशयः तथाविधेन ज्ञानेन अपनीयते तेन विशेषणमर्थवदित्य
र्थः तदेव प्रपंचयति न हीति आत्माश्रयत्वस्य प्रकृते संशये सिद्धत्वे
नाविवक्षितत्वात् न हि विषयस्य न हि विषयेनैव नस्यते न निवृत्तिर्विवक्षि
तेत्युपसंहरति अत इति संशयसमुच्छित्यनंतरं कर्तव्यमुपदिश
ति छित्त्वैनमिति अग्निहोत्रादिकं कर्म भगवदाज्ञया क्रमेणाकरि
ष्यामि युद्धात् पुनरुपरिरंसैवेत्याशंक्याह उत्तिष्ठेति भरतान्वयेम
हति क्षत्रियवंशे प्रसूतस्य समुपस्थितसमरविमुखत्वमनुचित
मिति मन्वानः सन्नाह भारतेति तदनेन योगस्य कृत्रिमत्वं भगवतः
तोऽनीश्वरत्वं च निराकृत्य कर्मादौ च कर्मादिदर्शनादात्मनः सम्य
ग्ज्ञानात् प्रणिपातादेर्बहिरंगादंतरंगाच्च श्रद्धादेरुत्कृष्टाद्दोषा
नर्थनिवृत्त्या ब्रह्मभावमभिदधता सर्वस्मादुत्कृष्टे तस्मिन्न संश
यानस्यापि कारादशेषदोषवत्त्वं संशयं हित्वा तमसा ज्ञाननिष्ठाप
रस्य कर्मनिष्ठेति स्थापितं ४२ इति श्रीआनंदगिरिकृतटीकायां चतु
र्थोऽध्यायः ४ ॥

स्वामिकृतटीका

पुमवस्थाविभेदेन कर्मज्ञानमयीं द्विधा निष्ठां कायेन तत्त्वं दे [illegible] शोरिसं
शयसंछिदे ४२ इति श्रीभगवद्गीतायां सुबोधिन्यां टीकायां कर्मा
कर्मयोगो नाम चतुर्थोऽध्यायः ४

पिशाचभाष्य

ज्ञानेन तत्त्वा [illegible] ज्ञानप्रतिपत्त्या तया ज्ञानावर [illegible] काशे हृदये देशमधि [illegible]
वर्तमानं ज्ञानमेवासि तीक्ष्णा [illegible] तेन मुहुर्मुहुर्भूयो भूयः उत्पद्यमानं छित्त्वा
विनाश्य पूर्वोक्तसंशयं योगं फलसंगरहितं कर्म आतिष्ठ सेवस्व उत्ति
ष्ठ प्रबुद्धो भव हे भारतेति ४२ इति पिशाचभाष्ये चतुर्थोऽध्यायः ४

[illegible]नुजभाष्य

[illegible]दज्ञानेनेति यस्मादेवं तस्मादात्मनो ज्ञानेन संभूतं
हृदि स्थितमेनं सं[illegible] शोकादिनिमित्तं देहात्मविवे
कज्ञानखड्गेन छित्त्वा कर्मयोगमातिष्ठ आश्रय तत्र
च प्रथमं प्रस्तुताय युद्धायोत्तिष्ठ हे भारतेति तद्विय
त्वेन युद्धस्य धर्मित्वं दर्शितम्

तस्मादितितस्मादनाद्यज्ञानसंभूतंहृत्स्थमात्मविषयंसंशयंमयोप-
दिष्टात्मज्ञानासिनाछित्वामयोपदिष्टकर्मयोगमातिष्ठतदर्थमुत्तिष्ठ-
भारतेति ४२ इतिश्रीमद्रामानुजाचार्यविरचितेगीताभाष्येचतुर्थोध्या-
यः ४ ॥

अभिनवगुप्तकृतटीका

यत एवं तस्मादिति

योगेनैवकर्मणांसंन्यासउपपद्यतेनान्यथेतिविचारितं विचारयिष्यतेच
संशयंछित्वायोगंकर्मकौशलमातिष्ठोक्तक्रमेण ततश्चातिष्ठतंसर्वव्या-
पारंकर्तव्यतामात्रेणकुर्वितिशिवं अत्रार्थसंग्रहः वियतेकर्मयत्किंचि
ददेहाभिमानपूर्वकं तेनैवशुभभाजः स्युस्तस्माकरणादेवता ४२ इत्या
चार्याभिनवगुप्तविरचितेश्रीभगवद्गीतार्थसंग्रहेचतुर्थोध्यायः ४

परमार्थप्रपाटीका

यस्मादेवंतस्मादात्मनः अज्ञानसंभूतंहृत्स्थंहृदिस्थंसंशयंज्ञानासिना
आत्मज्ञानखड्गेनछित्वा योगंज्ञानधर्मोचितंआतिष्ठआश्रयतदर्थमुत्ति-
ष्ठभारतेतिसमुद्धितेजनार्थे अथाध्यायतात्पर्यंबोध्यकर्मोक्तंहिवि-
यमपिविनश्यत्फलंतद्धिकर्मस्यात्तथाकर्मयत्स्यादमृतफलमतःका-
मनैष्कर्म्ययोस्तुअन्योन्यमाहवर्यंभवतितदखिलंमामिहोदिश्यकार्यं
तहैवब्रह्मार्पणंस्याद्धिविधयजनतः प्राहपार्थंचतुर्थे ४२ इतिश्रीमद्देव
ज्ञेपडितेसूर्यविरचितायांभगवद्गीताटीकायांपरमार्थप्रपायांब्रह्मार्प-
णयोगोनामचतुर्थोध्यायः ४ ॥

वनमालीटीका

[illegible]

[illegible] मद्युपदिष्टकर्मकर्तृत्वमुपसंहरति तस्मादिति

अज्ञानादविवेकादुत्पन्नंहृत्स्थंमनसिस्थितं कारणा स्याश्रयस्यचत्ता-

गी° नेसर्ग्येन विजेतुं शक्यत इत्युभयोक्तिः सर्वानर्थमूलभूतं अहं स्वतंत्रः
टी° कर्त्ता पराधीनो वेति संशयं आत्मनः परमेश्वरस्य स्वतंत्रकर्तृत्वं ममाधी
च° नमतोहं न स्वतंत्रकर्त्तेति ज्ञानासिना विवेकेन छित्वा योगं सम्यक् दर्शनो॰
पायं मदाराधनरूपं निःकामं कर्म कुरु अत इदानीं स्वधर्मीय युद्धायो॰
त्तिष्ठ हे भारत भरतवंशज युद्धोद्यमो न विफल इति भावः कर्तृत्वं पर
मेशस्य जीवस्य न स्वतः क्वचित् कृतमिति धिया कर्ममोचकमब्रवीन्मधु :
४२ इति श्रीवनमालीटीकायां चतुर्थोऽध्यायः ४

कृस्नमैवेजयंतीटीका

उपसंहरति तस्मादिति यस्मादेवं तस्मात् आत्मनः स्वस्याज्ञानसंभू
तं अज्ञानाद्युत्पन्नं हृत्स्थं हृदयगतं संशयं पापमेवाश्रयेदस्मान्हत्वाऽहो
वत महत्पापं कर्तुं व्यवसिता वयमित्यादिनाऽपापेऽस्मिन्पापारोपण॰
रूपं संशयं ज्ञानासिना ज्ञानखड्गेन छित्वा योगं कर्मयोगमातिष्ठ युद्धायो
त्तिष्ठ हे भारत भरतवंशज कर्मज्ञानांशयोः ज्ञानांशे योऽर्जु
नस्याधिकारं उपदिशन्क्रमसमुच्चयं संतनोतीति मन्यते ४२ इति श्रीमन्नवादी भज
इकंठीरकंदेवदमकुंभदमनातिप्रबलकंठीरवातिशयसकुंजरनारदनि मा
यमानंदसंततिप्रवरप्रबलप्रतापपार्थसखमहिमांकृष्णदासस्यांतेवा॰ भिज
सिनागिरिधारिदासेन विरचितायां श्रीमद्गीतार्थकृस्नमैवेजयंत्यां कर्म
योगो नाम चतुर्थोऽध्यायः ४

मधुसूदनीटीका

यस्मादेवं – अज्ञानादविवेकात्संभूतमुत्पन्नं हृत्स्थं हृदि बुद्धौ स्थितं कारणस्याज्ञाय॰
स्य वज्ञाने शत्रुः सविनष्टे न शक्य इत्युभयोपन्यासः एवं सर्वानर्थमूल
भूतं संशयमात्मनो ज्ञानासिना आत्मविषयकनिश्चयखड्गेन छित्वा यो
गं सम्यग्दर्शनोपायं निष्कामकर्म आतिष्ठ कुरु अत इदानीमुत्तिष्ठ यु
द्धाय हे भारत भरतवंशजातस्य युद्धोद्यमो न निष्फल इत्यर्थः स्वस्यानी
शत्वायेन भाति स्वदेहदधीकृतेन धीहेतुः कर्मनिष्ठा च हरिणोपसंह
ता ४२ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वती॰
श्रीपादशिष्यश्रीमधुसूदनसरस्वतीविरचितायां श्रीभगवद्गीतागूढा

र्थदीपिकायांकर्मनिक्षेपसंहारोनामचतुर्थोध्यायः ४ ॥

सदानंदीटीका

यस्मादेवंततोज्ञानाद्युत्पन्नंचास्थितंमतो कारणात्स्वाश्रयस्यापिज्ञाने
मतिमत्स्वेनवे ४१ निहंतेशक्यतेशत्रुरूपन्यासोह्ययोरिति १ ज्ञेकोक
बोधयविवेकेनच्छित्वाभारतवंशज निष्कामकर्मयोगंतुसाश्रयज्ञानसा
धनं २ अतउत्तिष्ठयुद्धायसन्नद्धोभववीरधीः ४ स्वामिनीशत्ववो
धाद्भगवतिस्वतनोभक्तिरापादिताह्यर्थीहेतुःकर्मनिष्ठाकृतभिरपि
तथाज्ञाननिष्ठेनमोक्षःसत्यत्वश्लोकतत्वप्रतिपदमुदितंहस्यमिथ्या
त्वमेवंयेनश्रीशांतियाम्नातमिहसुररिपुकल्पमेवावलंवे ४२ इति
श्रीभावप्रकाशेश्रीसदानंदविदाकृतेब्रह्मनिष्ठाप्रथानोयंचतुर्थः ४

नीलकंठीटीका

तस्मादिति हृत्स्थंबुद्धिस्थं ज्ञानासिनाज्ञानविवेकेन योगंसम्यग्दर्श
नोपायं निष्कामकर्मआतिष्ठकुरुउत्तिष्ठ युद्धायेतिशेषः ४२ इति
श्रीभगवद्गीतानीलकंठेभा चतुर्थोध्यायः ४ भार्थप्रकाशे

आनंदी टीका

आगमयार्थमुपसंहरति

तस्मादुक्तयुक्तेरात्मनोज्ञानासिनानायंहंतिनहन्यतेइत्येवंप्रकारेण
यस्यसर्वेसमारंभाइतीथंप्रकारेणवाज्ञानसंभूतंहृत्स्थंसंशयंममैतेवं
धवःपात्यापवकथंम्रियंते फलंतयकृतोदोषश्चभवेदित्येवंरूपंवि
परीतज्ञानंछित्वायोगेज्ञानकर्मसमुच्चययुक्तिमातिष्ठानुतिष्ठयुद्धे
प्रवृत्तोभवेत्यर्थः उत्तिष्ठ तिष्ठ
धर्मेउत्तिष्ठकिमितिरथोपस्थेउपविष्टःस्वकर्मणासत्वोभवे अथचा
योगमारुरुक्षुवाक्सेवकुशोभ्यस्तमाभ्यंतरंसंयमयोगमातिष्ठेतिनिष्ठस्व
र्मणासत्वोभव ४२ इतिश्रीराजानकानंदविरचितायांभग
वद्गीताव्याख्यायांचतुर्थोध्यायः ४

रामकंठीटीका

गी° यतएवं तस्मात्त्वमेवं प्रतिपादितात्कारणाद्योगं शास्त्रविहितेषु कर्मसु यथो
टी° क्तज्ञानसंस्कृतेषु समाधिं च यथोक्तमातिष्ठ समाचर श्रेयोऽतिष्ठेत्युक्तो
च भव किं कृत्वैवं सर्वदोषैकहेतुं संशयं यथोक्तेन ज्ञानखड्गेन छित्त्वा
मूलादेव निपात्य कीदृशं संशयं हृत्स्थं हृदयगतमज्ञानसंभूतं मोहप्र
भवमनेन हृदयगतत्वेन मोहप्रभवत्वेन चाहृत्स्थवर्तित्वमस्यासमूलत्वं
च संछेदत्वप्रतिपादनार्थमेतदुक्तमित्यो कल्याणैकनिकेतनस्य जग
तो घोराघविध्वंसिनो धर्मस्यास्य स्वरूपं गाम्भसद्भवब्रह्मात्मकस्याद्व
व्या° यात्मन एव यत्र भगवान्पार्थाय मायातिगं स्वमहात्म्यमस्मै च यत्
स विवृतोध्यायस्वतन्त्रर्थः क्रमात् ४२ इति श्रीमद्राजानकरामकण्ठे
विरचिते वाक्यार्थान्वयमात्रे सर्वतोभद्रनाम्नि भवद्गीताविवरणे च
तुर्थोध्यायः ४

श्रीधरस्वामीटीका

यतएवं तस्मादात्मनोऽज्ञानादविवेकाज्जातं हृत्स्थं हृदिस्थितमेनम
नुभूयमानं संशयं देहाद्यहमिति प्रत्ययं ज्ञानासिनोक्तलक्षणज्ञा
नखड्गेन छित्त्वा योगं कर्मसमाधिलक्षणमातिष्ठाश्रय हे भारत तोत्ति
ष्ठस्वकर्मणि युद्धे उद्युक्तो भवेत्यो ४२ फलाभिसंधिरहितेन कर्मणात्मा
वमर्शेन कर्मसंन्यासयोगाख्यं प्राह यस्तं हरिं स्तुमः वासस्यां चतुर्थः ४

पेचोलीटीका

यस्मादज्ञानादृष्टानेच संशयवान्विनश्यति तस्मात्संशयो न कर्त
व्यस्तत्राह तस्मादिति हे भारत तस्मादज्ञानसंभूतमविवेकाज्जातं
हृत्स्थं हृदि बुद्धौ स्थितमेनमात्मविनाशहेतुभूतं संशयमात्मनो ज्ञा
नासिना सर्वक्लेशोपशमनमात्मज्ञानमेवासिः खड्गः तेन छित्त्वा यो
गमात्मज्ञानसाधनं कर्मयोगमातिष्ठ उत्तिष्ठ युद्धाय उत्तिष्ठ ४२ इति
पेचोलेचतुर्थः ४

रणवीरसमिद्धोधिनी ॥

उपदेशमाध्यमेवार्थं विनिगमयति तस्मादिति यस्मादेवं त
स्माद्धेतोः अज्ञानात्संभूतार्थोपर्यालोचनादुत्पन्नं हृदि बुद्धाव
श्रयेस्थितमेनं सर्वानर्थमूलभूतं संशयं संदेहरूपं यात्मनः
प्रवृत्तिरूपस्य यत्नस्य ज्ञानेकर्मणोर्वृद्धिसंसिद्धिमास्थिताजन
कादय इत्यादिदृष्टांतपर्यालोचनेनोभयलोकसिद्धिसाधनता
निश्चयस्तदेवासिः खड्गं तेन समूलं छित्वा योगं कर्मकौशलमुक्त
कमेणाति छकरु ततश्चेदानीमुत्तिष्ठ युद्धाय सज्जीभव स्वेवितं
युद्धव्यापारमवधपकर्तव्यतानिश्चयेन कुरु विदितियावत् भार
तेति संबोधनं भरतवंशोत्पन्नस्य तेयुद्धोद्यमो न निष्फलः स्या
दिति ध्वनतीति भद्रं ४२ ॥ इति श्रीरणवीरसमिद्धोधिन्यां गी
ताव्याख्यायां चतुर्थोध्यायः ४ ॥

मधुभाष्य

४२ ॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितश्रीभ
गवद्गीताभाष्ये चतुर्थोध्यायः ४ ॥

२०७

भाषाअनुवाद

जब कि भगवदर्पणरूप निष्काम कर्मयोग और ज्ञानयोग ऐसा है तो हे भारत अर्जुन आत्मविषयक अपने अज्ञानसे उत्पन्न औ अंतःकरण मे टिके जो शोक मोह आदि सब संशय उनको देह आत्मा का विवेक कहे विचार रूप ज्ञानखड्गसे काटि कर उठो औ कर्मयोग का अनुष्ठान करो और उपस्थित जो युद्ध सो करो श्रीकृष्ण भारत इस संबोधन सेयह जनाया कि युद्ध क्षत्रीका स्वधर्म है और तुम श्रेष्ठ भरत वंशमे उत्पन्न हो श्रीधरस्वामी कहते हैं कि पुरुषों को अवस्था भेदसे कर्ममय औ ज्ञानमय ये दो प्रकार की निष्ठा जिसने कहा ऐसे संशय निवारण भगवान श्रीकृष्ण कोमै प्रणाम करता हूं ४२ इति श्रीजगन्नाथ शुक्ल विरचितायां मनभावनी टीकायां चतुर्थोध्यायः ४ ॥

दोहा

भारत निजसंदेह को हृदयभयो स्थित जोय ताते योग दृढ कर उठ तिहि ज्ञान खड्ग करदोय ४२॥ इतिश्रीमहाराजराणाबीरसिंह आज्ञा अनुसार जोकरी है वीरसिंहने वीररस प्रकाशनी बालबोधनी श्रीभगवद्गीताकी टीका तिसका चतुर्थ अध्याय संपूर्ण ॥ ४ ॥

210

